।। कोबातीर्थमंडन श्री महावीरस्वामिने नमः ।।

।। अनंतलब्धिनिधान श्री गौतमस्वामिने नमः ।। ।। गणधर भगवंत श्री सुधर्मास्वामिने नमः ।।

।। योगनिष्ठ आचार्य श्रीमद् बुद्धिसागरसूरीश्वरेभ्यो नमः ।। ।। चारित्रचूडामणि आचार्य श्रीमद् कैलाससागरसूरीश्वरेभ्यो नमः ।।

आचार्य श्री कैलाससागरसूरि ज्ञानमंदिर

पुनितप्रेरणा व आशीर्वाद

राष्ट्रसंत श्रुतोद्धारक आचार्यदेव श्रीमत् पद्मसागरसूरीश्वरजी म. सा.

जैन मुद्रित ग्रंथ स्केनिंग प्रकल्प

ग्रंथांक : १

श्री महावीर जैन आराधना केन्द्र

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-श्री महावीर जैन आराधना केन्द्र
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-३८२००७ (गुजरात)
(079) 23276252, 23276204
फेक्स : 23276249
Websiet : www.kobatirth.org
Email : Kendra@kobatirth.org

शहर शाखा

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
शहर शाखा
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
त्रण बंगला, टोलकनगर
परिवार डाइनिंग हॉल की गली में
पालडी, अहमदाबाद – ३८०००७
(079) 26582355

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रीमद्वाल्मीकीयरामायणम्

THE VALMIKIYARAMAYANA

श्री गोविन्दराजीय-रामानुजीय-तनिश्लोकी-महेश्वरतीर्थीयाख्याव्याख्याचतुष्टयालङ्कृतं

मुनिभावप्रकाशिका-सत्यतीर्थीयादिव्याख्योद्धृत टिप्पणी संबलितं च

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

महापुराणम्

१. ब्रह्म महापुराणम्
२. पद्म महापुराणम्
३. विष्णु महापुराणम्
४. शिव महापुराणम्
५. नारदीय महापुराणम्
६. मार्कण्डेय महापुराणम्
७. अग्नि महापुराणम्
८. भागवत महापुराणम्
९. भविष्य महापुराणम्
१०. ब्रह्मवैवर्त महापुराणम्
११. लिंग महापुराणम्
१२. वाराह महापुराणम्
१३. स्कन्द महापुराणम्
१४. वामन महापुराणम्
१५ कूर्म महापुराणम्
१६. मत्स्य महापुराणम्
१७ गरुड महापुराणम्
१८. ब्रह्माण्ड महापुराणम्
१९. वायु महापुराणम्
२०. विष्णुधर्मोत्तरपुराणम्

हरिवंश पुराणम् : देवीभागवतम्
वासुकि पुराणम् : कालिका पुराणम्
कल्किपुराणम् : एकाम्रपुराणम्
सौर पुराणम् : नरसिंह पुराणम्

[महाभारत-नीलकंठी टीका सहित]

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रीमद्वाल्मीकीयरामायणम्

THE VALMIKIYARAMAYANA

[श्री-गोविन्दराजीय-रामानुजीय-तनिश्लोकी-महेश्वरतीर्थीयाख्यव्याख्या चतुष्टयालङ्कृतं मुनिभावप्रकाशिका-सत्यतीर्थीयादिव्याख्योद्धृत टिप्पणी संवलितम् च]

चतुर्थं खण्ड :: सुन्दरकाण्डम्

AMAR PUBLICATION
VARANASI (INDIA)

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir


₹500.00

Published by:
M/s. Amar Publication
Satti Chautra Varanasi (U.P.)

Printed by :
Jain Amar Printing Press
Delhi-7

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अथ श्रीवाल्मीकिरामायणे सुन्दरकाण्डम् ॥

श्रीभूषणादिव्याख्याचतुष्टयालंकृतं मुनिभावप्रकाशिका-सत्यतीर्थीयादिव्याख्योद्धृतटिप्पणीसंवलितं च ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सुन्दरकाण्डम् ॥ ५ ॥



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रीमते रामानुजाय नमः ॥ तत्त्वज्ञानसमुच्चयो घनदयासारस्य सारो महान्निष्कर्षः कमलानिवासचरणद्वन्द्वानुरागस्मृतेः ।
अक्लेशः परिपाक एष जगतामक्षय्यपुण्यावलेरस्माकं निधिरक्षयो विजयते श्रीमान् शठारिर्गुरुः ॥ १ ॥
श्रीरामायणभूषायै प्रवृत्तो रामभक्तितः । व्याख्यां सुन्दरकाण्डस्य तिलकं कलयाम्यहम् ॥ २ ॥

उक्तं परत्वासाधारणं समस्तकल्याणगुणाकरत्वं किष्किन्धाकाण्डे । अत्र सर्वसंहर्तृत्वमुच्यते, वक्ष्यति हि तत् "ब्रह्मा स्वयंभूः" इत्यादिना । यद्वा पूर्वस्मिन् काण्डे सर्वथा मित्रसंरक्षणं कार्यमित्युक्तम् । अत्र दूतेन पतिव्रतया चैवं वर्तितव्यमित्यर्थः प्रतिपाद्यते । यद्वा पूर्वत्र सर्वरक्षणप्रवृत्तस्य विष्णोराचार्यरूपपुरुषकारलाभ उक्तः । अधुना आचार्यकृत्यमुच्यते । तत्र प्रथमे सर्गे शिक्षणीयशिष्यान्वेषणमुपपाद्यते—तत इत्यादि । ततः जाम्बवत्प्रोत्साहना

ततो रावणनीतायास्सीतायाश्शत्रुकर्शनः । इयेष पदमन्वेष्टुं चारणाचरिते पथि ॥ १ ॥

नन्तरम् । चारणाः सङ्गचारिणो देवगायकाः तैराचरिते पथि आकाशे रावणनीतायास्सीतायाः पदं स्थानमन्वेष्टुमियेष । शत्रुकर्शनः तदन्वेषणविरोधिनिरसनसमर्थः । यद्वा चारणाचरिते पथि गत्वा सीतायाः पदमन्वेष्टुमियेष । यद्वा यथापाङ्क्तमेवान्वयः । आकाशेऽपि पदन्यासान्वेषणसमर्थोऽयमिति बुद्धिचातुर्यातिशय उच्यते । अनेन शिष्यस्थानान्वेषणपरगुरुस्वरूपमुच्यते । ततः मुद्राप्रदानपूर्वकभगवदनुज्ञालाभानन्तरम् । शत्रुकर्शनः "गुशब्दस्त्वन्धकारः स्याद्रुशब्दस्तन्निरोधकः । अन्धकारनिरोधित्वाद्गुरुरित्यभिधीयते॥" इत्युक्तरीत्या अज्ञाननिवर्तनशीलो गुरुः । चारयन्ति आचारयन्ति धर्मानिति चारणाः पूर्वाचार्याः तैराचरिते पथि " महाजनो येन गतस्स पन्थाः" इत्युक्तसदाचारे, स्थित इति शेषः । रावयति असत्प्रलापान्कारयतीति रावणः अविवेकः, तेन नीतायाः स्ववशं प्रापितायाः सीतायाः अनादिभगवत्परतन्त्रचेतनस्य । सीताशब्देनायोनिजत्वोक्तेः स्त्रीलिङ्गेन पारतन्त्र्योक्तेश्च "स्त्रीप्रायमितरत्सर्वम्" इति ह्युक्तम् । पदं स्थानं संसारमण्डलमन्वेष्टुम्, सात्त्विकसंभाषणादिचिह्नं वा । तथोक्तम् "विष्णोः कटाक्षश्चाद्वेष आभिमुख्यं च सात्त्विकैः । संभाषणं षडे

श्रीमत्सुन्दरकाण्डे व्याख्येयानि व्याक्रियन्ते । पूर्वस्मिन् काण्डे " जगाम लङ्कां मनसा मनस्वी " इति मनसा गमनमुक्तम् । इदानीं कायेनापि गमनं कर्तुमैच्छदित्याह-ततो रावणनीताया इति । व इति गायत्र्याः द्वादशाक्षरं ततो रावणनीताया इत्यस्य श्लोकस्य चतुर्थाक्षरेण व इत्यनेन संगृह्णाति । अत्र गन्तुमिति पदमध्याहर्तव्यम् । शत्रुकर्शनो हनुमान् रावणनीतायाः रावणेनापहृतायाः सीतायाः पदं स्थानमन्वेष्टुं चारणाचरिते पथि सुरवर्त्मनि गन्तुमियेषेति योजना ॥ १ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तानि त्वाचार्यप्राप्तिहेतवः" इति । यद्वा पदं व्यवसायमन्वेष्टुं कस्य चेतनस्य भगवत्प्राप्तावध्यवसाय इत्यन्वेष्टुम् इयेष । " पदं व्यवसितत्राणस्थान लक्ष्माङ्घ्रिवस्तुषु " इत्यमरः । अत्रैकादशसहस्रश्लोका गताः । द्वादशसहस्रस्यादिमोऽयं श्लोकः । अत्र गायत्र्याः द्वादशमक्षरं प्रयुक्तं तदव लोकनीयं विद्वद्भिः ॥१॥ रामानु०—श्रीमत्सुन्दरकाण्डे व्याख्येयानि व्याक्रियन्ते । पूर्वस्मिन्काण्डे मनसा गमनं कृतमित्युक्तम् इदानीं कायेनापि गमनं कर्तुमिच्छन्नित्याशयेनाह—तत इत्यादि । अत्र गन्तुमिति पदमध्याहर्तव्यम् । शत्रुकर्शनो हनुमान् रावणनीतायाः सीतायाः पदं निवासस्थानम् अन्वेष्टुं चारणाचरिते पथि वर्त्मनि गन्तुमियेयेति योजना ॥ १ ॥

दुष्करं निष्प्रतिद्वन्द्वं चिकीर्षन्कर्म वानरः । समुद्यग्रशिरोग्रीवो गवां पतिरिवाऽऽबभौ ॥२॥ अथ वैडूर्यवर्णेषु शाद्वलेषु महाबलः । धीरस्सलिलकल्पेषु विचचार यथासुखम् ॥ ३ ॥ द्विजान् वित्रासयन् धीमानुरसा पादपान् हरन् । मृगांश्च सुबहून्निघ्नन् प्रवृद्ध इव केसरी ॥ ४ ॥ नीललोहितमाञ्जिष्ठपत्रवर्णैस्सितासितैः । स्वभावविहितैश्चित्रैर्धातुभिः समलंकृतम् ॥ ५ ॥ कामरूपिभिराविष्टमभीक्ष्णं सपरिच्छदैः । यक्षकिन्नरगन्धर्वैर्देवकल्पैश्च पन्नगैः ॥६॥ स तस्य गिरिवर्यस्य तले नागवरायुते । तिष्ठन् कपिवरस्तत्र ह्रदे नाग इवाबभौ ॥ ७ ॥

दुष्करमिति । निष्प्रतिद्वन्द्वं यथा भवति तथा दुष्करं चिकीर्षन् समुद्यग्रशिरोग्रीवः समुन्नतशिरोग्रीवः गवां पतिः वृषभः ॥ २ ॥ रामानु०—दुष्करमिति । निष्प्रतिद्वन्द्वं प्रतिद्वन्द्वान्निष्क्रान्तम्, प्रतिबन्धकरहितमित्यर्थः ॥ २ ॥ अथेति । शाद्वलानां सलिलकल्पत्वं वैडूर्यवर्णतया ॥३॥ रामानु०—अथेति । वैडूर्यवर्णेषु हरितत्वसंवलित शौक्ल्यविशिष्टतया वैडूर्यवर्णत्वं शाद्वलानाम्, सलिलकल्पत्वं शैत्यमार्द्रवादिना ॥ ३ ॥ द्विजानिति । केसरीव बभाविति शेषः ॥ ४ ॥ रामानु०—द्विजानिति । केसरीव विचचारेति पूर्वेणान्वयः॥ ४ ॥ नीलेति, अत्र यच्छब्दोऽध्याहार्यः । यदेवंविधं तलं तत्र तिष्ठन्नित्यन्वयः । पत्रवर्णैः पत्रश्यामैः । "पलाशो हरितो हरित्" इति हलायुधः । सिताऽसितैः कल्माषैः । स्वभावविहितैः स्वतस्सिद्धैः ॥ ५–७ ॥

दुष्करमिति । निष्प्रतिद्वन्द्वं प्रतिद्वन्द्वान्निष्क्रान्तम्, प्रतिबन्धकरहितमित्यर्थः । कर्म समुद्रलङ्घनकर्म । समुद्यग्रशिरोग्रीवः समुद्यते शिरोग्रीवे यस्य स तथोक्तः, अत एव गवां पतिः वृषभ इवाबभौ ॥ २ ॥ अथेति । वैडूर्यवर्णेषु मरकतच्छायेषु सलिलकल्पेषु तद्वत शीतलेष्वित्यर्थः ॥ ३॥ केसरीव विचचारेति पूर्वेण सम्बन्धः ॥४॥ नीलेत्यादिसार्धश्लोकमेकं वाक्यम् । अत्र यच्छब्दोऽध्याहर्तव्यः । नीलादिपत्रसमानवर्णैः । माञ्जिष्ठः पाटलः । सिताऽसितैः कल्माषवर्णैः । स्वभावविहितैः स्वभावसिद्धैः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स सूर्यायेति । स्वयंभुवे चतुर्मुखाय । भूतेभ्यः देवयोनिभ्यः ॥८॥ अञ्जलिमिति । आत्मयोनये स्वकारणभूताय । दक्षिणः समर्थः । हनुमान् प्राङ्मुखः सन् आत्मयोनये पवनाय अञ्जलिं कृत्वा ततो दक्षिणां दिशं गन्तुं ववृधे इत्यन्वयः । हिः पादपूरणे । अञ्जलिं प्राङ्मुखः कुर्वन्निति पाठरूत्वयुक्तः, शतृ प्रत्ययेन प्राङ्मुखत्वविशिष्टाञ्जलिकरणदक्षिणदिग्गमनोद्योगयोरेककालिकत्वप्रतीत्या विरोधात् । नहि प्राङ्मुखस्यैव सतो दक्षिणदिग्गमनोद्योगो

स सूर्याय महेन्द्राय पवनाय स्वयंभुवे । भूतेभ्यश्चाञ्जलिं कृत्वा चकार गमने मतिम् ॥ ८ ॥ अञ्जलिं प्राङ्मुखः कृत्वा पवनायात्मयोनये । ततोऽभिववृधे गन्तुं दक्षिणो दक्षिणां दिशम् ॥ ९॥ प्लवङ्गप्रवरैर्दृष्टः प्लवने कृतनिश्चयः । ववृधे रामवृद्ध्यर्थं समुद्र इव पर्वसु ॥ १० ॥ निष्प्रमाणशरीरस्सन् लिलङ्घयिषुरर्णवम् । बाहुभ्यां पीडयामास चरणाभ्यां च पर्वतम् ॥ ११ ॥ स चचालाचलश्चापि मुहूर्तं कपिपीडितः । तरूणां पुष्पिताग्राणां सर्वं पुष्पमशात यत् ॥ १२ ॥ तेन पादपमुक्तेन पुष्पौघेण सुगन्धिना । सर्वतः संवृतश्शैलो बभौ पुष्पमयो यथा ॥ १३ ॥ तेन चोत्तमवीर्येण पीड्यमानस्स पर्वतः । सलिलं सम्प्रसुस्राव मदं मत्त इव द्विपः ॥ १४॥

युज्यते ॥ ९ ॥ प्लवङ्गेति । रामवृद्ध्यर्थं रामप्रयोजनार्थम् ॥ १० ॥ निष्प्रमाणशरीरः निर्मर्यादशरीरः । बाहुभ्यामित्युक्तिर्वानरस्य चतुर्भिः सञ्चारात् ॥ ११॥ स चचालेति । चापीत्येकमव्ययमप्यर्थकम् । अशातयत् अगच्छत् । स्वार्थे णिच् ॥१२–१४॥ रामानु०–स चचालेति । अशातयत् अपातयदित्यर्थः । अत्राप्यचलः चित्रधातुभिस्समलंकृतम् । सपरिच्छदैः सालङ्कारैर्यक्षादिभिराविष्टं यत् तत्र तले तिष्ठन् बभौ ॥ ६–७ ॥ अथेष्टदेवताप्रार्थनापूर्वकं यात्रा समारब्धेत्याह--स सूर्यायेत्यादि ॥ ८ ॥ ९ ॥ रामवृद्ध्यर्थं रामाभ्युदयार्थम् ॥ १० ॥ ११ ॥ मुहूर्तम् अल्पकालम् । अशातयत् अपातयत ॥ १२–१४ ॥

स०–सूर्याय स्वस्य विधोपदेष्टृत्वाल्लोकदृष्ट्या । महेन्द्राय व्यवहारसिद्धये प्रकृतसीताप्रतिकृतिसंनिहितत्वात् । यथोक्तं भागवत्पादैः–" तस्यास्तु तां प्रतिकृतिं प्रविवेश शक्रः " इत्यादि । पवनाय पितृत्वात् । स्वयंभुवे सर्वगुरुत्वात्स्वस्य वरदानाद्वा । भूतेभ्यः विघ्ननिवारकेभ्यो देवेभ्यः । अञ्जलिं हस्तद्वयमेलनम् ॥ ८ ॥ वृद्ध्यर्थं स्वपितृत्वोपाधिना पुनरपि वायुं प्रणमति–**अञ्जलिमिति** । स्वयोनये स्वकारणाय । अथवा आत्मैव योनिः स्वोत्पत्तिकारणं यस्य तस्मै रामायेति वा ॥ ९ ॥ **रामवृद्ध्यर्थं** रामयशोवृद्ध्यर्थं यो ववृधे स प्लवङ्गप्रवरैर्दृष्ट इत्यन्वयः । तेन न पौनरुक्त्यम् । अथवा अरामवृद्ध्यर्थमिति छेदः । अर्थस्तु न विद्यते रामो येषां स्वपक्षीयत्वेन ते अरामाः । यद्वा अरामाः रामविरुद्धाः तेषां वृद्ध्यर्थं छेदनार्थम् । " वृधु हिंसायाम् " इति धातुव्याख्यानात् । यद्वा वृद्धिरभिवृद्धिः तस्या अर्थो निवृत्तिस्तमुद्दिश्य । " अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु " इत्यमरः ॥ १० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कर्ता ॥ १२ ॥ तेनेति । पुष्पौघेणेत्यत्र "कुमति च" इति णत्वम् । पुष्पमयो यथा पुष्पमय इव ॥ १३ ॥ पीड्यमान इति । रीतीः रेखाः काञ्चनाञ्जनरजतगर्भासु शिलासु विदीर्यमाणासु दृश्यमानास्तास्ता भेदधारा इत्यर्थः ॥ १५ ॥ मुमोचेति । समनःशिलाः धातुविशेषसहिताः । मध्यमेनार्चिषा मध्यमया

पीडयमानस्तु बलिना महेन्द्रस्तेन पर्वतः । रीतीर्निर्वर्तयामास काञ्चनाञ्जनराजतीः ॥ १५ ॥ मुमोच च शिलाश्शैलो विशालास्समनश्शिलाः । मध्यमेनार्चिषा जुष्टो धूमराजीरिवानलः ॥ १६ ॥ गिरिणा पीडयमानेन पीडयमानानि सर्वतः । गुहाविष्टानि भूतानि विनेदुर्विकृतैस्स्वरैः ॥ १७ ॥ स महासत्त्वसन्नादश्शैलपीडा निमित्तजः । पृथिवीं पूरयामास दिशश्चोपवनानि च ॥ १८ ॥ शिरोभिः पृथुभिस्सर्पा व्यक्तस्वस्तिकलक्षणैः । वमन्तः पावकं घोरं ददंशुर्दशनैश्शिलाः ॥ १९ ॥ तास्तदा सविषैर्दष्टाः कुपितैस्तैर्महाशिलाः । जज्वलुः पावकोद्दीप्ता बिभिदुश्च सहस्रधा ॥ २० ॥ यानि चौषधजालानि तस्मिन् जातानि पर्वते । विषघ्नान्यपि नागानां न शकुश्शमितुं विषम् ॥ २१ ॥ भिद्यतेऽयं गिरिर्भूतैरिति मत्वा तपस्विनः ॥ २२ ॥ त्रस्ता विद्याधरास्तस्मादुत्पेतुः स्त्रीगणैस्सह । पानभूमिगतं हित्वा हैममासवभाजनम् । पात्राणि च महार्हाणि करकांश्च हिरण्मयान् ॥ २३ ॥

ज्वालया, पार्श्वज्वाला हि न धूमनिवर्तिका ॥ १६ ॥ गिरिणेति । विकृतैः विकृतिमद्भिः, दैन्यव्यञ्जकैरित्यर्थः ॥ १७ ॥ स इति । सत्त्वसन्नादः भूतसन्नादः ॥ १८ ॥ शिरोभिरिति । स्वस्तिकं नाम फणोपरि दृश्यमानार्धचन्द्रकम् । ददंशुरिति । दंशनं कोपव्यापारः ॥ १९ ॥ ता इति । बिभिदुः भिन्नाः ॥ २० ॥ यानीति । अत्र तानीत्यध्याहार्यम् । शमितुं शमयितुम् ॥ २१ ॥ भिद्यत इत्यर्धमेकम् । उत्पेतुरित्यनुषज्यते ॥ २२ ॥ त्रस्ता इत्यादिसार्धश्लोकद्वय

महेन्द्रः काञ्चनाञ्जनराजतीः काञ्चनाञ्जनरजतमयीः । रीतीः पद्धतीः, धारा इत्यर्थः । निर्वर्तयामास प्रादुर्भावयामासेत्यर्थः ॥ १५ ॥ समनश्शिलाः धातुविशेष सहिताः । मध्यमेनार्चिषा जुष्टः, कालीकरालीविष्फुलिङ्गिनीधूम्रवर्णाविश्वरुचिलोहितामनोजवाभिधानासु सप्तस्वग्निजिह्वासु मध्यमया धूम्राख्यया विशिष्टः अग्निः धूमराजीरिव धूमनिचयानिव शैलः पर्वतः शिला मुमोचेति सम्बन्धः ॥ १६ ॥ १७ ॥ स इति । महासत्त्वाः महाजन्तवः तेषां सन्नादः ॥ १८ ॥ शिरोभिरुप लक्षिताः । स्वस्तिकः फणस्थो नीलरेखाविशेषः ॥ १९ ॥ २० ॥ यानीति । शमितुं शमयितुम् ॥ २१ ॥ भूतैः पृथिव्यादिभिस्सह ॥ २२ ॥ २३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मेकान्वयम् । आसवभाजनं मद्यपात्रम् । पात्राणि भोजनपात्राणि । आर्षभाणि चर्माणि ऋषभचर्मापिनद्धानि खेटकानि । त्सरुः मुष्टिबन्धनम् ॥ २३ ॥ ॥ २४ ॥ कृतेति । कृतकण्ठगुणाः कृतकण्ठस्रजः । क्षीबाः मत्ताः । रक्ताक्षाः मधुपानात् । पुष्कराक्षाः स्वभावत इत्यर्थः ॥ २५ ॥ हारेति । पारिहार्य वलयम् । तस्थुः तस्थुश्च ॥ २६ ॥ दर्शयन्तः प्रयोजयन्तः । महाविद्याम् अणिमाद्यष्टमहासिद्धिम् । विद्याधरमहर्षयः विद्याधराः महर्षय इवेत्युपमित

लेह्यानुच्चावचान् भक्ष्यान् मांसानि विविधानि च । आर्षभाणि च चर्माणि खड्गांश्च कनकत्सरून् ॥२४॥ कृतकण्ठ गुणाः क्षीबा रक्तमाल्यानुलेपनाः । रक्ताक्षाः पुष्कराक्षाश्च गगनं प्रतिपेदिरे ॥ २५ ॥ हारनूपुरकेयूरपारिहार्यधराः स्त्रियः । विस्मितास्मस्मितास्तस्थुराकाशे रमणैस्सह ॥२६॥ दर्शयन्तो महाविद्यां विद्याधरमहर्षयः । सहितास्तस्थु राकाशे वीक्षांचक्रुश्च पर्वतम् ॥ २७ ॥ शुश्रुवुश्च तदा शब्दमृषीणां भावितात्मनाम् । चारणानां च सिद्धानां स्थितानां विमलेऽम्बरे ॥२८॥ एष पर्वतसङ्काशो हनूमान् मारुतात्मजः । तितीर्षति महावेगस्समुद्रं मकरालयम् ॥ २९ ॥ रामार्थं वानरार्थं च चिकीर्षन् कर्म दुष्करम् । समुद्रस्य परं पारं दुष्प्रापं प्राप्तुमिच्छति ॥ ३० ॥

समासः । " उपमितं व्याघ्रादिभिः सामान्याप्रयोगे " इत्यनुशासनात् । विद्याधरश्रेष्ठा इत्यर्थः । विद्याधरा महर्षयश्चेति द्वन्द्वसमासो न युक्तः, इति विद्याधराः श्रुत्वेत्युपरितनश्लोके विद्याधराणामेवोपादानात् ॥ २७ ॥ शुश्रुवुरिति । सा पुनरत्राकाशास्थितिः । शुश्रुवुः, विद्याधरा इति शेषः । इति विद्याधराः श्रुत्वेत्युपसंहारात् ॥ २८ ॥ २९ ॥ रामानु०-एष इति । तितीर्षति महावेगमिति पाठे क्रियाविशेषणम् ॥ २९ ॥ समुद्रं तितीर्षतीत्युक्तम् । तस्य प्रयोजन कथनायोक्तमनुवदति-रामार्थमिति ॥ ३०-३२ ॥

आर्षभाणि ऋषभचर्मापिनद्धानि । चर्माणि फलकानि । कनकत्सरून् सुवर्णखड्गमुष्टीन् ॥ २४ ॥ कण्ठगुणाः कण्ठस्रजः । क्षीबा मत्ताः ॥ २५ ॥ हारेति । पारिहार्यः वलयः " आवापकः पारिहार्यः कटकं वलयोऽस्त्रियाम् " इत्यमरः ॥ २६ ॥ विद्याधरमहर्षयः विद्याधरश्रेष्ठा इत्यर्थः । महाविद्याम् अणिमादिसिद्धिम् ॥ २७ ॥ शब्दं वाक्यम् ॥ २८ ॥ तमेवाह-एष इत्यादि ॥ २९ ॥ रामार्थमिति । वानरार्थं तेषां रामकार्ये तथाभिमानात् ॥ ३०-३२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

आनुपूर्व्येणेति । आनुपूर्व्येण वृत्तं क्रमेण वृत्तम् ॥ ३३ ॥ ३४ ॥ लङ्घनोद्योगकालिकावस्थां वर्णयति–बाहू इत्यादिना । बाहू संस्तम्भयामास निश्चली चकार । कटयां ससाद शरीरं संचुकोचेत्यर्थः । चरणौ संचुकोच च ॥ ३५ ॥ रामानु०–बाहू इति । संस्तम्भयामास पर्वतोपरि दृढविन्यासेन निष्पन्दीचकार ।

इति विद्याधराः श्रुत्वा वचस्तेषां महात्मनाम् । तमप्रमेयं ददृशुः पर्वते वानरर्षभम् ॥ ३१ ॥ दुधुवे च स रोमाणि चकम्पे चाचलोपमः । ननाद सुमहानादं सुमहानिव तोयदः ॥ ३२ ॥ आनुपूर्व्येण वृत्तं च लाङ्गूलं रोमभिश्चितम् । उत्पतिष्यन् विचिक्षेप पक्षिराज इवोरगम् ॥ ३३ ॥ तस्य लाङ्गूलमाविद्धमात्तवेगस्य पृष्ठतः । ददृशे गरुडेनेव ह्रियमाणो महोरगः ॥ ३४ ॥ बाहू संस्तम्भयामास महापरिघसन्निभौ । ससाद च कपिः कट्यां चरणौ संचुकोच च ॥ ३५ ॥ संहृत्य च भुजौ श्रीमान् तथैव च शिरोधराम् । तेजस्सत्त्वं तथा वीर्यमाविवेश स वीर्यवान् ॥ ३६ ॥ मार्गमालोकयन् दूरादूर्ध्वं प्रणिहितेक्षणः । रुरोध हृदये प्राणानाकाशमवलोकयन् ॥ ३७ ॥ पद्भ्यां दृढमवस्थानं कृत्वा स कपिकुञ्जरः । निकुञ्च्य कर्णौ हनुमानुत्पतिष्यन् महाबलः । वानरान् वानरश्रेष्ठ इदं वचनमब्रवीत् ॥ ३८ ॥ यथा राघवनिर्मुक्तश्शरः श्वसनविक्रमः । गच्छेत्तद्वद्गमिष्यामि लङ्कां रावणपालिताम् ॥ ३९ ॥

कट्यां ससाद कटिप्रदेशे कृशो बभूव, चरणौ संचुकोच संकोचयामास च ॥ ३५ ॥ संहृत्येति । संहृत्य संकोच्य ॥ ३६ ॥ रामानु०–संहृत्येति । वीर्यवान् वीर्यमाविवेशेत्यभिधानात् पूर्वं विद्यमानमेव वीर्यं विशेषतोऽधिष्ठितवानित्यवगम्यते । तेजःसत्त्वयोरप्येवं द्रष्टव्यम् । तेजः पराभिभवनसामर्थ्यम् । सत्त्वं बलम् । वीर्यम् आकाशाद्यभिनिष्क्रमणसामर्थ्यम् ॥ ३६ ॥ मार्गमिति । प्राणान् उच्छ्वासरूपान् । प्राणनिरोधो व्योमोत्पतनार्थम् ॥ ३७–३९ ॥ रामानु०–यथेति । राघवशरदृष्टान्तेन स्वस्याविलम्बितत्वाप्रतिहतत्वामोघत्वादिकं

आनुपूर्व्यात् वृत्तं लाङ्गूलं विचिक्षेपेत्यन्वयः ॥ ३३ ॥ आविद्धं भ्रमम् ॥ ३४ ॥ बाहू संस्तम्भयामास पर्वतोपरि दृढविन्यासेन निष्पन्दीचकार । ससाद च कपिः कट्याम् इति कायप्रसारणात् कटिप्रदेशे कृशोऽभूदित्यर्थः । चरणौ संचुकोच सङ्कोचयामास ॥३५॥ तेजः पराभिभवने सामर्थ्यम् । सत्त्वं बलम् ॥ ३६–४० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सूचितवान् ॥ ३९ ॥ नहीति । हिशब्दः पादपूरणे ॥ ४० ॥ यदीति । अकृतश्रमः अप्राप्तश्रमः । राक्षसराजानमित्यत्र टजभाव आर्षः । आनयिष्यामि आनेष्यामि ॥ ४१–४४ ॥ समुत्पततीति । तस्मिन् हनुमति वेगात्समुत्पतति सति । नगरोहिणः शैलरुहा वृक्षाः विटपान् संहृत्य आदाय, समुत्पेतु

नहि द्रक्ष्यामि यदि तां लङ्कायां जनकात्मजाम् । अनेनैव हि वेगेन गमिष्यामि सुरालयम् ॥४०॥ यदि वा त्रिदिवे सीतां न द्रक्ष्याम्यकृतश्रमः । बद्ध्वा राक्षसराजानमानयिष्यामि रावणम् ॥ ४१ ॥ सर्वथा कृतकार्योऽहमेष्यामि सह सीतया । आनयिष्यामि वा लङ्कां समुत्पाट्य सरावणाम् ॥ ४२ ॥ एवमुक्त्वा तु हनुमान् वानरान् वानरोत्तमः ॥ ४३ ॥ उत्पपाताथ वेगेन वेगवानविचारयन् । सुपर्णमिव चात्मानं मेने स कपिकुञ्जरः ॥ ४४ ॥ समुत्पतति तस्मिंस्तु वेगात्ते नगरोहिणः । संहृत्य विटपान् सर्वान् समुत्पेतुस्समन्ततः ॥ ४५ ॥ स मत्तकोयष्टिभकान् पादपान् पुष्पशालिनः । उद्वहन्नूरुवेगेन जगाम विमलेऽम्बरे ॥ ४६ ॥ ऊरुवेगोद्धता वृक्षा मुहूर्तं कपिमन्वयुः । प्रास्थितं दीर्घमध्वानं स्वबन्धुमिव बान्धवाः ॥ ४७ ॥ तमूरुवेगोन्मथितास्साला श्चान्ये नगोत्तमाः । अनुजग्मुर्हनूमन्तं सैन्या इव महीपतिम् ॥ ४८ ॥ सुपुष्पिताग्रैर्बहुभिः पादपैरन्वितः कपिः । हनुमान् पर्वताकारो बभूवाद्भुतदर्शनः ॥ ४९ ॥ सारवन्तोऽथ ये वृक्षा न्यमज्जन् लवणाम्भसि । भयादिव महेन्द्रस्य पर्वता वरुणालये ॥ ५० ॥ स नानाकुसुमैः कीर्णः कपिस्साङ्कुरकोरकैः । शुशुभे मेघसङ्काशः खद्योतैरिव पर्वतः ॥ ५१ ॥

रित्यर्थः ॥ ४५ ॥ संग्रहेणोक्तं विवृणोति–स मत्तेत्यादिना । कोयष्टिभकः कोयष्टिः ॥ ४६ ॥ ४७ ॥ तमिति । तमूरुवेगेति पाठः । ऊरुवेगेन उन्मथिताः सालाः सालवृक्षाः । अन्ये नगोत्तमाः अन्ये वृक्षश्रेष्ठाः । सैन्याः सेनायां समवेताः पुरुषाः । "सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते" इत्यमरः ॥४८॥४९॥ सारवन्तः स्थिरांशवन्तः । "सारो बले स्थिरांशे च" इत्यमरः ॥५०॥ स नानाकुसुमैरिति । मेघसङ्काशः स कपिरित्यन्वयः । खद्योतैः

आनयिष्यामि आनेष्यामि ॥ ४१–४४ ॥ समुत्पतति हनूमति समुद्गच्छति सति नगरोहिणः पर्वतस्थवृक्षाः विटपान् संहृत्य संक्षिप्य, वेगात् समुत्पेतुरित्यर्थः ॥ ४५–४९ ॥ सारवन्तः गुरुत्वातिशययुक्ताः ॥ ५० ॥ ५१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रात्राविति शेषः ॥ ५१ ॥ विमुक्ता इति । अवशीर्यन्त अवाशीर्यन्त । आगमशासनस्यानित्यत्वादडभावः । स्थितवन्त इत्यर्थः । निवृत्ताः बन्धूननुगम्य निवृत्ताः । सुहृत्पक्षे सलिल इति सामीप्ये सप्तमी । " उदकान्तात् स्निग्धो बन्धुमनुव्रजेत् " इत्युक्तेः ॥ ५२ ॥ रामानु०–विमुक्ता इति । तस्य वेगेन विमुक्ताः दूरगमनहेतुभूतवेगेन हेतुना विमुक्ताः गतसंबन्धाः अवशीर्यन्त । आगमशासनस्यानित्यत्वादडभावः । पुष्पाणि मुक्त्वा सलिले अवशीर्यन्तेत्यनेन प्रास्थितेभ्यः सहृद्भ्यो निवृत्तानामश्रुमोक्षण पूर्वकं शोकसागरे निमग्नानां सुहृदां समाधिर्धन्यते ॥ ५२ ॥ लघुत्वेनोपपन्नं लघुत्वेन युक्तम् ॥ ५३ ॥ रामानु०–हनुमन्तमनुद्रुताः सारवन्तो वृक्षाः प्रथमं सागरे पतिताः अल्प

विमुक्तास्तस्य वेगेन मुक्ता पुष्पाणि ते द्रुमाः । अवशीर्यन्त सलिले निवृत्ताः सुहृदो यथा ॥ ५२ ॥ लघुत्वेनोप पन्नं तद्विचित्रं सागरेऽपतत् । द्रुमाणां विविधं पुष्पं कपिवायुसमीरितम् ॥ ५३ ॥ ताराचितमिवाकाशं प्रबभौ स महार्णवः ॥ ५४ ॥ पुष्पौघेणानुबद्धेन नानावर्णेन वानरः । बभौ मेघ इवाकाशे विद्युद्गणविभूषितः ॥ ५५ ॥ तस्य वेगसमाधूतैः पुष्पैस्तोयमदृश्यत । ताराभिरभिरामाभिरुदिताभिरिवाम्बरम् ॥ ५६ ॥ तस्याम्बरगतौ बाहू ददृशाते प्रसारितौ । पर्वताग्राद्विनिष्क्रान्तौ पञ्चास्याविव पन्नगौ ॥ ५७ ॥ पिबन्निव बभौ चापि सोर्मिजालं महा र्णवम् । पिपासुरिव चाकाशं ददृशे स महाकपिः ॥ ५८ ॥ तस्य विद्युत्प्रभाकारे वायुमार्गानुसारिणः । नयने विप्रकाशेते पर्वतस्थाविवानलौ ॥ ५९ ॥

सारास्ततोऽप्यधिकं गत्वा जले विशीर्णा इत्युक्त्वा पुष्पाण्यप्यतिलघुत्ववत्तया महदूरं गत्वा पतितानीत्याह लघुत्वेनेति ॥ ५३ ॥ तारेत्यर्धमेकं वाक्यम् । ताराचितमिव आकाशं प्रबभौ स महार्णवः ॥ ५४ ॥ पुष्पौघेणेति । अनुबद्धेन व्याप्तेन ॥ ५५–५७ ॥ रामानु०–तस्येति । बाह्वोः पञ्चशाखत्वात् पञ्चास्यपन्नगदृष्टान्तः ॥ ५७ ॥ पिबन्नि वेति । अर्णवं पिबन्निव आकाशं पिपासुरिवेत्याभ्यामस्य महानुद्योगस्सूच्यते । लङ्कनवेगेन सहसा क्षीयमाणे सागरविस्तारे स पीयमान इव भवति एव मम्बरं च । ततोऽतिवेगेन गच्छन् स महार्णवं पिबन्निव बभौ तथा आकाशमपीत्याहुः ॥ ५८ ॥ रामानु०–पिबन्निवेति । सागरप्रत्यासन्नप्रदेशगमनवेलायां महोदधि तस्य हनूमतो वेगेन विमुक्ताः द्रुमाः पुष्पाणि मुक्त्वा सलिले अवशीर्यन्त । अडभाव आर्षः । सुहृदो यथेति । बन्धुप्रस्थापनार्थं गताः सुहृदो बन्धून् प्रस्थाप्य यथा निवर्तन्ते तथा द्रुमा निवृत्ता इत्यर्थः ॥ ५२–५७ ॥ पिबन्निवेति । अर्णवसमीपगमनवेलायामुदधिं पिबन्निव बभौ, उपरि गमनावस्थायाम् आकाशं पिपासुरिव

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पिबन्निव बभौ, तदुपरि गमनावस्थायामाकाशं पिपासुरिव दृष्टः ॥ ५८ ॥ ५९ ॥ पिङ्गे पिङ्गलवर्णे । पिङ्गाक्षाणां वानराणां मुख्यस्य । परिमण्डले मण्डलाकारे । चन्द्रसूर्याविवेत्यभूतोपमा ॥ ६० ॥ मुखमिति । तत्सूर्यमण्डलं सन्ध्यासूर्यमण्डलम् ॥६१॥ लाङ्गूलमिति । समाविद्धम् उन्नतीकृतम् ॥ ६२ ॥ ६३ ॥

पिङ्गे पिङ्गाक्षमुख्यस्य बृहती परिमण्डले । चक्षुषी संप्रकाशेते चन्द्रसूर्याविवोदितौ ॥ ६० ॥ मुखं नासिकया तस्य ताम्रया ताम्रमाबभौ । सन्ध्यया समभिस्पृष्टं यथा तत्सूर्यमण्डलम् ॥ ६१ ॥ लाङ्गूलं च समाविद्धं प्लवमानस्य शोभते । अम्बरे वायुपुत्रस्य शक्रध्वज इवोच्छ्रितः ॥६२॥ लाङ्गूलचक्रेण महान् शुक्रुदंष्ट्रोऽनिलात्मजः । व्यरोचत महाप्राज्ञः परिवेषीव भास्करः ॥ ६३ ॥ स्फिग्देशेनाभिताम्रेण रराज स महाकपिः । महता दारितेनेव गिरि र्गैरिकधातुना ॥ ६४ ॥ तस्य वानरसिंहस्य प्लवमानस्य सागरम् । कक्षान्तरगतो वायुर्जीमूत इव गर्जति ॥ ६५ ॥ खे यथा निपतन्त्युल्का ह्युत्तरान्ताद्विनिःसृता । दृश्यते सानुबन्धा च तथा स कपिकुञ्जरः ॥ ६६ ॥ पतत्पतङ्गसङ्काशो व्यायतः शुशुभे कपिः । प्रवृद्ध इव मातङ्गः कक्ष्यया बध्यमानया ॥ ६७ ॥ उपरिष्टाच्छरीरेण च्छायया चावगाढया । सागरे मारुताविष्टा नौरिवासीत्तदा कपिः ॥ ६८ ॥

स्फिग्देशेन वालमूलप्रदेशेन ॥ ६४ ॥ गर्जति अगर्जत् ॥ ६५ ॥ खे यथेति । सानुबन्धा, सपुच्छा उल्का हि पुच्छयुक्ता निपतति ॥ ६६ ॥ रामानु०-खे यथेति । उल्कापातोपमया रावणस्य भाव्यशुभं सूच्यते ॥ ६६ ॥ पतदिति । पतङ्गः सूर्यः । व्यायतो दीर्घः । प्रवृद्ध इव दीर्घ इव, कक्ष्यायां बध्यमानायां हि मातङ्गो दीर्घो भवति ॥ ६७ ॥ रामानु०-पतदिति । पतत्पतङ्गसंकाशः गच्छत्सूर्यसदृशः व्यायतः कपिः बध्यमानया कक्ष्यया प्रवृद्धः दीर्घभूतो मातङ्ग इव शुशुभ इति योजना । कक्ष्या इभमध्यबन्धनम् । " कक्ष्या प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने । " इत्यमरः॥ ६७ ॥ उपरिष्टादिति । नौर्जलावगाढेनाधोभागेन व्योमावगाढेन चोर्ध्वं दृष्टः ॥ ५८ ॥ ५९ ॥ परिमण्डले वर्तुलाकारे ॥ ६०-६३ ॥ स्फिग्देशेन वालमूलप्रदेशेन ॥ ६४ ॥ गर्जति जगर्ज ॥ ६५ ॥ सानुबन्धा सूक्ष्मोल्कासहिता ॥ ६६ ॥ पतत्पतङ्गसङ्काशः गच्छत्सूर्यसदृशः । व्यायतः दीर्घाकारः । कपिः बध्यमानया कक्ष्यया गजमध्यबन्धनरज्ज्वा । प्रवृद्धः दीर्घीभूतो मातङ्ग इव शुशुभ इति योजना ॥ ६७ ॥ उपरिष्टात्स्थितशरीरेणावगाढया सागरान्तःप्रविष्टया छायया प्रतिबिम्बेन चैकाकारस्सन् सागरान्तर्मग्नमूला बहिष्ठोर्ध्वभागा मारुताविष्टा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भागेन गच्छति । अयं च उपरिगतशरीरेणाधोजलावगाढच्छायया चैकाकारस्सन् मारुतपूरितकटा नौरिवासीत् ॥ ६८ ॥ यं यमिति । सोन्माद इव समुद्धर्ष इव, समुद्धतजल इत्यर्थः ॥ ६९ ॥ रामानु०—यमिति । समुद्रः सोन्माद इव अपस्मारीव लक्ष्यते, भ्रमणफेनजलोद्गमनक्रोशनादिमत्त्वादियमुपमा ॥ ६९ ॥ सागरस्येति ।

यं यं देशं समुद्रस्य जगाम स महाकपिः । स स तस्योरुवेगेन सोन्माद इव लक्ष्यते ॥६९॥ सागरस्योर्मिजालाना मुरसा शैलवर्ष्मणाम् । अभिघ्नंस्तु महावेगः पुप्लुवे स महाकपिः ॥ ७० ॥ कपिवातश्च बलवान् मेघवातश्च निःसृतः । सागरं भीमनिर्घोषं कम्पयामासतुर्भृशम् ॥७१॥ विकर्षन्नूर्मिजालानि बृहन्ति लवणाम्भसि । पुप्लुवे कपि शार्दूलो विकिरन्निव रोदसी ॥ ७२ ॥ मेरुमन्दरसङ्काशानुद्धतान् स महार्णवे । अतिक्रामन्महावेगस्तरङ्गान् गणय न्निव ॥ ७३ ॥ तस्य वेगसमुद्धूतं जलं सजलदं तदा । अम्बरस्थं विबभ्राज शारदाभ्रमिवाततम् ॥ ७४ ॥ तिमिनक्र झषाः कूर्मा दृश्यन्ते विवृतास्तदा । वस्त्रापकर्षणेनेव शरीराणि शरीरिणाम् ॥ ७५ ॥ प्लवमानं समीक्ष्याथ भुजङ्गाः सागरालयाः । व्योम्नि तं कपिशार्दूलं सुपर्ण इति मेनिरे ॥ ७६ ॥

शैलवर्ष्मणां शैलतुल्यानाम् । " वर्ष्म देहप्रमाणयोः " इति सज्जनः ॥ ७० ॥ रामानु०—सागरस्येति । ऊर्मिजालानामित्यत्र " न लोकाव्यय०—" इति षष्ठ्या निषेधेपि ऋषिप्रयोगात् साधुत्वम् । उरसा उरश्शब्देन उरोवेगजनितो वायुर्लक्ष्यते ॥ ७० ॥ ७१ ॥ विकिरन्निव विभजन्निव । रोदसी द्यावापृथिव्यौ ॥ ७२ ॥ मेर्विति । अतिक्रामत् अत्यक्रामत् ॥ ७३ ॥ तस्येति । तस्य हनुमतः । वेगेन ऊरुवातेन । समुद्धूतं समुत्थापितम् । सजलदं जलं जलदो जलं चोद्धूतमित्यर्थः ॥ ७४ ॥ रामानु०—तस्येति । तस्य वेगसमुद्धूतमिति पाठः । जलं सजलदमित्यनेन समुद्धूतं जलं मेघमण्डलपर्यन्तमभूदित्यवगम्यते ॥ ७४ ॥ तिमीति । तिमयो महामत्स्याः, नक्राः ग्राहाः,

वायुप्रेरिता नौरिवासीदिति योजना ॥ ६८ ॥ सोन्माद इव समुद्रः अपस्मारीव लक्ष्यते, भ्रमणफेनजलोद्गमनघोषादिमत्त्वादियमुपमा ॥ ६९ ॥ शैलवर्ष्मणा शैल सदृशेन । उरश्शब्देन उरोवेगतो जनितवायुर्लक्ष्यते ॥ ७० ॥ ७१ ॥ विकर्षन्निव रोदसी द्यावापृथिव्यौ ऊर्मिजालानि विकिरन् विक्षिपन्निव पुप्लुव इति सम्बन्धः ॥ ७२ ॥ ७३ ॥ वेगसमुद्धुष्टं वेगेनोत्कीर्णम् अत एवाम्बरस्थम् अत एव सजलदं जलदसहचरं जलं शारदाभ्रमिव स्वयं च जलदविशेषवत् विबभ्राजेत्यर्थः । वेगसमुद्धूतमित्यपि पाठः ॥ ७४ ॥ शरीराणि अवयवाः ॥ ७५--७७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

झषाः मकराः । विवृताः जलविभेदेन प्रकाशिताः ॥ ७५ ॥ ७६ ॥ दशयोजनविस्तीर्णेति । ननु त्रिंशद्योजनायतत्वे चतुर्थपदेपि लङ्काप्राप्तिः स्यात् मैनाकसंवादसुरसासंवादादिकं च विरुद्धयेत । नहि बिम्बादधिकपरिमाणत्वं प्रतिबिम्बस्य संभवतीति न शङ्कनीयम्, छायाशब्दो हि नात्र प्रतिबिम्बपरः किन्त्वनातपपरः । प्रातरेव हि समुद्रतरणमुक्तम्, तदा तस्य छाया समुद्रे तथाप्रमाणा दृश्येतैव ॥ ७७ ॥ श्वेताभ्रेति । अभ्रघनः अभ्र

दशयोजनविस्तीर्णा त्रिंशद्योजनमायता । छाया वानरसिंहस्य जले चारुतराऽभवत् ॥ ७७ ॥ श्वेताभ्रघनराजीव वायुपुत्रानुगामिनी । तस्य सा शुशुभे छाया वितता लवणाम्भसि ॥७८॥ शुशुभे स महातेजा महाकायो महाकपिः । वायुमार्गे निरालम्बे पक्षवानिव पर्वतः ॥ ७९ ॥ येनासौ याति बलवान् वेगेन कपिकुञ्जरः । तेन मार्गेण सहसा द्रोणीकृत इवार्णवः ॥ ८० ॥ आपाते पक्षिसङ्घानां पक्षिराज इव व्रजन् । हनुमान् मेघजालानि प्रकर्षन् मारुतो यथा ॥ ८१ ॥ पाण्डुरारुणवर्णानि नीलमाञ्जिष्ठकानि च । कपिनाऽऽकृष्यमाणानि महाभ्राणि चकाशिरे ॥ ८२ ॥ प्रविशन्नभ्रजालानि निष्पतंश्च पुनः पुनः । प्रच्छन्नश्च प्रकाशश्च चन्द्रमा इव लक्ष्यते ॥ ८३ ॥ प्लवमानं तु तं दृष्ट्वा प्लवङ्गं त्वरितं तदा । ववर्षुः पुष्पवर्षाणि देवगन्धर्वदानवाः ॥ ८४ ॥ तताप न हि तं सूर्यः प्लवन्तं वानरोत्तमम् । सिषेवे च तदा वायू रामकार्यार्थसिद्धये ॥ ८५ ॥ ऋषयस्तुष्टुवुश्चैनं प्लवमानं विहायसा । जगुश्च देवगन्धर्वाः प्रशंसन्तो महौजसम् ॥ ८६ ॥

मूर्तिः ॥७८॥ रामानु०—श्वेतेति । श्वेताभ्रघनराजीव । अत्र श्वेतशब्देन स्वच्छतोच्यते, घनशब्देन सान्द्रता । "घनं निरन्तरं सान्द्रम्" इत्यमरः । निर्मलाभ्रसान्द्रपंक्तिरिवेत्यर्थः॥७८॥७९॥ येनेति । द्रोणी कटाहः ॥ ८० ॥ आपात इति । आपाते मार्गे ॥ ८१–८४ ॥ तताप इति । रामकार्यं सीतान्वेषणम् तदेवार्थः प्रयोजनं तस्य सिद्धये लाभाय, तद्धेतुभूतहनुमच्छ्रमनिवर्तनायेत्यर्थः ॥ ८५ ॥ रामानु०—तताप इति । सिषेवे इत्यनेन पुत्रत्वेपि रामकार्यप्रवृत्तत्वात् पूज्यतैव द्योत्यते ॥ ८५ ॥ ८६ ॥

श्वेतेति । श्वेताभ्रघनराजीव, अत्र श्वेतशब्देन स्वच्छतोच्यते, घनशब्देन सान्द्रता, तथाच निर्मलाभ्रसान्द्रपङ्क्तिरित्यर्थः ॥ ७८–८० ॥ आपात इति । आपतन्ति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नागा इति । रक्षांसि दिक्पालकरक्षस्सम्बन्धीनि ॥ ८७ ॥ तस्मिन्निति । मानार्थौ बहुमानार्थौ । स्वयं सागरत्वादिति भावः ॥ ८८ ॥ साहाय्यमिति । सर्ववाच्यः सर्वप्रकारेण निन्द्यः । विवक्षतां वक्तुमिच्छताम् ॥ ८९–९१ ॥ रामानु०–साहाय्यमिति । विवक्षतां वक्तुमिच्छताम्, वागिन्द्रियवतामित्यर्थः ।

नागाश्च तुष्टुवुर्यक्षा रक्षांसि विबुधाः खगाः । प्रेक्ष्य सर्वे कपिवरं सहसा विगतक्लमम् ॥ ८७ ॥ तस्मिन् प्लवगशार्दूले प्लवमाने हनूमति । इक्ष्वाकुकुलमानार्थी चिन्तयामास सागरः ॥ ८८ ॥ साहाय्यं वानरेन्द्रस्य यदि नाहं हनूमतः । करिष्यामि भविष्यामि सर्ववाच्यो विवक्षताम् ॥ ८९ ॥ अहमिक्ष्वाकुनाथेन सगरेण विवर्द्धितः । इक्ष्वाकुसचिवश्चायं नावसीदितुमर्हति ॥ ९० ॥ तथा मया विधातव्यं विश्रमेत यथा कपिः । शेषं च मयि विश्रान्तस्सुखेनातिपतिष्यति ॥ ९१ ॥ इति कृत्वा मतिं साध्वीं समुद्रश्छन्नमम्भसि । हिरण्यनाभं मैनाकमुवाच गिरिसत्तमम् ॥ ९२ ॥ त्वमिहा सुरसङ्घानां पातालतलवासिनाम् । देवराज्ञा गिरिश्रेष्ठ परिघः सन्निवेशितः ॥ ९३ ॥ त्वमेषां जातवीर्याणां पुनरेवो त्पतिष्यताम् । पातालस्याप्रमेयस्य द्वारमावृत्य तिष्ठसि ॥ ९४ ॥ तिर्यगूर्ध्वमधश्चैव शक्तिस्ते शैल वर्द्धितुम् । तस्मात्संचोदयामि त्वामुत्तिष्ठ गिरिसत्तम ॥ ९५ ॥

सर्ववाच्यो भविष्यामि सर्वनिन्दावाग्विषयो भविष्यामीत्यर्थः ॥ ८९ ॥ अहमिति । नावसीदितुमर्हतीति पाठः ॥ ९० ॥ शेषं मार्गशेषम् ॥९१॥ इतीति । हिरण्यनाभं हिरण्यशृङ्गम् नाभिशब्दो ह्यध्यक्षवाची, शृङ्गं च पर्वतस्याध्यक्षमेव । " नाभिरध्यक्षकस्तूर्योः " इति दर्पणः ॥ ९२ ॥ त्वमिति । परिघः अर्गलम् । " परिघो मुद्गरे ऽर्गले " इति दर्पणः ॥ ९३ ॥ परिघत्वमेवाह–त्वमेषामिति ॥ ९४ ॥ तिर्यगिति । शक्तिः अस्तीति शेषः ॥ ९५ ॥ ९६ ॥

सञ्चरन्त्यस्मिन्नित्यापातो मार्गः ॥ ८१–८७ ॥ तस्मिन्निति । सागरः सगरसम्बन्धी अत एव इक्ष्वाकुकुलमानार्थी पूजार्थी ॥ ८८ ॥ चिन्ताप्रकारमेवाह–साहाय्यमिति । विवक्षतां वक्तुमिच्छताम्, वागिन्द्रियवतामित्यर्थः । सर्ववाच्यः सर्वनिन्दावाग्विषयो भविष्यामीत्यर्थः ॥ ८९ ॥ ९० ॥ शेषं मार्गशेषम् ॥९१॥ हिरण्यनाभं हिरण्यप्रधानम्, हिरण्मयमित्यर्थः । "नाभिः प्रधाने कस्तूर्याम्" इति विश्वः ॥ ९२ ॥ परिघस्सन्निवेशितः आयुधविशेषत्वेन सन्निवेशितः, अनेन पक्षच्छेदभयात् समुद्रप्रवेशानन्तरं पातालस्थराक्षसनिरोधार्थं देवराजेन मैनाकः स्थापित इत्यवगम्यते ॥ ९३ ॥ ९४ ॥ तिर्यगिति । वर्द्धितुं, शक्तिरस्तीति शेषः ॥ ९५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अस्येति । इक्ष्वाकोः कुले वंशे वर्तते शुश्रूषत इति इक्ष्वाकुकुलवर्त्ती तस्य पूज्यतमास्तव मत्सम्बन्धादिति भावः । यद्वा त्वदुपकारकवायुपुत्रमुद्दिश्य ॥ ९७ ॥ रामानु०—अस्येति । साहाय्यं सहायकर्म, सहकारित्वमिति यावत् । ब्राह्मणादित्वात् ष्यञ् । मम इक्ष्वाकवः पूज्या हि मद्वृद्धिहेतुत्वात् । तव परं पूज्यतमाः सगरविवृद्धमदन्तः

स एष कपिशार्दूलस्त्वामुपर्येति वीर्यवान् । हनूमान् रामकार्यार्थी भीमकर्मा खमाप्लुतः ॥९६॥ अस्य साह्यं मया कार्यमिक्ष्वाकुकुलवर्तिनः । मम ह्येक्ष्वाकवः पूज्याः परं पूज्यतमास्तव ॥ ९७॥ कुरु साचिव्यमस्माकं न नः कार्यमतिक्रमेत् । कर्तव्यमकृतं कार्यं सतां मन्युमुदीरयेत् ॥९८॥ सलिलादूर्ध्वमुत्तिष्ठ तिष्ठत्वेष कपिस्त्वयि । अस्माकमतिथिश्चैव पूज्यश्च प्लवतां वरः॥९९॥ चामीकरमहानाभ देवगन्धर्वसेवित । हनुमांस्त्वयि विश्रान्तस्ततश्शेषं गमिष्यति ॥ [स एष कपिशार्दूलस्त्वामुपर्येति वीर्यवान्] ॥ १०० ॥ काकुत्स्थस्यानृशंस्यं च मैथिल्याश्च विवासनम् । श्रमं च प्लवगेन्द्रस्य समीक्ष्योत्थातुमर्हसि ॥ १०१ ॥ हिरण्यनाभो मैनाको निशम्य लवणाम्भसः । उत्पपात जलात्तूर्णं महाद्रुमलतायुतः ॥ १०२ ॥ स सागरजलं भित्त्वा बभूवाभ्युत्थितस्तदा । यथा जलधरं भित्त्वा दीप्तरश्मिर्दिवाकरः ॥ १०३ ॥ स महात्मा मुहूर्तेन पर्वतस्सलिलावृतः । दर्शयामास शृङ्गाणि सागरेण नियोजितः ॥ १०४ ॥ शातकुम्भनिभैश्शृङ्गैस्सकिन्नरमहोरगैः । आदित्योदयसङ्काशैरालिखद्भिरिवाम्बरम् ॥ १०५ ॥

प्रवेशसुखावस्थानादिफलभोक्तृत्वादिति भावः ॥ ९७ ॥ कुर्वीति । कार्यं प्रयोजनं विश्रान्त्यादि । कर्तव्यं कार्यमकृतं सतां मन्युं कोपम् उदीरयेत् प्रेरयेत् उत्पादयेत् ॥ ९८ ॥ ९९ ॥ चामीकरेति । चामीकरमहानाभ स्वर्णमयमहाशृङ्ग ॥ १०० ॥ काकुत्स्थस्येति । काकुत्स्थस्यानृशंस्यं रामस्य सीताविषयां दयाम् ॥ १०१ ॥ हिरण्यनाभ इति । निशम्य, वचनमिति शेषः ॥ १०२–१०४ ॥ शातकुम्भेति । शातकुम्भनिभैः स्वर्णसदृशैः आदित्योदयसङ्काशैः आदित्योदयतुल्यैरित्यर्थः । शृङ्गैरुपलक्षितः शृङ्गाणि दर्शयामासेति योजना ॥ १०५ ॥

स एष इति । त्वामुपरि तवोपरि ॥ ९६ ॥ ९७ ॥ अतः साचिव्यकरणात् अस्माकं कार्यं प्रयोजनं नातिक्रमेत् न लुप्यतामित्यर्थः । कार्यातिक्रमे अरिष्टमाह कर्तव्यमिति ॥ ९८ ॥ ९९ ॥ चामीकर हिरण्यात्मक ॥ १०० ॥ आनृशंस्यं कृतज्ञत्वम् हिरण्यनाभ इति । निशम्य, वचनमिति शेषः । ॥ १–३ ॥ स महात्मेत्यादि श्लोक

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तप्तेति । शस्त्रसङ्काशं नीलमित्यर्थः । " शस्त्रमायुधलोहयोः " इति विश्वः ॥ १०६ ॥ १०७ ॥ तमिति । निश्चितः निश्चितवान् । कर्तरि निष्ठा ॥ १०८ ॥ १०९ ॥ रामानु०—स तमिति । जीमूतमिव मारुत इत्यनेन पर्वतम् अनायासेन पातितवानिति द्योत्यते ॥ १०९ ॥ जहर्ष विसिष्मिये ॥ ११० ॥

तप्तजाम्बूनदैश्शृङ्गैः पर्वतस्य समुत्थितैः । आकाशं शस्त्रसङ्काशमभवत् काञ्चनप्रभम् ॥ १०६ ॥ जातरूपमयैः शृङ्गैर्भ्राजमानैस्स्वयंप्रभैः । आदित्यशतसङ्काशस्सोऽभवद्गिरिसत्तमः ॥ १०७ ॥ तमुत्थितमसङ्गेन हनुमानग्रतः स्थितम् । मध्ये लवणतोयस्य विघ्नोऽयमिति निश्चितः ॥ १०८ ॥ स तमुच्छ्रितमत्यर्थं महावेगो महाकपिः । उरसा पातयामास जीमूतमिव मारुतः ॥ १०९ ॥ स तदा पातितस्तेन कपिना पर्वतोत्तमः । बुद्ध्वा तस्य कपेर्वेगं जहर्ष च ननन्द च ॥ ११० ॥ तमाकाशगतं वीरमाकाशे समुपस्थितः । प्रीतो हृष्टमना वाक्यमब्रवीत्पर्वतः कपिम् । मानुषं धारयन् रूपमात्मनश्शिखरे स्थितः ॥ १११ ॥ दुष्करं कृतवान् कर्म त्वमिदं वानरोत्तम । निपत्य मम शृङ्गेषु विश्रमस्व यथासुखम् ॥ ११२ ॥ राघवस्य कुले जातैरुदधिः परिवर्द्धितः । स त्वां रामहिते युक्तं प्रत्यर्चयति सागरः ॥ ११३ ॥ कृते च प्रतिकर्तव्यमेष धर्मस्सनातनः । सोऽयं त्वत्प्रतिकारार्थी त्वत्तः सम्मानमर्हति ॥ ११४ ॥ त्वन्निमित्तमनेनाहं बहुमानात्प्रचोदितः । तिष्ठ त्वं कपिशार्दूल मयि विश्रम्य गम्यताम् ॥ ११५ ॥

रामानु०—तदेति । जहर्ष च ननन्द चेति पदद्वयेन कायमनसोर्विकृतिरुच्यते । अस्य वेगेन ग्लानिराहित्यं बुद्ध्वा हृष्टमना बभूवेत्यर्थः ॥ ११० ॥ तमिति । प्रीतः प्रीतिद्योतकव्यापारः ॥ १११ ॥ ११२ ॥ रामानु०—तमिति । प्रीतः सुखितः । हृष्टमनाः प्रसन्नमनाः ॥ ११ ॥ दुष्करमिति । विश्रमस्वेति श्रमिरात्मनेपदी कश्चिदस्ति । तथा चोक्तं भट्टमल्लेन—" विश्राम्यतीति विश्रान्तौ क्वचिद्विश्रमतेपि च " इति ॥ १२ ॥ ११३ ॥ कृत इति । कृते उपकारे त्वत्प्रतिकारार्थी त्वदातिथ्यकरणापेक्षी । त्वत्तः संमानमर्हतीति त्वया तत्कृतातिथ्यपरिग्रह द्वयमेकं वाक्यम् । शातकुम्भमयैः शृङ्गैरुपलक्षितः ॥ ४ ॥ ५ ॥ शस्त्रसङ्काशं शस्त्रश्यामाकाशम्, काञ्चनप्रभं कनकगौरमासीदित्यर्थः ॥ ६ ॥ ७ ॥ असङ्गेन एकाकिना ॥ ८ ॥ ९ ॥ जहर्ष च ननन्द च इत्यनेन कायमनसोर्विकृतिरुच्यते ॥ ११०–१३ ॥ कृते चेति । कृते उपकारे सोऽयमुदधिः तत्प्रतिकारार्थी इति पाठः । तस्योपकारस्य प्रत्युपकारार्थी त्वत्तस्सम्मानमर्हति, त्वत्सकाशात् त्वत्स्वीकाररूपां पूजां प्राप्तुं योग्यो भवतीत्यर्थः ॥ ११४ ॥ त्वन्निमित्तमित्यादि श्लोकद्वयमेकं वाक्यम् । एष

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

एवास्य संमानमित्यर्थः ॥ ११४ ॥ ११५ ॥ चोदनाप्रकारमाह—योजनानामिति । प्रक्रमतामिति प्रचोदित इति पूर्वेणान्वयः ॥ ११६ ॥ रामानु०—त्वन्निमित्तमित्यादिश्लोकद्वयमेकं वाक्यम् । एष कपिः योजनानां शतं चापि समाप्लुतः समापतितुमुपक्रान्तः तव सानुषु विश्रान्तः शेषं मार्गशेषं प्रक्रमतामिति त्वन्निमित्तम् अहम् अनेन सागरेण बहुमानात् प्रचोदितः, अतः कपिशार्दूल ! त्वं तिष्ठ मयि विश्रम्य गम्यतामित्यन्वयः॥ १५॥ १६॥ तदिति । तत्प्रसिद्धम् । कन्दः करहाटः । मूलं पादः । तत्तस्मात्॥ ११७॥ अस्माक

योजनानां शतं चापि कपिरेष समाप्लुतः । तव सानुषु विश्रान्तश्शेषं प्रक्रमतामिति ॥ ११६ ॥ तदिदं गन्धवत् स्वादु कन्दमूलफलं बहु । तदास्वाद्य हरिश्रेष्ठ विश्रान्तोऽनुगमिष्यसि ॥ ११७ ॥ अस्माकमपि सम्बन्धः कपिमुख्य त्वयाऽस्ति वै । प्रख्यातस्त्रिषु लोकेषु महागुणपरिग्रहः ॥ ११८ ॥ वेगवन्तः प्लवन्तो ये प्लवगा मारुतात्मज । तेषां मुख्यतमं मन्ये त्वामहं कपिकुञ्जर ॥ ११९ ॥ अतिथिः किल पूजार्हः प्राकृतोऽपि विजानता । धर्मं जिज्ञासमानेन किं पुनस्त्वादृशो महान् ॥ १२० ॥ त्वं हि देववरिष्ठस्य मारुतस्य महात्मनः । पुत्रस्तस्यैव वेगेन सदृशः कपि कुञ्जर ॥ १२१ ॥ पूजिते त्वयि धर्मज्ञ पूजां प्राप्नोति मारुतः । तस्मात्त्वं पूजनीयो मे शृणु चाप्यत्र कारणम् ॥ १२२ ॥ पूर्वं कृतयुगे तात पर्वताः पक्षिणोऽभवन् । ते हि जग्मुर्दिशः सर्वा गरुडानिलवेगिनः ॥ १२३ ॥

मिति । प्रख्यात इति सम्बन्धविशेषणम् । महागुणानां परिग्रहो यस्मिन्स तथा॥ ११८॥ रामानु०—हनुमतः पूज्यतमत्वे हेत्वन्तरं दर्शयति—अस्माकमपीति । संबन्धः अतिथ्य तिथिमद्भावलक्षणः । महागुणपरिग्रहः. परिगृह्यत इति परिग्रहः. महागुणानां सतां परिग्रहः महागुणपरिग्रहः ॥ १८ ॥ ११९—१२२ ॥ रामानु०—अतिथिरिति । त्वादृशो महानिति पाठः ॥ १२० ॥ किंचातिथेस्तव पूजायां काम्यार्थसिद्धिवद्व्याधोरपि प्रत्युपकारासिद्धिः स्यादित्याह—त्वं हीत्यादिना ॥ १२१ ॥ संबन्धं विवृणोति—पूर्वमित्यादिना । पक्षिणः पक्षवन्तः । हिः

कपिः योजनानां शतं समाप्लुतः समाप्लवितुमुपक्रान्तः । शेषं मार्गशेषं प्रक्रमतामिति त्वन्निमित्तमनेन सागरेणाहं बहुमानात्प्रचोदितः, अतः कपिशार्दूल ! त्वं तिष्ठ मयि विश्रम्य गम्यतामित्यन्वयः ॥ १५ ॥ १६ ॥ तदिति । तत् प्रसिद्धम् ॥ १७ ॥ अस्माकमिति । महागुणपरिग्रहः महागुणेन वायुना परिगृह्यत इति तथा ॥ १८ ॥ १९ ॥ अतिथिरिति । त्वादृशो महानिति पाठः ॥ १२०—१२८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पादपूरणे ॥ १२३-१२६ ॥ अस्मिन्निति । समग्रः समग्रपक्षः, गुप्तसमग्रपक्षश्च यथा भवामि तथा अभिरक्षितोऽस्मीत्यर्थः ॥ १२७-१३० ॥
रामानु०-श्रममिति । मोक्षय मुञ्च । " मोक्ष निरसने " इति चौरादिको धातुः ॥ १३० ॥ १३१ ॥ प्रीतोस्मीति । कृतमातिथ्यं तव दर्शनादिनेति भावः । मन्युः कोपः,

ततस्तेषु प्रयातेषु देवसङ्घाः सहर्षिभिः । भूतानि च भयं जग्मुस्तेषां पतनशङ्कया ॥ १२४॥ ततः क्रुद्धः सहस्राक्षः पर्वतानां शतक्रतुः । पक्षांश्चिच्छेद वज्रेण तत्र तत्र सहस्रशः ॥ १२५ ॥ स मामुपगतः क्रुद्धो वज्रमुद्यम्य देवराट् । ततोऽहं सहसा क्षिप्तः श्वसनेन महात्मना ॥ १२६ ॥ अस्मिँल्लवणतोये च प्रक्षिप्तः प्लवगोत्तम । गुप्तपक्षसमग्रश्च तव पित्राऽभिरक्षितः ॥ १२७ ॥ ततोऽहं मानयामि त्वां मान्यो हि मम मारुतः । त्वया मे ह्येष सम्बन्धः कपिमुख्य महागुणः ॥ १२८ ॥ तस्मिन्नेवंगते कार्ये सागरस्य ममैव च । प्रीतिं प्रीतमनाः कर्तुं त्वमर्हसि महाकपे ॥ १२९ ॥ श्रमं मोक्षय पूजां च गृहाण कपिसत्तम । प्रीतिं च बहु मन्यस्व प्रीतोऽस्मि तव दर्शनात् ॥ १३० ॥ एवमुक्तः कपिश्रेष्ठस्तं नगोत्तममब्रवीत् ॥ १३१ ॥ प्रीतोऽस्मि कृतमातिथ्यं मन्युरेषोऽपनीयताम् । त्वरते कार्यकालो मे अहश्चाप्यतिवर्तते । प्रतिज्ञा च मया दत्ता न स्थातव्यमिहान्तरे ॥ १३२ ॥ इत्युक्त्वा पाणिना शैलमालभ्य हरिपुङ्गवः । जगामाकाशमाविश्य वीर्यवान् प्रहसन्निव ॥ १३३ ॥

मत्कृता पूजा न गृहीतेति कोपो निरस्यतामित्यर्थः । कार्यकालः त्वरते शीघ्रं गच्छेति मां प्रेरयति । अहश्चाप्यतिवर्तते, अत्र विलम्बः क्रियते चेदिद महोऽतिवर्तते इत्यर्थः । इह समुद्रे अन्तरे मध्ये मया न स्थातव्यमिति वानरसान्निध्यौ प्रतिज्ञा कृता ॥१३२॥ रामानु०-त्वरते कार्यकाल इति । कार्यः करणयोग्यः कालः कार्यकालः त्वरते त्वरयति । अहश्चाप्यतिवर्तते लङ्काद्वीपप्रवेशयोग्यमहश्चातिवर्तते । प्रतिज्ञा चेति । "यथा राघवनिर्मुक्तश्शरः श्वसनविक्रमः । गच्छेत्तद्वद्गमिष्यामि लङ्कां रावणपालिताम् ।" इति प्रतिज्ञा दत्ता तस्मादिहान्तरे न स्थातव्यम् ॥ १३२ ॥ इत्युक्त्वेति । प्रहसन्निव प्रसन्नमुख इवेत्यर्थः ॥ १३३ ॥ १३४ ॥ रामानु०-इत्युक्त्वेति । आलभ्य स्पृष्ट्वा ।
एवंगते प्राप्ते सति । कार्ये उपकाररूपकार्ये । प्रीतिं कर्तुमर्हसि, पूजास्वीकारेणेति भावः ॥ २९-१३१ ॥ मन्युः पूजानङ्गीकारनिबन्धनं दैन्यम् । कार्यकालः लङ्काप्रवेशकालः । त्वरते विलम्बं न सहते ॥ ३२ ॥ आलभ्य स्पृष्ट्वा । प्रहसन्निव प्रसन्नमुखस्सन् ॥ ३३ ॥ ३४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

महसान्निवेत्यत्र इवशब्दो हासप्रकर्षस्य पारमार्थ्यपरः प्रीतिसूचकः। मन्दस्मितं कुर्वन्नित्यर्थः॥ १३३ ॥ स इति। उपपन्नाभिः रामकार्यसिद्धयुचिताभिः ॥ १३४ ॥ अथेति । हित्वा शैलमहार्णवौ मूर्तिमन्तौ तौ हित्वेत्यर्थः। अनेन शैलवत्समुद्रोऽपि मूर्तिमत्तया तत्राद्दश्यतेति सूचितम् ॥१३५॥१३६॥ तद्वितीयमिति । द्वितीयं समुद्र

स पर्वतसमुद्राभ्यां बहुमानादवेक्षितः। पूजितश्चोपपन्नाभिराशीर्भिरनिलात्मजः ॥ १३४ ॥ अथोर्ध्वं दूरमुत्पत्य हित्वा शैलमहार्णवौ। पितुः पन्थानमास्थाय जगाम विमलेऽम्बरे ॥ १३५ ॥ भूयश्चोर्ध्वगतिं प्राप्य गिरिं तमव लोकयन्। वायुसूनुर्निरालम्बे जगाम विमलेऽम्बरे ॥ १३६ ॥ तद् द्वितीयं हनुमतो दृष्ट्वा कर्म सुदुष्करम्। प्रशशंसुः सुराः सर्वे सिद्धाश्च परमर्षयः ॥ १३७ ॥ देवताश्चाभवन् हृष्टास्तत्रस्थास्तस्य कर्मणा। काञ्चनस्य सुनाभस्य सहस्राक्षश्च वासवः ॥ १३८ ॥ उवाच वचनं धीमान् परितोषात् सगद्गदम्। सुनाभं पर्वतश्रेष्ठं स्वयमेव शचीपतिः ॥ १३९ ॥ हिरण्यनाभ शैलेन्द्र परितुष्टोऽस्मि ते भृशम्। अभय ते प्रयच्छामि तिष्ठ सौम्य यथा सुखम् ॥ १४० ॥ साह्यं कृतं ते सुमहद्विक्रान्तस्य हनूमतः। क्रमतो योजनशतं निर्भयस्य भये सति ॥ १४१ ॥ रामस्यैष हि दूत्येन याति दाशरथेर्हरिः। सत्क्रियां कुर्वता तस्य तोषितोऽस्मि दृढं त्वया ॥ १४२ ॥ ततः प्रहर्ष मगमद्विपुलं पर्वतोत्तमः। देवतानां पतिं दृष्ट्वा परितुष्टं शतक्रतुम् ॥ १४३ ॥

लङ्घनापेक्षया द्वितीयं तत्पर्वतजयरूपं कर्म॥१३७॥१३८॥ रामानु०—देवताश्चेति। तस्य मैनाकस्य कर्मणा देवता हृष्टा अभवन् सहस्राक्षश्च हृष्टोऽभवदिति वचनविपरिणामेन संबन्धः ॥ १३८ ॥ १३९॥१४०॥ साह्यमिति। भये सति समुद्रलङ्घनेऽस्य किं भविष्यतीत्यस्माकं भये सतीत्यर्थः॥१४१॥ रामानु०—साह्यमिति । साह्यं सहायकर्म सहकारित्वमिति यावत्। ब्राह्मणादित्वात् ष्यञ्। ते त्वया निर्भयस्य भये सति अतिविस्तृतसमुद्रोपर्याकाशगमने समुद्रपतनादिभयनिमित्तसंभावनायामपि निर्भयस्य ॥१४१॥१४२–१४४॥

पितुः पन्थानं वायुमार्गम् ॥ ३५ ॥ ३६ ॥ तदिति । समुद्रलङ्घनं प्रथमं कर्म, द्वितीयं मैनाकगिरावविश्रम्य गमनम्॥३७॥ देवताश्चेति । वासवश्च हृष्ट इति सम्बन्धः ॥ ३८–१४० ॥ साह्यमिति । साह्यं सहायकर्म, सहकारित्वमिति यावत्। ते तव मन्निमित्तभये सत्यपि निर्भयस्य हनूमतः साह्यं कृतम् अतः अभयं प्रयच्छामीति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रामानु०–त इति । बभूवावस्थितस्तदा तस्मिन् काले स्वस्थोऽभूदित्यर्थः । प्रतिप्रयाणवेलायामपि "पर्वतेन्द्रं सुनाभं च समुपस्पृश्य वीर्यवान्" इति मैनाकावस्थानाभिधानात् । सागरं मैनाकाधिष्ठित सागरप्रदेशम् ॥ १४४ ॥ १४५॥१४६ ॥ रामानु०–अयमिति । श्रीमान् अत्र श्रीशब्देन अतिदूरसमुद्रलङ्घनेऽप्युपर्युपरिबलाभिवृद्धिप्रयुक्ता सुषमोच्यते ॥ १४६ ॥१४७–१५३॥

स वै दत्तवरः शैलो बभूवावस्थितस्तदा । हनुमांश्च मुहूर्तेन व्यतिचक्राम सागरम् ॥ १४४ ॥ ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः । अब्रुवन् सूर्यसङ्काशां सुरसां नागमातरम् ॥ १४५ ॥ अयं वातात्मजः श्रीमान् प्लवते सागरोपरि । हनुमान्नाम तस्य त्वं मुहूर्तं विघ्नमाचर ॥ १४६ ॥ राक्षसं रूपमास्थाय सुघोरं पर्वतोपमम् । दंष्ट्राकरालं पिङ्गाक्षं वक्त्रं कृत्वा नभस्समम् ॥ १४७ ॥ बलमिच्छामहे ज्ञातुं भूयश्चास्य पराक्रमम् । त्वां विजेष्यत्युपायेन विषादं वा गमिष्यति ॥ १४८ ॥ एवमुक्ता तु सा देवी दैवतैरभिसत्कृता । समुद्रमध्ये सुरसा बिभ्रती राक्षसं वपुः ॥ १४९ ॥ विकृतं च विरूपं च सर्वस्य च भयावहम् । प्लवमानं हनूमन्तमावृत्येदमुवाच ह ॥ १५० ॥ मम भक्ष्यः(क्षः)प्रदिष्टस्त्वमीश्वरैर्वानरर्षभ । अहं त्वां भक्षयिष्यामि प्रविशेदं ममाननम् ॥ १५१ ॥ एवमुक्तः सुरसया प्राञ्जलिर्वानरर्षभः । प्रहृष्टवदनः श्रीमानिदं वचनमब्रवीत् ॥ १५२ ॥ रामो दाशरथिर्नाम प्रविष्टो दण्डकावनम् । लक्ष्मणेन सह भ्रात्रा वैदेह्या चापि भार्यया ॥ १५३ ॥ अन्यकार्यविषक्तस्य बद्धवैरस्य राक्षसैः । तस्य सीता हृता भार्या रावणेन यशस्विनी ॥ १५४॥ तस्याः सकाशं दूतोऽहं गमिष्ये रामशासनात् । कर्तुमर्हसि रामस्य साह्यं विषय वासिनी ॥ १५५॥ अथवा मैथिलीं दृष्ट्वा रामं चाक्लिष्टकारिणम् । आगमिष्यामि ते वक्त्रं सत्यं प्रतिशृणोमि ते ॥ १५६ ॥

अन्येति । अन्यकार्यविषक्तस्य मारीचमृगग्रहणव्यासक्तस्य ॥ १५४ ॥ तस्या इति । विषयवासिनी रामराज्यवासिनी ॥ १५५ ॥ १५६ ॥

सम्बन्धः॥४१–४३॥सागरं मैनाकाधिष्ठितसिन्धुप्रदेशम्॥४४–४७॥त्वामुपायेन विजेष्यति वा विषादं दैन्यं गमिष्यति वेति ज्ञातुमिच्छामह इति सम्बन्धः॥४८–१५०॥ ईश्वरैः दैवतैः ॥ ५१–५३ ॥ अन्येति पाठः । कार्यविषक्तस्य मायामृगवधप्रस्थितस्य ॥ ५४ ॥ विषयवासिनि रामराज्यवासिनि ! त्रैलोक्यनाथन्वाद्रघुनाथस्येति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

एवमिति । नातिवर्तेन्मां ममाननमप्रविश्य न गच्छेत् । अतिवर्तैदित्यत्र परस्मैपदमार्षम् । अत्र इतिकरणं द्रष्टव्यम् । अब्रवीन्नातिवर्तेन्मां कश्चिदेष वरो ममेत्यस्यानन्तरं तद्दृष्ट्वा व्यादितं वक्त्रं वायुपुत्रः सुबुद्धिमानित्यादिश्लोका द्रष्टव्याः । मध्ये तं प्रयान्तामित्यादयः केचन श्लोकाः प्रक्षिप्ताः असङ्गताश्च, शतयोजनायतत्वे वानरैर्लङ्कावासिभिश्च ज्ञातः स्यादिति विरोधात् । त इमे प्रक्षिप्तश्लोकाः—" तं प्रयान्तं समुद्वीक्ष्य सुरसा वाक्यमब्रवीत् । बलं जिज्ञासमाना वै नागमाता हनूमतः । प्रविश्य वदनं मेऽद्य गन्तव्यं वानरोत्तम । वर एष पुरा दत्तो मम धात्रेति सत्वरा । व्यादाय विपुलं वक्त्रं स्थिता

एवमुक्ता हनुमता सुरसा कामरूपिणी । अब्रवीन्नातिवर्तेन्मां कश्चिदेष वरो मम ॥ १५७ ॥ [तं प्रयान्तं समुद्वीक्ष्य सुरसा वाक्यमब्रवीत् । बलं जिज्ञासमाना वै नागमाता हनूमतः ॥ १ ॥ प्रविश्य वदनं मेऽद्य गन्तव्यं वानरोत्तम । वर एष पुरा दत्तो मम धात्रेति सत्वरा ॥ २ ॥ व्यादाय वक्त्रं विपुलं स्थिता सा मारुतेः पुरः । एवमुक्तः सुरसया क्रुद्धो वानरपुङ्गवः ॥ ३ ॥ अब्रवीत् कुरु वै वक्त्रं येन मां विषहिष्यसे । इत्युक्ता सुरसां क्रुद्धो दशयोजनमायतः ॥ ४ ॥ दशयोजनविस्तारो बभूव हनुमांस्तदा । तं दृष्ट्वा मेघसङ्काशं दशयोजनमायतम् ॥ ५ ॥

सा मारुतेः पुरः । एवमुक्तः सुरसया क्रुद्धो वानरपुङ्गवः । अब्रवीत्कुरु वै वक्त्रं येन मां विषहिष्यसे । इत्युक्त्वा सुरसां क्रुद्धो दशयोजनमायतः । दशयोजनविस्तारो बभूव हनुमांस्तदा । तं दृष्ट्वा मेघसंकाशं दशयोजनमायतम् । चकार सुरसा चास्यं विंशद्योजनमायतम् । हनूमांस्तु ततः क्रुद्धस्त्रिंशद्योजनमायतः । चकार सुरसा वक्त्रं चत्वारिंशत्तथोच्छ्रितम् । बभूव हनुमान्वीरः पञ्चाशद्योजनोच्छ्रितः । चकार सुरसा वक्त्रं षष्टियोजनमायतम् । तथैव हनुमान्वीरस्सप्ततीयोजनोच्छ्रितः । चकार सुरसा वक्त्रमशीतीयोजनोच्छ्रितम् । हनुमानचलप्रख्यो नवतीयोजनोच्छ्रितः । चकार सुरसा वक्त्रं शतयोजनमायतम् " इति ॥ १५७ ॥ रामानु०—नाग(देव)माता हनूमत इत्यतः परं—प्रविश्य वदनं मेऽद्य गन्तव्यं वानरोत्तम । वर एष पुरा दत्तो मम धात्रेति सत्वरेति पाठः । एवमिति । विषहिष्यसे अभिभविष्यसि ग्रसिष्यसीत्यर्थः । इत्युक्त्वेति । दशयोजनमायतः दशयोजनविस्तारो बभूव हनुमानित्यनेन " दशयोजनविस्तीर्णा त्रिंशद्योजनमायता । छाया

भावः ॥ ५५॥५६ ॥ एवमिति । कश्चिदपि जनः नातिवर्तेत, मामिति शेषः । नातिवर्तेन्माम् इत्यपि पाठः ॥१५७॥ [अथ वरदानं श्रुत्वापि जिगमिषन्तं प्रत्याह—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वानरसिंहस्य" इत्युक्तच्छायोचितं परिमाणान्तरं सुरसादर्शनात्पूर्वं संक्षिप्तवानित्यवगम्यते । चकार सुरसा चास्यं विंशद्योजनमायतमित्यतः परं हनूमांस्तु ततः क्रुद्धस्त्रिंशद्योजनमायत इत्यादिक्रमेण । चकार सुरसा वक्त्रं शतयोजनमायतमित्येष पाठक्रमः । एते श्लोकाः केषुचित्कोशेषु लेखकप्रमादात्पतिताः । सप्ततीयोजनोच्छ्रित इत्यादौ दीर्घ आर्षः ॥ १५७ ॥ प्रकृतं विलिख्यते—तद्दृष्ट्वा व्यादितं त्वास्यं वायुपुत्रः सुबुद्धिमान् । सुसंक्षिप्यात्मनः कायं बभूवाङ्गुष्ठमात्रकः इति ॥१५८॥ रामानु०—तद्दृष्ट्वा व्यादितं त्वास्य मिति । व्यादितं व्याप्तम् । इडागमस्त्वार्षः । अतिविस्तृतं वक्त्रं सूक्ष्मरूपेण प्रविश्याङ्गेन निर्गन्तुमयं समीचीनः समय इति ज्ञानयोगात् सुबुद्धिमानिति विशेषणम् ॥ १५८ ॥

चकार सुरसा चास्यं विंशद्योजनमायतम् । तां दृष्ट्वा विस्तृतास्यां तु वायुपुत्रः सुबुद्धिमान् ॥ ६ ॥ हनूमांस्तु ततः क्रुद्धस्त्रिंशद्योजनमायतः । चकार सुरसा वक्त्रं चत्वारिंशत्तथोच्छ्रितम् ॥ ७ ॥ बभूव हनुमान् वीरः पञ्चाशद्योजनोच्छ्रितः । चकार सुरसा वक्त्रं षष्टियोजनमायतम् ॥ ८ ॥ तथैव हनुमान् वीरः सप्ततीयोजनोच्छ्रितः । चकार सुरसा वक्त्रमशीतियोजनायतम् ॥ ९ ॥ हनुमानचलप्रख्यो नवतीयोजनोच्छ्रितः । चकार सुरसा वक्त्रं शतयोजनमायतम् ॥ १० ॥] तदृष्ट्वा व्यादितं त्वास्यं वायुपुत्रः सुबुद्धिमान् । [दीर्घजिह्वं सुरसया सुघोरं नरकोपमम् ।] सुसंक्षिप्यात्मनः कायं बभूवाङ्गुष्ठमात्रकः ॥ १५८ ॥ सोऽभिपत्याशु तद्वक्त्रं निष्पत्य च महाजवः । अन्तरिक्षे स्थितः श्रीमानिदं वचनमब्रवीत् ॥ १५९ ॥ प्रविष्टोऽस्मि हि ते वक्त्रं दाक्षायणि नमोऽस्तु ते । गमिष्ये यत्र वैदेही सत्यश्चासीद्वरस्तव ॥ १६० ॥ तं दृष्ट्वा वदनान्मुक्तं चन्द्रं राहुमुखादिव । अब्रवीत्सुरसा देवी स्वेन रूपेण वानरम् ॥ १६१ ॥ अर्थसिद्ध्यै हरिश्रेष्ठ गच्छ सौम्य यथासुखम् । समानयस्व वैदेहीं राघवेण महात्मना ॥ १६२ ॥ तत्तृतीयं हनुमतो दृष्ट्वा कर्म सुदुष्करम् । साधु साध्विति भूतानि प्रशशंसुस्तदा हरिम् ॥ १६३ ॥

॥ १५९ ॥ प्रविष्टोस्मीति । दक्षस्यापत्यं दाक्षायणी, तत्त्वं च पूर्वं वरप्रदानकथनसमये तयैव कथितमित्यनुवादात् कल्प्यते॥१६०॥रामानु०—प्रविष्टोस्मि हीति । दाक्षायणीत्यनुवादात् स्ववरप्रदानकथनसमये हनुमन्तमुद्दिश्य स्वकीयं दाक्षायणीत्वमपि तयैव कथितमित्यवगन्तव्यम् । सत्यं चासीद्वरं तव, त्वदास्यं प्रविश्य निर्गमनात् ब्रह्मणा दत्तो वरस्सत्य आसीदित्यर्थः । वरशब्दस्य नपुंसकत्वमार्षम् ॥ १६० ॥ १६१ ॥ १६२ ॥ रामानु०—अर्थेति । समानयचेति पाठः। समानय संगमय ॥ १६२॥ १६३ ॥ १६४ ॥ त्वमिति । एवमिति । त्रिषहिष्यसे अभिभविष्यसि, प्रसिष्यसीत्यर्थः॥ १-१०॥] तद् दृष्ट्वेति । सुरसया व्यादितमास्यम् ॥१५८-१६१॥समानय संयोजय ॥६२॥ तृतीयं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

आकाशगमनमतिदुष्करमित्यमुमर्थं कथयितुम् आकाशस्वरूपं वर्ण्यते–सेवित इत्यादिना श्लोकसप्तकेन। कैशिकाचार्यैः कैशिके रागविशेषे आचार्यैः विद्याधरविशेषैरित्यर्थः। वज्राशनिसमाघातैः पावकैः वज्राशनिसमाघातैर्हेतुभिर्जातैः पावकैः। हव्यं वहता देवेभ्यो हव्यवहनार्थं गतेन चित्रभानुना वह्निना। विश्वे विश्वगते, व्यापक इत्यर्थः। देवराजगजाक्रान्ते ऐरावताभिन्नादिग्गजाक्रान्ते। विताने वितानतुल्ये। वितत इति वितानविशेषणम् ॥ १६५–१७३ ॥

स सागरमनाधृष्यमभ्येत्य वरुणालयम् । जगामाकाशमाविश्य वेगेन गरुडोपमः ॥ १६४ ॥ सेविते वारिधाराभिः पतगैश्च निषेविते । चरिते कैशिकाचार्यैरैरावतनिषेविते ॥ १६५ ॥ सिंहकुञ्जरशार्दूलपतगोरगवाहनैः । विमानैः संपतद्भिश्च विमलैः समलंकृते ॥ १६६ ॥ वज्राशनिसमाघातैः पावकैरुपशोभिते । कृतपुण्यैर्महाभागैः स्वर्गजिद्भिरलंकृते ॥ १६७ ॥ वहता हव्यमत्यर्थं सेविते चित्रभानुना । ग्रहनक्षत्रचन्द्रार्कतारागणविभूषिते ॥ १६८ ॥ महर्षिगणगन्धर्वनागयक्षसमाकुले । विविक्ते विमले विश्वे विश्वावसुनिषेविते ॥ १६९ ॥ देवराजगजाक्रान्ते चन्द्रसूर्यपथे शिवे । विताने जीवलोकस्य विततेब्रह्मनिर्मिते॥ १७०॥ बहुशः सेविते वीरैर्विद्याधरगणैर्वरैः । जगाम वायुमार्गे तु गरुत्मानिव मारुतिः ॥ १७१ ॥ प्रदृश्यमानस्सर्वत्र हनुमान् मारुतात्मजः । भेजेऽम्बरं निरालम्बं लम्बपक्ष इवाद्रिराट् ॥१७२॥ प्लवमानं तु तं दृष्ट्वा सिंहिका नाम राक्षसी । मनसा चिन्तयामास प्रवृद्धा कामरूपिणी ॥ १७३॥

रामानु०–सेवित इति। कैशिकाचार्यैः। कैशिकं रागविशेषः तदाचार्यैः तुम्बुरुप्रभृतिभिरित्यर्थः। ऐरा वतनिषेविते ऐरावतमिति ऋजुदीर्घमिन्द्रधनुरुच्यते। तेन निषेविते युक्ते "इन्द्रायुधं त्विन्द्रधनुस्तहीर्घमृजु रोहितम्। ऐरावतं च विद्युत्तु चञ्चला चपलेति च" इति वैजयन्ती। वज्राशनिसमाघातैः वज्राशन्योस्समः तुल्यः आघातः अभिघातः येषां तैः। विविक्त इति। विश्वे विशतीति विश्वः व्यापक इत्यर्थः। विताने उल्लोचभूते। " अस्त्री वितानमुल्लोचः " इत्यमरः। विद्याधरगणैर्वरैरित्यतः परम् जगाम वायुमार्गे तु गरुत्मानिव मारुतिरिति पाठक्रमः। उपरि तु हनुमान् मेघजालानीत्यादिसार्द्धश्लोकद्वयं प्रमादाल्लिखितम्। प्रदृश्यमानः सर्वत्रेति पाठः ॥ १६५–१७२ ॥

कर्म सुरसावक्त्रान्निष्क्रमणम् ॥ १६३ ॥ १६४ ॥ कैशिकाचार्यैः कैशिकं नृत्तादि तदाचार्यैस्तुम्बुरुप्रभृतिभिः। ऐरावतनिषेविते ऐरावतम् इति ऋजुदीर्घमिन्द्रधनु रुच्यते ॥ १६५ ॥ १६६ ॥ वज्राशनिसमाघातैः वज्राशन्योस्समः तुल्यः आघातोऽभिघातो येषां तैः पावकैः ॥ १६७ ॥ आकाशस्य एकोनपञ्चाशदग्नि सम्बन्धमुक्त्वा तत्प्रधानभूतचित्रभानुसम्बन्धमाह–वहतेति ॥ १६८ ॥ विश्वे विश्वव्यापके। विश्वावसुः गन्धर्वराजः ॥ १६९–१७३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अद्येति । दीर्घस्य कालस्य दीर्घकाले गते सति अद्य आशिता आशित्री भुक्तवती भविष्यामि ॥ १७४ ॥ इतीति । समाक्षिपत् सम्यग्गृहीतवती ॥ १७५ ॥ समाक्षिप्त इति । षड्गूकृतपराक्रमः कुण्ठितगतिः । प्रतिलोमेन प्रतिकूलेन ॥ १७६–१७८ ॥ छायाग्राहीति । तदिदं छायाग्राहि कपिराजेन कथितं नात्र संशय इति योजना ॥ १७९॥ १८० ॥ घनराजीवेति । समभिद्रवत् समभ्यद्रवत् ॥ १८१ ॥ स ददर्शेति । कायमात्रं देहप्रमाणम् ॥१८२॥

अद्य दीर्घस्य कालस्य भविष्याम्यहमाशिता । इदं हि मे महत्सत्त्वं चिरस्य वशमागतम् ॥१७४॥ इति संचिन्त्य मनसा छायामस्य समाक्षिपत् । छायायां गृह्यमाणायां चिन्तयामास वानरः ॥ १७५ ॥ समाक्षिप्तोऽस्मि सहसा षड्गूकृतपराक्रमः । प्रतिलोमेन वातेन महानौरिव सागरे ॥ १७६ ॥ तिर्यगूर्ध्वमधश्चैव वीक्षमाणस्ततः कपिः । ददर्श स महत्सत्त्वमुत्थितं लवणाम्भसि ॥ १७७ ॥ तद्दृष्ट्वा चिन्तयामास मारुतिर्विकृताननम् । कपिराजेन कथितं सत्त्वमद्भुतदर्शनम् ॥१७८॥ छायाग्राहि महावीर्यं तदिदं नात्र संशयः । स तां बुद्ध्वाऽर्थतत्त्वेन सिंहिकां मतिमान् कपिः । व्यवर्धत महाकायः प्रावृषीव बलाहकः ॥१७९॥ तस्य सा कायमुद्वीक्ष्य वर्धमानं महाकपेः । वक्त्रं प्रसारया मास पातालान्तरसन्निभम् ॥१८०॥ घनराजीव गर्जन्ती वानरं समभिद्रवत् ॥ १८१ ॥ स ददर्श ततस्तस्या विवृतं सुमहन्मुखम् । कायमात्रं च मेधावी मर्माणि च महाकपिः ॥१८२॥ स तस्या विवृते वक्त्रे वज्रसंहननः कपिः । संक्षिप्य मुहुरात्मानं निष्पपात महाबलः ॥ १८३ ॥ आस्ये तस्या निमज्जन्तं ददृशुः सिद्धचारणाः । ग्रस्यमानं यथा चन्द्रं पूर्णं पर्वणि राहुणा ॥१८४॥ ततस्तस्या नखैस्तीक्ष्णैर्मर्माण्युत्कृत्य वानरः । उत्पपाताथ वेगेन मनस्संपातविक्रमः॥ १८५॥

स इति । मुहुस्संक्षिप्य संनिकर्षानुगुणं सङ्कुच्य॥ १८३ ॥ १८४ ॥ तत इति । ततः तेन रूपेण मनस्संपातविक्रमः मनोवेगतुल्यगतिः ॥ १८५ ॥

रामानु०–तत इति । अथ वानरः मनःसंपातविक्रमस्सन् मनोगमनसमानगतिस्सन् तीक्ष्णैर्नखैस्तस्या मर्माण्युत्कृत्य ततः आस्यात् वेगेनोत्पपात आस्यापिधानात् पूर्वमेवोत्पपातेत्यर्थः ॥१८५॥ अद्येति । आशिता भुक्तवती । समाक्षिपत् जग्राह ॥ ७४–१७९ ॥ पातालान्तरसन्निभम् पातालविवरसदृशम् ॥ १८० ॥ ८१ ॥ कायमात्रं शरीरप्रमाणम्, स्वशरीरकबलनपर्याप्तमित्यर्थः । मुखं ददर्श । मर्माणि प्राणस्थानानि संक्षिप्य ॥८२–८४॥ मनस्संपातविक्रमः मनोगमनसमानगतिः ॥ १८५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तामिति । दृष्ट्या दूरादेव दर्शनेन । धृत्या अस्य नियमनजननधार्ष्ट्येन । दाक्षिण्येन पाटवेन ॥ १८६ ॥ हृतहृदिति । विधुरा आर्ता ॥ १८७ ॥ भीम मित्यादि । अरिष्टं शुभं यथा भवति तथा । यस्य सिंहिकारूपसत्त्वस्य । दृष्टिः आयतिक्षमसूक्ष्मेक्षणम् । मतिः अर्थतत्त्वनिश्चयः । क्रियावत्त्वं दाक्ष्यम् । यथा तव तथा यस्य चत्वारि सन्ति तत्त्वया हतम् । तान्येव चत्वार्याह धृतिरिति । या धृतिः स्वकर्मसु स्वानुकूलकार्येषु नावसीदति या दृष्टिर्नावसीदति या

तां तु दृष्ट्वा च धृत्या च दाक्षिण्येन निपात्य च । स कपिप्रवरो वेगाद्ववृधे पुनरात्मवान् ॥ १८६ ॥ हृतहृत् सा हनुमता पपात विधुराऽम्भसि । तां हतां वानरेणाशु पतितां वीक्ष्य सिंहिकाम् । भूतान्याकाशचारीणि तमूचुः प्लव गोत्तमम् ॥ १८७ ॥ भीममद्य कृतं कर्म महत्सत्त्वं त्वया हतम् । साधयार्थमभिप्रेतमरिष्टं प्लवतांवर ॥ १८८ ॥ यस्य त्वेतानि चत्वारि वानरेन्द्र यथा तव । धृतिर्दृष्टिर्मतिर्दाक्ष्यं स्वकर्मसु न सीदति ॥ १८९ ॥ स तैः सम्भावितः पूज्यः प्रतिपन्नप्रयोजनः । जगामाकाशमाविश्य पन्नगाशनवत्कपिः ॥ १९० ॥ प्राप्तभूयिष्ठपारस्तु सर्वतः प्रतिलोकयन् । योजनानां शतस्यान्ते वनराजिं ददर्श सः ॥ १९१ ॥ ददर्श च पतन्नेव विविधद्रुमभूषितम् । द्वीपं शाखामृगश्रेष्ठो मलयोपवनानि च ॥ १९२ ॥ सागरं सागरानूपं सागरानूपजान् द्रुमान् । सागरस्य च पत्नीनां मुखान्यपि विलो कयन् ॥ १९३ ॥ स महामेघसङ्काशं समीक्ष्यात्मानमात्मवान् । निरुन्धन्तमिवाकाशं चकार मतिमान्मतिम् ॥ १९४ ॥

मतिर्नावसीदति यद्दाक्ष्यं नावसीदति एतानि चत्वारि यस्य सन्ति तत्त्वया हतामिति योजना ॥ १८८ ॥ १८९ ॥ स इति । संभावितः पूजितः । प्रतिपन्न प्रयोजनः प्राक्प्रतिभासितकार्यसारः, स च स्त्रीत्वे दोषे समानेपि सुरसाया जयप्रतिपत्तिः सिंहिकाया वधप्रतिपत्तिश्च ॥ १९० ॥ प्राप्तेति । प्राप्तभूयिष्ठ पारः प्राप्तप्रायतीरः ॥ १९१ ॥ ददर्शेति । मलयोपवनानि लङ्कामलय इति दक्षिणतीरे स्थितमलयः तस्योपवनानि ॥ १९२ ॥ सागरमिति । सागरस्य

दृष्ट्वा सूक्ष्मदर्शनेन । धृत्या धैर्येण । दाक्षिण्येन कौशलेन, क्षिप्रकारित्वेनेत्यर्थः । तस्याः संहारवैपुल्येन वा ॥ १८६ ॥ सा सिंहिका । हृतहृत् विदारितहृदया, अत एव विधुरा विह्वला ॥ ८७ ॥ अरिष्टं शुभम् ॥ ८८ ॥ ८९ ॥ प्रतिपन्नप्रयोजनः प्राप्तमकृतकार्यः ॥ १९० ॥ प्राप्तं प्राप्तप्रायं भूयिष्ठपारं महातीरं येन ॥ ९१ ॥ पतन् गच्छन् । मलयः लङ्कायां मलयो नाम गिरिः ॥ ९२ ॥ ९३ ॥ मतिं कर्तव्यनिश्चयम् ॥ १९४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पत्नीनां नदीनां त्रिकूटोत्पन्नानाम् । आत्मानं स्वशरीरम् । मतिं चक्रार मेन इति यावत् ॥ १९३ ॥ १९४ ॥ कथं मेन इत्यत्राह–कायवृद्धेमिति । ॥ १९५ ॥ तत इति । पुनः प्रकृतिमापेदे पुनर्निजाकारं प्राप्तवान् ॥ १९६ ॥ उक्तं शरीरसंक्षेपं दृष्टान्तार्थमनुवदति–तद्रूपमिति ॥ १९७ ॥ स चार्विति । प्रतिपन्नरूपः प्रतिपन्नस्वभावशरीरः, अभूदिति शेषः । समीक्षितात्मा समीक्षितदेहः । समवेक्षितार्थः निरूपितकार्यः । पूर्वोक्तोपसंहारश्लोक एषः ॥१९८॥

कायवृद्धिं प्रवेगं च मम दृष्ट्वैव राक्षसाः । मयि कौतूहलं कुर्युरिति मेने महाकपिः ॥ १९५ ॥ ततः शरीरं संक्षिप्य तन्महीधरसन्निभम् । पुनः प्रकृतिमापेदे वीतमोह इवात्मवान्॥ १९६॥ तद्रूपमतिसंक्षिप्य हनुमान् प्रकृतौ स्थितः । त्रीन् क्रमानिव विक्रम्य बलिवीर्यहरो हरिः ॥ १९७ ॥ स चारुनानाविधरूपधारी परं समासाद्य समुद्रतीरम् । परैरशक्यः प्रतिपन्नरूपः समीक्षितात्मा समवेक्षितार्थः ॥ १९८ ॥ ततस्स लम्बस्य गिरेस्समृद्धे विचित्रकूटे निपपात कूटे । सकेतकोद्दालकनालिकेरे महाद्रिकूटप्रतिमो महात्मा ॥ १९९ ॥ ततस्तु संप्राप्य समुद्रतीरं समीक्ष्य लङ्कां गिरिवर्यमूर्ध्नि । कपिस्तु तस्मिन्निपपात पर्वते विधूय रूपं व्यथयन्मृगद्विजान् ॥ २०० ॥

रामानु०–स चार्विति । पूर्वोक्तार्थसङ्ग्रहश्लोकोऽयम्। चारुनानाविधरूपधारी तत्तत्कार्यानुगुण्येन परिगृहीतरमणीयस्थूलसूक्ष्मादिरूपः परैः। सिंहिकादिभिः अशक्यः अप्रधृष्यः। सः परं समुद्रतीरमासाद्य समीक्षितात्मा समालोकितातिप्रमाणस्वशरीरः। समवेक्षितार्थः समालोचितकार्यः। प्रतिपन्नरूपः अङ्गीकृतदृष्टदंशदेहः, अभूदिति शेषः ॥१९८॥ तत इति । लम्बस्य लम्बमानस्येव स्थितस्य, अविज्ञाताग्रस्येत्यर्थः । विचित्रकूटे विविधाश्चर्यसमूहे । "कूटस्त्वस्त्रियां पुञ्जपालयोः" इति दर्पणः । उद्दालकाः श्लेष्मातकाः॥१९९॥ व्यथयन् मृगद्विजानित्यादिविशेषं वक्तुमुक्तमर्थमनुवदति–ततस्त्विति । समुद्रतीरं तीरोपर्याकाशम् । विधूय रूपं पूर्वरूपं विहाय । वृत्तमुपजातिः॥२००॥

तामेवाह–कायवृद्धिमित्यादि । कौतूहलम् आश्चर्यधिया दिदृक्षाम् ॥ १९५ ॥ प्रकृतिं निजाकारम् । वीतमोहः निवृत्ताविद्यः ॥ ९६ ॥ उक्तशरीरसंक्षेपं दृष्टान्तकथनार्थमनुवदति–तद्रूपमिति ॥ ९७ ॥ नानाविधरूपधारी परैः शत्रुभिः अशक्यः अप्रधृष्यः । समीक्षितात्मा समालोकितातिप्रमाणस्वशरीरः । समवेक्षितार्थः आलोचितानन्तरकार्यः । प्रतिपन्नरूपः अङ्गीकृतदृष्टदंशदेहः, अभूदिति शेषः ॥ ९८ ॥ लम्बस्य लम्बाख्यस्य गिरेः । विचित्रकूटे विचित्राः कूटाः अवान्तरशिखराणि यस्मिन तस्मिन । कूटे शृङ्गे निपपातेति सम्बन्धः ॥ ९९ ॥ उक्तार्थं पुनः श्लोकद्वयेनाह–ततस्त्वित्यादि ॥ २०० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अस्मिन् सर्गे सार्द्धैकाधिकद्विशतश्लोकाः ॥२०१॥ इति श्रीगोविन्द० श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने प्रथमः सर्गः ॥ १ ॥

स सागरमित्यादि ॥ १ ॥ रामानु०–त्रिकूटशिखरे लङ्कां स्थितामिति पाठः ॥ १ ॥ २ ॥ ३ ॥ समुद्रलङ्घने कुतो ग्लानिं नाध्यगच्छदित्यत्राह–शतानीति ॥४॥

रामानु०–समुद्रलङ्घने कुतः श्रमं नाध्यगच्छत्तत्राह–शतान्यहमिति । अहं सुबहून्यपि योजनानां शतानि क्रमेयं शतयोजनसंख्याकं सागरस्यान्तं किं पुनरिति, अमन्यतेति शेषः ॥ ४ ॥

स सागरं दानवपन्नगायुतं बलेन विक्रम्य महोर्मिमालिनम् । निपत्य तीरे च महोदधेस्तदा ददर्श लङ्कामरावतीमिव ॥ २०१ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे प्रथमः सर्गः ॥ १ ॥

स सागरमनाधृष्यमतिक्रम्य महाबलः । त्रिकूटशिखरे लङ्कां स्थितां स्वस्थो ददर्श ह ॥ १ ॥ ततः पादपमुक्तेन पुष्पवर्षेण वीर्यवान् । अभिवृष्टः स्थितस्तत्र बभौ पुष्पमयो यथा ॥ २ ॥ योजनानां शतं श्रीमांस्तीर्त्वाप्युत्तम विक्रमः । अनिश्वसन् कपिस्तत्र न ग्लानिमधिगच्छति ॥ ३ ॥ शतान्यहं योजनानां क्रमेयं सुबहून्यपि । किं पुनः सागरस्यान्तं सङ्ख्यातं शतयोजनम् ॥ ४ ॥ स तु वीर्यवतां श्रेष्ठः प्लवतामपि चोत्तमः । जगाम वेगवान् लङ्कां लङ्घयित्वा महोदधिम् ॥ ५ ॥ शाद्वलानि च नीलानि गन्धवन्ति वनानि च । गण्डवन्ति च मध्येन जगाम नगवन्ति च ॥ ६ ॥ शैलांश्च तरुसंछन्नान् वनराजीश्च पुष्पिताः । अभिचक्राम तेजस्वी हनुमान् प्लवगर्षभः ॥७॥

॥ ५ ॥ शाद्वलानीति । गण्डवन्ति स्थूलोपलवन्ति । नामैकदेशे नामग्रहणेन गण्डशब्देन गण्डशैल उच्यते ॥ ६ ॥ ७ ॥ रामानु०–शाद्वलानीति । वनानि पर्वतस्थवनानि । गण्डवन्ति स्थूलपाषाणवन्ति । मध्येन मध्यमार्गेण । नगवन्ति प्रशस्तवृक्षयुक्तानि ॥६॥ शैलानिति । अत्र शैलशब्दः शृङ्गपरः लम्बाख्यगिरेरुपरितनस्योच्यमानत्वात् ॥ ७ ॥

॥२०१॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां प्रथमः सर्गः ॥ १ ॥ ॥१॥ तत इति । पुष्पमयो यथा पुष्पमयकपि रित्येत्यर्थः ॥२॥ अनिश्वसन श्रमनिबन्धनदीर्घनिश्वासममुञ्चन् । तत्र लङ्घननिमित्ते । नाधिगच्छति नाध्यगच्छत् ॥ ३ ॥ अहं सुबहून्यपि योजनानां शतानि क्रमेयं शतयोजनं यथा तथा सङ्ख्यातं सागरस्यान्तं किं पुनरित्यमन्यतेति शेषः ॥ ४ ॥ ५ ॥ गण्डवन्ति स्थूलपाषाणवन्ति । नगवन्ति क्षुद्रगिरेवन्ति । शाद्वलानि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स इति । स तस्मिन्नित्यर्धं ददर्शेत्यपकृष्यते ॥ ८ ॥ रामानु०–स इति । तस्मिन्नचले लम्बगिरौ तिष्ठन् वनान्युपवनानि च ददर्शेत्यपकृष्य सम्बन्धनीयम् अन्यथा तच्छब्दोऽतिरिच्येत । नगाग्रे त्रिकूटशिखरे ॥ ८ ॥ सरलान् यूपसरलान् । कर्णिकारान् परिव्याधान् । खर्जूरान् कण्टकच्छदान् । प्रियालान् धनुःपटान् । मुचुलिन्दान् जम्बीरान् । प्रियङ्गून् फलिनः । गन्धपूर्णान् नीपान् असनान् । कोविदारान् चमरिकान् ॥ ९–११ ॥ आक्रीडान् सर्वसाधारणक्रीडा

स तस्मिन्नचले तिष्ठन् वनान्युपवनानि च । स नगाग्रे च तां लङ्कां ददर्श पवनात्मजः ॥ ८ ॥ सरलान् कर्णिकारांश्च खर्जूरांश्च सुपुष्पितान् । प्रियालान्मुचुलिन्दांश्च कुटजान् केतकानपि ॥ ९ ॥ प्रियङ्गून् गन्धपूर्णांश्च नीपान् सप्तच्छदांस्तथा । असनान् कोविदारांश्च करवीरांश्च पुष्पितान् ॥ १० ॥ पुष्पभारनिबद्धांश्च तथा मुकुलितानपि । पादपान् विहगाकीर्णान् पवनाधूतमस्तकान् ॥ ११ ॥ हंसकारण्डवाकीर्णा वापीः पद्मोत्पलायुताः । आक्रीडान् विविधान् रम्यान् विविधांश्च जलाशयान् ॥ १२ ॥ सन्ततान् विविधैर्वृक्षैः सर्वर्तुफलपुष्पितैः । उद्यानानि च रम्याणि ददर्श कपिकुञ्जरः ॥ १३ ॥ समासाद्य च लक्ष्मीवान् लङ्कां रावणपालिताम् । परिघाभिः सपद्माभिः सोत्पलाभिरलंकृताम् ॥ १४ ॥ सीतापहरणार्थेन रावणेन सुरक्षिताम् । समन्ताद्विचरद्भिश्च राक्षसैरुग्रधन्विभिः ॥ १५ ॥ काञ्चनेनावृतां रम्यां प्राकारेण महापुरीम् । गृहैश्च ग्रहसङ्काशैः शारदाम्बुदसन्निभैः ॥ १६ ॥

स्थानानि ॥ १२ ॥ उद्यानानि राजयोग्यानि । सर्वर्तुफलपुष्पितैः सर्वर्तुषु फलपुष्पाण्येषां सञ्जातानीति तैः ॥ १३ ॥ समासाद्येति । समासाद्य ददर्शेति क्रियाभेदाल्लङ्कापदावृत्तिः । लक्ष्मीवान् जयहेतुकान्तिमान् । उत्पलानि पद्मव्यतिरिक्तानि सरसिजानि ॥ १४ ॥ सीतापहरणम् अर्थः प्रयोजनं यस्य तेन । सुरक्षितत्वे हेतुरयम् । विचरद्भिश्चेत्यत्र चकारो भिन्नक्रमः । राक्षसैश्च सुरक्षिताम् ॥ १५ ॥ ग्रहसङ्काशैः नवग्रहतुल्यैः ॥ १६ ॥

वनानि च पश्यन्निति शेषः । मध्येन मार्गेण जगामेति सम्बन्धः ॥ ६ ॥ ७ ॥ सनगाग्रे शिखरसहिते अचले लम्बगिरौ तिष्ठन् ॥ ८–११ ॥ हंसेति । आक्रीडान् राजसम्बन्धित्वेपि साधारणोद्यानानि, उद्यानानि राज्ञामसाधारणानि ॥ १२ ॥ १३ ॥ लङ्कां लङ्कासमीपम् ॥ १४ ॥ सीतापहरणार्थेन सीतापहरणहेतुना अपहृत

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पाण्डराभिः सुधालिप्तभूमिकत्वात्सितताभिः । प्रतोलीभिः वीथीभिः । अट्टालकाः अट्टाः । पताकाध्वजमालिनीं लतादिरेखाविचित्रितपटविशिष्टाः पताकाः, मत्स्यमकराद्याकारा ध्वजाः । व्रीह्यादित्वादिनिः ॥ १७ ॥ लतापङ्क्तयः लताकाररेखाः ॥ १८–२० ॥ वप्रेति । वप्रेत्यादावपि ददर्श

पाण्डराभिः प्रतोलीभिरुच्चाभिरभिसंवृताम् । अट्टालकशताकीर्णां पताकाध्वजमालिनीम् ॥ १७ ॥ तोरणैः काञ्चनै र्दिव्यैर्लतापङ्क्तिविचित्रितैः । ददर्श हनुमान् लङ्कां दिवि देवपुरीमिव ॥ १८ ॥ गिरिमूर्ध्नि स्थितां लङ्कां पाण्डुरैर्भवनैः शुभैः । ददर्श स कपिश्रेष्ठः पुरमाकाशगं यथा ॥ १९ ॥ पालितां राक्षसेन्द्रेण निर्मितां विश्वकर्मणा । प्लवमाना मिवाकाशे ददर्श हनुमान् पुरीम् ॥ २० ॥ वप्रप्राकारजघनां विपुलाम्बुनवाम्बराम् । शतघ्नीशूलकेशान्तामट्टालक वतंसकाम् । मनसेव कृतां लङ्कां निर्मितां विश्वकर्मणा ॥ २१ ॥ द्वारमुत्तरमासाद्य चिन्तयामास वानरः ॥ २२ ॥ कैलासशिखरप्रख्यामालिखन्तीमिवाम्बरम् । डीयमानामिवाकाशमुच्छ्रितैर्भवनोत्तमैः ॥ २३ ॥

हनुमान् कपिरित्यनुवर्तते । वप्रं प्राकारमूर्तिकः । प्राकारः सालः । विपुलाम्बु परिघारूपं नवाम्बरं यस्यास्सा । शतघ्नी यन्त्रविशेषः । वतंसः अवतंसः । भागुरिमतेनाल्लोपः । वस्तुतो विश्वकर्मणा निर्मितां विचार्यमाणे केनापि मनसा निर्मितामिव स्थितामित्युत्प्रेक्षा ॥ २१ ॥ रामानु०–वप्रेति । वप्रं चयः, प्राकाराधारवेदिकेति यावत् । "स्याच्चयो वप्रमस्त्रियाम्" इत्यमरः । प्राकारः सालः । विपुलाम्बुनवाम्बराम् अत्राम्बुशब्देन परिघान्तर्गतजलमुच्यते । अट्टालकाः वतंसः कर्णाभरणं यस्याः सा । मनसा कृतामिव स्थिताम् । विश्वकर्मणा निर्मितां लङ्काम्, ददर्शेत्यनुषज्यते ॥ २१ ॥ द्वारमिति । उत्तरं द्वारमासाद्य चिन्तयामास मनसा निरूपयामास, वैदेहीदर्शनोपायमिति शेषः ॥ २२ ॥ कैलासेत्यादि । डीयमानां गच्छन्तीम् "डीङ् विहायसा गतौ" इत्यस्माच्छानच् ॥ २३–३० ॥

द्रव्यत्वेन हेतुना सुरक्षितामित्यर्थः ॥ १५ ॥ १६ ॥ प्रतोल्यः रथ्याः, तासां पाण्डुरत्वमुच्चत्वं च तत्रत्यसौधसम्बन्धेन । अट्टालकशताकीर्णां प्राकारवेदिकोपरि युद्धार्थं परिकल्पितमञ्चविशेषशतसङ्कुलाम् । मत्स्याद्याकारा ध्वजाः, ततोऽन्याः पताकाः । लतापङ्क्तयः विचित्ररचनाविशेषाः । ददर्श हनुमान् पुरीम् इति पुनर्दर्शनाभिधानं विशेषान्तरविवक्षया उपमानान्तरविवक्षया च ॥ १७–२० ॥ लङ्कां स्त्रीत्वेन निरूपयति–वप्रेति । वप्रः चयः, प्राकाराधारवेदिकेति यावत् । "स्याच्चयो वप्रमस्त्रियाम्" इत्यमरः । विपुलाम्बुनवाम्बराम्, अत्राम्बुशब्देन परिघान्तर्गतजलमुच्यते । निर्मितामित्यत्र ददर्शेत्यनुषज्यते ॥ २१ ॥ चिन्तया मास, लङ्का केन प्रदेशेन गन्तव्येति चिन्तयामासेति भावः ॥ २२ ॥ डीयमानामिवाकाशं प्रत्युद्गच्छन्तीमिव स्थिताम् । डीयमानत्वादिविशेषणविशिष्टां लङ्कां

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रामानु०–कैलासंत्यादि । आलिखन्तमिति लिङ्गव्यत्ययः । डीयमानामिव उद्गच्छन्तीमिव । डीयमानत्वादिविशेषणविशिष्टा या तस्या लङ्कायाः महतीं गुप्तिम्, सागरं च, रावणं घोरं रिपुं च निरीक्ष्य ज्ञात्वा वानराश्चिन्तयामासेति संबन्धः ॥ २३–२६ ॥ चिन्ताप्रकारमाह–आगत्यापीत्यादिना । अत्र अपिशब्देन दुस्तरसागरलङ्घनपूर्वकमागमनमेव दुर्घटमिति सूच्यते ॥ २७॥ न केवलं वानरैरसाध्या, किन्तु रामेणाप्यसाध्येत्याह--इमामिति । सः सालगिरिभूविदलनादिषु दृष्टपराक्रम इत्यर्थः ॥ २८ ॥ अवकाश इति । सान्त्वस्यावकाशाभावः आसुरप्रकृतित्वात् । दानस्यावकाशाभावः अर्थोपचितत्वात् । भेदस्यावकाशाभावः बलदर्पितत्वात् । युद्धस्यावकाशाभावः बुद्धिपराक्रमयुक्तत्वात् ॥ २९॥ चतुर्णामिति । गतिः प्राप्तिः, संभावितेति शेषः ॥३०॥

संपूर्णां राक्षसैर्घोरैर्नागैर्भोगवतीमिव । अचिन्त्यां सुकृतां स्पष्टां कुबेराध्युषितां पुरा ॥ २४ ॥ दंष्ट्रिभिर्बहुभिः शूरैः शूलपट्टिशपाणिभिः । रक्षितां राक्षसैर्घोरैर्गुहामाशीविषैरिव ॥ २५ ॥ तस्याश्च महतीं गुप्तिं सागरं च निरीक्ष्य सः । रावणं च रिपुं घोरं चिन्तयामास वानरः ॥ २६ ॥ आगत्यापीह हरयो भविष्यन्ति निरर्थकाः । नहि युद्धेन वै लङ्का शक्या जेतुं सुरैरपि ॥ २७ ॥ इमां तु विषमां दुर्गां लङ्कां रावणपालिताम् । प्राप्यापि स महाबाहुः किं करिष्यति राघवः ॥२८॥ अवकाशो न सान्त्वस्य राक्षसेष्वभिगम्यते । न दानस्य न भेदस्य नैव युद्धस्य दृश्यते ॥ २९ ॥ चतुर्णामेव हि गतिर्वानराणां महात्मनाम् । वालिपुत्रस्य नीलस्य मम राज्ञश्च धीमतः ॥ ३० ॥ यावज्जानामि वैदेहीं यदि जीवति वा न वा । तत्रैव चिन्तयिष्यामि दृष्ट्वा तां जनकात्मजाम् ॥ ३१ ॥

एवं विचार्य नायमेतद्विचारकाल इत्यनुशेते–यावदिति । यावत् यदा जीवति वा न वेति वैदेहीं जानामि । तत्रैव काले तां जनकात्मजां दृष्ट्वा चिन्तयिष्यामि । यद्वा यावच्छब्दोऽवधारणे । जानाम्येव जीवति वा नवेति जानाम्येव । यदि जीवति तदा तां जनकात्मजां दृष्ट्वा तत्रैव तत्काल एव चिन्त

तस्याः महतीं गुप्तिं च सागरं च रावणं घोरं रिपुं च निरीक्ष्य ज्ञात्वा वानरः चिन्तयामासेति सम्बन्धः ॥ २३–२६ ॥ चिन्ताप्रकारमेवाह–आगत्यापीत्यादिना ॥ २७ ॥ २८ ॥ अवकाशो नेति । आसुरप्रकृत्या अर्थोपचयबलदर्पपराक्रमसम्पन्नत्वात् सामादीनामवकाशो नास्तीति भावः ॥ २९ ॥ गतिः प्राप्तिः, सम्भावितेति शेषः ॥३०॥ यावदिति । जीवति वा नवेति वैदेहीं जानामि यावत् जानाम्येव । यदि जीवन्तं जनकात्मजां दृष्ट्वा तत्रैव तस्मिन् काल एव चिन्तयिष्यामीति योजना । यद्वा जीवति वा जीवतीति वैदेहीं न जानामि यावत् न जानाम्येव वा । उत यदि जीवति तां जनकात्मजां दृष्ट्वा तत्रैव तस्मिन्काल एव चिन्त

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यिष्यामीत्यन्वयः ॥ ३१ ॥ तत इति । चिन्तयामास, वैदेहीदर्शनोपायमिति शेषः ॥ ३२--३४ ॥ लक्ष्यालक्ष्येति । लक्ष्यशरीरत्वे राक्षसा गृह्णीयुः । अलक्ष्यशरीरत्वे सर्वा लङ्का न विचेतुं शक्या । कृत्यं साधयितुं प्रवेष्टुं कृत्यसाधनाय प्रवेष्टुम् प्राप्तकालं युक्तम् ॥ ३५ ॥ तामिति । विनिश्चित्य

ततः स चिन्तयामास मुहूर्तं कपिकुञ्जरः । गिरिशृङ्गे स्थितस्तस्मिन् रामस्याभ्युदये रतः ॥ ३२ ॥ अनेन रूपेण मया न शक्या रक्षसां पुरी । प्रवेष्टुं राक्षसैर्गुप्ता क्रूरैर्बलसमन्वितैः ॥३३॥ उग्रौजसो महावीर्या बलवन्तश्च राक्षसाः । वञ्चनीया मया सर्वे जानकीं परिमार्गता ॥ ३४ ॥ लक्ष्यालक्ष्येण रूपेण रात्रौ लङ्कापुरी मया । प्रवेष्टुं प्राप्तकालं मे कृत्यं साधयितुं महत् ॥३५॥ तां पुरीं तादृशीं दृष्ट्वा दुराधर्षां सुरासुरैः । हनुमांश्चिन्तयामास विनिःश्वस्य मुहुर्मुहुः ॥ ३६ ॥ केनोपायेन पश्येयं मैथिलीं जनकात्मजाम् । अदृष्टो राक्षसेन्द्रेण रावणेन दुरात्मना ॥३७॥ न विनश्येत् कथं कार्यं रामस्य विदितात्मनः । एकामेकश्च पश्येयं रहिते जनकात्मजाम् ॥ ३८ ॥ भूताश्चार्था विपद्यन्ते देशकालविरोधिताः । विक्लवं दूतमासाद्य तमः सूर्योदये यथा ॥ ३९ ॥

सीतान्वेषणप्रकारं विनिश्चित्य, मुहुर्मुहुस्तमेव चिन्तयामासेत्यर्थः ॥ ३६ ॥ ३७ ॥ रामानु०-तामिति । विनिःश्वस्य मुहुर्मुहुरित्यनेन समुद्रलङ्घनादपि लङ्काप्रवेशस्य दुष्करत्वं द्योत्यते ॥ ३६ ॥ न विनश्येदिति। एकश्च पश्येयमिति । अत्रापि कथमित्यनुषञ्जनीयम् । रहिते एकान्ते ॥ ३८॥ रामानु०-रहिते जनरहिते ॥३८॥ पण्डितेन मुहुर्मुहुर्विचार्य कार्याणि कर्तव्यानि नतु पण्डितमानिना सकृद्विचार्य कर्तव्यानि । तथा सति दोषः स्यादित्याह--भूताश्चेति । भूताश्चार्थाः सम्यगुपायप्रयोगान्निष्पन्नप्राया अप्यर्थाः । विक्लवम् अधीरम्, अविमृश्यकारिणम् । दूतमासाद्य देशकालविरोधितास्सन्तः । सूर्योदये तमो यथा तम इव तद्दूतस्याविमृश्यकारित्वेन सद्य एव विपद्यन्ते नश्यन्तीत्यर्थः ॥ ३९ ॥

यिष्यामीत्यर्थः ॥३१-३४॥ लक्ष्यालक्ष्येण रूपेण सूक्ष्मशरीरेण महत्कृत्यं सीतान्वेषणरूपं प्राप्तकालम् उचितमिति चिन्तयामासेति पूर्वेण सम्बन्धः ॥३५॥ तामिति । तां दृष्ट्वा चिन्तयामासेति सम्बन्धः । चिन्ताप्रकारमेवाह-केनेत्यादिना । तां पुरीमित्यादेः विचिन्वन्भवनमित्यन्तस्य ग्रन्थस्य हनुमान् चिन्तयामास इत्यनेन सम्बन्धः ॥३६-३८॥ भूताश्चार्थाः निष्पन्नान्यपि प्रयोजनानि । विक्लवम् अविवेकिनम् आसाद्य देशकालविरोधितास्सन्तः विपद्यन्ते नश्यन्तीति सम्बन्धः ॥ ३९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न केवलं कार्यहानिः किन्तु स्वाम्यादीनां बुद्धिशून्यतापि स्यादित्याह–अर्थेति । अत्रापि विक्लवं दूतमासाद्येत्यनुवर्तते । अर्थानर्थान्तरे अर्थानर्थयोः प्रयोजनसाधनयोः कार्याकार्ययोः अन्तरे विषये, निश्चिता राज्ञा सचिवैश्च निर्णीता बुद्धिः विक्लवं दूतमासाद्य न शोभते, अनर्थ

अर्थानर्थान्तरे बुद्धिर्निश्चितापि न शोभते । घातयन्ति हि कार्याणि दूताः पण्डितमानिनः ॥४०॥ न विनश्येत्कथं कार्यं वैक्लव्यं न कथं भवेत् । लङ्घन च समुद्रस्य कथं नु न वृथा भवेत् ॥ ४१ ॥ मयि दृष्टे तु रक्षोभी रामस्य विदितात्मनः । भवेद्व्यर्थमिदं कार्यं रावणानर्थमिच्छतः ॥ ४२ ॥ नहि शक्य क्वचित् स्थातुमविज्ञातेन राक्षसैः । अपि राक्षसरूपेण किमुतान्येन केनचित् ॥ ४३ ॥ वायुरप्यत्र न ज्ञातश्चरेदिति मतिर्मम । नह्यस्त्यविदितं किंचिद्राक्षसानां बलीयसाम् ॥ ४४ ॥ इहाहं यदि तिष्ठामि स्वेन रूपेण संवृतः । विनाशमुपयास्यामि भर्तुरर्थश्च हीयते ॥ ४५ ॥ तदहं स्वेन रूपेण रजन्यां ह्रस्वतां गतः । लङ्कामधिपतिष्यामि राघवस्यार्थसिद्धये ॥ ४६ ॥ रावणस्य पुरीं रात्रौ प्रविश्य सुदुरासदाम् । विचिन्वन् भवनं सर्वं द्रक्ष्यामि जनकात्मजाम् ॥ ४७ ॥

कारिणी भवतीत्यर्थः । इदमेव समर्थयते घातयन्तीति ॥४०॥ प्रागुक्तदोषाः स्वस्मिन्कथं न स्युरिति चिन्तयति–न विनश्येदिति । कार्यं रामकार्यम् । कथं केनोपायेन । न विनश्येत् किमद्यापराह्ण एव लङ्का प्रवेष्टव्या उत रात्रौ, किमनेनैव महता रूपेण प्रवेष्टव्या उत ह्रस्वेन रूपेणेत्यर्थः । वैक्लव्यं ममापाण्डित्यं कथं न भवेत् ॥४१॥ अपराह्णे प्रवेशदोषमाह–मयीति॥४२॥महता रूपेण प्रवेशं निराचष्टे–नहीति । स्वेन रूपेण स्वाभाविकमहता रूपेण।

किञ्च न केवलं कार्यहानिः किन्तु स्वाम्यादीनां बुद्धिशून्यतापि स्यादित्याह–अर्थेति । अर्थानर्थान्तरे कार्याकार्यविषये । निश्चितापि स्वामिना सचिवैस्सह निश्चितापि बुद्धिः विक्लवं दूतमासाद्येत्यनुकर्षः, न शोभते अकिञ्चित्करा भवतीत्यर्थः । तस्मात् दूतदोषादेव राज्ञां कार्यहानिरित्याह घातयन्ति हीति ॥ ४० ॥ प्रागुक्तदोषाः स्वस्मिन् यथा न स्युः तथा कर्तव्यमित्याह–नेति । कार्यं स्वामिकार्यम् । वैक्लव्यं बुद्धिहीनता । वैक्लव्यमित्यादौ स्वस्येति शेषः । तथा कर्तव्यमिति श्लोकशेषः ॥ ४१ ॥ प्रस्तुतकार्याविरोधाय यावदस्तमयं स्वगोपनमुचितमिति हृदि निधायाह–मयि दृष्ट इत्यादिना ॥ ४२-४५ ॥ स्वेन रूपेण

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

परिशेषाद्रात्रौ ह्रस्वरूपेणैव प्रवेष्टव्यमित्याह—तदहमिति ॥ ४३–४८ ॥ सूर्य इति । स्वेन रूपेण (पृ)वृषदंशकमात्रः बिडालप्रमाणः ॥४९॥ प्रदोषकाल इति । प्रविवेश प्रवेष्टुमुपक्रान्तः, चतुर्थे सर्गे प्रवेशस्य वक्ष्यमाणत्वात् । लङ्कादर्शनं तु त्रिकूटदर्शनास्थित्या ॥ ५० ॥ प्रासादेत्यादि । काञ्चनराजतैः

इति संचिन्त्य हनुमान् सूर्यस्यास्तमयं कपिः । आचकांक्षे तदा वीरो वैदेह्या दर्शनोत्सुकः ॥ ४८ ॥ सूर्ये चास्तं गते रात्रौ देहं संक्षिप्य मारुतिः । वृषदंशकमात्रः सन् बभूवाद्भुतदर्शनः ॥ ४९ ॥ प्रदोषकाले हनुमांस्तूर्णमुत्प्लुत्य वीर्यवान् । प्रविवेश पुरीं रम्यां सुविभक्तमहापथाम् ॥ ५० ॥ प्रासादमालाविततां स्तम्भैः काञ्चनराजतैः । शातकुम्भमयैर्जालैर्गन्धर्वनगरोपमाम् ॥ ५१ ॥ सप्तभूमाष्टभूमैश्च स ददर्श महापुरीम् । तलैः स्फटिकसंकीर्णैः कार्तस्वरविभूषितैः ॥ ५२ ॥ वैडूर्यमणिचित्रैश्च मुक्ताजालविभूषितैः । तलैः शुशुभिरे तानि भवनान्यत्र रक्षसाम् ॥५३॥ काञ्चनानि विचित्राणि तोरणानि च रक्षसाम् । लङ्कामुद्द्योतयामासुः सर्वतः समलंकृताम् ॥ ५४ ॥

स्तम्भैः शातकुम्भमयैर्जालैश्च उपलक्षिताम् । गन्धर्वनगरोपमामिति । गन्धर्वनगरं नाम नानारत्नमयगोपुरप्रासादादियुक्तनगरादिवद्भासमानमभ्रचित्रम् तद्वदाश्चर्यावहामित्यर्थः । यथोक्तम् –" अनेकरत्नाकृति खे विराजते पुरं पताकाध्वजतोरणान्वितम् । यदा तदा हस्तिमनुष्यवाजिनां पिबत्यसृग्भूरि रणे वसुन्धरा ॥" इति ॥ ५१ ॥ सप्तभूमाष्टभूमैश्चेति । भूमिशब्देन आसनशयनादियोग्यं तलमुच्यते । सप्त भूमयो येषां ते सप्तभूमाः । " कृष्णोदक् पाण्डुसंख्यापूर्वाया भूमेरजिष्यते" इत्यच् समासान्तः । एवमष्टभूमाः । सप्तभूमादिशब्देन तादृशाः प्रासादविशेषा उच्यन्ते । यद्वा प्रासादैरिति शेषः । तैरुपलक्षिताम् ॥५२–५४॥ रामानु०–प्रासादेत्यादि । अभ्रंलिहत्वातिविचित्रत्वाभ्यां गन्धर्वनगरोपम्यम् । स्फटिकसंकीर्णैः कार्तस्वरविभूषितैश्च तलैरुपलक्षितैः । सप्तभौमाष्टभौमाः, भूमिषु भवन्तीति भौमानि स्थलानि, सप्त भौमानि येषां ते सप्तभौमाः एवमष्टभौमाः, सप्तभौमाश्चाष्टभौमाश्च तैः, प्रसादैरिति शेषः । तैरुपलक्षितां पुरीं ददर्शेति योजना ॥ ५१॥ ५२ ॥ काञ्चनानीति ।

वानररूपेण ॥ ४६–४८ ॥ पृषदंशकमात्रः, पृषान् मूषिकान् दशतीति पृषदंशः मार्जारः । "ओतुर्बिडालो मार्जारः पृषदंशक आखुभुक् " इत्यमरः ॥ ४९ ॥ प्रदोषे प्रविवेश प्रवेष्टुमुपक्रान्तः, 'अद्वारेण महाबाहुः प्राकारमभिपुप्लुवे ' इति चतुर्थे सर्गे साक्षात्प्रवेशस्य वक्ष्यमाणत्वात्॥५०॥ प्रासादेति । स्तम्भादिभिरुपलक्षिताम् । भूमिषु भवन्तीति भौमानि तलानि, सप्त भौमानि येषां ते तथा । एवमष्टभौमाः । तैः प्रासादैरिति शेषः । तैरुपलक्षितां पुरीं स ददर्शेति योजना ॥५१–५३॥ रक्षसां

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रक्षसां तोरणानि रक्षोगृहद्वारस्थतोरणानि ॥ ५४ ॥ अचिन्त्येति । विषण्णः हृष्टश्चेति । अचिन्त्या दुष्प्रवेशेति च विषण्णः, यतोऽद्भुताकारा अतो विस्मयनी यतया हृष्टः ॥ ५५ ॥ स इति । पूर्वश्लोकेनायमेकान्वयः । सुधाधवलनिम्नोन्नतविमानाकारभवनमालिनीमित्यर्थः ॥ ५६ ॥ रामानु०—स पाण्डुरे त्यस्य दृष्टेति पूर्वेण सम्बन्धः । पाण्डुरोद्विद्धविमानमालिनीं सुधाधौतोन्नतसप्तभूमगृहमालिनीम् । " विमानोऽस्त्री देवयाने सप्तभूमे च सद्मनि " इति वैजयन्ती ॥ ५६ ॥ इदानीं चन्द्रो

अचिन्त्यामद्भुताकारां दृष्ट्वा लङ्कां महाकपिः । आसीद्विषण्णो हृष्टश्च वैदेह्या दर्शनोत्सुकः ॥ ५५ ॥ स पाण्डुरोद्विद्धविमानमालिनीं महार्हजाम्बूनदजालतोरणाम् । यशस्विनीं रावणबाहुपालितां क्षपाचरैर्भीमबलैः समावृताम् ॥ ५६ ॥ चन्द्रोऽपि साचिव्यमिवास्य कुर्वंस्तारागणैर्मध्यगतो विराजन् । ज्योत्स्नावितानेन वितत्य लोकमुत्तिष्ठते नैकसहस्ररश्मिः ॥५७॥ शङ्खप्रभं क्षीरमृणालवर्णमुद्गच्छमानं व्यवभासमानम् । ददर्श चन्द्रं स हरिप्रवीरः पोप्लूयमानं सरसीव हंसम् ॥५८॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे द्वितीयः सर्गः ॥२॥

दयकाल इत्याह—चन्द्रोपीति । मध्यगतः सन्निधानात्तारागणमध्यगतः । तारागणैरिति सहयोगे तृतीया । ज्योत्स्नावितानेन लोकं वितत्य व्याप्य उत्तिष्ठते आविर्भवति स्म । " उदोऽनूर्ध्वकर्मणि " इत्यात्मनेपदम् ॥ ५७ ॥५८ ॥ रामानु०—चन्द्र इति । चन्द्रोपि नैकसहस्ररश्मिः ज्योत्स्नावितानेन लोकं वितत्य अस्य साचिव्यं कुर्वन्निव विराजन् मध्यगतः तारागणैः सह उत्तिष्ठते प्रादुरभूदित्यन्वयः । अत्र तिष्ठतेः परस्मैपदित्वात् " उदोनूर्ध्वकर्मणि " इत्यात्मनेपदम् । नैकसहस्ररश्मिरित्यत्र नञर्थस्य नशब्दस्य सुप्सुपेति समासः । सागरमैनाकदिवाकरादिवच्चन्द्रोपि साचिव्यं कुर्वन् प्रादुरभूदित्यपिशब्देनावगम्यते ॥ ५७ ॥ शङ्खप्रभमिति । पोप्लूयमानम् उड्डीयमानम् ॥ ५८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्वितीयः सर्गः ॥ २ ॥

तोरणानि रक्षोगृहस्थद्वारतोरणानि ॥ ५४ ॥ विषण्णः लङ्कायां दुर्धर्षत्वाद्विषण्णः, अत्यद्भुतत्व त हृष्टश्च ॥ ५५ ॥ पाण्डुरोद्विद्धविमानमालिनीं धवलोन्नतसप्तभौम प्रासादपङ्क्तिमतीम् ॥ ५६ ॥ ज्योत्स्नावितानेन लोकान्वितत्य विस्तारीकृत्य अस्य हनूमतः मैनाकसिन्धुवत साचिव्यं कुर्वन्निव कुर्वन्निव विराजन् मध्यगतः तारागणमध्यगतः तारागणैः सह उत्तिष्ठते प्रादुरभूदित्यन्वयः ॥ ५७ ॥ पोप्लूयमानं भृशं प्लवमानम् ॥ ५८ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्व दीपिकाख्यायां सुन्दरकाण्डव्याख्यायां द्वितीयः सर्गः ॥ २ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स लम्बेत्यादि। लम्बे लम्बाख्ये। लम्बशिखरे लम्बगिरिशिखरे इति चाहुः। यद्वा लम्बे लम्बमान इव स्थिते। लम्बशिखरे त्रिकूटशिखरे। सत्त्वं व्यवसायम्। धैर्यमिति यावत्। विवेश प्राप ॥ १–३ ॥ रामानु०–पूर्वसर्गोक्तं लङ्काप्रवेशोपक्रमं विस्तरेणाह–स लम्बशिखर इत्यादिना। सः सागराङ्गेशतरणेन प्रसिद्धः। महासत्त्वः समुद्र

स लम्बशिखरे लम्बे लम्बतोयदसन्निभे। सत्त्वमास्थाय मेधावी हनुमान्मारुतात्मजः॥ १॥ निशि लङ्कां महासत्त्वो विवेश कपिकुञ्जरः। रम्यकाननतोयाढ्यां पुरीं रावणपालिताम् ॥ २ ॥ शारदाम्बुधरप्रख्यैर्भवनैरुपशोभिताम्। सागरोपमनिर्घोषां सागरानिलसेविताम् ॥ ३ ॥ सुपुष्टबलसंघुष्टां यथैव विटपावतीम्। चारुतोरणनिर्यूहां पाण्डुर द्वारतोरणाम् ॥४॥ भुजगाचरितां गुप्तां शुभां भोगवतीमिव। तां सविद्युदघनाकीर्णां ज्योतिर्मार्गनिषेविताम् ॥५॥ मन्दमारुतसञ्चारां यथेन्द्रस्यामरावतीम्। शातकुम्भेन महता प्राकारेणाभिसंवृताम् ॥ ६ ॥ किङ्किणीजालघोषाभिः पताकाभिरलंकृताम्। आसाद्य सहसा हृष्टः प्राकारमभिपेदिवान्॥७॥ विस्मयाविष्टहृदयः पुरीमालोक्य सर्वतः ॥८॥ जाम्बूनदमयैर्द्वारैर्वैडूर्यकृतवेदिकैः। वज्रस्फटिकमुक्ताभिर्मणिकुट्टिमभूषितैः। तप्तहाटकनिर्यूहै राजतामलपाण्डुरैः॥९॥

लङ्घनादावप्रतिहतशक्तिः हनुमान्। लम्बे लम्बमानाकारे। लम्बतोयदसन्निभे लम्बशिखरे लम्बपर्वतशिखरे। मेधावी तत्कालोचितकर्तव्याविषयप्रज्ञायुक्तः सन्। सत्त्वमास्थाय लङ्काप्राप्तिमात्रो पयुक्तलङ्घनशक्तिमास्थाय निशि विवेशेति सम्बन्धः॥ १ ॥ २ ॥ सागरेति। सागरोपमनिर्घोषां सागरनिर्घोषोपमनिर्घोषाम्॥३॥ विटपावतीम् अलकाम्। निर्यूहो मत्तवारणः। पाण्डुरद्वारतोरणां पाण्डुरे द्वारतोरणे यस्यास्ताम् ॥४–७॥ रामानु०–विटपावतीम् अलकाम्। "क्षयः पुण्यजनानां स्यादलका विटपावती" इति वचनात्। चारुतोरणनिर्यूहां निर्यूहो मत्तवारणः, तोरणस्य निर्यूहः तोरणनिर्यूहः, चारुः तोरणनिर्यूहो यस्यास्ताम्। पाण्डुरद्वारतोरणां पाण्डुरे सुधाधवलिते द्वारतोरणे यस्यास्ताम्। शातकुम्भेन स्वर्णविकारेण। प्राकार मभिपेदिवानिति। प्राकारशब्देन प्राकारसमीपो लक्ष्यते।' अद्वारेण महाबाहुः प्राकारमभिपुप्लुवे' इत्युपरि वक्ष्यमाणत्वात् ॥ ४–७ ॥ विस्मयाविष्टहृदयः, अभूदिति शेषः ॥८॥ पुनर्हर्षहेतूनाह–जाम्बूनदमयैरित्यादिना। जाम्बूनदमयैर्द्वारैरित्यादौ सहयोगे तृतीया। वज्रस्फटिकमुक्ताभिरित्यत्रापि कृतवेदिकैरिति सम्बध्यते। स इति। लम्बे लम्बाकारे। लम्बशिखरे लम्बगिरिशृङ्गे। सत्त्वमास्थाय बलमास्थाय ॥१–३॥ सुपुष्टेति। विटपावतीम् अलकापुरीम्। चारुतोरणनिर्यूहां निर्यूहः मत्तवारणः, तोरणस्य निर्यूहः तोरणनिर्यूहः, चारुः तोरणनिर्यूहो यस्यां ताम्। पाण्डरद्वारतोरणाम् पाण्डरे सुधा धवलिते द्वारे तोरणं यस्यां ताम् ॥४–८॥ जाम्बूनद

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

राजतामलपाण्डुरैः अवयवैः ॥ ९ ॥ रामानु०—जाम्बूनदमयैर्द्वारैरित्युपलक्षणे तृतीया । राजहंसनिषेवितैरित्यन्तविशेषणविशिष्टैर्द्वारैरुपलक्षितां लङ्कां नगरीं समीक्ष्येति संबन्धः । वज्र स्फटिकमुक्ताभिः, भूषितैरिति शेषः । तप्तहाटकनिर्यूहैः तप्तहेममयमत्तवारणैः । राजतामलपाण्डुरैः रजतमयामलपाण्डुरोपरिप्रदेशैरित्यर्थः ॥ ९ ॥ स्फाटिकान्तरपांसुभिः स्फटिक मयाङ्गणपांसुभिः । सञ्जवनं चतुश्शालम् ॥ १०॥११॥ रामानु०—स्फाटिकान्तरपांसुभिः, अन्तरमवकाशः, अङ्गणमिति यावत् । स्फाटिकाः अन्तरपांसवो येषां तैः । चारुसञ्ज

वैडूर्यकृतसोपानैः स्फाटिकान्तरपांसुभिः । चारुसञ्जवनोपेतैः खमिवोत्पतितैः शुभैः ॥ १० ॥ क्रौञ्चबर्हिणसंघुष्टे राजहंसनिषेवितैः । तूर्याभरणनिर्घोषैः सर्वतः प्रतिनादिताम् ॥ ११ ॥ वस्वोकसाराप्रतिमां तां वीक्ष्य नगरीं ततः । खमिवोत्पतितुंकामां जहर्ष हनुमान् कपिः ॥ १२ ॥ तां समीक्ष्य पुरीं रम्यां राक्षसाधिपतेः शुभाम् । अनुत्तमा मृद्धियुतां चिन्तयामास वीर्यवान् ॥ १३ ॥ नेयमन्येन नगरी शक्या धर्षयितुं बलात् । रक्षिता रावणबलैरुद्यतायुध धारिभिः ॥ १४ ॥ कुमुदाङ्गदयोर्वापि सुषेणस्य महाकपेः । प्रसिद्धेयं भवेद्भूमिर्मैन्दद्विविदयोरपि ॥१५॥ विवस्वत स्तनूजस्य हरेश्च कुशपर्वणः । ऋक्षस्य केतुमालस्य मम चैव गतिर्भवेत् ॥ १६ ॥

वनोपेतैः रमणीयचतुःशालोपेतैः । " सभा सञ्जवनं त्विदम् । चतुःशालम् " इत्यमरः ॥ १० ॥ वस्वोकसारा अलका । यद्वा वस्वोकसारा पूर्वदिगवस्थिता शक्रपुरी । "वस्वोकसारा शक्रस्य पूर्वस्यां दिशि वै पुरी " इति पुराणवचनात् ॥१२–१४॥ वस्वोकसाराप्रतिमां, यथैव विटपावतीमित्यत्रालकासाम्यस्य पूर्वमुक्तत्वा दत्र वस्वोकसाराप्रतिमामिति पूर्वदिगवस्थितशक्रपुरीसाम्यमुच्यते । " वस्वोकसारा शक्रस्य याम्या संयमनी तथा । पुरी सुखा जलेशस्य सोमस्य च विभावती ॥ " इति श्रीविष्णु पुराणवचनात् वस्वोकसाराशब्दस्य शक्रपुरीवाचकत्वम् ॥ १२ ॥ प्रसिद्धेयमिति । इयं लङ्का विदिता भवेत् ॥ १५ ॥ रामानु०—कुमुदेति । प्रसिद्धा दुष्प्रवेशत्वेन प्रसिद्धेयं नगरी कुमुदाङ्गदयोः महाकपेः सुषेणस्यापि मैन्दद्विविदयोरपि भूमिर्भवेद्विषयो भवेत् ॥ १५ ॥ विवस्वत इति । गतिस्तु सुग्रीवस्य कुशपर्वणः केतुमालस्य मम

मयैर्द्वारैरित्युपलक्षणे तृतीया। राजहंसनिषेवितैरित्यन्तविशेषणविशिष्टैर्द्वारैरुपलक्षितां लङ्कानगरीं समीक्ष्य हनुमान् जहर्षेति सम्बन्धः । वज्रस्फटिकमुक्ताभिः, भूषितैरिति शेषः । राजतामलपाण्डरैः रजतमयामलपाण्डरोपरिप्रदेशैः । चारुसञ्जवनोपेतैः रमणीयचतुश्शालोपेतैः । " सभा सञ्जवनं त्विदम् । चतुःशालम् " इत्यमरः ॥९–११॥ वस्वोकसारा पूर्वदिक्स्थेन्द्रपुरी । उत्पतितुंकामाम् उत्पतितुमिव स्थिताम्॥१२–१४॥ अन्येषामसाध्यत्वेऽप्येतेषां साध्येत्याह--कुमुदाङ्गदयोरिति ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चैव भवेत् । पूर्वं नीलादीनामेव गतिरुक्ता । अत्र त्वन्येषामित्युक्तिश्चिन्ताप्रकारविशेषः ॥ १६ ॥ १७ ॥ रामानु०—विवस्वत इति । अत्र इयमित्यनुषज्यते । विवस्वत स्तनूजस्य कुशपर्वणो हरेश्च ऋक्षस्य केतुमालस्य मम चैव गतिर्भवेत् विषयो भवेत् । मम चेति पश्चान्निर्देशेन सर्वोत्तरेणापि हनुमता स्वनैच्यमनुसंहितमित्यवगम्यते ॥ १६ ॥ समीक्ष्येति । विक्रान्तं विक्रमम् । भावे निष्ठा । प्रीतिमानभवत्, रामलक्ष्मणाभ्यामनायासेन जेतुं शक्येति मत्वा प्रीतिमानभूदित्यर्थः ॥ १७ ॥ तां रत्नेत्यत्र ददर्शेत्यपकृष्यते । न त्वेकं वाक्यं

समीक्ष्य तु महाबाहू राघवस्य पराक्रमम् । लक्ष्मणस्य च विक्रान्तमभवत्प्रीतिमान् कपिः ॥ १७ ॥ तां रत्नवसनोपेतां गोष्ठागारावतंसकाम् । यन्त्रागारस्तनीमृद्धां प्रमदामिव भूषिताम् ॥ १८ ॥ तां नष्टतिमिरां दीप्तैर्भास्वरैश्च महागृहैः । नगरीं राक्षसेन्द्रस्य ददर्श स महाकपिः ॥ १९ ॥ अथ सा हरिशार्दूलं प्रविशन्तं महाबलम् । नगरी स्वेन रूपेण ददर्श पवनात्मजम् ॥ २० ॥ सा तं हरिवरं दृष्ट्वा लङ्का रावणपालिता । स्वयमेवोत्थिता तत्र विकृताननदर्शना ॥ २१ ॥ पुरस्तात्कपिवर्यस्य वायुसूनोरतिष्ठत । मुञ्चमाना महानादमब्रवीत्पवनात्मजम् ॥ २२ ॥ कस्त्वं केन च कार्येण इह प्राप्तो वनालय । कथयस्वेह यत्तत्त्वं यावत्प्राणा धरन्ति ते ॥ २३ ॥ न शक्यं खल्वियं लङ्का प्रवेष्टुं वानर त्वया । रक्षिता रावणबलैरभिगुप्ता समन्ततः ॥ २४ ॥

श्लोकद्वयम्, तच्छब्दद्वयप्रयोगात्प्रथमे श्लोके स्त्रीसाम्योक्तेश्च॥१८–२३॥ रामानु०—तामिति । अत्र ददर्शेत्यपकृष्यते । यद्वा एकस्य तच्छब्दस्य प्रसिद्धिपरत्वेन श्लोकद्वय मेकं वाक्यम् ॥ १८ ॥ १९ ॥ अथेति । स्वेन रूपेण अधिदेवतारूपेण ॥ २० ॥ पुरस्तादिति । अतिष्ठत तस्मै स्वात्मानं प्रदर्शितवती । " प्रकाशनस्थेयाख्ययोश्च " इत्यात्मनेपदम् ॥ २२ ॥ क इति । ते तव प्राणाः यावद्धरन्ति म्रियन्ते तावद्यत्तत्त्वं तत्कथयस्व कथय । "धृङ्, अवस्थाने" विकरणादिप्रत्यय आर्षः । यावत् प्राणान् हरामि त इति वा पाठः ॥ २३ ॥ नेति ।

प्रसिद्धा दुष्प्रवेशत्वेन प्रसिद्धेयं नगरी कुमुदाङ्गदादीनामपि भूमिः विषयः भवेत् । विवस्वतस्तनूजस्य सुग्रीवस्य कुशपर्वणः मम च गतिर्भवेत् गम्या भवेत् ॥ १५ ॥ १६ ॥ विक्रान्तं विक्रमम् । रामलक्ष्मणाभ्यामनायासेन जेतुं शक्येति मत्वा प्रीतिमानभूदित्यर्थः ॥ १७ ॥ तां रत्नेत्यादिश्लोकद्वयमेकं वाक्यम् । तत्रैकस्त च्छब्दः प्रसिद्धिपरःअपर प्रकृतपरामर्शी ॥ १८ ॥ १९ ॥ अथेति । स्वेन रूपेण अधिदेवतारूपेण ॥२०॥२१॥ पुरस्तादिति । अतिष्ठत स्वात्मानं प्रकाशितवती॥२२॥ ते तव प्राणा यावद्धरन्ति म्रियन्ते तावत् यत्तत्त्वं तत्कथयस्व ॥ २३–२७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अभिगुप्ता समावृतेत्यर्थः । अतो न रक्षितेत्यनेन पुनरुक्तिः ॥ २४–३३ ॥ रामानु०–न शक्यमिति । लिङ्गसामान्ये नपुंसकम् । तथा चोक्तम् भगवता भाष्यकारेण– " श्वमांसेनापि शक्यं क्षुदपहन्तुम् " इति । रावणबलैः समन्ततः अभिगुप्ता समन्ततः संवृता अत एव रक्षिता ॥ २४ ॥ अहमिति । आज्ञाप्रतीक्षा आज्ञानुवर्तिनी ॥ २८ ॥ अहं हि नगरी लङ्का स्वयमेव प्लवङ्गमेति । स्वयमेव सर्वतः सर्वं परिरक्षामीति संबन्धः ॥ ३० ॥ द्रक्ष्यामीति । इत्यर्थम् एतदर्थम् ॥ ३३ ॥ उपवनानि गृहोद्यानानि । काननानि शून्या

अथ तामब्रवीद्वीरो हनूमानग्रतः स्थिताम् । कथयिष्यामि ते तत्त्वं यन्मां त्वं परिपृच्छसि ॥ २५ ॥ का त्वं विरूप नयना पुरद्वारेऽवतिष्ठसि । किमर्थं चापि मां रुद्ध्वा निर्भर्त्सयसि दारुणा ॥ २६ ॥ हनुमद्वचनं श्रुत्वा लङ्का सा कामरूपिणी । उवाच वचनं क्रुद्धा परुषं पवनात्मजम् ॥ २७ ॥ अहं राक्षसराजस्य रावणस्य महात्मनः । आज्ञा प्रतीक्षा दुर्धर्षा रक्षामि नगरीमिमाम् ॥ २८ ॥ न शक्या मामवज्ञाय प्रवेष्टुं नगरी त्वया । अद्य प्राणैः परित्यक्तः स्वप्स्यसे निहतो मया॥२९॥ अहं हि नगरी लङ्का स्वयमेव प्लवङ्गम । सर्वतः परिरक्षामि ह्येतत्ते कथितं मया ॥३०॥ लङ्काया वचनं श्रुत्वा हनुमान् मारुतात्मजः । यत्नवान् स हरिश्रेष्ठः स्थितः शैल इवापरः ॥ ३१ ॥ स तां स्त्रीरूप विकृतां दृष्ट्वा वानरपुङ्गवः । आबभाषेऽथ मेधावी सत्त्ववान् प्लवगर्षभः ॥३२॥ द्रक्ष्यामि नगरीं लङ्कां साट्टप्राकार तोरणाम् । इत्यर्थमिह संप्राप्तः परं कौतूहलं हि मे ॥ ३३ ॥ वनान्युपवनानीह लंकायाः काननानि च । सर्वतो गृह मुख्यानि द्रष्टुमागमनं हि मे ॥ ३४ ॥ तस्य तद्वचनं श्रुत्वा लंका सा कामरूपिणी । भूय एव पुनर्वाक्यं बभाषे परुषाक्षरम् ॥ ३५ ॥ मामनिर्जित्य दुर्बुद्धे राक्षसेश्वरपालिताम् । न शक्यमद्य ते द्रष्टुं पुरीयं वानराधम ॥ ३६ ॥

रण्यानि ॥ ३४ ॥ भूयः अतिशयेन परुषाक्षरमित्यन्वयः ॥ ३५ ॥ मामिति । शक्यामेत्येतद्व्ययम् । तदाह कालिदासः–" शक्यमरविन्दसुरभिः कणवाही मालिनीतरङ्गाणाम् । अङ्गैरनङ्गतप्तैरविरलमालिङ्गितुं पवनः ॥" इति । पुरीरूपं वस्तु शक्यमिति शक्यपुर्योस्सामानाधिकरण्यं वा ॥ ३६ ॥ ॥१८॥

अहमिति । आज्ञाप्रतीक्षा आज्ञानुवर्तिनी ॥ २८–३३ ॥ वनानीति । उपवनानि कृत्रिमवनानि । वनानि क्षुद्राणि ॥ ३४ ॥ भूयः भृशं परुषाक्षरं वाक्यं पुनर्बभाषे

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तत इति । यास्ये यास्यामि । इत्युवाचेति सम्बन्धः ॥ ३७ ॥ वेगिता सञ्जातवेगा ॥ ३८ ॥ संवर्तयामास सङ्कोचयामास ॥ ३९–४४ ॥ प्रसीदेति ।

ततः स कपिशार्दूलस्तामुवाच निशाचरीम् । दृष्ट्वा पुरीमिमां भद्रे पुनर्यास्ये यथागतम् ॥ ३७ ॥ ततः कृत्वा महा नादं सा वै लङ्का भयावहम् । तलेन वानरश्रेष्ठं ताडयामास वेगिता ॥३८॥ ततः स कपिशार्दूलो लङ्कया ताडितो भृशम् । ननाद सुमहानादं वीर्यवान् पवनात्मजः ॥३९॥ ततः संवर्तयामास वामहस्तस्य सोऽङ्गुलीः । मुष्टिनाऽभि जघानैनां हनूमान् क्रोधमूर्च्छितः ॥ ४० ॥ स्त्री चेति मन्यमानेन नातिक्रोधस्स्वयं कृतः ॥ ४१ ॥ सा तु तेन प्रहा रेण विह्वलाङ्गी निशाचरी । पपात सहसा भूमौ विकृताननदर्शना ॥४२॥ ततस्तु हनुमान् प्राज्ञस्तां दृष्ट्वा विनिपातिताम् । कृपां चकार तेजस्वी मन्यमानः स्त्रियं तु ताम् ॥ ४३ ॥ ततो वै भृशसंविग्ना लंका सा गद्गदाक्षरम् । उवाचागर्वितं वाक्यं हनुमन्तं प्लवङ्गमम् ॥ ४४ ॥ प्रसीद सुमहाबाहो त्रायस्व हरिसत्तम । समये सौम्य तिष्ठन्ति सत्त्ववन्तो महाबलाः ॥ ४५ ॥ अहं तु नगरी लङ्का स्वयमेव प्लवङ्गम । निर्जिताऽहं त्वया वीर विक्रमेण महाबल ॥ ४६ ॥ इदं तु तथ्यं शृणु वै ब्रुवन्त्या मे हरीश्वर । स्वयंभुवा पुरा दत्तं वरदानं यथा मम ॥ ४७ ॥

समये स्त्रीवधवर्जनव्यवस्थायाम् । सत्त्ववन्तः धैर्यवन्तः ॥ ४५ ॥ अहं त्वित्यर्थे भिन्नं वाक्यम्, एकवाक्यत्वेऽहंशब्दस्य पुनरुक्तिः ॥ ४६ ॥ ४७ ॥

इति सम्बन्धः ॥ ३५–३७ ॥ वेगिता सञ्जातवेगा ॥ ३८ ॥ ३९ ॥ अङ्गुलीः संवर्तयामास मुष्टिमाबबन्धेत्यर्थः ॥ ४० ॥ ४१ ॥ विकृताननदर्शना विकृताननदृष्टिः ॥ ४२–४४ ॥ प्रसीदेति । समये स्त्री न हन्तव्येति व्यवस्थायाम् ॥ ४५ ॥ दुर्जयत्वज्ञापनाय स्वस्वरूपं तावदाह–अहं त्विति । अहं स्वयं साक्षात् लङ्कानगर्यैव लङ्कानगर्यधिष्ठात्री देवतैव, अधिष्ठानदेवतात्वादेवाहं दुर्जयेत्यर्थः । ततः किमत आह–निर्जितेति । दुर्जयाऽप्यहं त्वया बलान्निर्जिता अतः सत्यं सर्वे लङ्कान्तर्वर्तिनो राक्षसाः निर्जिता इति भावः ॥ ४६ ॥ स्वनिर्जयेन रक्षसां निर्जितत्वप्रतिपादनस्य कारणमाह–इदमित्यादिना । वरदानं दत्तम् वरदानं कृतमित्यर्थः ॥ ४७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वरदानस्वरूपमाह–यदेति । अत्र रावणस्य दिग्विजये नन्दिकेश्वरादिभिर्लङ्कायाः सद्यो विनाशशापे दत्ते सा ब्रह्माणं गत्वा प्रार्थयामास, विनाशो मे मा भूदिति । स च तस्यै वरमदात्, तव सद्यो विनाशो न भविष्यति यदा तु वानरस्त्वामभिभविष्यति तदा तु विनाशो भविष्यतीति कथोन्नीयते

यदा त्वां वानरः कश्चिद्विक्रमाद्वशमानयेत् । तदा त्वया हि विज्ञेयं रक्षसां भयमागतम् ॥४८॥ स हि मे समयस्सौम्य प्राप्तोऽद्य तव दर्शनात् । स्वयम्भूविहितस्सत्यो न तस्यास्ति व्यतिक्रमः ॥ ४९ ॥ सीतानिमित्तं राज्ञस्तु रावणस्य दुरात्मनः । रक्षसां चैव सर्वेषां विनाशः समुपागतः ॥ ५० ॥ तत्प्रविश्य हरिश्रेष्ठ पुरीं रावणपालिताम् । विधत्स्व सर्वकार्याणि यानि यानीह वाञ्छसि ॥ ५१ ॥ प्रविश्य शापोपहतां हरीश्वरः शुभां पुरीं राक्षसमुख्यपालिताम् । यदृच्छया त्वं जनकात्मजां सतीं विमार्ग सर्वत्र गतो यथासुखम् ॥ ५२ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे तृतीयः सर्गः ॥ ३ ॥

स निर्जित्य पुरीं श्रेष्ठां लङ्कां तां कामरूपिणीम् । विक्रमेण महातेजा हनूमान् कपिसत्तमः । अद्वारेण महाबाहुः प्राकारमभिपुप्लुवे ॥ १ ॥ प्रविश्य नगरीं लंकां कपिराजहितंकरः । चक्रेऽथ पादं सव्यं च शत्रूणां स तु मूर्धनि ॥२॥

॥ ४८–५१ ॥ प्रविश्येति । शापो नन्दिकेश्वरादिकृतः । यदृच्छयेत्यस्य गत इति सम्बन्धः । यदृच्छयाऽत्र प्राप्तस्त्वमित्यर्थः ॥ ५२ ॥ रामानु०–प्रविश्येति । हरीश्वरस्त्वं यदृच्छया स्वैरं विमार्गेति सम्बन्धः ॥ ५२ ॥ इति श्रीगोविन्द० श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने तृतीयः सर्गः॥३॥

स निर्जित्येत्यादि । अद्वारेणेत्यनेन लङ्कापरिभवो राक्षसैर्न ज्ञातुं शक्य इति द्योत्यते ॥ १ ॥ रामानु०–अद्वारेणेति । "ग्रामं वा नगरं वापि पत्तनं वा परस्य हि । विशेषात्समये सौम्य न द्वारेण विशेन्नृपः ॥ " इत्युक्तप्रकारेण अद्वारेण प्रविष्टवान् ॥ १ ॥ प्रविश्येति । चक्र इति । शत्रुदेशप्रवेशे प्रथमं सव्यपादः कार्यः स तु शत्रोर्मूर्ध्नि

वरस्वरूपमाह–यदेति । अत्र रावणाधिक्षेपक्षुभितनन्दिकेश्वरशापात् सद्यः प्राप्तो विनाशः स्वयम्भूवरप्रसादात् वानरास्कन्दनपर्यन्तं प्रतिबद्ध इति कथाऽनुसन्धेया ॥ ४८–५१ ॥प्रविश्येति । यदृच्छया स्वैरम् ॥ ५२ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां तृतीयः सर्गः ॥ ३ ॥ अद्वारेणेति । शत्रुस्थानमद्वारेण प्रवेष्टव्यमिति शास्त्रादद्वारेणेत्युक्तम् ॥ १ ॥ प्रविश्येति । प्रवेष्टुमुपक्रम्य सव्यं पादं चक्रे, अग्रे इति शेषः । सः अग्रतः कृत

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कृतो भवेदिति राजशास्त्रम् । अनेन प्रथमं सव्यं पादं लङ्कायां कृतवानित्यर्थः सिद्धः । तदाह बृहस्पतिः—" प्रयाणकाले च गृहप्रवेशे विवाहकालेऽपि च दक्षिणाङ्घ्रिम् । कृत्वाऽग्रतः शत्रुपुरप्रवेशे वामं निदध्याच्चरणं नृपालः ॥ " इति ॥ २–४ ॥ रामानु०–प्रविश्येति । प्रविश्य प्रवेष्टुमुपक्रम्य । सव्यं पादं चक्रे अग्रत इति शेषः । "प्रयाणकाले च गृहप्रवेशे विवाहकालेऽपि च दक्षिणाङ्घ्रिम् । कृत्वाऽग्रतः शत्रुपुरप्रवेशे वामं निदध्याच्चरणं नृपालः ॥" इति बृहस्पतिवचनप्रकारेण सव्यं पादमग्रतः कृतवान् । सः अग्रतः

प्रविष्टः सत्त्वमंपन्नो निशायां मारुतात्मजः । स महापथमास्थाय मुक्तापुष्पविराजितम् ॥ ३ ॥ ततस्तु तां पुरीं लङ्कां रम्यामभिययौ कपिः ॥ ४ ॥ हसितोत्कृष्टनिनदैस्तूर्यघोषपुरस्सरैः । वज्राङ्कुशनिकाशैश्च वज्रजालविभूषितैः । गृहमेघैः पुरी रम्या बभासे द्यौरिवाम्बुदैः ॥ ५ ॥ प्रजज्वाल तदा लङ्का रक्षोगणगृहैः शुभैः ॥ ६ ॥ सिताभ्रसदृशैः शृङ्गैः पद्मस्वस्तिकसंस्थितैः । वर्धमानगृहैश्चापि सर्वतः सुविभूषिता । [गृहमुख्यैः पुरी रम्या बभासे द्यौरिवाम्बुदैः] ॥ ७ ॥ तां चित्रमाल्याभरणां कपिराजहितंकरः । राघवार्थं चरन् श्रीमान् ददर्श च ननन्द च ॥ ८ ॥

पादः शत्रूणां मूर्धस्वित्यत्र कृतो भवति । अग्रतः सव्यपादनिक्षेपे शत्रवः पराभूताः स्युरिति भावः ॥ २ ॥ प्रविष्ट इति । महापथम् आस्थाय गम्यत्वेनावलम्ब्य प्रविष्ट इति संबन्धः ॥ ३ ॥ हसितेति । तूर्यघोषपुरस्सरैः हसितोत्कृष्टनिनदैः हसितानामुत्कृष्टस्वरैः युक्तेत्यर्थः । वज्राङ्कुशनिकाशैः वज्रवत्कुशो यस्य सः वज्राङ्कुशः ऐरावतः तत्तुल्यैः तद्रक्षणक्षमैरित्यर्थः । वज्राङ्कुशतुल्यसंस्थानैर्वा । वज्रजालविभूषितैः वज्रो रत्नविशेषः । गृहमेघैः गृहश्रेष्ठैः । "उपमितं व्याघ्रादिभिः" इत्युपमितसमासः ॥ ५ ॥ रामानु०–हसितोत्कृष्टनिनदैः हसितोच्चध्वनिभिः निनदैश्च । उपलक्षणे तृतीयान्तमेतत् गृहमुख्यविशेषणम् । वज्राङ्कुशनिकाशैः वज्रसंस्थानैरङ्कुशसंस्थानैश्च । वज्रजालविभूषितैः वज्रात्मकरत्नालंकृतैः । गृहमुख्यैरिति पाठः । गृहमेघैरिति पाठे मेघशब्दः श्रेष्ठवाची ॥ ६ ॥ प्रजज्वालेत्यादि । पद्मस्वस्तिकसंस्थितैः पद्मस्वस्तिकनामभ्यां संस्थानविशेषाभ्यां

सव्यपादः शत्रूणां मूर्धस्वित्यत्र कृतो भवति । अग्रतः सव्यपादनिक्षेपे शत्रवः पराभूताः स्युरिति भावः ॥२॥ प्रविष्ट इति । महापथमास्थाय गम्यत्वेनावलम्ब्य प्रविष्टः ॥ ३ ॥ ४ ॥ हसितानामुत्कृष्टनिनदैः अट्टहासैः वज्राङ्कुशनिकाशैः वज्रनिकाशैरङ्कुशनिकाशैश्च गृहमेघैः गृहश्रेष्ठैः । गृहमुख्यैरित्यपि पाठः ॥ ५ ॥ प्रजज्वालेति । प्रज्वलत्प्रकाशे ॥ ६ ॥ पद्मस्वस्तिकसंस्थितैः पद्मस्वस्तिकनामभ्यां संस्थानविशेषाभ्यां संस्थितैः । वर्धमानगृहैः वर्धमाननामा संस्थानेन संस्थितैः [illegible] लक्षणगृहं आकृत्या चतुरश्रं । " चतुरश्रशाला चतुर्द्वारा सर्वतोभद्रसंज्ञिता । पश्चिमद्वाररहिता मध्यावर्ता ह्यायना । दक्षिणद्वाररहिता वर्धमाना धनप्रदा ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

संस्थितैः । वर्द्धमानगृहैः वर्द्धमाननाम्ना संस्थानेन संस्थितैः गृहैः । तल्लक्षणानि वराहमिहिरसंहितायां व्यक्तानि विस्तरभयान्न लिख्यन्ते ॥ ६-९ ॥

रामानु०-तामिति । श्रीमान्, अत्र श्रीशब्देन स्वामिकार्यकरणरूपसंपदुच्यते । ददर्श च ननन्द च दुष्प्रवेशामपि लङ्कामक्लेशेन प्रविश्य सर्वतः पश्यामि तस्माद्रामसुग्रीवयोर्मनोरथासिद्धिरवश्यं भाविनीति ननन्देत्यर्थः ॥ ८ ॥ शुश्रावेति । त्रिस्थानस्वरभूषितं त्रिस्थानेषु उरःकण्ठशिरस्सु भवैः स्वरैर्भूषितम् । ते च मन्द्रमध्यतारा: ॥ १० ॥

भवनाद्भवनं गच्छन् ददर्श पवनात्मजः । विविधाकृतिरूपाणि भवनानि ततस्ततः ॥ ९ ॥ शुश्राव मधुरं गीतं त्रिस्थानस्वरभूषितम् । स्त्रीणां मदसमृद्धानां दिवि चाप्सरसामिव ॥ १० ॥ शुश्राव काञ्चीनिनदं नूपुराणां च निस्वनम् । सोपाननिनदांश्चैव भवनेषु महात्मनाम् । आस्फोटितनिनादांश्च क्ष्वेलितांश्च ततस्ततः ॥ ११ ॥ शुश्राव जपतां तत्र मन्त्रान् रक्षोगृहेषु वै ॥ १२ ॥ स्वाध्यायनिरतांश्चैव यातुधानान् ददर्श सः । रावणस्तवसंयुक्तान् गर्जतो राक्षसानपि ॥ १३ ॥ राजमार्गं समावृत्य स्थितं रक्षोबलं महत् । ददर्श मध्यमे गुल्मे रावणस्य चरान् बहून् ॥ १४ ॥ दीक्षितान् जटिलान् मुण्डान् गोजिनाम्बरवाससः । दर्भमुष्टिप्रहरणानग्निकुण्डायुधांस्तथा ॥ १५ ॥

सोपाननिनदांश्च मणिहेमकृतानां सोपानानां नूपुरादिताडनेन ये निनदाः संभवन्ति तान् । आस्फोटितनिनादान् व्यत्यस्तकरतलाभ्यां भुजाग्रास्फालनशब्दान् । क्ष्वेलितान् सिंहनादान् ॥ ११ ॥ मन्त्रान् ऋग्वेदादीन् ॥ १२ ॥ स्वाध्यायनिरतान् ब्रह्मभागपाठनिरतान् ॥ १३ ॥ राजमार्गमिति । मध्यमे गुल्मे नगरमध्यस्थितसैन्यसमाजे । चरान् स्वजनवृत्तान्तजिज्ञासया प्रधानप्रेरितान् प्राणिधीन् ॥ १४ ॥ दीक्षितानित्यादि । गोजिनाम्बरधारिणः वृषभचर्मरूपवस्त्रधारिणः । दर्भमुष्टिप्रहरणान् " यथा वज्रं हरेः पाणौ तथा विप्रकरे कुशः " इति स्मरणादिति भावः । अग्निकुण्डायुधान् जयार्थं

प्राग्द्वाररहिता स्वस्तिकाख्या पुत्रधनप्रदा ॥ " इत्युक्तेः पद्मस्वस्तिकवर्द्धमानाख्यगृहाः प्रभुगृहभेदा इत्यर्थः ॥ ७-९ ॥ त्रिस्थानस्वरभूषितम्, उरःकण्ठशिरःस्थानत्रयोत्पन्नैः मन्द्रमध्यमतारकैः स्वरैर्भूषितम् ॥ १० ॥ सोपाननिनदान् सोपानसञ्चरत्कान्ताजनमञ्जीरध्वनीनित्यर्थः । आस्फोटितनिनादान् हर्षोत्पन्नक्रियाविशेषजनितशब्दान् क्ष्वेलितान् । सिंहनादान् ॥ ११-१३ ॥ मध्यमे गुल्मे नगरमध्यस्थसैन्यसङ्घे । चरान् नगरवृत्तान्तानिवेदकान् गूढचारानित्यर्थः ॥ १४ ॥ गोजिनाम्बरवाससः गोचर्मवाससः विवसनांश्च । दर्भमुष्टिप्रहरणान् अनिष्टनिवारकानुष्ठानसाधनतया दर्भमुष्टीनामायुधत्वम् । अग्निकुण्डायुधान् कृत्याद्युत्पादनद्वारा शत्रु

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

होमशीलान् ॥ १५ ॥ कूटमुद्गरपाणीन् कूटो नामायस्कारकूटसदृश आयुधविशेषः । " कूटोऽस्त्री पुत्रमायाद्रिशृङ्गायोघनवेश्मसु । छले बाणान्तरे दम्भे भग्नशृङ्गवृषे तु ना ॥" इति शब्दरत्नाकरे । मुद्गरः द्रुघणः । " मुद्गरो द्रुघणो घनः " इति वैजयन्ती ॥ १६ ॥ करालान् भीमान् । "करालो दन्तुरे तुङ्गे विशाले विकृतेऽपि च " इति भागुरिः । भुग्नवक्त्रान् कुटिलवक्त्रान् । "आविद्धं कुटिलं भुग्नम् " इत्यमरः । विकटान् विषमाङ्गान् । शतघ्नी शतशक्तिः

कूटमुद्गरपाणींश्च दण्डायुधधरानपि । एकाक्षानेककर्णांश्च लम्बोदरपयोधरान् ॥ १६ ॥ करालान् भुग्नवक्त्रांश्च विकटान् वामनांस्तथा । धन्विनः खड्गिनश्चैव शतघ्रीमुसलायुधान् ॥ १७ ॥ परिघोत्तमहस्तांश्च विचित्रकवचोज्ज्वलान् । नातिस्थूलान्नातिकृशान्नातिदीर्घातिह्रस्वकान् ॥ १८ ॥ नातिगौरान्नातिकृष्णान्नातिकुब्जान्नवामनान् । विरूपान् बहुरूपांश्च सुरूपांश्च सुवर्चसः । ध्वजीन् पताकिनश्चैव ददर्श विविधायुधान् ॥ १९ ॥ शक्तिवृक्षायुधांश्चैव पट्टिशाशनिधारिणः ॥ २० ॥ क्षेपणीपाशहस्तांश्च ददर्श स महाकपिः । स्रग्विणस्त्वनुलिप्तांश्च वराभरणभूषितान् ॥ २१ ॥ नानावेषसमायुक्तान् यथास्वैरगतान् बहून् । तीक्ष्णशूलधरांश्चैव वज्रिणश्च महाबलान् ॥ २२ ॥ शतसाहस्रमव्यग्रमारक्षं मध्यमं कपिः । रक्षोधिपतिनिर्दिष्टं ददर्शान्तःपुराग्रतः ॥ २३ ॥

अयोगदा । "अयःकण्टकसञ्छन्ना शतघ्री परिकीर्तिता" इति वैजयन्ती । मुसलम् आयसोऽरत्निप्रमाणको दण्डः । " मुसलं त्वायसो दण्डो धार्योऽरत्नि प्रमाणकः" इति शब्दरत्नाकरे ॥ १७ ॥ परिघः दण्डविशेषः । नातिदीर्घातिह्रस्वकानित्यत्र हकारोपरि ऋकारोच्चारणं वृत्तभङ्गपरिहाराय । एवं ध्वजिनः इति वक्तव्ये ध्वजीनित्युक्तिश्च छन्दोभङ्गपरिहारायैव ॥ १८ ॥ १९ ॥ शक्तीत्यादि । पट्टिशः तीक्ष्णधारो लोहदण्डः । " पट्टिशो यो दीर्घदण्डस्तीक्ष्ण धारः क्षुरोपमः " इति निघण्टुः ॥ २० ॥ क्षेपणी क्षेपणीयः । वेषः अलङ्कारः । यथास्वैरगतान् यथेष्टचारिणः ॥ २१ ॥ २२ ॥ शतेति । शतसहस्रमेव शतसाहस्रम् । स्वार्थे अण् । आरक्षं गुल्मम् । अन्तःपुराग्रतः अन्तर्नगराग्रतः रक्षोधिपतिनिर्दिष्टं मध्यमगुल्मभूतं रावणमूलबलं ददर्शेत्यर्थः ॥ २३ ॥

मारकतया अग्निकुण्डानामायुधत्वम् ॥१५॥१६॥ विकटान् विषमाङ्गान् ॥१७-२०॥ क्षेपणी क्षेपणीयः ॥२१॥२२॥ आरक्षम् आ समन्ताद्रक्षनीत्यारक्षं सैन्यम् । अन्तः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स तदेत्यादिश्लोकद्वयमेकान्वयम् । सः कपिः तत् आरक्षं दृष्ट्वा सः राक्षसेन्द्रस्य गृहं ददर्शेत्यन्वयः । क्रियाभेदात्तच्छब्दद्वयम् ॥ २४ ॥ २५ ॥ त्रिविष्टपेत्यादि । यानैः शिबिकादिभिः । विमानैः व्योमयानैः । हयगजैरित्यत्र गजशब्दः द्विदन्तगजपरः । अतो न वारणैरित्यनेन पुनरुक्तिः । मृगपक्षिभिश्च भूषितमित्यन्वयः । रक्षिभिर्यातुधानैर्गुप्तमिति सम्बन्धः । आविवेश जगाम । गृहप्रवेशस्य दूरं वक्ष्यमाणत्वात् ॥ २६–२८ ॥

स तदा तद्गृहं दृष्ट्वा महाहाटकतोरणम् । राक्षसेन्द्रस्य विख्यातमद्रिमूर्ध्नि प्रतिष्ठितम् ॥२४॥ पुण्डरीकावर्तसाभिः परिघाभिरलंकृतम् । प्राकारावृतमत्यन्तं ददर्श स महाकपिः॥ २५ ॥ त्रिविष्टपनिभं दिव्य दिव्यनादविनादितम् । वाजिहेषितसंघुष्टं नादितं भूषणैस्तदा ॥२६॥ रथैर्यानैर्विमानैश्च तथा हयगजैः शुभैः । वारणैश्च चतुर्दन्तैः श्वेताभ्र निचयोपमैः ॥ २७ ॥ भूषितं रुचिरद्वारं मत्तैश्च मृगपक्षिभिः । रक्षितं सुमहावीर्यैर्यातुधानैः सहस्रशः । राक्षसाधिपते र्गुप्तमाविवेश महाकपिः ॥ २८ ॥ सहेमजाम्बूनदचक्रवालं महार्हमुक्तामणिभूषितानाम् । पराध्यकालागरुचन्दनार्क्तं स रावणान्तःपुरमाविवेश॥२९॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमन्सुन्दरकाण्डे चतुर्थः सर्गः ॥४॥

ततः स मध्यं गतमंशुमन्तं ज्योत्स्नावितानं महदुद्वहन्तम् ।
ददर्श धीमान् दिवि भानुमन्तं गोष्ठे वृषं मत्तमिव भ्रमन्तम् ॥ १ ॥

सहेमेति । हेम अन्यत्र जातं सुवर्णम् । जाम्बूनदं जम्बूनद्यां जातम् । चक्रवालं प्राकारमण्डलम् । रावणान्तःपुरं रावणान्तर्नगरम् ॥ २९ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुर्थः सर्गः ॥ ४ ॥ ततः स मध्यमित्यादि । दिवि आकाशे मध्यं गतम् आकाशमध्यगतमित्यर्थः । लङ्काप्रवेशे चन्द्रोदयोक्तेः रावणनगरप्रवेशे अर्धरात्र इति सूच्यते । उत्तरश्लोके अभियान्तमित्यनेन

पुराग्रतः रावणगृहस्याग्रतः ॥ २३ ॥ स इत्यादिश्लोकद्वयमेकं वाक्यम् । द्वितीयस्तच्छब्दः प्रसिद्धिपरः ॥ २४–२ । ज्येरिति । यानैः शिबिकादिभिः । आविवेश आससाद, साक्षात्प्रवेशस्य वक्ष्यमाणत्वात् ॥ २७ ॥२८॥ सहेमेति च्छेदः । हेमसहितं जाम्बूनदचक्रवालमहितं स्वर्णपाकारमण्डलयुक्तम् । अन्तःपुरम् अन्तर्नगरम् आविवेश ॥ २९ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां चतुर्थः सर्गः ॥ ४ ॥ तत इति । ततः प्रवेशानन्तरम् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नाभिगमनमुच्यते । दक्षिणां दिशं गच्छतोऽभिमुखत्वासंभवात्. किन्तु गमनमात्रम् । सप्तदशे सर्गेऽपि " प्रजगाम नभश्चन्द्रः" इति प्रकर्षेण गमनवचनं नभोमध्यातीतत्वमाचष्टे । अंशुमन्तमिति चन्द्र एवोच्यते । भानुमन्तं दीप्तिमन्तम् । वृषं श्वेतम् । अस्मिन्सर्गे छेकानुप्रासः न तु यमकम्, अर्थभेदाभावात् । तदुक्तं काव्यप्रकाशे–" भिन्नार्थानां व्यादीनां वर्णानां विवृत्तिर्यमकम् " इति ॥ १ ॥ पापानि दुःखानि ॥ २ ॥ भुवि मन्दरो लक्ष्मीवान् ।

लोकस्य पापानि विनाशयन्तं महोदधिं चापि समेधयन्तम् । भूतानि सर्वाणि विराजयन्तं ददर्श शीतांशुमथाभियान्तम् ॥ २ ॥ या भाति लक्ष्मीर्भुवि मन्दरस्था तथा प्रदोषेषु च सागरस्था । तथैव तोयेषु च पुष्करस्था रराज सा चारुनिशाकरस्था ॥ ३ ॥ हंसो यथा राजतपञ्जरस्थः सिंहो यथा मन्दरकन्दरस्थः । वीरो यथा गर्वित कुञ्जरस्थश्चन्द्रो विबभ्राज तथाऽम्बरस्थः ॥ ४ ॥ स्थितः ककुभ्मानिव तीक्ष्णशृङ्गो महाचलः श्वेत इवोच्चशृङ्गः । हस्तीव जाम्बूनदबद्धशृङ्गो रराज चन्द्रः परिपूर्णशृङ्गः ॥ ५ ॥ विनष्टशीताम्बुतुषारपङ्को महाग्रहग्राहविनष्टपङ्कः । प्रकाशलक्ष्म्याश्रयनिर्मलाङ्को रराज चन्द्रो भगवान् शशाङ्कः ॥ ६ ॥

प्रदोषेषु सागरः । तोयेषु पद्मं श्रीमत । तद्वत्तदानीं चन्द्रो विशिष्टलक्ष्मीको बभूवेत्यर्थः । अत्रान्यस्यान्यत्रासम्बन्धान्मन्दरादिलक्ष्मीरिवास्य लक्ष्मीरिति सादृश्याक्षेपान्निदर्शनालङ्कारः । तदुक्तं काव्यप्रकाशे निदर्शनायाम्–" अभिमान्यस्तु सम्बन्ध उपमापरिकल्पकः" इति ॥ ३ ॥ हंस इति । राजतपञ्जरस्थः गगनगर्भस्य ज्योत्स्नाश्लालितत्वात् । मन्दरकन्दरस्थः तस्य श्वेतगिरित्वात् । गर्वितकुञ्जरस्थः नीलरूपस्य नभस उपर्यवस्थानात् । अत्र पुष्टत्वादीनां साधारणधर्माणामनुपादानाल्लुप्तोपमालङ्कारः ॥ ४ ॥ स्थित इति । परिपूर्णशृङ्गः परिपूर्णकलः । अत्र शृङ्गशब्दस्य विषाणाद्यर्थभेदेऽपि बिम्बप्रतिबिम्बभावेनौपम्यम् ॥ ५ ॥ विनष्टेति । शीताम्बु हिमाम्बु, तुषाराः पृषताः, पङ्कः तमः, विनष्टाः शीताम्बुतुषारा एव पङ्काः यस्मिन्

मध्यं गतं, गगनस्येति शेषः । यद्वा तारामध्यं गतम् अंशुमन्तं चन्द्रम् । भानुमन्तं दीप्तिमन्तम् ॥ १ ॥ लोकस्येति । पापशब्देन पापफलं दुःखमुच्यते, लोकाह्लादकत्वाच्चन्द्रस्य दुःखविनाशकत्वम् । यद्वा सूर्यचन्द्रादीनां लोकपावनत्वादिति भावः ॥ २ ॥ या लक्ष्मीः मन्दरादिस्थानेषु राजते सा लक्ष्मीः चारुनिशाकरस्था भातीति सम्बन्धः ॥ ३ ॥ ४ ॥ परिपूर्णशृङ्गः परिपूर्णकलः ॥ ५ ॥ महाग्रहग्राहविनष्टपङ्कः महाग्रहः सूर्यः तस्य ग्राहेण किरणसङ्कटेन विनष्टः विनाशितः पङ्कस्तमो

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तथा। "तुषारः शीकरे हिमे" इति विश्वः। महाग्रहाणां शुक्रबृहस्पत्यादीनां ग्राहेण ग्रहणेन आच्छादनेन विनष्टः पङ्को मलं यस्य सः महाग्रहग्राह विनष्टपङ्कः, स्वतेजसा महाग्रहतिरस्कारेण व्यक्तनैर्मल्य इत्यर्थः। यद्वा महाग्रहः सूर्यः तस्य ग्राहेण किरणपरिग्रहेण विनष्टः विनाशितः पङ्कः तमः येन सः। तदा तरणिकिरणसङ्क्रमणेन देदीप्यमानमण्डल इत्यर्थः। तदुक्तं वराहमिहिरेण–" सलिल (समे) मये शशिनि रवेर्दीधितयो मूर्च्छितास्तमो नैशम्।

शिलातलं प्राप्य यथा मृगेन्द्रो महारणं प्राप्य यथा गजेन्द्रः। राज्यं समासाद्य यथा नरेन्द्रस्तथा प्रकाशो विरराज चन्द्रः ॥ ७ ॥ प्रकाशचन्द्रोदयनष्टदोषः प्रवृद्धरक्षःपिशिताशदोषः। रामाभिरामेरितचित्तदोषः स्वर्गप्रकाशो भगवान् प्रदोषः ॥ ८ ॥

क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्यान्तः॥" इति। प्रकाशलक्ष्म्याश्रयनिर्मलाङ्कः तेजस्समृद्धियोगात्स्पष्टकलङ्कः। अतिधवले चन्द्रे परभागयोगेन कलङ्कस्याप्यौज्ज्वल्यं भवतीत्यर्थः। शशाङ्क इति। भूच्छायामयः शशरूपः अङ्कः यस्य स तथा। "लोकच्छायामयं लक्ष्म तवाङ्के शशसन्निभम्" इति हरिवंशोक्तेः। भगवान्महाप्रभाववान् ॥ ६ ॥ शिलेति। प्रकाशः प्रकाशमानः ॥७॥ प्रकाशेन चन्द्रोदयेन नष्टः दोषः तिमिरं यस्मिन् सः। प्रवृद्धः रक्षसां पिशिताशनानां च दोषः सञ्चाररूपो यस्मिन् स तथा। रामाभिः अभिरामैः कान्तैश्च ईरितः त्यक्तः चित्तदोषः कोपाभिमानरूपः यस्मिन्। येन तथोक्तः। चन्द्रस्य सूर्यकिरणसंक्रमणद्वारा तमोविनाशकत्वम्। तदुक्तम्–" सलिलमये शशिनि रवेर्दीधितयो मूर्च्छितास्तमो नैशम्। क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्यान्तः॥" इति। विनष्टशीताम्बुतुषारपङ्कः शीताम्बु हिमं तस्य तुषाराः पृषतः त एव पङ्कः मालिन्यम्, विनष्टः शीताम्बुतुषारपङ्को यस्मिन् स तथा। एतदपि सूर्यकिरणसंक्रमणादित्यवगन्तव्यम्। प्रकाशलक्ष्म्याश्रयनिर्मलाङ्कः, प्रकाशसमृद्ध्याश्रयत्वात्सुव्यक्तचिह्नः इत्यर्थः ॥ ६ ॥ ७ ॥ प्रकाशचन्द्रोदय नष्टदोषः प्रकाशचन्द्रोदयेन नष्टः दोषः तिमिररूपदोषो यस्य स तथा। प्रवृद्धरक्षःपिशिताशदोषः प्रवृद्धः रक्षसां पिशितभक्षणरूपदोषो यस्मिन्। पिशितभक्षणस्य दोषत्वमहितजनहिंसाहेतुत्वात्। रामाभिरामेरितचित्तदोषः रामाः कान्ताः अभिरामाः रमणाः स्त्रीभिः कान्तैश्च ईरितः निरस्तः चित्तदोषः प्रणयकलहरूपो येन

स०–भगवान् पूर्वोक्तरीत्या माहात्म्यवान्। प्रदोषः रात्रिकालः। स्वर्गप्रकाशः स्वर्गस्थानवत्सुखकरः। कीदृशः प्रकाशचन्द्रोदयनष्टदोषः प्रकाशाय जातो यश्चन्द्रोदयस्तेन नष्टो दोषः अन्धकाराख्यः यस्य स तथा। प्रवृद्धः रक्षसां पिशिताशरूपः मांसभक्षणरूपो दोषो यस्मिन्। रामाभिः स्त्रीभिः अभिरामान् पतीन् प्रति इरितेन वचनेन चित्तदस्य चित्तं ददति खण्डयतीति व्युत्पत्त्या मन्मथस्य उषः दाहः, निवृत्तिरिति यावत्, यस्मिन् कान्तासुरतसँल्लापजनितमन्मथोत्सववानित्यर्थः। अथवा रामाभिरामाणां परस्परमीरितरूपप्रणयकलहाख्यचित्तदोषवानित्यर्थः। "उष दाहे" "घञर्थे कविधानम्" इति कः ॥ ८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्वर्गप्रकाशः स्वर्गतुल्यः, तद्वदानन्दावह इत्यर्थः । भगवान् श्रीमान् । " भगः श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु " इत्यमरः । प्रदोषः गत इति शेषः ॥ ८ ॥ तन्त्रीति स्पष्टम् ॥ ९ ॥ मत्ताः मधुमदक्षीबाः । प्रमत्ताः प्रस्तुतकार्यविस्मारिणः । मत्तप्रमत्तजनयोगात् कुलान्यपि तथोच्यन्ते । कुलानि गृहाणि । समाकुलानि समाकुलजनानि । वीरश्रिया वीरलक्ष्म्या । वीरः ज्ञाते भिन्नं पदं वा कपिविशेषणम् ॥ १० ॥ परस्परं चेत्यादिश्लोकद्वयमेकान्वयम् । ददर्शेति सम्बध्यते । आक्षिपन्तीत्यादीनि शत्रन्तानि रक्षोविशेषणानि । आक्षिपन्ति अपहसन्ति । अधिनिक्षिपन्ति अन्योन्यस्योपरि दधन्ति ।

तन्त्रीस्वनाः कर्णसुखाः प्रवृत्ताः स्वपन्ति नार्यः पतिभिस्सुवृत्ताः । नक्तञ्चराश्चापि तथा प्रवृत्ता विहर्तुमत्यद्भुत रौद्रवृत्ताः ॥९॥ मत्तप्रमत्तानि समाकुलानि रथाश्वभद्रासनसङ्कुलानि । वीरश्रिया चापि समाकुलानि ददर्श धीमान् स कपिः कुलानि ॥ १० ॥ परस्परं चाधिकमाक्षिपन्ति भुजांश्च पीनानधिनिक्षिपन्ति । मत्तप्रलापानधिकं क्षिपन्ति मत्तानि चान्योन्यमधिक्षिपन्ति ॥ ११ ॥ रक्षांसि वक्षांसि च विक्षिपन्ति गात्राणि कान्तासु च विक्षिपन्ति । रूपाणि चित्राणि च विक्षिपन्ति दृढानि चापानि च विक्षिपन्ति ॥ १२ ॥ ददर्श कान्ताश्च समालभन्त्यस्तथा ऽपरास्तत्र पुनः स्वपन्त्यः । सुरूपवक्त्राश्च तथा हसन्त्यः क्रुद्धाः पराश्चापि विनिःश्वसन्त्यः ॥ १३ ॥

अधिविक्षिपन्ति अधिकं मुञ्चन्ति । अधिक्षिपन्ति भर्त्सयन्ति । विक्षिपन्ति विवृण्वन्ति । चित्राणि रूपाणि विविधान् वेषान् । विक्षिपन्ति वितन्वन्ति चापानि चापान् विक्षिपन्ति विस्फारयन्ति ॥११॥१२॥ ददर्शेति । समालभन्त्यः अङ्गरागेणानुलिम्पन्त्यः । समालपन्त्य इति च पाठः । सर्वत्र व्यत्ययेन

स तथोक्तः । स्वर्गप्रकाशः सीतान्वेषणस्यानुकूलत्वेनानन्दहेतुतया प्रदोषकालस्य स्वर्गसदृशत्वोक्तिः, अत एव भगवान् पूज्यः, आदरणीय इति यावत् । अत्र विरराजेत्यनुषज्यते ॥ ८ ॥ ९ ॥ मत्तानि मदजनकद्रव्येण, अत एव प्रमत्तानि अनवहितानि, मत्तप्रमत्तजनयोगात् कुलानि भवनान्यपि तथोच्यन्ते । भद्रा गजाः ॥१०॥ परस्परं चेत्यादि श्लोकद्वयमेकं वाक्यम् । आक्षिपन्तीत्यादीनि शत्रन्तानि रक्षांसीत्यस्य विशेषणानि । आक्षिपन्ति आकर्षन्ति । भुजानधिनिक्षिपन्ति अन्योन्यस्योपरि निक्षिपन्ति । मत्तप्रलापानधिकं क्षिपन्ति मुञ्चन्ति, भर्त्सयन्तीत्यर्थः । अन्योन्यमधिक्षिपन्ति तिरस्कुर्वन्ति । रूपाणि चित्राणि च विक्षिपन्ति विविधान् वेषान्विदधति । चापानि विक्षिपन्ति विस्फारयन्ति । वक्षांसि विक्षिपन्ति विवृण्वन्ति । एतादृशरक्षांसि कपिर्ददर्शेति पूर्वक्रियया सम्बन्धः ॥११॥१२॥ ददर्शेति ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

द्वितीयार्थे प्रथमा ॥ १३ ॥ महागजैरिति । सा पुरीति शेषः । सुसद्भिः सुतरां सद्भिः । विनिःश्वसद्भिः युद्धयोग्यवीरालाभात् ॥ १४ ॥ बुद्धिप्रधानान् बुद्ध्या श्रेष्ठान् प्रधानबुद्धीन्वा, उत्तमबुद्धीनित्यर्थः । रुचिराभिधानान् शोभनव्यवहारान् । संश्रद्दधानान् आस्तिकान् । नानाविधानान्नानाकारान् । रुचिराभिधानान् हृद्यनाम्नः ॥ १५ ॥ आत्मगुणानुरूपान् आत्मगुणानुरूपव्यवहारान् ॥ १६ ॥ वराणां श्रेष्ठानाम् अर्हाः वरार्हाः । सुविशुद्ध

महागजैश्चापि तथा नदद्भिः सुपूजितैश्चापि तथा सुसद्भिः । रराज वीरैश्च विनिःश्वसद्भिर्ह्रदो भुजङ्गैरिव निःश्वसद्भिः ॥ १४ ॥ बुद्धिप्रधानान् रुचिराभिधानान् संश्रद्दधानान् जगतः प्रधानान् । नानाविधानान् रुचिराभिधानान् ददर्श तस्यां पुरि यातुधानान् ॥ १५ ॥ ननन्द दृष्ट्वा स च तान् सुरूपान्नानागुणानात्मगुणानुरूपान् । विद्योतमानान् स तदाऽनुरूपान् ददर्श कांश्चिच्च पुनर्विरूपान् ॥ १६ ॥ ततो वरार्हाः सुविशुद्धभावास्तेषां स्त्रियस्तत्र महानुभावाः । प्रियेषु पानेषु च सक्तभावा ददर्श तारा इव सुप्रभावाः ॥ १७ ॥ श्रिया ज्वलन्तीस्त्रपयोपगूढा निशीथ काले रमणोपगूढाः । ददर्श काश्चित्प्रमदोपगूढा यथा विहङ्गाः कुसुमोपगूढाः ॥ १८ ॥ अन्याः पुनर्हर्म्यतलोपविष्टास्तत्र प्रियाङ्केषु सुखोपविष्टाः । भर्तुः प्रिया धर्मपरा निविष्टा ददर्श धीमान् मदनाभिविष्टाः ॥ १९ ॥

भावाः कान्तेषु निर्मलहृदयाः । महानुभावाः पातिव्रत्यरूपमहाप्रभावाः । यद्वा महानुभावाः अनुभावाः कटाक्षभुजक्षेपादयः सुप्रभावाः । शोभनवैभवाः ॥ १७ ॥ श्रियेति । प्रमदोपगूढाः हर्षोपगूढाः । विहङ्गाः विहङ्गीः ॥१८॥ निविष्टाः ऊढाः, पाणिगृहीता इत्यर्थः । " निवेशः शिबिरोद्वाहविन्यासेषु "

समालभन्त्य इत्यादौ द्वितीयार्थे प्रथमा । समालभन्त्यः चन्दनादिना अनुलिम्पन्त्यः । " समालम्भो विलेपनम् " इत्यमरः ॥ १३ ॥ महागजैरिति । रराज, पूरिति शेषः ॥ १४ ॥ रुचिराभिधानान् रुचिरवचनान्, अन्यत्र रुचिरनामधेयान् । नानाविधानान् नानाव्यापारान् ॥ १५ ॥ ननन्देति । आत्मगुणानुरूपान् आत्मगुणानुरूपव्यापारान् ॥ १६ ॥ वरार्हाः श्रेष्ठभूषणानुलेपनादियोग्याः ॥ १७ ॥ प्रमदोपगूढाः हर्षपूर्णाः । विहङ्गाः विहङ्गीरित्यर्थः ॥ १८ ॥ निविष्टाः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इति विश्वः ॥ १९ ॥ अप्रावृताः अनवकुण्ठिताः । काञ्चनराजिवर्णाः कनकरेखाकाराः । तपनीयवर्णाः तप्तकाञ्चनवर्णाः । शशलक्ष्मवर्णाः चन्द्र पाण्डुराः । कान्तप्रहीणाः विरहिण्यः ॥ २० ॥ प्रियान्प्राप्य अभिसृत्य सुप्रीतियुक्ताः मनोभिरामाः रामाः प्रसमीक्ष्य गृहेषु रामाश्च ददर्श । अभिसारिकाः कुलपालिकाश्च ददर्शेत्यर्थः॥२१॥चन्द्रेति । वक्त्रनेत्रदर्शनं मानुषीत्वराक्षसीत्वविवेकार्थम् । आभरणदर्शनं स्वदृष्टसीताभरणतुल्याभरणदर्शनार्थम् ॥२२॥

अप्रावृताः काञ्चनराजिवर्णाः काश्चित्परार्ध्यास्तपनीयवर्णाः । पुनश्च काश्चिच्छशलक्ष्मवर्णाः कान्तप्रहीणा रुचिराङ्गवर्णाः ॥ २० ॥ ततः प्रियान् प्राप्य मनोभिरामान् सुप्रीतियुक्ताः प्रसमीक्ष्य रामाः । गृहेषु हृष्टाः परमाभिरामा हरिप्रवीरः स ददर्श रामाः ॥ २१ ॥ चन्द्रप्रकाशाश्च हि वक्त्रमाला वक्त्राक्षिपक्ष्माश्च सुनेत्रमालाः । विभूषणानां च ददर्श मालाः शतह्रदानामिव चारुमालाः ॥ २२ ॥ न त्वेव सीतां परमाभिजातां पथि स्थिते राजकुले प्रजाताम् । लतां प्रफुल्लामिव साधुजातां ददर्श तन्वीं मनसाऽभिजाताम् ॥ २३ ॥

रामानु०—चन्द्रप्रकाशाश्च हीति । वक्त्राणि अक्षिपक्ष्माणि यासां ताः " डाबुभाभ्यामन्यतरस्याम् " इति डाप् । सीतामन्वेषमाणस्य हनुमतः स्त्रीणां मुखनयनादिदर्शनं मानुषीत्वराक्षसीत्व विभागपरिज्ञानार्थम् । आभरणदर्शनं रामोक्तसीताभरणस्वरूपनिरूपणार्थम् । एतच्च--" तां समीक्ष्य विशालाक्षीं राजपुत्रीमनिन्दिताम् । तर्कयामास सीतेति कारणैरुपपादयन् । वैदेह्या यानि चाङ्गेषु तदा रामोऽन्वकीर्तयत् । तान्याभरणजालानि शाखाशोभीन्यलक्षयत् ॥ " इति राजपुत्रीत्वाविशालाक्षीत्वाभरणदर्शनैः सीतात्वनिर्णयस्योपरि वक्ष्यमाणत्वादवगम्यते ॥ २२ ॥ न त्विति । परमाभिजाताम् अत्यन्ताभिरामाम् । साधुजातां सुरूपाम् । मनसाऽभिजाताम् अयोनिजामित्यर्थः ॥ २३ ॥ रामानु०-न त्विति । साधुजाता मित्येतल्लतताविशेषणम् । मनसाभिजाताम् " यस्मात्तु धार्पिता चाहमपापा चाप्यनाथवत् । तस्मात्तव वधार्थं वै उत्पत्स्येऽहं ध्रुवं पुनः ॥ " इत्युत्तरश्रीरामायणोक्तप्रकारेण स्वसंकल्पेनावतर्णा

ऊढाः, पाणिगृहीता इत्यर्थः । " निवेशः शिबिरोद्वाहविन्यासेषु " इत्यमरः ॥ १९ ॥ अप्रावृता इत्यादिश्लोकद्वयमेकं वाक्यम् । अत्र ददर्शेति क्रियायास्सर्वत्र सम्बन्धः । उत्तरीयरहिताः, काञ्चनराजिवर्णाः कनकरेखाकाराः, तपनीयवर्णाः तप्तस्वर्णवर्णाः, शशलक्ष्मवर्णाः चन्द्रवर्णाः, कान्तप्रहीणाः प्रियवियुक्ताः रामाश्च ददर्श, ततः प्रियान् प्रसमीक्ष्य प्राप्य सुप्रीतियुक्ता रामाश्च ददर्श । गृहेषु हृष्टाः रामाश्च ददर्शेति सम्बन्धः । यद्वा स हरिप्रवीरः मनोभिरामान् प्रियान् प्राप्य अभिसृत्य सुप्रीतियुक्ताः रामाः प्रसमीक्ष्य गृहेषु हृष्टाः स्वगृहेषु रमणं प्राप्य हृष्टाः परमाभिरामाश्च ददर्शेति सम्बन्धः । पूर्वोक्तानियतभर्तृकाभिसारिकासमभिव्याहारादुत्तरार्धेन स्वगृहप्राप्तरमणा वाराङ्गना उच्यन्ते ॥ २०–२२ ॥ न त्विति । साधुजातामित्येतल्लताविशेषणम् । परमाभिजाताम् अत्यन्ताभिरूपां मनसाभि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मित्यर्थः ॥ २३ ॥ सनातन इति । सनातने अविच्छिन्ने वर्त्मनि पातिव्रत्यधर्मे । रामेक्षणे अन्तो निश्चयो यस्यास्ताम् । श्रीमत् सीताचिन्तनश्रीमत् । विशिष्टाम् उत्कृष्टाम् ॥ २४ ॥ उष्णेति । सानुसृतास्रकण्ठीम् अनुगतास्रेण अनुगतबाष्पेण कण्ठेन सह वर्तमानाम् । पुरा रामपार्श्वावस्थान

सनातने वर्त्मनि सन्निविष्टां रामेक्षणान्तां मदनाभिविष्टाम् । भर्तुर्मनः श्रीमदनुप्रविष्टां स्त्रीभ्यो वराभ्यश्च सदा विशिष्टाम् ॥ २४ ॥ उष्णार्दितां सानुसृतास्रकण्ठीं पुरा वराहोत्तमनिष्ककण्ठीम् । सुजातपक्ष्मामभिरक्तकण्ठीं वने प्रनृत्तामिव नीलकण्ठीम् ॥ २५ ॥ अव्यक्तरेखामिव चन्द्ररेखां पांसुप्रदिग्धामिव हेमरेखाम् । क्षतप्ररूढामिव बाण रेखां वायुप्रभिन्नामिव मेघरेखाम् ॥ २६ ॥

काले । वराहोत्तमनिष्ककण्ठीं वराहः उत्तमश्च निष्कः कण्ठे यस्याः ताम् । उरःकण्ठसम्बन्धी भूषणविशेषो निष्कः । अभिरक्तकण्ठीं स्निग्धकण्ठीम् ॥ २५ ॥ अव्यक्तेति । अव्यक्तरेखाम् अव्यक्तस्वरूपां चन्द्ररेखां चन्द्रकलामिव स्थिताम् । अत्यन्तकृशत्वे कान्तिहीनत्वे च दृष्टान्तोऽयम् । पांसुप्रदिग्धां पांसुकलुषितां हेमरेखां कनकशलाकामिव स्थिताम् । स्वतःशुद्धस्वभावस्य आगन्तुकमालिन्ये दृष्टान्तोयम् । क्षतप्ररूढां क्षतेन प्ररूढाम् औषधादिना समाहिताम् । अन्तःशल्यदोषवतीं बहिस्समाहिताम् । बाणरेखां बाणक्षतीमिव स्थिताम् । अन्तर्वेदनातिशये दृष्टान्तोऽयम् । वायुप्रभिन्नामिव मेघरेखाम्, पुनरसमाधेयशैथिल्ये दृष्टान्तोऽयम् ॥ २६ ॥

जाताम् अयोनिजाम् ॥ २३ ॥ सनातने वर्त्मनि अविच्छेदेन प्रवृत्ते पातिव्रत्यरूपमार्गे । सन्निविष्टां सम्यङ्निष्ठिताम् ॥२४॥ उष्णार्दितां विरहतापपीडिताम् । अनुसृतास्रेण कण्ठेन सह वर्तत इति सानुसृतास्रकण्ठीम् । निष्कम् उरोभूषणम् । अव्यक्तरेखाम् अस्पष्टप्रकाशां चन्द्ररेखां चन्द्रकलाम् । पांसुप्रदिग्धाम् पांसुदूषिताम्,

स०-उष्णार्दितां रामविग्रहतप्ताम् । अनुसृतम् अस्रम् अश्रु यस्य स चासौ कण्ठश्च तेन सह वर्तत इति तथा ताम् । सानुसृतास्रकण्ठीमित्यादिस्थानत्रयेपि ङीर्बाधः । यद्वा "स्वाङ्गाच्च" इति सूत्रस्थचशब्द सूचित "अङ्गमात्रकण्ठेभ्य इति वक्तव्यम्" इति वृत्तिकृदुक्तेर्ङीप् । न च "भाष्यानुक्तेरप्रामाणिका इति प्रामाणिकाः अप्रामाणिका एव" इति मट्टोजिनागोजिमट्टोक्तेः कथमिति शङ्कयम् । अनुवृत्यैव ङीषि सिद्धे चशब्दस्य वैयर्थ्यादेवमादिरूपाणां दुरुपपादनत्वावर्णनाच्च 'अप्रतिषिद्धमनुमतम्' इत्युक्तेर्महाभाष्यकारस्य मतमिति सूचितत्वात् कर्त्रभेदाच्च । अश्रुकण्ठामिति वा पाठ इति नागोजिमट्टोक्तिरनुप्रासभङ्गभीरुभिरनादरणीया । अभिरक्तकण्ठीं सुस्वराम् । नीलकण्ठीं मयूरीम् ॥ २५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सीतामिति । चिरस्यापश्यन् चिरकालं निरीक्ष्याप्यपश्यन् । अचिरस्य अचिरेण, सपदीत्यर्थः । मन्दो मुग्ध इव दुःखाभिहतो बभूव । " मुग्धो मन्दो विवर्णश्च" इति हलायुधः ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चमः सर्गः ॥ ५ ॥

सीतामपश्यन् मनुजेश्वरस्य रामस्य पत्नीं वदतां वरस्य । बभूव दुःखाभिहतश्चिरस्य प्लवङ्गमो मन्द इवाचिरस्य ॥ २७ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे पञ्चमः सर्गः ॥ ५ ॥

स निकामं विमानेषु विषण्णः कामरूपधृक् । विचचार पुनर्लङ्कां लाघवेन समन्वितः ॥१॥ आससादाथ लक्ष्मीवान् राक्षसेन्द्रनिवेशनम् । प्राकारेणार्कवर्णेन भास्वरेणाभिसंवृतम् ॥ २ ॥ रक्षितं राक्षसैर्घोरैः सिंहैरिव महद्वनम् । समीक्षमाणो भवनं चकाशे कपिकुञ्जरः ॥ ३ ॥ रूप्यकोपहितैश्चित्रैस्तोरणैर्हेमभूषितैः । विचित्राभिश्च कक्ष्याभिर्द्वारैश्च रुचिरैर्वृतम् ॥४॥ गजास्थितैर्महामात्रैः शूरैश्च विगतश्रमैः । उपस्थितमसंहार्यैर्हयैः स्यन्दनयायिभिः ॥५॥

स निकाममित्यादि । विमानेषु विषण्णः विमानेषु सीतामदृष्ट्वा विषण्ण इत्यर्थः । लाघवेन वेगेन ॥१॥२॥ रामानु०-स इति । स लङ्कायामन्विष्टायामपि वैदेह्या अदर्शनेन विषण्णः । विचचार पुनर्लङ्कामिति सम्यक् । विचचार कपिर्लङ्कामिति पाठेपि वैदेह्या अन्वेषणेन विषण्णस्य हनुमतोऽन्वेषणकर्तृत्वाभिधानात् पुनरन्वेषणं कृतवानित्यय मर्थो लभ्यते ॥ १ ॥ आससादाथ लक्ष्मीवान् राक्षसेन्द्रनिवेशनम् इति । रावणभवनं प्रविष्टस्य हनुमतः पुनरपि रावणभवनप्राप्त्यभिधानान्मध्ये लङ्कान्वेषणाभिधानाच्च पूर्वं रावणभवनं प्रविष्टो हनुमान् तदानीं जाग्रद्बहुरक्षःसंकीर्णतया सीतान्वेषणावसरोऽयं न भवतीति मत्वा ततो निष्क्रम्य पुनर्लङ्कां विचित्य राक्षसेन्द्रनिवेशनमाससादेत्यवगम्यते ॥२॥ रक्षितमिति । चकाशे जहर्षेत्यर्थः ॥ ३ ॥ रामानु०-रक्षितमिति । समीक्षमाणो भवनं चकाश इति । भवनमितस्ततो निरीक्षमाणः सन्नर्कवर्णभवनप्राकारतेजःसंबन्धात् सप्रकाशोऽभूदित्यर्थः । चचार कपिकुञ्जर इति वा पाठः ॥ ३ ॥ रूप्यकेत्यादि । रूप्यकोपहितैः रजतनिर्मितैः । कक्ष्याभिः प्रकोष्ठैः । असंहार्यैः अवध्यैः । स्यन्दनयायिभिः स्यन्दनवाहकैः ॥ ४ ॥५॥ हेमरेखां स्वर्णशलाकाम् । क्षतप्ररूढां क्षता च सा प्ररूढा च ताम्, अन्तर्व्रणां बहिश्छादितामित्यर्थः । यद्वा क्षते व्रणे प्ररूढां मलीनां वाणरेखां वाणशकल मित्यर्थः ॥ २५ ॥ २६ ॥ सीतामिति । चिरस्यापश्यन् चिरमन्विष्यापश्यन् दुःखाभिभूतः अचिरस्य सद्य एव मन्द इव मूढ इव बभूव ॥ २७ ॥ इति श्रीमहेश्वरतीर्थ विरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां पञ्चमः सर्गः ॥ ५ ॥ १ ॥ २ ॥ रक्षितमिति । चकाशे विस्मयादुल्लासेत्यर्थः । चचार कपि कुञ्जरः इति वा पाठः ॥ ३ ॥ रूप्यकोपहितैः रजतनिर्मितैः । कक्ष्याभिः प्रकोष्ठैः । " कक्ष्या प्रकोष्ठे हर्म्यादेः " इत्यमरः ॥ ४ ॥ महामात्रैः प्रधानैः । " महामात्राः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रामानु०--रूप्यकेति । रूप्यकाभिर्हितैः रजतविहितैः । कक्ष्याभिः प्रकोष्ठैः । " कक्ष्या प्रकोष्ठे हर्म्यादेः " इत्यमरः । गजास्थितीरिति । महामात्रैः प्रधानैः । "महामात्राः प्रधानानि" इत्यमरः । असंहार्यैः संहर्तुमशक्यैः, अवध्यैरिति यावत् ॥ ४ ॥ ५ ॥ सिंहव्याघ्रतनुत्राणैः सिंहव्याघ्रचर्मपरिवृतैरित्यर्थः । महारथसमावासं महारथानां रक्षसामाकरम् । महारथमहास्वनं महतां रथानां महान् स्वनः यस्मिन् ॥ ६–८ ॥ रामानु०--सिंहव्याघ्रतनुत्राणैः सिंहव्याघ्रचर्मतनुत्राणैः । महारथसमावासं रथिकविशेषाणामावासस्थानम् । महारथसमावापमिति पाठेपि महारथानां रथिकविशेषाणाम् आवापम् आवासभूतमित्यर्थः । महारथमहासनमिति पाठः । महारथं च तन्महासनं च महारथमहासनम् ॥ ६ ॥ ७ ॥ दृश्यैः दर्शनीयैः ।

सिंहव्याघ्रतनुत्राणैर्दान्तकाञ्चनराजतैः । घोषवद्भिर्विचित्रैश्च सदा विचरितं रथैः ॥ ६ ॥ बहुरत्नसमाकीर्णं परार्घ्यासनभाजनम् । महारथसमावासं महारथमहास्वनम् ॥ ७ ॥ दृश्यैश्च परमोदारैस्तैस्तैश्च मृगपक्षिभिः । विविधैर्बहुसाहस्रैः परिपूर्णं समन्ततः ॥ ८ ॥ विनीतैरन्तपालैश्च रक्षोभिश्च सुरक्षितम् । मुख्याभिश्च वरस्त्रीभिः परिपूर्णं समन्ततः ॥ ९ ॥ मुदितप्रमदारत्नं राक्षसेन्द्रनिवेशनम् । वराभरणसंह्रादैः समुद्रस्वननिस्वनम् ॥ १० ॥ तद्राजगुणसंपन्नं मुख्यैश्चागुरुचन्दनैः । महाजनैः समाकीर्णं सिंहैरिव महद्वनम् ॥ ११ ॥ भेरीमृदङ्गाभिरुतं शङ्खघोषनिनादितम् । नित्यार्चितं पर्वहुतं पूजितं राक्षसैः सदा ॥ १२ ॥

परमोदारैः अतिमहद्भिः । " उदारो दातृमहतोः " इत्यमरः ॥ ८ ॥ अन्तपालैः बाह्यरक्षिभिः । राक्षसेन्द्रनिवेशनं राक्षसेन्द्रा राक्षसश्रेष्ठाः निविशन्ते समीपे निवसन्त्यस्मिन्निति राक्षसेन्द्रनिवेशनमित्यर्थः । अन्यथा वक्ष्यमाणवेश्मपदेन पुनरुक्तिः स्यात् । संह्रादः शब्दः । समुद्रस्वनवन्निस्वनतीति समुद्रस्वननिस्वनम् । पचाद्यच् ॥ ९–१० ॥ रामानु०--अन्तपालैः बाह्यरक्षकैः ॥ ९ ॥ राक्षसेन्द्रनिवेशनं राक्षसेन्द्राणां निवेशनानि यस्मिन् तत् । समुद्रस्वननिस्वनं समुद्रस्वनयुक्तम् ॥ १० ॥ तत् प्रसिद्धम् । राजगुणसंपन्नं राजोपचारैर्धूपादिभिः संपन्नम् । अगुरुचन्दनैरित्यत्रापि संपन्नमिति संबध्यते । पर्वसु हुतं होमो यस्मिन् तत् पर्वहुतम् ॥ ११ ॥ १२

प्रधानानि " इत्यमरः । असंहार्यैः अत्रार्यैः ॥ ५ ॥ सिंहव्याघ्रतनुत्राणैः तच्चर्मनिर्मितवर्मभिरित्यर्थः ॥ ६ ॥ महारथसमावासं महारथानां रथिकविशेषाणां समावासं स्थानम् । समावापमिति पाठेऽप्ययमेवार्थः । महारथं च तत् महासनं च महारथमहासनम् ॥ ७ ॥ दृश्यैः दर्शनीयैः । परमोदारैः अतिमहद्भिः । " उदारो दातृमहतोः " इत्यमरः ॥ ८ ॥ अन्तपालैः बाह्यरक्षकैः ॥ ९ ॥ राक्षसेन्द्रनिवेशनम् निवासभूतम् । राजगुणाः राजोपचाराः तैः सम्पन्नम् ॥ १० ॥ ११ ॥ नित्यार्चितं

स०–"एको दशसहस्राणि योधयेद्यस्तु धन्विनाम् । अस्त्रशस्त्रप्रवीणश्च स महारथ उच्यते ॥" इत्युक्तलक्षणानां यत्समावापः उपवेशनवेदिका स यस्मिन् " आवापः परिक्षेपालवालयोः " इति विश्वः । महोरथानाम् उक्तलक्षणानामपि शत्रूणां महन् असनं गतिनिवृत्तिर्यस्मिन् । " असनं यात्रानिवृत्तिः " इति विश्वः ॥ ७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रामानु०—राजगुणसंपन्नं राजगुणाश्छत्रचामरादयः तैः समृद्धम् । नित्यार्चितं गन्धपुष्पादिभिर्नित्यमर्चितम् । पर्वसु हुतं होमो यस्मिन् तत् पर्वहुतम् । रावणस्याहिताग्नित्वात्तदगृहे पर्वसु दर्शपूर्णमासादिहोमसद्भावः । अस्याहिताग्नित्वं युद्धकाण्डे प्रसिद्धम् । पूजितं राक्षसैः सदा । स्वामिगृहत्वाद्राक्षसैः सदा नमस्कृतम् । " पूजा नमस्याऽपचितिः " इत्यमरः । नित्यार्चितं सर्वसुखमूर्जितमिति वा पाठः । पर्वयुतमिति पाठे पर्वशब्देनोत्सव उच्यते ॥ ११ ॥ १२ ॥ समुद्रमिव निःस्वनं निःशब्दम्, रावणभीत्या जनकोलाहलरहितमित्यर्थः । समुद्रस्वननिस्वनमिति तु बाह्यकक्ष्यापेक्षया ॥ १३ ॥ १४ ॥ रामानु०—समुद्रमिति । समुद्रमिव नितरां स्वनतीति निस्वनम् । पचाद्यच् ॥१३॥ चचारेति । रावणस्य

समुद्रमिव गम्भीरं समुद्रमिव निःस्वनम् । महात्मनो महद्वेश्म महारत्नपरिच्छदम् । महारत्नसमाकीर्णं ददर्श स महाकपिः ॥ १३ ॥ विराजमानं वपुषा गजाश्वरथसङ्कुलम् । लङ्काभरणमित्येव सोऽमन्यत महाकपिः ॥ १४ ॥ चचार हनुमांस्तत्र रावणस्य समीपतः ॥ १५ ॥ गृहाद् गृहं राक्षसानामुद्यानानि च वानरः । वीक्षमाणो ह्यसंत्रस्तः प्रासादांश्च चचार सः ॥ १६ ॥ अवप्लुत्य महावेगः प्रहस्तस्य निवेशनम् । ततोऽन्यत् पुप्लुवे वेश्म महापार्श्वस्य वीर्यवान् ॥ १७ ॥ अथ मेघप्रतीकाशं कुम्भकर्णनिवेशनम् । विभीषणस्य च तदा पुप्लुवे स महाकपिः ॥ १८ ॥ महोदरस्य च गृहं विरूपाक्षस्य चैव हि । विद्युज्जिह्वस्य भवनं विद्युन्मालेस्तथैव च । वज्रदंष्ट्रस्य च तथा पुप्लुवे स महाकपिः ॥ १९ ॥ शुकस्य च महातेजाः सारणस्य च धीमतः । तथा चेन्द्रजितो वेश्म जगाम हरियूथपः ॥ २० ॥ जम्बुमालेः सुमालेश्च जगाम हरिसत्तमः । रश्मिकेतोश्च भवनं सूर्यशत्रोस्तथैव च ॥ २१ ॥ वज्रकायस्य च तथा पुप्लुवे स महाकपिः । धूम्राक्षस्य च संपातेर्भवनं मारुतात्मजः ॥ २२ ॥

रावणगृहस्य ॥ १५–२२ ॥ रामानु०—चचारेति । तत्र पूर्वोक्तप्राकारवेष्टितस्थले । रावणस्य रावणभवनस्य समीपतः ॥ १५ ॥ गृहाद्गृहमिति । राक्षसानां रावणभ्रातृकुमारामात्यादीनां गृहाद्गृहम् । उद्यानानि च चचारेति योजना ॥ १६ ॥

गन्धादिभिः । पर्वहुतं पर्वसु हुतं होमो यस्मिन् तत्, रावणस्याहिताग्नित्वात् ॥ १२–१४ ॥ रावणस्य समीपतः रावणभवनस्य समीपतः ॥ १५–२४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विद्युद्रूपस्येत्यादि । विद्युज्जिह्वेन्द्रजिह्वानामिति बहुवचनं तन्नाम्नां बहूनां सत्त्वात् ॥ २३–२८ ॥ रावणस्येति । उपशायिन्यः पर्यायशायिनीः । रावणे शयाने जाग्रतीरित्यर्थः ॥ २९ ॥ ३० ॥ रामानु०–ददर्शेति । गुल्मान् सेनाः । " गुल्मो रुक्स्तम्बसेनासु " इत्यमरः ॥ ३० ॥ सितान् बद्धान् । " षित्र बन्धने "

विद्युद्रूपस्य भीमस्य घनस्य विघनस्य च ॥ २३ ॥ शुकनासस्य वक्रस्य शठस्य विकटस्य च । ब्रह्मकर्णस्य दंष्ट्रस्य रोमशस्य च रक्षसः ॥ २४ ॥ युद्धोन्मत्तस्य मत्तस्य ध्वजग्रीवस्य नादिनः । विद्युज्जिह्वेन्द्रजिह्वानां तथा हस्तिमुखस्य च ॥२५॥ करालस्य पिशाचस्य शोणिताक्षस्य चैव हि । क्रममाणः क्रमेणैव हनुमान् मारुतात्मजः ॥ २६ ॥ तेषु तेषु महार्हेषु भवनेषु महायशाः । तेषामृद्धिमतामृद्धिं ददर्श स महाकपिः ॥२७॥ सर्वेषां समतिक्रम्य भवनानि समन्ततः । आससादाथ लक्ष्मीवान् राक्षसेन्द्रनिवेशनम् ॥२८॥ रावणस्योपशायिन्यो ददर्श हरिसत्तमः । विचरन् हरिशार्दूलो राक्षसीर्विकृतेक्षणाः । शूलमुद्गरहस्ताश्च शक्तितोमरधारिणीः ॥ २९ ॥ ददर्श विविधान् गुल्मांस्तस्य रक्षःपतेर्गृहे । राक्षसांश्च महाकायान्नानाप्रहरणोद्यतान् ॥ ३० ॥ रक्तान् श्वेतान् सितांश्चैव हरींश्चापि महाजवान् । कुलीनान् रूपसम्पन्नान् गजान् परगजारुजान् ॥ ३१ ॥ निष्ठितान् गजशिक्षायामैरावतसमान् युधि । निहन्तॄन् परसैन्यानां गृहे तस्मिन् ददर्श सः ॥ ३२ ॥ क्षरतश्च यथा मेघान् स्रवतश्च यथा गिरीन् । मेघस्तनितनिर्घोषान् दुर्धर्षान् समरे परैः ॥ ३३ ॥

इत्यस्मात् कः । हरीन् अश्वान् । परगजानारुजन्ति पीडयन्तीति परगजारुजान् । क्षरतश्चेति श्लोकः पूर्वोक्तगजविशेषकः । क्षरतः किंचिद्गर्पतः । स्रवन्मदत्वे दृष्टान्तः । स्रवतः निर्झरिणः ॥ ३१–३३ ॥

विद्युज्जिह्वेन्द्रजिह्वानामिति बहुवचनमार्षम् । यद्वा तन्नामानो बहवः सन्ति॥२५–२८॥ उपशायिन्यः समीपशायिन्यः॥२९॥ ददर्शेति । गुल्मान् सेनाः। "गुल्मो रुक्स्तम्बसेनासु" इत्यमरः॥३०॥ हरीन् अश्वान्। कुलीनान् परगजारुजान् परगजानां भञ्जकान् ॥३१॥ निष्ठितान् गजशिक्षायां गजविद्याभ्यासे शिक्षितान् ॥३२–३५॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सहस्रमिति। वाहिनीः सेनाः, पदातीनित्यर्थः। जाम्बूनदं जम्बूनदीप्रभवं स्वर्णम्। हेम केवलस्वर्णम्, उभयविधस्वर्णमयाभरणयुक्ता इत्यर्थः ॥ ३४ ॥ ३५ ॥ शिबिका इत्यादि। दारुपर्वतकान् क्रीडापर्वतकान्। कामस्य गृहकं रतिगृहम्। दिवागृहकं दिवाविनोदस्थानम्। रावणस्य

सहस्रं वाहिनीस्तत्र जाम्बूनदपरिष्कृताः। हेमजालपरिच्छन्नास्तरुणादित्यसन्निभाः ॥ ३४ ॥ ददर्श राक्षसेन्द्रस्य रावणस्य निवेशने ॥ ३५ ॥ शिबिका विविधाकाराः स कपिर्मारुतात्मजः। लतागृहाणि चित्राणि चित्रशाला गृहाणि च ॥ ३६ ॥ क्रीडागृहाणि चान्यानि दारुपर्वतकानपि। कामस्य गृहकं रम्यं दिवागृहकमेव च। ददर्श राक्षसेन्द्रस्य रावणस्य निवेशने ॥ ३७ ॥ स मन्दरगिरिप्रख्यं मयूरस्थानसंकुलम्। ध्वजयष्टिभिराकीर्णं ददर्श भवनोत्तमम् ॥ ३८ ॥ अनेकरत्नसङ्कीर्णं निधिजालं समन्ततः। धीरनिष्ठितकर्मान्तं गृहं भूतपतेरिव ॥ ३९ ॥ अर्चिर्भिश्चापि रत्नानां तेजसा रावणस्य च। विरराजाथ तद्वेश्म रश्मिमानिव रश्मिभिः॥४०॥ जाम्बूनदमयान्येव शयनान्यासनानि च। भाजनानि च मुख्यानि ददर्श हरियूथपः ॥४१॥ मध्वासवकृतक्लेदं मणिभाजनसंकुलम्। मनोरममसम्बाधं कुबेरभवनं यथा। नूपुराणां च घोषेण काञ्चीनां निनदेन च ॥ ४२ ॥

निवेशने इति पाठः ॥३६॥३७॥ स इत्यादि। मयूरस्थानं क्रीडामयूरविश्रमस्थानम्। कपोतानामिव मयूराणामपि स्थानानि शिलाभिः कल्प्यन्त इति प्रसिद्धम्। धीरनिष्ठितकर्मान्तं धीरैः कृतकल्पकर्मकम्। भूतपतेः प्रमथाधिपस्य ॥३८॥३९॥ अर्चिर्भिरिति। रश्मिमान् सूर्यः ॥ ४० ॥४१॥ मध्वासव

लतागृहाणीति। चित्रशालागृहाणि चित्रशालायुक्तगृहाणि। दारुपर्वतकान् दारुमयक्रीडापर्वतान्। कामस्य गृहकं कामोद्दीपकं गृहम्। दिवागृहकं दिवाविहारोचित चित्रगृहम्। मयूरस्थानानि क्रीडामयूरस्थानानि ॥ ३६–३८ ॥ धीरनिष्ठितकर्मान्तं निष्ठिता निष्ठितवन्तः दृढव्रताः। धीराश्च ते निष्ठिताश्च धीरनिष्ठिताः तेषां कर्म तपोरूपं तस्यान्तः फलम्, महातपःफलमिति यावत्। भूतपतेः शिवस्य ॥ ३९–४१ ॥ मध्विति। मध्वासवकृतक्लेदं मध्वासवैः क्षौद्रविकारमद्यैः कृतद्रवम्॥ ४२ ॥

विषम०–सहस्रं वाजिनः अनेकानश्वान्। हेमजालैरविच्छन्नाः इतिपाठः। सर्वतो भूषिता इति शिविकाविशेषणम्॥ ३४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कृतक्केदं मध्वासवैः मधुविकारमद्यैः कृतक्केदं कृतसेकम् । घोषवद्भिः नादवद्भिः । नादश्च दीर्घशब्दस्य विरामसमयसम्भवो ध्वनिः । व्यूढकक्ष्यं विशाल प्रकोष्ठम् । अस्मिन् सर्गे सार्द्धचतुश्चत्वारिंशच्छ्लोकाः॥४२-४४॥ इति श्रीगो० श्रीरामा० शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षष्ठः सर्गः॥६॥

मृदङ्गतलघोषैश्च घोषवद्भिर्विनादितम् । प्रासादसङ्घातयुतं स्त्रीरत्नशतसंकुलम् ॥ ४३ ॥ सुव्यूढकक्ष्यं हनुमान् प्रविवेश महागृहम् ॥ ४४ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे षष्ठः सर्गः ॥ ६ ॥

स वेश्मजालं बलवान् ददर्श व्यासक्तवैडूर्यसुवर्णजालम् । यथा महत् प्रावृषि मेघजालं विद्युत्पिनद्धं सविहङ्गजालम् ॥ १ ॥ निवेशनानां विविधाश्च शालाः प्रधानशङ्खायुधचापशालाः । मनोहराश्चापि पुनर्विशाला ददर्श वेश्माद्रिषु चन्द्रशालाः ॥ २ ॥ गृहाणि नानावसुराजितानि देवासुरैश्चापि सुपूजितानि । सर्वैश्च दोषैः परिवर्जितानि कपिर्ददर्श स्वबलार्जितानि ॥ ३ ॥

स वेश्मजालमित्यादि । व्यासक्तवैडूर्यसुवर्णजालं वैडूर्यघटितसुवर्णमयजालकरन्ध्रम् ॥ १ ॥ निवेशनानां शालाः गृहान्तःशालाः । प्रधानैर्मुख्यैः शङ्खायुधचापैः शालन्ते प्रकाशन्त इति प्रधानशङ्खायुधचापशालाः । पचाद्यच् । वेश्मादिषु हर्म्यप्रासादादिषु । चन्द्रशालाः शिरोगृहाणि ॥ २ ॥

रामानु०-नानाविधानि कर्माणि यासां ताः नानाविधकर्माणः शालाश्च नानाविधकर्मशालाः । कक्ष्याश्च नानाविधकर्मशाला इत्ययं पाठः । निवेशनानां विविधाश्च शाला इति पाठे प्रधानभवनानां संबन्धिनीर्विविधाः शाला इत्यर्थः । प्रधानशङ्खायुधचापशालाः प्रधानैर्मुख्यैः शङ्खैरायुधैः चापैश्च शालन्त इति प्रधानशङ्खायुधचापशालाः ताः । पचाद्यच् । वेश्मान्यद्रय इव वेश्माद्रयः तेषु । वेश्मादिष्विति पाठे आदिशब्देन प्रासादादय उच्यन्ते । चन्द्रशालाः शिरोगृहाणि । "चन्द्रशाला शिरोगृहम्" इत्यमरः ॥ २ ॥ नानावसुराजितानि

घोषवद्भिः नादविशेषयुक्तैः । अनुक्तैरन्यैश्च । सुव्यूढकक्ष्यं सन्निवेशितप्रकोष्ठम् । व्यूहः पद्मस्वस्तिकादिरचनाविशेषः ॥ ४३ ॥ ४४ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां षष्ठः सर्गः ॥ ६ ॥ स वेश्मेति । व्यासक्तवैडूर्यसुवर्णजालं खचितवैडूर्यस्वर्णगवाक्षम् । सविहङ्गजालमित्युपमेयेपि योज्यम् ॥१॥ निवेशनानां गृहाणां सम्बन्धिनीः शालाः अवान्तरगृहाणि । प्रधानशङ्खायुधचापशालाः प्रधानैर्मुख्यैः शङ्खादिभिः शालन्त इति पचाद्यच् । वेश्माद्रिषु वेश्मान्यद्रय इव तेषु । चन्द्रशालाः शिरोगृहाणि । वेश्मादिष्विति पाठे-आदिशब्देन प्रासादादयश्च लक्ष्यन्ते ॥ २ ॥ स्वबलार्जितानि कुबेर

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नानारत्नराजितानि ॥ ३ ॥ प्रयत्नाभिसमाहितानि प्रयत्नेन यथायोगं स्थापितानि । मयेनेति विश्वकर्मा लक्ष्यते । महीतले निर्मितानि । इवशब्देन मयस्य निर्मातृत्वव्याजमात्रम् । रावणप्रयत्नेनैव निर्मितानीत्यर्थः । यद्वा अन्यानि गृहाणि विश्वकर्मनिर्मितानि, इमानि तु मयं व्याजीकृत्य स्वयमुपाय प्रदर्शनमुखेन निर्मितानीति पूर्वगृहेभ्यो विशेष उच्यते ॥ ४ ॥ तदन्तर्वर्तिपुष्पकविमानं दर्शयति–तत इति । अप्रतिरूपरूपम् अप्रतिमसौन्दर्यम् ।

तानि प्रयत्नाभिसमाहितानि मयेन साक्षादिव निर्मितानि । महीतले सर्वगुणोत्तराणि ददर्श लङ्काधिपतेर्गृहाणि ॥ ४ ॥ ततो ददर्शोच्छ्रितमेघरूपं मनोहरं काञ्चनचारुरूपम् । रक्षोधिपस्यात्मबलानुरूपं गृहोत्तमं ह्यप्रति रूपरूपम् ॥५॥ महीतले स्वर्गमिव प्रकीर्णं श्रिया ज्वलन्तं बहुरत्नकीर्णम् । नानातरूणां कुसुमावकीर्णं गिरेरिवाग्रं रजसाऽवकीर्णम् ॥ ६ ॥ नारीप्रवेकैरिव दीप्यमानं तडिद्भिरम्भोदवदर्च्यमानम् । हंसप्रवेकैरिव वाह्यमानं श्रिया युतं खे सुकृतां विमानम् ॥ ७ ॥ यथा नगाग्रं बहुधातुचित्रं यथा नभश्च ग्रहचन्द्रचित्रम् । ददर्श युक्तीकृतमेघचित्रं विमानरत्नं बहुरत्नचित्रम् ॥ ८ ॥

प्रकीर्णं दैवाच्युतम् । रजसा पुष्परजसा । नारीप्रवेकैः नारीश्रेष्ठैः । " प्रवेकानुत्तमोत्तमाः " इत्यमरः । इवशब्दो वाक्यालङ्कारे । अर्च्यमानं, सर्वैरिति शेषः । हंसप्रवेकैर्वाह्यमानं सुकृतां पुण्यकृतां विमानमिव स्थितमित्यन्वयः । युक्तीकृतमेघचित्रं पुञ्जीकृतमेघचित्रम्, चित्रमेघसङ्घातसदृशमित्यर्थः । विमानरत्नं पुष्पकम् ॥ ५–८ ॥ रामानु०–वैश्रवणं निर्जित्य गृहीतं पुष्पकं वर्ण्यते–तत इत्यादिना । ततः गृहदर्शनानन्तरम् । आत्मबलानुरूपम् आत्मनोऽप्रतिबलस्य सदृशम् । गृहोत्तममिति पुष्पकमुच्यते । पुष्पकस्यापि गृहलक्षणसद्भावात् । एतच्च पुष्पाह्वयमित्यनेन व्यक्तीभविष्यति । रजसा पुष्परजसा । तडिद्भिरिव स्थितैर्नारीप्रवेकैरम्भोदवद्दीप्यमानमिव स्थितमिति माक्रम्य हृतानि ॥३॥ प्रयत्नाभिसमाहितानि प्रयत्नेनाभितः सम्यगाहितानि,यथायोगं संस्थापितानीत्यर्थः। मयेन निर्मितानीव विश्वकर्मानिर्मितान्यपि मयेन विचित्र विधानेन समाहितत्वात तेनैव साक्षान्निर्मितानीत्यर्थः ॥ ४ ॥ अथ पुष्पकं वर्णयति–तत इत्यादिना । आत्मबलानुरूपम् आत्मनोऽप्रतिबलस्य सदृशम् । गृहोत्तम मिति पुष्पकमुच्यते ॥ ५ ॥ बहुरत्नकीर्णं बहुरत्नपूर्णम् । रजसा पुष्परजसा ॥ ६ ॥ तडिद्भिः अम्भोदवत् । नारीप्रवेकैरिव नारीश्रेष्ठैरिव । इव एवार्थे । दीप्यमानम् अर्च्यमानम् । हंसप्रवेकैः वाह्यमानं सुकृतां विमानमिवेत्यन्वयः । वाह्यमानम् उह्यमानम् । स्वार्थे णिच् ॥ ७ ॥ युक्तीकृतमेघचित्रं समूहीकृतनानावर्णमेघवद्विचित्र

स०–प्रयत्नाभिसमाहितानि प्रयत्नेन, विश्वकर्मणा इति शेषः ॥ ४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

संबन्धः । नारीप्रवेकैः नारीश्रेष्ठैः । "प्रवेकानुत्तमोत्तमाः" इत्यमरः । अर्च्यमानं, सर्वैरिति शेषः । हंसप्रवेकैः खे वाह्यमानं सुकृतां विमानमिवेत्यन्वयः । वाह्यमानम् उह्यमानम् । आर्षः स्वार्थे णिच् । अत एव संप्रसारणाभावः । यद्वा हंसप्रवेकैर्वाह्यमानं स्वामिनेति शेषः । युक्तीकृतमेघचित्रं समूहीकृतनानावर्णमेघचित्रमित्यर्थः । विमानरत्नं पुष्पकम् ॥ ९–८ ॥ **महीति** । यत्रेति शेषः । यत्र विमाने पर्वतराजिपूर्णा मही कृता चित्ररूपेण लिखिता । एवमुत्तरत्रापि बोध्यम् । अत्र पूर्वपूर्वं प्रत्युत्तरोत्तरस्य विशेषवत्त्वादधिका

मही कृता पर्वतराजिपूर्णा शैलाः कृता वृक्षवितानपूर्णाः । वृक्षाः कृताः पुष्पवितानपूर्णाः पुष्पं कृतं केसरपत्रपूर्णम् ॥ ९ ॥ कृतानि वेश्मानि च पाण्डुराणि तथा सुपुष्पाण्यपि पुष्कराणि । पुनश्च पद्मानि सकेसराणि धन्यानि चित्राणि तथा वनानि ॥ १० ॥ पुष्पाह्वयं नाम विराजमानं रत्नप्रभाभिश्च विवर्द्धमानम् । वेश्मोत्तमानामपि चोच्चमानं महार्कपिस्तत्र महाविमानम् ॥ ११ ॥ कृताश्च वैडूर्यमया विहङ्गा रूप्यप्रवालैश्च तथा विहङ्गाः । चित्राश्च नानावसुभिर्भुजङ्गा जात्यानुरूपास्तुरगाः शुभाङ्गाः ॥ १२ ॥

लङ्कारः ॥ ९ ॥ रामानु०–महीत्यादि । यत्रेति शेषः । ददर्शेत्यनुषज्यते । मही कृतेत्यारभ्य पद्मिनि पद्महस्तेत्यन्तमेकं वाक्यम् । यत्र मह्यादयो लक्ष्यन्ताः पदार्थाः कृताः तत्पुष्पाह्वयं नाम महाविमानं ददर्शेति संबन्धः । मही कृता मही निर्मिता । एवमुत्तरत्रापि कृतशब्दार्थः ॥ ९ ॥ **कृतानीति** । अत्रापि यत्रेत्यध्याहार्यम् । **पुष्कराणि पुष्करिण्यः** ॥ १० ॥ **पुष्पाह्वयं पुष्पकम्** । **उच्चमानम् अधिकमानम्** । **सर्वत्र ददर्शेत्यन्वयः** ॥ ११ ॥ रामानु०–वेश्मोत्तमानामिति पञ्चम्यर्थे षष्ठी । वेश्मोत्तमेभ्योऽप्युच्चमानम् । यद्वा पूर्वं गृहोत्तमं ह्यप्रतिरूपरूपमिति पुष्पकस्य गृहोत्तमत्वप्रतिपादनेन सजातीयत्वान्निर्धारणे षष्ठी । तेषां मध्ये उच्चमानम् उन्नतामिति यावत् । अपिचेति निपातसमुदायो विशेषणान्तरसमुच्चयपरः ॥ ११ ॥ **कृताश्चेति** । यत्रेति शेषः । नानावसुभिः नानारत्नैः । जात्यानुरूपाः जात्या सदृशाः, स्पष्टजातिस्वभावा इत्यर्थः ॥ १२ ॥ रामानु०–जात्यानुरूपाः आरट्

मित्यर्थः । यद्वा इन्द्रचापमिश्रीकृतमेघचित्रम् । विमानरत्नं पुष्पकम् ॥ ८ ॥ महीत्यादि । यत्रेति शेषः । ददर्शेत्यनुषज्यते । मही कृतेत्यारभ्य पद्मिनि पद्महस्तेत्यन्तमेकं वाक्यम् । यत्र मह्यादयो लक्ष्यन्ताः पदार्थाः कृताः तत् पुष्पाह्वयं नाम विमानं ददर्शेति सम्बन्धः । यत्र पुष्पके पर्वतराजैः पूर्णा मही कृता चित्ररूपेण लिखिता, तत्र शैलादयोप्येवं लिखिता इति ज्ञेयाः ॥ ९ ॥ १० ॥ पुष्पाह्वयमिति । वेश्मोत्तमानामिति पञ्चम्यर्थे षष्ठी । तेभ्योप्युच्चमानम् उन्नतप्रमाणम् ॥ ११ ॥ तत्र कृत्रिमाः पक्ष्यादयश्च

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जत्ववनायुजत्वादिविशिष्टाश्वाकारसदृशाः ॥ १२॥ प्रवालजाम्बूनदकृतानि पुष्पाणि पक्षेषु येषां ते प्रवालजाम्बूनदपुष्पपक्षाः । सलीलमावर्जितजिह्मपक्षाः सलीलमालम्बितवक्रपक्षाः । कामस्य पक्षा इव कामस्य सहाया इव ॥ १३ ॥ रामानु०–प्रवालजाम्बूनदमयानि पुष्पाणि पक्षेषु येषां ते तथोक्ताः । सलीलमावर्जित जिह्मपक्षाः सलीलमानमितवक्रपक्षाः । कामस्य साक्षात्पक्षा इव मदनस्य साक्षात्सहाया इव, कामोद्दीपका इति यावत् ॥ १३ ॥ नियुज्यमानाः स्वयमेवात्मानं नियोजयन्तः । कर्म

प्रवालजाम्बूनदपुष्पपक्षाः सलीलमावर्जितजिह्मपक्षाः । कामस्य साक्षादिव भान्ति पक्षाः कृता विहङ्गाः सुमुखाः सुपक्षाः ॥ १३ ॥ नियुज्यमानास्तु गजाः सुहस्ताः सकेसराश्चोत्पलपत्रहस्ताः । बभूव देवी च कृता सुहस्ता लक्ष्मीस्तथा पद्मिनि पद्महस्ता ॥१४॥ इतीव तद् गृहमभिगम्य शोभनं सविस्मयो नगमिव चारुशोभनम् । पुनश्च तत्परमसुगन्धि सुन्दरं हिमात्यये नगमिव चारुकन्दरम् ॥ १५ ॥

कर्तरि यक् । यत्र विमाने । पद्मिनि पद्माकरे । स्वयमेवोत्पलपत्राभिषेककर्मणि प्रवर्तमानाः । सुहस्ताः शोभनशुण्डादण्डाः । सकेसराः कृतजलावगाहत्वेनाङ्गलग्नकिञ्जल्काः । उत्पलपत्रहस्ताः उत्पलपत्रवर्षिणः । गजाश्च कृताः तदभिषिच्यमाना पद्महस्ता अत एव सुहस्ता लक्ष्मीश्च कृता बभूवेत्यर्थः ॥ १४ ॥ रामानु०–नियुज्यमानाः स्वयमेव व्याप्रियमाणाः । कर्मकर्तरि यक् । सकेसराः पद्माकरविहारिगजाकारनिर्माणात् सकेसरत्वम् । पद्मिनि पद्माकरे ॥ १४ ॥ इतीवेति । इवशब्दो वाक्यालङ्कारे । तदगृहं तस्य रावणस्य गृहम् । सविस्मयः, अभूदिति शेषः । नगं पर्वतमिव स्थितम् । शोभनं शोभमानम् । चारुशोभनं चारुमङ्गलम् । इतीवेत्येकनिपातो वा प्रकारार्थः । इतीव तद्गृहम् अभिगम्य अभिगत्य । अद्भुतदर्शनात्पुनश्चाभिगम्य सविस्मयोऽभूदिति योजना ।

सन्तीत्याह–कृताश्चेत्यादिना । जात्यानुरूपाः जातितुरङ्गसदृशाः॥१२॥ प्रवालजाम्बूनदमयानि पुष्पाणि पक्षेषु येषां ते तथोक्ताः । सलीलमावर्जितजिह्मपक्षाः सलीलमावर्जिता आकुञ्चिताः जिह्मा वक्राः पक्षा येषां ते । कामस्य पक्षाः सहायाः, कामोद्दीपका इति यावत् ॥ १३ ॥ नियुज्यमानाः स्वयमेव व्याप्रियमाणाः यत्र कृत्रिमगजाः, सन्तीति शेषः । कर्मकर्तरि यक् । सकेसराः पद्माकरविहारिगजाकारनिर्माणात् सकेसरत्वादिकम् । पद्मिनि पद्माकरे पद्महस्ता लक्ष्मीः यत्र कृता, बभूवेति शेषः ॥१४॥ इतीवेति निपातसमुदायः प्रकाशवाची । इति पूर्वोक्तप्रकारेण रमणीयं चारु शोभनं नगमिव पर्वतमिव स्थितम्, तद्गृहं रावणगृहम् अभिगम्य अभितो गत्वा सविस्मयः, अभूदिति शेषः । अभितो गत्वापि सन्नीकरावणावस्थितप्रदेशं नागममिति सविस्मयोऽभूदित्यर्थः । हिमात्यये वसन्तकाले । चारु

स०–हिमात्यये वसन्ते । हिमशब्देन तद्युक्तमासचतुष्टयग्रहणात् ॥ १५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रुचिरावृत्तामिदम् । " चतुर्ग्रहैरिह रुचिरा जभमजगाः " इति लक्षणात् ॥ १५ ॥ रामानु०--इतीवेति । इतीव शोभनम् । इतीवेति निपातसमुदायः प्रकारवाची । " प्रासाद सङ्घातयुतं स्त्रीरत्नशतसंकुलम् । सुव्यूढकक्ष्यं हनुमान् प्रविवेश महागृहम्" इत्युक्तप्रकारेण रमणीयम् । चारुशोभनं चारुमङ्गलम् । नगमिव स्थितं तत् गृहमभिगम्य अभितो गत्वा सविस्मयः अभूदिति शेषः । अभितश्चरित्वापि सस्त्रीकरावणस्थितप्रदेशानधिगमात् सविस्मयोऽभूदित्यर्थः । हिमात्यये शीतकालात्यये । वसन्तकाल इति यावत् । चारुकन्दरं नगमिव परम सुगन्धि सुन्दरं तद्गृहं पुनश्चाभिगम्य अभितो गत्वा । सविस्मयोऽभूत्, परिच्छेदानधिगमादिति भावः ॥ १५ ॥ तत इति । अदृश्य अदृष्ट्वा । ऋषिनिपातनान्नञ्पूर्वैपि ल्यप् ।

ततः स तां कपिरभिपत्य पूजितां चरन् पुरीं दशमुखबाहुपालिताम् । अदृश्य तां जनकसुतां सुपूजितां सुदुःखितः पतिगुणवेगनिर्जिताम् ॥ १६ ॥ ततस्तदा बहुविधभावितात्मनः कृतात्मनो जनकसुतां सुवर्त्मनः । अपश्यतोऽभवदति दुःखितं मनः सुचक्षुषः प्रविचरतो महात्मनः ॥ १७ ॥ इत्यार्षे० श्रीरामायणे श्रीमत्सुन्दरकाण्डे सप्तमः सर्गः ॥ ७ ॥

सुदुःखितः, अभूदिति शेषः । पतिगुणवेगनिर्जितां भर्तृगुणजवेन वशीकृताम् ॥ १६ ॥ ततस्तदेति । बहुविधभावितात्मनः बहुविधं यथा भवति तथा चिन्तितात्मनः । कृतात्मनः निशितबुद्धेः । सुवर्त्मनः सदाचारसम्पन्नस्य । सुचक्षुषः दूरसूक्ष्मादिदर्शनेषु अप्रतिहतनयनतेजसः । महात्मनः महाधैर्यस्य ॥ १७ रामानु०--ततस्तदेति । बहुविधभावितात्मनः बहुविधभावितमनसः । बहुविधचिन्तान्वितचित्तस्येति यावत् । कृतात्मनः कृतप्रयत्नस्य । " आत्मा देहे धृतौ यत्ने स्वभावपरमात्मनोः " इति वैजयन्ती । सुवर्त्मनः शोभननीतिमार्गवर्तिन इत्यर्थः । सुचक्षुषः सकृदालोकनेन द्रष्टव्यं सर्वं करतलामलकवत्साक्षात्कर्तुं क्षमस्य ॥ १७ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायण भूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तमः सर्गः ॥ ७ ॥

कन्दरं नगमिव परमसुगन्धिसुन्दरं तद्गृहं पुनश्चाभिगम्य अभितो गत्वा सविस्मयोऽभूत्, परिच्छेदानधिगमादिति भावः ॥ १५ ॥ तत इति । तां पुरीं चरन् कपिः पतिगुणवेगनिर्जितां पतिगुणोत्कर्षवशीकृताम् । जनकात्मजाम् अदृश्य अदृष्ट्वा सुदुःखितः, अभूदिति शेषः ॥ १६ ॥ बहुविधभावितात्मनः बहुविधचिन्तान्वित चित्तस्येत्यर्थः । कृतात्मनः कृतप्रयत्नस्य । सुवर्त्मनः शोभननीतिमार्गवर्तिनः । सुचक्षुषः दूरसाक्षात्कारसमर्थस्येत्यर्थः ॥ १७ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां सप्तमः सर्गः ॥ ७ ॥

स०--दृश्यस्य भावो दृश्यता । न विद्यते दृश्यता यस्यास्ता तथा । तामुद्दिश्य दुःखितोऽभूदिति वा । पतिगुणवेगनिर्जितां पत्युः रामस्य यो गुणवेगः गुणप्रवाहः तेन निर्जिताम् । पत्या रामेण कर्त्रा गुणवेगेन ज्याकर्षणवेगेन धनुर्मुक्तद्वारा निर्जितां नितरां प्राप्ताम् ॥ १६ ॥ बहुविधभावितात्मनः बहुप्रकारं ध्यातरामरूपस्वामिकस्य ॥ १७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पूर्वोक्तविमानवर्णनं विस्तृणीते–स तस्येत्यादि । प्रतप्तजाम्बूनदजालकृत्रिमं निष्टप्तस्वर्णविशेषकृतकृत्रिमपक्ष्यादिकम् ॥ १ ॥ तदिति । अप्रतिमेया प्रतिकारकृत्रिमम् अपरिच्छेद्याप्रतिक्रियकृत्रिमम् । तत्र हेतुमाह कृतं स्वयं साध्विति । विश्वकर्मणा स्वयं निर्मात्रा विश्वकर्मणा इदं साधु सुन्दरमिति श्लाघापूर्वं कृतम् । सर्वत्राप्रतिहतसञ्चारं चैतदित्याह–दिवं गतम् आकाशगतम् । वायुपथप्रतिष्ठितं वायुमार्गभूतान्तरिक्षस्थितम् । मध्ये भवनस्य संस्थित मिति पूर्वमुक्तत्वात् भूतलप्रत्यासन्नान्तरिक्षस्थितामित्यर्थः । आदित्यपथस्य लक्ष्मवत् लक्ष्म लक्षणं व्यावर्तकम्, व्यराजत प्रचकाश इत्यर्थः ॥ २ ॥

स तस्य मध्ये भवनस्य संस्थितं महद्विमानं मणिवज्रचित्रितम् । प्रतप्तजाम्बूनदजालकृत्रिमं ददर्श वीरः पवना त्मजः कपिः ॥ १ ॥ तदप्रमेयाऽप्रतिकारकृत्रिमं कृतं स्वयं साध्विति विश्वकर्मणा । दिवं गतं वायुपथप्रतिष्ठितं व्यराजतादित्यपथस्य लक्ष्मवत् ॥ २ ॥ न तत्र किंचिन्नकृतं प्रयत्नतो न तत्र किंचिन्नमहार्हरत्नवत् । न ते विशेषा नियताः सुरेष्वपि न तत्र किंचिन्नमहाविशेषवत् ॥ ३ ॥ तपःसमाधानपराक्रमार्जितं मनःसमाधान विचारचारिणम् । अनेकसंस्थानविशेषनिर्मितं ततस्ततस्तुल्यविशेषदर्शनम् ॥ ४ ॥

न तत्रेति । ते विशेषाः तद्विमानस्थितविशेषाः । सुरेष्वपि सुरालयेष्वपि ॥ ३ ॥ तपस्समाधानेत्यादि पञ्चश्लोकी कुलकम् । सर्वत्र ददर्शेति संबन्धः । तपस्समाधानपराक्रमार्जितं तपस्समाधानेन तपोनुष्ठानेन पराक्रमेण च अर्जितम् । मनस्समाधानविचारचारिणं समाधानमभिसन्धानम् । कर्मणि चैतत् । विचारो विविधा गतिः । मनोभिसंहितविविधगतिचारिणम् । अनेकसंस्थानविशेषनिर्मितम् अनेकैस्संस्थानविशेषैः विमानगोपुरादिसन्निवेशैः निर्मितम् ।

भूयः पुष्पकं वर्णयति–स तस्येत्यादिना । प्रतप्तजाम्बूनदजालकृत्रिमं तप्तहेमगवाक्षाणां कृत्रिमं निर्माणं यस्मिन् तत्, प्रतप्तजाम्बूनदसमूहैः निष्पन्नमिति वा ॥१॥ अप्रमेयाप्रतिकारकृत्रिमम् अपरिच्छेद्यमप्रतिकारमप्रतिनिर्माणं यथा भवति तथा निर्वृत्तम् । कृतं स्वयं साध्विति विश्वकर्मणा स्वयं साध्विति कृतम्, निर्माण वेलायां प्रशंसापूर्वकं कृतमित्यर्थः । दिवं गतम् आकाशगतं वायुपथप्रतिष्ठितम् अन्तरिक्षस्थितम् । आदित्यपथस्य लक्ष्मवत् आदित्यमार्गचिह्नमिव ॥ २ ॥ नकृतमित्यादौ नञर्थस्य नशब्दस्य " सुप्सुपा " इति समासः । तत्र विमाने । प्रयत्नतो न कृतमकृतम्, सर्वमपि प्रयत्नतः कृतमेवेत्यर्थः । ये विशेषा रचना विशेषाः तत्र नियताः प्रतिष्ठिताः ते सुरेष्वपि सुरविमानेष्वपि ॥ ३ ॥ तपस्समाधानं तपोनुष्ठानं तेन च पराक्रमेण चार्जितम् । मनस्समाधानविचारचारिणम्,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ततस्ततस्तुल्यविशेषदर्शनम् तत्र तत्र तुल्यं विशेषदर्शनं यस्मिन् ॥ ४ ॥ मनस्समाधाय मन एकाग्रीकृत्य । स्वयं मनस्वीति यावत् । दुरावरं दुर्वारम् । महर्द्धिनां महर्द्धीनाम् । "अपि माषं मषं कुर्याच्छन्दोभङ्गं न कारयेत्" इत्युक्तरीत्या वृत्तभङ्गभिया ह्रस्वोच्चारणम् । अभ्र्यमुदाम् इन्द्रादीनाम् ॥५॥ विशेषमिति । विशेषमालम्ब्य विशेषसंस्थितं विशेषं गृहीत्वा विशेषेण संस्थितम् । सविशेषणविशेषसंस्थितमिति यावत् । सविशेषसंस्थानविशेष

मनस्समाधाय तु शीघ्रगामिनं दुरावरं मारुततुल्यगामिनम् । महात्मनां पुण्यकृतां महर्द्धिनां यशस्विनामभ्र्य मुदामिवालयम् ॥ ५ ॥ विशेषमालम्ब्य विशेषसंस्थितं विचित्रकूटं बहुकूटमण्डितम् । मनोभिरामं शरदिन्दु निर्मलं विचित्रकूटं शिखरं गिरेर्यथा ॥ ६ ॥ वहन्ति यं कुण्डलशोभिताननाः महाशना व्योमचरा निशाचराः । विवृत्तविध्वस्तविशाललोचना महाजवा भूतगणाः सहस्रशः ॥ ७ ॥

विशिष्टमित्यर्थः । कूटानां विचित्रत्वबहुत्वे विशेषणद्वयेन दर्शयति—विचित्रेत्यादिना । विचित्रकूटं शिखरं गिरेर्यथा । कूटम् अवान्तरशृङ्गम्, शिखरं महाशृङ्गमिति प्रयोगादवधार्यते ॥ ६ ॥ वहन्तीति । यं यत् । आर्षो व्यत्ययः । महाशनाः महाकाया इत्यर्थः । व्योमचराः व्योमचरसदृशसंस्थानाः । विवृत्तविध्वस्तविशाललोचनाः विवृत्तानि वर्तुलानि विध्वस्तानि भुग्नानि विशालानि लोचनानि येषां ते तथा । महाजवाः महाजवा इव स्थिताः । भूतगणाः गोपुरवाहका इव प्रतिमारूपेण स्थिताः । अन्यथा रावणान्तःपुरे पुरुषसञ्चारायोगात् कामगस्य विमानस्य वहनासंभवाच्च । यद्वा शिविकावाहका इव

समाधीयन्त इति समाधानाः मनसः समाधानाः मनोहितसंहिताः ते च ते विचारा विविधमार्गास्तैः सञ्चरणशीलम्, मनोभिलषितसर्वदेशगमनशीलमित्यर्थः । यद्वा मनस्समाधानेन मनोनैश्चल्येन यत्र विचारः चिन्ता तत्र चरणशीलम्, मनस्सङ्कल्पितदेशगमनशीलमित्यर्थः । ततस्ततस्तुल्यविशेषदर्शनं तुल्यानां रमणीयत्वेन सदृशानां विशेषाणां दर्शनं यस्मिन् तत्, सर्वतो रमणीयमित्यर्थः ॥ ४ ॥ मन इति । मनस्समाधाय स्वामिचित्तं स्वहृदि निधाय, स्वामिचित्तं विदित्वेति यावत् । दुरावरं दुर्निवारम् । महर्धिनाम् । दीर्घाभावश्छान्दसः । अभ्र्यमुदां महानन्दानामिन्द्रादीनामालयं निविष्टमिव स्थितमित्यर्थः ॥ ५ ॥ विशेषं विशिष्टदिव्यरत्नादि वस्तुजातम् । आलम्ब्य अवलम्ब्य विशेषसंस्थितं दिव्यसंस्थानविशेषेणावस्थितम् । बहुकूटमण्डितं बहुभिरवान्तरकूटैरलंकृतम् । विचित्रकूटं विचित्रशिखरम् ॥ ६ ॥ वहन्तीति । महद्दर्शनं येषां ते तथा । विवृत्तविध्वस्तविशाललोचनाः विवृत्तानि विघूर्णितानि विध्वस्तानि विपर्यस्तानि विशालानि लोचनानि येषां ते ।

स०—विवृत्तविध्वस्तविशाललोचनाः वि विरुद्धं स्वामिविरुद्धं वृत्तं चरित्रं विध्वस्तं येषां ते तथा । ते च ते विशाललोचनाश्चेति तथा ॥ ७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भूतगणा अधोभागे वहन्ति । तद्वारेणैव कामगत्वमपि, चेतनप्रेरणं विना अचेतनसञ्चारस्यात्यन्तमनुचितत्वाच्च ॥ ७ ॥ रामानु०—वहन्तीत्यनेन श्लोकेन विमानस्य राक्षसवाह्यत्वं प्रतीयते । कामगस्य दिव्यस्य तन्नोपपद्यते । एतद्विरोधपरिहारार्थं वहतेर्धातोः रक्षणार्थत्वस्वीकारोपि नोपपद्यते । अन्तःपुरमध्ये विमानरक्षणार्थं राक्षसावस्थानायोगात् । अतोऽत्र समाधानं विद्वद्भिश्चिन्त्यम् ॥ ७ ॥ उत्करः समूहः ॥ ८ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टमः सर्गः ॥ ८ ॥ तस्येत्यादि । आलयवरिष्ठस्य पुष्पकस्य ॥ १ ॥ रामानु०—तस्यालयवरिष्ठस्य, स तस्य मध्ये भवनस्य संस्थितमिति पुष्पकाधारत्वेन प्रकृतस्वगृह

वसन्तपुष्पोत्करचारुदर्शनं वसन्तमासादपि कान्तदर्शनम् । स पुष्पकं तत्र विमानमुत्तमं ददर्श तद्वानरवीरसत्तमः ॥ ८ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे अष्टमः सर्गः ॥ ८ ॥
तस्यालयवरिष्ठस्य मध्ये विपुलमायतम् । ददर्श भवनश्रेष्ठं हनुमान् मारुतात्मजः ॥ १ ॥ अर्द्धयोजनविस्तीर्णं मायतं योजनं हि तत् । भवनं राक्षसेन्द्रस्य बहुप्रासादसङ्कुलम् ॥२॥ मार्गमाणस्तु वैदेहीं सीतामायतलोचनाम् । सर्वतः परिचक्राम हनुमानरिसूदनः ॥ ३ ॥ उत्तमं राक्षसावासं हनुमानवलोकयन् । आससादाथ लक्ष्मीवान् राक्षसेन्द्रनिवेशनम् ॥ ४ ॥ चतुर्विषाणैर्द्विरदैस्त्रिविषाणैस्तथैव च । परिक्षिप्तमसंबाधं रक्ष्यमाणमुदायुधैः ॥ ५ ॥

श्रेष्ठस्य । भवनश्रेष्ठं पुष्पकाख्यम् ॥ १ ॥ तद्भवनं कियत्प्रमाणमित्यत्राह—अर्द्धयोजनेति ॥२॥ सर्वतः पुष्पकादन्यत्र सर्वत्र । पुष्पकारोहणस्य पश्चाद् वक्ष्यमाणत्वात् ॥३॥ रामानु०—मार्गमाण इति । सर्वतः परिचक्राम । रावणभवनपर्यन्तवर्तितद्भ्रातृकुमारामात्यादिभवनेषु परितश्चचारेत्यर्थः । उत्तरश्लोके रावणगृहप्राप्तेरभिधानात् ॥३॥ उत्तममिति ।

निशाचराः वहन्ति वहन्तीव । इवशब्दोऽत्राध्याहर्तव्यः । तथा च विमाने निर्मितनिशाचराकाराः प्रतिमा वहन्तीवेत्यर्थः । तं विमानं ददर्शेत्युत्तरेण सम्बन्धः । अन्यथा कामगमनस्य अन्तःपुरे विद्यमानस्य राक्षसवहनरक्षणयोरयोगात् ॥ ७ ॥ वसन्तेति । वसन्तपुष्पोत्करचारुदर्शनं वसन्तकालीनपुष्पसमूहचारुदर्शनम् ॥ ८ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायाम् अष्टमः सर्गः ॥ ८ ॥ ॥ १ ॥ तस्येत्यादि श्लोकद्वयमेकं वाक्यम् । तस्यालयवरिष्ठस्य पूर्वोक्तपुष्पकस्य मध्ये भवनश्रेष्ठं भवनोत्तमं राक्षसेन्द्रस्य भवनं ददर्शेति सम्बन्धः ॥ २ ॥ मार्गमाण इति । सीतां मार्गमाणः सर्वतः पुष्पकादन्यत्र सर्वत्र परिचक्राम सञ्चचार पुष्पकारोहणस्योपरि वक्ष्यमाणत्वात् ॥ ३ ॥ उत्तममित्यादि श्लोकद्वयमेकं वाक्यम् । राक्षसावासमित्यनेन सर्वोप

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

राक्षसेन्द्रनिवेशनं पुष्पकमध्यस्थालयादन्यन्मूलस्थानम् ॥४॥५॥ राक्षसीभिरित्यादिश्लोकद्वये आससादेति संबध्यते । रावणस्य निवेशनमिति पुनरुपादानमपूर्वविशेषणविवक्षया ॥ ६ ॥ नक्रः कुम्भीरः । तिमिङ्गिलः महामत्स्यः । झषः केवलमत्स्यः ॥ ७–९ ॥ रामानु०–हनुमता प्राप्तरावणभवनस्य राक्षसभवनानां च सर्वोत्तरतां दर्शयितुं तत्समृद्धिमनुसन्धत्ते–या हि वैश्रवण इत्यादिश्लोकद्वयेन । वैश्रवणेन्द्रयोर्ग्रहणमितरदिक्पालानामप्युपलक्षणम् । " रावणस्य गृहे सर्वा नित्यमेवानपायिनी " इत्यभिधानात् सर्वदिक्पालानामैश्वर्यमेकस्मिन् रावणभवने सर्वदा वर्तत इत्यवगम्यते ॥ ८ ॥ या चेति । तद्विशिष्टा ततोप्यधिका । रक्षोगृहेषु रावणभ्रातृपुत्रामात्यादिराक्षसगृहेषु । अत्र ऋद्धेः सर्वशब्देनाविशेषितत्वात्कुबेराद्यैकैकदिक्पालैश्वर्यं रक्षसां गृहेषु प्रत्येकं वर्तत इत्यर्थः ॥ ९ ॥ तस्य हर्म्यस्येत्यादि । पूर्वमुक्तार्थस्यापि पुनरुपन्यासः पुष्पकस्य मध्ये

राक्षसीभिश्च पत्नीभी रावणस्य निवेशनम् । आहृताभिश्च विक्रम्य राजकन्याभिरावृतम् ॥६॥ तन्नक्रमकराकीर्णं तिमिङ्गिलझषाकुलम् । वायुवेगसमाधूतं पन्नगैरिव सागरम् ॥ ७ ॥ या हि वैश्रवणे लक्ष्मीर्या चेन्द्रे हरिवाहने । सा रावणगृहे सर्वा नित्यमेवानपायिनी ॥ ८ ॥ या च राज्ञः कुबेरस्य यमस्य वरुणस्य च । तादृशी तद्विशिष्टा वा ऋद्धी रक्षोगृहेष्विह ॥ ९ ॥ तस्य हर्म्यस्य मध्यस्थं वेश्म चान्यत्सुनिर्मितम् । बहुनिर्यूहसङ्कीर्णं ददर्श पवनात्मजः ॥ १० ॥ ब्रह्मणोर्थे कृतं दिव्यं दिवि यद्विश्वकर्मणा । विमानं पुष्पकं नाम सर्वरत्नविभूषितम् । परेण तपसा लेभे यत्कुबेरः पितामहात् ॥ ११ ॥

रावणस्य निवासभवनमन्यदस्तीत्यस्यार्थस्य स्पष्टीभावार्थम् । निर्यूहः मत्तवारणः ॥ १० ॥ रामानु०–तस्येति । तस्य हर्म्यस्य पूर्वोक्तविशेषणविशिष्टस्य रावणभवनस्य । बहुनिर्यूहसंकीर्णम् निर्यूहो मत्तवारणः ॥ १० ॥ ब्रह्मणोऽर्थ इत्यादि । ब्रह्मणोऽर्थे कृतं यत्कुबेरस्तपसा लेभे तद्वेश्म ददर्शेति पूर्वेण सम्बन्धः॥११॥ जीव्यत्वात्सर्वराक्षससाधारणत्वमुक्तम् । राक्षसेन्द्रनिवेशनं रावणभवनम् । परिक्षिप्तं परिवेष्टितम् । उदायुधैः, राक्षसैरिति शेषः ॥ ४ ॥ ५ ॥ राक्षसीभिरिति । रावणस्य निवेशनं निवेश्यन्ते परिगृह्यन्ते पत्न्योऽत्रेति निवेशनम्, रावणस्थानमित्यर्थः । अपश्यदिति शेषः । अत एव पत्नीभिरावृतम् ॥ ६–८ ॥ या चेत्यादिश्लोकद्वयेन रावणगृहसर्वराक्षसगृहवर्तमानां लक्ष्मीमनुसन्धत्ते । या लक्ष्मीः वैश्रवणादिषु नित्यानपायिनी सा सर्वापि रावणगृहे सर्वराक्षसगृहेषु च तादृशी तद्विशिष्टा ततोप्यधिका वेति सम्बन्धः । लक्ष्मीः शोभा । ऋद्धिः ऐश्वर्यम् ॥ ९ ॥ तस्य हर्म्यस्येत्यादिश्लोकत्रयस्य पवनात्मजः तद्विमानं ददर्शेति सम्बन्धः । निर्यूहो

स०–हरिवाहने " त्वक्केशवालरोमाणि सुवर्णाभानि यस्य तु । हरिः स वर्णतोऽश्वस्तु पीतकौशेयसप्रभः ॥ " इति शालिहोत्रोक्तलक्षणोपेतो योऽश्वः स हरिरित्युच्यते । स वाहनं यस्य तस्मिन् । यद्वा हरिवाहने सूर्ये । " हरिवाहन इत्युक्तिः शचीरतिविवस्वतोः " इति विश्वः । अनपायिनी अविश्लेषा ॥ ८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कुबेरमित्यादि । ईहामृगसमायुक्तैः वृकप्रतिकृतियुक्तैः । कार्तस्वरहिरण्मयैः कार्तस्वरं सुवर्णम्, हिरण्यं रजतम् । " कृताकृतं हेम रूप्यं हिरण्यमभिधीयते " इति रजतस्यापि हिरण्यत्वाभिधानात् ॥ १२–१५ ॥ रामानु०–कुबेरमित्यारभ्य सर्वतः समलंकृतमित्यन्तमेकं वाक्यम् । अतो वक्ष्यमाणेन कूटागारशब्देन न पौनरुक्त्यम् । ईहामृगसमायुक्तैः कृत्रिमवृकयुक्तैः । कार्तस्वरहिरण्मयैः सुवर्णरजतमयैः । " कृताकृतं हेम रूप्यं हिरण्यमभिधीयते " इति रजतस्यापि हिरण्यत्वाभिधानात् ॥ १२–१४ ॥

कुबेरमोजसा जित्वा लेभे तद्राक्षसेश्वरः ॥ १२ ॥ ईहामृगसमायुक्तैः कार्तस्वरहिरण्मयैः । सुकृतैराचितं स्तम्भैः प्रदीप्तमिव च श्रिया ॥ १३ ॥ मेरुमन्दरसङ्काशैरुल्लिखद्भिरिवाम्बरम् । कूटागारैः शुभाकारैः सर्वतः समलंकृतम् ॥ १४ ॥ ज्वलनार्कप्रतीकाशं सुकृतं विश्वकर्मणा । हेमसोपानसंयुक्तं चारुप्रवरवेदिकम् ॥ १५ ॥ जालवातायनैर्युक्तं काञ्चनैः स्फाटिकैरपि । इन्द्रनीलमहानीलमणिप्रवरवेदिकम् ॥ १६ ॥ विद्रुमेण विचित्रेण मणिभिश्च महाधनैः । निस्तुलाभिश्च मुक्ताभिस्तलेनाभिविराजितम् ॥ १७ ॥ चन्दनेन च रक्तेन तपनीयनिभेन च । सुपुण्यगन्धिना युक्त मादित्यतरुणोपमम् ॥ १८ ॥ कूटागारैर्वराकारैर्विविधैः समलंकृतम् । विमानं पुष्पकं दिव्यमारुरोह महाकपिः ॥ १९ ॥

जालवातायनैः जालानि तिर्यगूर्ध्वविन्यस्तफलकघटितानि, वातायनानि केवलानि रन्ध्राणि । अर्थवैशद्यार्थमेकार्थे शब्दद्वयप्रयोगो वा । महानीलाः सिंहलद्वीपोद्भवनीलरत्नानि । महाधनैः महामूल्यैः । निस्तुलाभिः सुवृत्ताभिः । तलेन, निर्मितेनेति शेषः । आदित्यतरुणोपमं तरुणादित्योपमम् । एतदन्ते लेभे तद्राक्षसेश्वर इति संबध्यते । अन्यथा कूटागारैरित्यनेन पुनरुक्तिः स्यात् ॥ १६–१९ ॥ रामानु०–ज्वलनार्कप्रतीकाशमित्यारभ्य आरुरोह महाकपिरित्यन्तमेकं वाक्यम् । जालवातायनैर्युक्तं कुड्योपरिभागे अलङ्कारार्थं स्वस्तिकसर्वतोभद्राद्याकारेण यन्त्रवत्तया कृतं जालम् । वायुसञ्चारार्थं कृतो गवाक्षो वातायनम् । इन्द्रनीलमहानीलेति ।

मत्तवारणः ॥ १०–१२ ॥ ईहामृगसमायुक्तैरित्यादीनामारुरोह महाकपिरित्युत्तरेण सम्बन्धः । ईहामृगाः कृत्रिममृगाः । कार्तस्वरहिरण्मयैः सुवर्णरजतमयैः ॥ १३–१५ ॥ जालवातायनैर्युक्तं कुड्योपरिभागे अलङ्कारार्थं स्वस्तिकसर्वतोभद्राद्याकारेणायामवत्तया कृतं जालम् । वायुसञ्चारार्थं कृतो गवाक्षः वातायनम् । इन्द्रनीलः क्षीरस्य नैल्यप्रकाशोत्पादकः, महानीलः सिंहलद्वीपाकरोद्भूतः । विद्रुमेण महाधनैः मणिभिः निस्तुलाभिः वर्तुलाभिः मुक्ताभिश्च करणैः विचित्रेण तलेन कुट्टिमेन विराजितमिति सम्बन्धः ॥ १६ ॥ १७ ॥ आदित्यतरुणोपमं तरुणादित्योपमम् ॥ १८ ॥ १९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

" क्षीरमध्ये क्षिपेन्नीलं क्षीरं नेन्नीलतां व्रजेत् । इन्द्रनीलमिति ख्यातमिति चागस्त्यभाषितम् ॥ " इति रत्नशास्त्रोक्तलक्षणमिन्द्रनीलम् । " सिंहलाकरसंभूता महानीला इति स्मृताः " इत्युक्ता महानीला इति तयोर्भेदः । विद्रुमेण महाधनैर्मणिभिः निस्तुलाभिर्मुक्ताभिश्च करणैः विविधेन तलेनाभिविराजितमिति संबन्धः । आदित्यतरुणोपमं तरुणादित्योपमम् । उपसर्जनस्य परानिपात आर्षः ॥ १९–१९ ॥ जिघ्रत् अजिघ्रत् ॥ २०–२२ ॥ दन्तान्तरितरूपिकां दन्तैः व्यवहितरूपिकाम् । अन्तरान्तरा कृतदन्तफलकामिति

तत्रस्थः स तदा गन्धं पानभक्ष्यान्नसम्भवम् । दिव्यं संमूर्च्छितं जिघ्रद्रूपवन्तमिवानिलम् ॥ २० ॥ स गन्धस्तं महासत्त्वं बन्धुर्बन्धुमिवोत्तमम् । इत एहीत्युवाचेव तत्र यत्र स रावणः ॥ २१ ॥ ततस्तां प्रस्थितः शालां ददर्श महतीं शुभाम् । रावणस्य मनःकान्तां कान्तामिव वरस्त्रियम् ॥ २२ ॥ मणिसोपानविकृतां हेमजालविभूषिताम् । स्फाटिकैरावृततलां दन्तान्तरितरूपिकाम् ॥ २३ ॥ मुक्ताभिश्च प्रवालैश्च रूप्यचामीकरैरपि । विभूषितां मणिस्तम्भैः सुबहुस्तम्भभूषिताम् ॥ २४ ॥ समैर्ऋजुभिरत्युच्चैः समन्तात् सुविभूषितैः । स्तम्भैः पक्षैरिवात्युच्चैर्दिवं संप्रस्थितामिव ॥ २५ ॥ महत्या कुथयाऽऽस्तीर्णां पृथिवीलक्षणाङ्कया । पृथिवीमिव विस्तीर्णां सराष्ट्रगृहमालिनीम् ॥ २६ ॥ नादितां मत्तविहगैर्दिव्यगन्धाधिवासिताम् । पराध्यास्तरणोपेतां रक्षोधिपनिषेविताम् ॥ २७ ॥

यावत् ॥ २३ ॥ सुबहुस्तम्भभूषिताम् अवान्तरबहुस्तम्भभूषिताम् । सुबहुस्तम्भभूषितैरिति पाठे–सुबहुस्तम्भैः स्तम्भदार्ढ्यकारिपट्टैरलंकृतामित्यर्थः ॥ २४ ॥ अत्युच्चैः अत्यन्तोन्नतैः । दिवम् आकाशम् ॥ २५ ॥ कुथया आस्तरणेन । पृथिवीलक्षणाङ्कया सरित्समुद्रगिरिवनादिभिः पृथिवी

तत्रस्थ इति । जिघ्रत् अजिघ्रत् । रूपवन्तमिवानिलम् अरूपस्य वायोः गन्धवद्गुणभूयस्त्वाद्रूपवत्त्वोत्प्रेक्षा ॥२०॥२१॥ ततस्तामित्यारभ्य तां शोकनाशिनीं दिव्यां श्रियस्सञ्जननीमिवेत्यन्तमेकं वाक्यम् । प्रस्थित इत्यनेन सम्बध्यते, अपरो ददर्शेत्यनेन । दन्तान्तरितरूपिकां दन्तैरन्तरितानि मध्ये निर्मितानि रूपाणि यस्यां ताम् । सुबहुस्तम्भभूषितामित्यत्र बहुत्वविधानाय स्तम्भानुवादान्न पौनरुक्त्यम् । पक्षैरिव स्थितैः स्तम्भैर्दिवं सम्प्रस्थितामिवेत्युत्प्रेक्षा । पृथिवीलक्षणाङ्कया सरित्समुद्रगिरिराष्ट्रादिभिः पृथिवीलक्षणैरङ्कितया । कुथया परिस्तोमेन विशालचित्ररत्नकम्बलेनेत्यर्थः । कल्माषीमिव कल्माषीशब्देन वसिष्ठधेनुरुच्यते,

स०–बहूनां शत्रूणां स्तम्भः जडीभावः तेन विभूषितां यदाशया प्रवृत्ताश्शत्रवो जडीभवन्तीत्यर्थः । " स्तम्भौ स्थूणाजडीभावौ " इत्यमरः ॥ २४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लक्षणैरङ्कितया ॥ २६ ॥ २७ ॥ कल्माषीं शबलवर्णाम्, वसिष्ठधेनुमिव सर्वकामप्रदत्वेन कल्माषीसादृश्यम् ॥ २८ ॥ वर्णस्यापि प्रसाधिनीम् वर्णोत्कर्ष करीमित्यर्थः । तां शोकनाशिनीमिति । ततस्तामिति वर्तमाने पुनस्तच्छब्द उपसंहारार्थः । तां प्रति प्रस्थितः ददर्शेति वा संबन्धः ॥ २९ ॥ इन्द्रियाणीति, हनुमत इति शेषः ॥ ३० ॥ स्वर्गोऽयमिति । सामान्यतः स्वर्गोऽयम् । तत्रापि देवलोकः त्रयस्त्रिंशद्देवानां लोकः । तत्रापीन्द्रस्य पुरी अमरावती ।

धूम्रामगरुधूपेन विमलां हंसपाण्डुराम् । चित्रां पुष्पोपहारेण कल्माषीमिव सुप्रभाम् ॥ २८ ॥ मनस्संह्लाद जननीं वर्णस्यापि प्रसाधिनीम् । तां शोकनाशिनीं दिव्यां श्रियः सञ्जननीमिव ॥ २९ ॥ इन्द्रियाणीन्द्रियार्थैस्तु पञ्च पञ्चभिरुत्तमैः । तर्पयामास मातेव तदा रावणपालिता ॥ ३० ॥ स्वर्गोऽयं देवलोकोऽयमिन्द्रस्येयं पुरी भवेत् । सिद्धिर्वेयं परा हि स्यादित्यमन्यत मारुतिः ॥ ३१ ॥ प्रध्यायत इवापश्यत् प्रदीपांस्तत्र काञ्चनान् । धूर्तानिव महा धूर्तैर्देवनेन पराजितान् ॥ ३२ ॥ दीपानां च प्रकाशेन तेजसा रावणस्य च । अर्चिर्भिर्भूषणानां च प्रदीप्तेत्यभ्य मन्यत ॥ ३३ ॥ ततोऽपश्यत्कुथासीनं नानावर्णाम्बरस्रजम् । सहस्रं वरनारीणां नानावेषविभूषितम् ॥ ३४ ॥ परि वृत्तेऽर्धरात्रे तु पाननिद्रावशं गतम् । क्रीडित्वोपरतं रात्रौ सुष्वाप बलवत्तदा ॥ ३५ ॥ तत्प्रसुप्तं विरुरुचे निःशब्दा न्तरभूषणम् । निःशब्दहंसभ्रमरं यथा पद्मवनं महत् ॥ ३६ ॥

परा सिद्धिः ब्रह्मणः स्थानमित्युत्तरोत्तरोत्कर्षः ॥ ३१ ॥ प्रध्यायत इति । प्रध्यायत इव निश्चलतया प्रकृष्टध्यानयुक्तानिव । धूर्तान् अक्षधूर्तान् । देवनेन द्यूतेन ॥ ३२ ॥ प्रदीप्ता शाला दग्धेति अभ्यमन्यत ॥ ३३ ॥ तत इत्यादि । कुथासीनं कुथशयितम् । नानावर्णाम्बरस्रजमिति इलन्तस्य स्रक्छब्दस्य भागुरिमतेन टाबन्तत्वादजन्तत्वोपपत्तिः ॥ ३४ ॥ ३५ ॥ तदिति । निःशब्दान्तरभूषणं निःशब्दविशेषाणि भूषणानि यस्य । " अथान्तरं रन्ध्रेष्यपरव्यव अनेन सर्वानन्ददायिनी सूच्यते ॥ २२–२९ ॥ इन्द्रियाणीति । हनुमत इति शेषः । तर्पयामास, उत्कृशालेति शेषः ॥ ३० ॥ स्वर्गः पातालादिः । देवलोकः वायु वरुणादिलोकः । इन्द्रपुरी अमरावती । परा सिद्धिः उत्कृष्टतपःफलभूतो ब्रह्मलोकः ॥ ३१ ॥ प्रध्यायत इव ध्याननिष्ठानिव । प्रत्यायत इति पाठे–झटिति प्रकाश सम्भारात् प्रत्यागच्छत इव स्थितान् । काञ्चनान्, काञ्चनस्तम्भगतानित्यर्थः । धूर्तान् अक्षधूर्तान् । देवनेन द्यूतेन ॥ ३२ ॥ + कवाटजालैरिति । कवाटजालैः प्रभामुद्गमन्तीव स्थिता शाला प्रदीप्तेत्यभ्यमन्यतेति सम्बन्धः ॥ ३३ ॥ ३४ ॥ परिवृत्ते प्रवृत्ते सति ॥ ३५ ॥ निश्शब्दान्तरभूषणं निश्शब्दोदराणि भूषणानि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

धानयोः । अवकाशावसरयोरवसानविनार्थयोः । विशेषमध्यतादर्थ्येषु " इति दर्पणः । अतिनिद्रापरवशत्वेन निश्चलाङ्गतया निःशब्दभूषणमित्यर्थः ॥३६॥३७॥ प्रबुद्धानीति । अत्र वदनानीत्यनुषज्यते । तासां वदनानि क्षपाक्षये दिवसे पद्मानीव प्रबुद्धानि भूत्वा रात्रौ पुनः संवृतपत्राणि सङ्कुचित पत्राणि पद्मानीव बभुः॥३८॥ इमानीति । प्रार्थयन्ति प्रार्थयेरन् । मधुरसलुब्धतया अत्र पुनः पुनः पतेयुरित्यर्थः । व्यत्ययेन परस्मैपदम् । अनुदात्तत्वेन

तासां संवृतदन्तानि मीलिताक्षाणि मारुतिः । अपश्यत् पद्मगन्धीनि वदनानि सुयोषिताम् ॥ ३७ ॥ प्रबुद्धानीव पद्मानि तासां भूत्वा क्षपाक्षये । पुनः संवृतपत्राणि रात्राविव बभुस्तदा ॥ ३८ ॥ इमानि मुखपद्मानि नियतं मत्तषट्पदाः । अम्बुजानीव फुल्लानि प्रार्थयन्ति पुनः पुनः ॥ ३९ ॥ इति चामन्यत श्रीमानुपपत्त्या महाकपिः । मेने हि गुणतस्तानि समानि सलिलोद्भवैः ॥४०॥ सा तस्य शुशुभे शाला ताभिः स्त्रीभिर्विराजिता । शारदीव प्रसन्ना द्यौस्ताराभिरभिशोभिता ॥४१॥ स च ताभिः परिवृतः शुशुभे राक्षसाधिपः । यथा ह्युडुपतिः श्रीमांस्ताराभिरभिसंवृतः ॥ ४२ ॥ याश्चयवन्तेऽम्बरात्तारा पुण्यशेषसमावृताः । इमास्ताः सङ्गताः कृत्स्ना इति मेने हरिस्तदा ॥ ४३ ॥ ताराणामिव सुव्यक्तं महतीनां शुभार्चिषाम् । प्रभावर्णप्रसादाश्च विरेजुस्तत्र योषिताम् ॥ ४४ ॥ व्यावृत्त गुरुपीनस्रक्प्रकीर्णवरभूषणाः । पानव्यायामकालेषु निद्रापहृतचेतसः ॥ ४५ ॥

आत्मनेपदत्वात् । नियतं नूनम् । उपपत्त्या युक्त्या । उपपत्तिमेवाह मेन इति । तानि मुखानि । गुणतः सौरभादिगुणैः । सलिलोद्भवैः पद्मैः॥३९–४३॥ ताराणामिति । प्रभा कान्तिः । वर्णः रूपम् । प्रसादः प्रसन्नता ॥४४॥ व्यावृत्तेति । पानव्यायामकालेषु पानानन्तरं भाविरतिव्यापारसमयेषु । व्यावृत्त

यस्य तत् ॥ ३६ ॥ ३७ ॥ प्रबुद्धानीति । वदनानीत्यनुषज्यते । तासां वदनानि क्षपाक्षये दिवसे पद्मानीव प्रबुद्धानि भूत्वा रात्रौ पुनः संवृतपत्राणि पद्मानीव बभुरित्यन्वयः ॥ ३८ ॥ इमानीति । मत्तषट्पदाः इमानि मुखपद्मानि फुल्लान्यम्बुजानीव पुनः पुनः प्रार्थयन्ति प्रार्थयेरन् । नियतं नूनम् । प्रार्थयन्त इति पाठे प्रार्थयमाना भवेयुरिति शेषः ॥ ३९ ॥ उपपत्त्या युक्त्या । इतीव इत्येवामन्यत उत्प्रेक्षितवान् । तामेवाह मेन इति । तानि मुखानि । गुणतः शौत्यसौरभ्यादिगुणैः, सलिलोद्भवैरम्बुजैः समानि मेने हीति योजना ॥ ४०–४३ ॥ ताराणामिति । प्रभा देहकान्तिः । वर्णः रूपम् । प्रसादः औज्ज्वल्यम् ॥ ४४ ॥ व्यावृत्तेति । पान

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गुरुपीनस्रक्प्रकीर्णवरभूषणाः विपर्यस्तगुरुपीनस्रजः प्रकीर्णवरभूषणाश्च सत्यः निद्रापहृतचेतसः विरेजुः ॥ ४५ ॥ व्यावृत्ततिलकाः उन्मृष्टतिलकाः । उद्भ्रान्तनूपुराः स्वस्थानानवस्थितनूपुराः ॥ ४६ ॥ मुक्ताहारावृताः मुक्ताहारैरावृताः, छिन्नमुक्ताहारा इत्यर्थः । व्याविद्धरशनादामाः छिन्नकाञ्चीगुणाः । किशोर्यः प्रथमवयस्का वडवाः । वाहिताः मार्गश्रमनिवृत्त्यर्थं भूमौ प्रवेष्टनं कारिताः । सर्वत्र रेजुरित्यन्वयः ॥ ४७ ॥ ४८ ॥ चन्द्रांशुकिरणाभाः अंशुः

व्यावृत्ततिलकाः काश्चित् काश्चिदुद्भ्रान्तनूपुराः । पार्श्वे गलितहाराश्च काश्चित् परमयोषितः ॥ ४६ ॥ मुक्ताहारावृताश्चान्याः काश्चिद्विस्रस्तवाससः । व्याविद्धरशनादामाः किशोर्य इव वाहिताः ॥ ४७ ॥ सुकुण्डलधराश्चान्या विच्छिन्नमृदितस्रजः। गजेन्द्रमृदिताः फुल्ला लता इव महावने ॥४८॥ चन्द्रांशुकिरणाभाश्च हाराः कासांचिदुत्कटाः। हंसा इव बभुः सुप्ताः स्तनमध्येषु योषिताम् ॥ ४९ ॥ अपरासां च वैडूर्याः कादम्बा इव पक्षिणः । हेमसूत्राणि चान्यासां चक्रवाका इवाभवन् ॥ ५० ॥ हंसकारण्डवाकीर्णाश्चक्रवाकोपशोभिताः । आपगा इव ता रेजुर्जघनैः पुलिनैरिव ॥५१॥ किङ्किणीजालसङ्कोशास्ता हैमविपुलाम्बुजाः । भावग्राहा यशस्तीराः सुप्ता नद्य इवाबभुः ॥५२॥

सूर्यः । "अथांशुः स्यान्मयूखे सवितर्यपि" इति दर्पणः । चन्द्रसूर्ययोः किरणानामाभेवाभा येषां ते तथा । उत्कटाः स्थूलाः ॥४९–५१॥ अथासां नदी समाधिं दर्शयति–किङ्किणीति । किङ्किणीजालसङ्कोशाः किङ्किणीजालान्येव संकोशा मुकुलानि यासां ताः । एतत्स्थाने सत्कोशा इति पाठान्तरदर्शनात् संकोशशब्दो मुकुलवाचीत्यवगम्यते । भावाः शृङ्गारचेष्टाः त एव ग्राहाः नकाः यासां ताः । सुप्तिदशायामपि वासनावशाद्भावाभिव्यञ्जकसंस्थान

व्यायामकालेषु पानानन्तरगीतनृत्तादिव्यापारकालेषु । व्यावृत्तगुरुपीनस्रक्प्रकीर्णवरभूषणाः व्यावृत्ताः विपर्यस्ताः गुरुपीनस्रजश्च प्रकीर्णवरभूषणानि च यासां ताः तथाभूता विरेजुरिति पूर्वेण सम्बन्धः ॥४५॥ उद्भ्रान्तनूपुराः स्वस्थानानवस्थितनूपुराः । व्याविद्धरशनादामाः चलत्काञ्चीगुणाः । किशोर्यः वडवाः । वाहिताः अध्वश्रमनिवृत्त्यर्थं भूवेष्टनं कारिताः श्लथबन्धा भवन्ति तद्वदित्यर्थः ॥ ४६ ॥ ४७ ॥ सुकुण्डलेति । अस्मिन्विरेजुरित्यनुषज्यते ॥ ४८ ॥ अंशवः सूक्ष्मरश्मयः । किरणाः स्थूलरश्मयः ॥ ४९–५१ ॥ किङ्किणीजालान्येव सङ्कोशाः मुकुलाः यासां ताः । हैमानि हेमभूषणान्येव विपुलान्यम्बुजानि यासां ताः । भावग्राहाः भावाः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वत्त्वाद्भावग्राह्य इत्युक्तम् । यशस्तीराः यशःशब्देन यशोहेतुभूता पर्यन्तप्रसृतप्रभोच्यते सैव तीरं यासां ताः ॥ ५२ ॥ मृदुष्विति । संस्थिताः लग्नाः भूषणराजयः । भ्रमराणीव भ्रमरा इव । व्यत्यय आर्षः । कामुका इव बभूवुः । " भ्रमरः कामुके भृङ्गे " इति दर्पणः । केचित्तु भूषणानीति पाठं कल्पयित्वा भूषणराजयः भूषणविमर्दकृतरेखाः । विस्रस्तभूषणानामपि कासांचिद्भूषणानीव बभूवुरित्यर्थ इत्याहुः ॥ ५३ ॥ रामानु०–मृदुष्विति । भूषण

मृदुष्वङ्गेषु कासांचित् कुचाग्रेषु च संस्थिताः । बभूवुर्भूषणानीव शुभा भूषणराजयः ॥ ५३ ॥ अंशुकान्ताश्च कासांचिन्मुखमारुतकम्पिताः । उपर्युपरि वक्त्राणां व्याधूयन्ते पुनः पुनः ॥ ५४ ॥ ताः पताका इवोद्धूताः पत्नीनां रुचिरप्रभाः । ननावर्णसुवर्णानां वक्त्रमूलेषु रेजिरे ॥५५॥ ववल्गुश्चात्र कासांचित् कुण्डलानि शुभार्चिषाम् । मुख मारुतसंसर्गान्मन्दं मन्दं सुयोषिताम् ॥ ५६ ॥ शर्करासवगन्धैश्च प्रकृत्या सुरभिः सुखः । तासां वदननिःश्वासः सिषेवे रावणं तदा ॥५७॥ रावणाननशङ्काश्च काश्चिद्रावणयोषितः । मुखानि स्म सपत्नीनामुपाजिघ्रन् पुनः पुनः ॥ ५८ ॥ अत्यर्थं सक्तमनसो रावणे ता वरस्त्रियः । अस्वतन्त्राः सपत्नीनां प्रियमेवाचरंस्तदा ॥ ५९ ॥

राजयः भूषणविमर्दजनितरेखाः । विस्रस्तभूषणानामपि कासांचिद् भषणस्थानदेशा भूषणानीव बभूवुरित्यर्थः ॥ ५३॥ अंश्विति । मुखमारुतकम्पिताः अंशुकान्ताः सूक्ष्मवस्त्र दशाः । उपर्युपरि वक्त्राणां वक्त्राण्युपर्युपरि । "धिगुपर्यादिषु त्रिषु । द्वितीयाऽऽम्रेडितान्तेषु" इति द्वितीयाभाव आर्षः । व्याधूयन्त इति श्यन्नार्षः । धूनातेः क्र्यादित्वात् ॥ ५४ ॥ ता इति । विधेयत्वात् स्त्रीलिङ्गता । नानावर्णसुवर्णानां नानाविधशोभनवर्णानाम् ॥ ५५ ॥ ववल्गुरिति । उपधान परिसरे घनमणिखचिततया लम्बमानानि कुण्डलानि मन्दं मन्दं चेलुरित्यर्थः ॥ ५६–५८ ॥ अत्यर्थमिति । रावणे अत्यर्थं सक्तमनसः अस्वतन्त्राः पाननिद्रापरवशाः ताः सपत्नीभिराघ्रातमुखाः वरस्त्रियः तदा मुखाघ्राणसमये सपत्नीनां प्रियमेवाचरन् रावणोऽजिघ्रदिति बुद्ध्या स्वयमप्यजिघ्र

विलासा एव ग्राहाः नक्रादयो यासां ताः । यशस्तीराः लक्षणया कान्तिरोधस इत्यर्थः ॥ ५२ ॥ मृदुष्विति । भूषणराजयः भूषणप्रमर्दनजनितरेखाः । विस्रस्तभूष णानामपि कासाञ्चिद्भूषणस्थानरेखाः भूषणानीव बभूवुरित्यर्थः ॥ ५३ ॥ ५४ ॥ ताः अंशुकान्ताः । नानावर्णसुवर्णानां नानावर्णाः सुवर्णाः शोभनवर्णाः यासां ताः ॥ ५५–५८ ॥ ननु ताः सपत्नीभिः कृतमुखाघ्राणं कथं सहन्त इत्यत आह–अत्यर्थमिति । अस्वतन्त्राः रागान्धाः । रावणे अत्यर्थं सक्तमनसः ताः सपत्नीभि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्रित्यर्थः । अथवा कथं सपत्न्योपि सह स्वपन्तीत्याशङ्क्याह–अत्यर्थमिति ॥ ५९ ॥ पारिहार्यो वलयः । अंशुकानि च, उपनिधायेत्यनुषज्यते ॥ ६० ॥ अन्या वक्षसि चान्यस्या इत्यादिश्लोकद्वये शिशिरे इत्येतद्वचनविपरिणामेन यथायोगं सम्बध्यते उपनिधायेति च ॥ ६१ ॥ ६२ ॥

रामानु०–अन्या वक्षसीत्यादिश्लोकद्वये शिशिरे इत्येतद्वचनविपरिणामेन यथायोगं सम्बध्यते उपनिधायेति च ॥ ६१ ॥ ६२ ॥ मालेव पुष्पमालेव । मत्तषट्पदस्थानीयाः

बाहूनुपनिधायान्याः पारिहार्यविभूषितान् । अंशुकानि च रम्याणि प्रमदास्तत्र शिशिरे ॥ ६० ॥ अन्या वक्षसि चान्यस्यास्तस्याः काश्चित्पुनर्भुजम् । अपरा त्वङ्कमन्यस्यास्तस्याश्चाप्यपरा भुजौ ॥६१॥ ऊरुपार्श्वकटीपृष्ठमन्योन्यस्य समाश्रिताः । परस्परनिविष्टाङ्ग्यो मदस्नेहवशानुगाः ॥६२॥ अन्योन्यभुजसूत्रेण स्त्रीमाला ग्रथिता हि सा । मालेव ग्रथिता सूत्रे शुशुभे मत्तषट्पदा ॥६३॥ लतानां माधवे मासि फुल्लानां वायुसेवनात् । अन्योन्यमालाग्रथितं संसक्तकुसुमोच्चयम् ॥ ६४ ॥ व्यतिवेष्टितसुस्कन्धमन्योन्यभ्रमराकुलम् । आसीद्वनमिवोद्भूतं स्त्रीवनं रावणस्य तत् ॥ ६५ ॥ उचितेष्वपि सुव्यक्तं न तासां योषितां तदा । विवेकः शक्य आधातुं भूषणाङ्गाम्बरस्रजाम् ॥ ६६ ॥

कशाः ॥ ६३ ॥ लतानामित्यादिश्लोकद्वयमेकान्वयम् । तत् रावणस्य स्त्रीवनं लतानां वनमिवासीदिति संबन्धः । विशेषणान्युभयत्र योज्यानि । वायुसेवनाद्धेतोः अन्योन्यमालाग्रथितम् अन्योन्यमालारूपेण ग्रथितं सुखमुखमारुतसेवनादन्योन्यमालाग्रथितमिति स्त्रीपक्षे । संसक्तकुसुमोच्चयम् अन्योन्यसंसक्तनीवीकम् संसक्तकुसुमसमूहं चेत्यर्थः । व्यतिवेष्टितसुस्कन्धम् अन्योन्यपरिवेष्टितांसम् अन्योन्यपरिवेष्टितप्रकाण्डं च । अन्योन्यं भ्रमरैश्चिकुरैराकुलम्, भ्रमरैः भृङ्गैराकुलं च । "भ्रमराश्चिकुरे भृङ्गे" इति विश्वः ॥ ६४ ॥ ६५ ॥ उचितेषु स्थानेषु स्थितानामपि भूषणाङ्गाम्बरस्रजां

राघ्रातमुखाः वरस्त्रियः, तदाघ्राणं पत्युः प्रियमिति मत्वा सपत्नीनां प्रियमेवाचरन् । रागान्धाः किं किं न कुर्वन्तीति भावः ॥ ५९ ॥ बाहूनिति । पारिहार्य विभूषितान् पारिहार्यः वलयः । उपनिधाय उपधानं कृत्वा ॥ ६० ॥ अन्येत्यादिश्लोकद्वये शिशिरे इत्येतद्यथायोगं वचनविपरिणामेन उपनिधायेति पदं चानुवर्तनीयम् ॥ ६१ ॥ ६२ ॥ मालेव पुष्पमालेव । उपमेये मत्तषट्पदस्थानीयाः कचभाराः ॥ ६३ ॥ लतानामित्यादिश्लोकद्वयमेकं वाक्यम् । तत् रावणस्य स्त्रीवनं लतानां वनमिवासीदिति सम्बन्धः । विशेषणान्युभयत्र योज्यानि ॥ ६४ ॥ ६५ ॥ उचितेष्विति । तदा तासां योषितामुचितेषु स्थानेषु स्थितानामपि भूषणाङ्गा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

साधारण्यादेकतामापन्नानामिति भावः। विवेकः सुव्यक्तमाधातुं न शक्यः। अन्योन्यसंग्रथितत्वेन सुप्तत्वात्। इमा अस्या भूषणाङ्गाम्बरस्रजः इमा अपरस्या इति विवेकः कर्तुं न शक्य इत्यर्थः ॥ ६६ ॥ रावण इति। सुखसंविष्टे सुखसुप्ते। काञ्चनाः काञ्चनदीपस्तम्भस्था दीपाः अनिमिषास्सन्तः प्रेक्षन्त इव। अनेन रावणस्य जाग्रदवस्थायां दीपैरपि ताः स्त्रियो निश्चलं द्रष्टुमशक्या इति गम्यते ॥ ६७ ॥ अथ सीतयैकया अका

रावणे सुखसंविष्टे ताः स्त्रियो विविधप्रभाः। ज्वलन्तः काञ्चना दीपाः प्रेक्षन्तानिमिषा इव ॥ ६७ ॥ राजर्षिपितृदैत्यानां गन्धर्वाणां च योषितः। राक्षसानां च याः कन्यास्तस्य कामवशं गताः ॥ ६८ ॥ युद्धकामेन ताः सर्वा रावणेन हृताः स्त्रियः। समदा मदनेनैव मोहिताः काश्चिदागताः ॥ ६९ ॥ न तत्र काश्चित् प्रमदाः प्रसह्य वीर्योपपन्नेव गुणेन लब्धाः। न चान्यकामापि न चान्यपूर्वा विना वराहीं जनकात्मजां ताम् ॥ ७० ॥ न चाकुलीना न च हीनरूपा नादक्षिणा नानुपचारयुक्ता। भार्याऽभवत्तस्य न हीनसत्त्वा न चापि कान्तस्य न कामनीया ॥ ७१ ॥

म्यत्वं वक्तुं सर्वस्त्रीकाम्यत्वमाह—राजर्षीत्यादिना श्लोकत्रयेण। तस्य कामवशंगताः तं प्रति यः कामः तस्य वशंगताः। तं कामयित्वा स्वयमेवागतास्ताः न तु तेन कामयित्वा हृता इत्यर्थः ॥ ६८ ॥ हृताश्च काश्चन श्रूयन्ते, तत्र कथमित्यत्राह—युद्धेति। तासु हृतासु तासां संबन्धिभिस्सह युद्धं भविष्यतीति युद्धं कामयित्वाऽनेन हृताः नतु ताः कामयित्वा हृताः ॥६९॥ अमुमेवार्थं विवृणोति—न तत्रेति। तत्र तासु काश्चिदपि प्रमदाः प्रसह्य वीर्येण न लब्धाः। किंतु स्वसंवादेनैवेत्यर्थः। वीर्योपपन्नेन रावणेन न लब्धाः अपि तु गुणेन लब्धाः। अन्यकामा च काचित्तत्र नास्ति। अन्यपूर्वा च न। अन्यत्रासक्ता च न

म्बरस्रजां विवेकः सुव्यक्तमाधातुं न शक्यः, अन्योन्यसंग्रथितत्वेन सुप्तत्वात्। इमा अस्या भूषणाङ्गाम्बरस्रजः इमा अपरस्या इति विवेकः कर्तुं न शक्य इत्यर्थ ॥ ६६ ॥ रावण इति। सुखसंविष्टे सति काञ्चनाः काञ्चनस्तम्भगता दीपाः कर्तारः ताः स्त्रियः कर्म अनिमिषा इव प्रेक्षन्ते, अनेन जाग्रदवस्थायां दीपा अपि निश्चलतयान द्रष्टुमिच्छन्तीति ध्वन्यते ॥ ६७॥ राजर्षीति। तस्य योषितोऽभवन्निति सम्बन्धः ॥६८॥ युद्धकामेन ता हृताः आहृताः, तासु हृतासु तासां बन्धुभिः सह युद्धं भविष्यतीति युद्धं कामयित्वा तेनाहृताः, न तु ताः कामयित्वा ॥ ६९ ॥ एतमेवार्थं विवृणोति—न तत्रेति। तत्र आहृतासु काचिदपि प्रमदा वीर्योप

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

काचिदित्यर्थः॥७०॥७१॥ बभूवेति । राघवधर्मपत्नी ईदृशी यदि स्वयंवरात्पूर्वमेवास्य धर्मपत्नी चेत् । अस्य सुजातं सुकृतम् । इयमसाध्वी बुद्धिः कापेयत्वप्रमादकृता न तु स्वयं तस्य बुद्धिरिति द्योतयितुं साधुबुद्धेरित्युक्तम् । एवं प्रमादोपस्थितबुद्ध्या पश्चात्तापोऽभूदित्याह–पुनश्च सोऽचिन्तयदार्त रूप इति । यद्वा इमाः राक्षसराजभार्याः यथा स्वभर्त्रा विशिष्टास्सकलभोगयुक्ताश्च तथा राघवधर्मपत्नी ईदृशी यदि स्वभर्त्रा सहिता भोगयुक्ता च यदि

बभूव बुद्धिस्तु हरीश्वरस्य यदीदृशी राघवधर्मपत्नी । इमा यथा राक्षसराजभार्याः सुजातमस्येति हि साधुबुद्धेः॥७२॥

तदाऽस्य रावणस्य सुजातं शोभनं जन्मेति साधुबुद्धेः परसमृद्धिपरस्य हरीश्वरस्य स्वयमाधिपत्यार्हस्य बुद्धिर्बभूव । अयं रावणः राघवधर्मपत्नीं यदि प्रत्यर्पयेत्तदाऽस्य शोभनं जन्म स्यादिति बुद्धिर्जातेत्यर्थः ॥७२॥ रामानु०–बभूवेति । इमा राक्षसराजभार्याः यथा स्वभर्तृविशिष्टाः सकलभोगयुक्ताश्च तथा राघवधर्मपत्नी

पत्रेन रावणेन न लब्धा, किन्तु गुणेन सौन्दर्यादिगुणेन लब्धा ॥ ७० ॥ ७१ ॥ बभूवेति । इमाः राक्षसराजभार्याः यथा स्वभर्तृविशिष्टाः सकलभोगयुक्ताः तथा राघवधर्मपत्नी ईदृशी स्वभर्तृसहिता यदि अस्य रावणस्य सुजातं शोभनम् इति साधुबुद्धेः हरीश्वरस्य हनूमतः बुद्धिः बभूव । अयं रावणः राघवधर्मपत्नीं यदि प्रत्यर्पयेत् तदा अस्य जन्म शोभनं स्यादिति हरीश्वरस्य बुद्धिर्जातेत्यर्थः । यद्वा राघवधर्मपत्नी यथा रावणेन बलादानीता इमा राक्षसराजभार्यास्तथा यदि सुग्रीवेण बलाद्धृता यदि तदा हरीश्वरस्य सुग्रीवस्य सुजातं हीति साधुबुद्धेः सन्मन्त्रिबुद्धेः अस्य हनूमतः ईदृशी बुद्धिर्बभूवेत्यन्वयः । यद्वा इमा राक्षसराजभार्याः यथा रावणेनाहृता इत्यर्थः । राघवधर्मपत्नी ईदृशी यदि अनेनाहृता यदि तदा अस्य रावणस्य सुजातं किं सम्यग्भविष्यति किम् ? न भविष्यत्येवेति हरीश्वरस्य बुद्धिर्बभूव " मम दयिततरा हृता वनान्ताद्रजनिचरेण तदा विमथ्य सा । कथय मम रिपुं तमद्य वै प्लवगपते यमसादनं नयामि ॥ " इति रामवाक्याद्रावणस्य न सम्यग्भविष्यतीत्यर्थः । यद्वा इमा राक्षसराजभार्याः यथा, मया दृष्टा इति शेषः । राघवधर्मपत्नी ईदृशी मया दृष्टा यदीत्यर्थः । तदा अस्य मम सुजातम् अस्य मम जन्म सफलमिति हरीश्वरस्य बुद्धिर्बभूव । " यश्च मासान्निवृत्तोऽग्रे दृष्टा सीतेति वक्ष्यति । मतुल्यविभवो भोगैस्सुखं स विहरिष्यति ॥ ततः प्रियतरो नास्ति मम प्राणाद्विशेषतः॥ " इति सुग्रीववचनात् प्रभोः सुग्रीवस्य प्रियसम्पादकत्वेन मम जन्म सफलमितिभावः । यद्वा इमा राक्षसराजभार्याः यथा मया दृष्टाः, राघवधर्मपत्नी ईदृशी यदि दृष्टा यदि, अस्य सीताया अदर्शनहेतुना सुग्रीवरामादिभयात् प्रायोपवेशनायोद्युक्ताङ्गदादिवानरसमूहस्येत्यर्थः । सुजातमिति हरीश्वरस्य बुद्धिर्बभूव " अमृत्तौ च सीतायाः पापमेव करिष्यति । तस्मात्क्षममिहैवाद्य प्रायोपविशनं हि नः । त्यक्त्वा पुत्रांश्च दारांश्च धनानि च गृहाणि च ॥ " इति सीताऽदर्शनव्यथिताङ्गदादीनां पुनर्जीवितलाभात् सुजातमिति भावः । यद्वा इमा राक्षसराजभार्या यथा जीवन्तीत्यर्थः । राघवधर्मपत्नी ईदृशी जीवति यदि तदा अस्य रामस्य सुजातमिति हरीश्वरस्य बुद्धिर्बभूव " ज्ञायतां सौम्य वैदेही यदि जीवति वा नवा । नह्यहं जीवितुं शक्तस्तामृते जनकात्मजाम् ॥" इति सीताजीवितसंशयव्यथितस्य रामस्य सीताजीवितनिश्चये सति स्वजीवितलाभात्सुजातमिति भावः । यद्वा हे राक्षसराज ! इमाः स्त्रियो यथा भार्याः एवं राघव

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ईदृशी स्वभर्तृसहिता यदि अस्य रावणस्य सुजातमिति साधुबुद्धेर्हरीश्वरस्य बुद्धिर्बभूव । अयं रावणः राघवधर्मपत्नीं यदि प्रत्यर्पयेत् तदा अस्य जन्म शोभनं स्यादिति साधुबुद्धेर्हरीश्वरस्य बुद्धिर्जातेत्यर्थः ॥ ७२ ॥ तनि०—रावणः स्वस्त्रीभिस्सह यथा सन्ततसंश्लेषेण तिष्ठति एवं रामः सीतया संश्लेषेण तिष्ठति चेद्रावणस्यैश्वर्यमविच्छिन्नं स्यात् । साधुबुद्धेः शत्रूणामपि हितमन्वेषयतः ॥ ७२ ॥ किंच चिन्तान्तरमाह—पुनश्चेति । अथ सः हनुमान् । सीता गुणतः पातिव्रत्यादिगुणतः ध्रुवं विशिष्टा हि । अस्याम् एतद्विषये । महात्मा महाकुलप्रसूतोपि अयं लङ्केश्वरः । अनार्यकर्म अपहरणरूपं कर्म कृतवान् । कष्टमिति आर्त्तरूपः अत्यन्तमार्तः । "प्रशंसायां रूपप् " । पुनश्चाचिन्तयत् । वैदेह्याः दृढव्रतत्वात्पातिव्रत्यभङ्गो न भवेदेव अपि तु मिथ्यापवादमेवोत्पादितवानिति भृशं दुःखितस्सन् चिन्तितवानित्यर्थः । यद्वा बभूवेत्यादि । राक्षसराजपत्नीवत्सीता स्वभर्त्रा सङ्गता चेत्सीतापहरणं न कृतवांश्चेत्तदाऽस्य सुजातमित्युक्तम् । तत्र निरतिशयसौन्दर्यादिशालिन्या;

पुनश्च सोऽचिन्तयदार्तरूपो ध्रुवं विशिष्टा गुणतो हि सीता। अथायमस्यां कृतवान् महात्मा लङ्केश्वरः कष्टमनार्य कर्म ॥ ७३ ॥ इत्यार्षे श्रीरामायणे श्रीमद्वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे नवमः सर्गः ॥ ९ ॥

मैथिल्याः रक्षस्त्रीसाम्यं चिन्तयता मया हीनोपमा कृतेति पश्चात्तापयुक्तस्सन् अचिन्तयत् । हि यस्मात्सीता गुणतः विशिष्टा अतः आर्तस्वरूपस्सन् अचिन्तयत् मया हीनोपमैव कृतेत्यचिन्तयत् । अथ अथापि अस्यां सीतायाम् । अनार्यकर्म धर्षणरूपं कर्म कृतवान् । कष्टं सर्वमिदं लङ्केश्वर्यं भ्रष्टं भविष्यतीत्यचिन्तयच्चेत्यर्थः । यद्वा राघवधर्मपत्नी यथा रावणेन बलादानीता तथा राक्षसराजभार्याः बलात्सुग्रीवेण बन्दीकृताश्चेदस्य हरीश्वरस्य

धर्मपत्नी ईदृशी यदि अस्य तव सर्वसम्पत्समृद्धियुक्तपुत्रपौत्रादिसहितस्यास्य तवेत्यर्थः । सुजातं हि किं सम्यग्भविष्यति किम् ? न भविष्यतीति रावणस्य हित मुपदेष्टव्यमिति हरीश्वरस्य बुद्धिर्बभूव " तद्भवान् दृष्टधर्मार्थः तपःकृतपरिग्रहः । परदारान्महाप्राज्ञ नोपरोद्धुं त्वमर्हसि " इति हितोपदेशस्य वक्ष्यमाणत्वात् । यद्वा एतासां मध्ये सीता नास्तीति निश्चिनोति—बभूवेति । इमा राक्षसराजभार्या यथा यादृग्रूपवत्य इत्यर्थः । यदि किमित्यर्थे । राघवधर्मपत्नी ईदृशी किम् ईदृग्रूपवती किम् ? किन्तु त्रिलोकसुन्दरीत्यर्थः । अत एवात्र नास्तीति शेषः । इत्यस्य हरीश्वरस्य सुजातं निश्चितं यथा तथा बुद्धिर्बभूव ॥ ७२ ॥ चिन्तान्तरमाह—पुनश्चेति । सीता गुणतः पातिव्रत्यादिगुणतः ध्रुवं विशिष्टा हि । अस्यामेतद्विषये । लङ्केश्वरः अनार्यकर्म अपहरणरूपं कर्म कृतवान् कष्टमिति महात्मा हनुमान्

स०—स महात्मा हनुमान् पुनश्चैवमचिन्तयत् । हि यस्मात् गुणतः पातिव्रत्यादिगुणैः सीता विशिष्टा श्रेष्ठा । अथ तस्मात् अस्यां सीतायां तद्विषये । अयं रावणः अनार्यकर्म अपहरणादिजुगुप्सितं कर्म कृतवान् अतो मृत्वा आर्तरूपस्सन् ध्रुवं कदाप्यनिवर्त्यतया शाश्वतं कष्टं पञ्चकष्टाख्यं तमः, यातीति शेषः । रावणदेहे जीवद्वयसमावेशात्सञ्जीवस्य पूर्वश्लोके गतिरुक्ता । द्वितीयस्य त्वत्रेति विवेकः ॥ ७३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सुग्रीवस्य सुजातं हीति साधुबुद्धेः सन्मन्त्रिबुद्धेः अस्य हनुमतः बुद्धिर्बभूवेत्यर्थः । यद्वा इमा राक्षसराजभार्याः यथा रावणेऽनुरक्ताः ईदृशी राघवधर्म पत्नी यदि एवमनुरक्ता चेत् अस्य सुजातमिति साधुबुद्धेरपि बुद्धिर्बभूव । ऐश्वर्यातिशयदर्शनविस्मयादिति भावः । अत एव वक्ष्यति—अहो वीर्यमित्यादिना । एवं हठादुक्त्वाऽनुशयितवानित्याह—पुनश्चेति । हि यस्मात् सीता गुणतः पातिव्रत्येन विशिष्टा सर्वोत्कृष्टा अतः आर्तरूपः किं मया व्याहृतमित्यनुतप्तः सन् । अस्यामनार्यकर्म कृतवानित्यचिन्तयत् । अस्मिन्सर्गे त्रिसप्ततिश्लोकाः ॥ ७३ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे

तत्र दिव्योपमं मुख्यं स्फाटिकं रत्नभूषितम् । अवेक्षमाणो हनुमान् ददर्श शयनासनम् ॥ १ ॥
दान्तकाञ्चनचित्राङ्गैर्वैडूर्यैश्च वरासनैः । महार्हास्तरणोपेतैरुपपन्नं महाधनैः ॥ २ ॥
तस्य चैकतमे देशे सोऽग्र्यमालाविभूषितम् । ददर्श पाण्डुरच्छत्रं ताराधिपतिसन्निभम् ॥ ३ ॥
जातरूपपरिक्षिप्तं चित्रभानुसमप्रभम् । अशोकमालावितनं ददर्श परमासनम् ॥ ४ ॥

शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने नवमः सर्गः ॥ ९ ॥ तत्र दिव्योपममित्यादि । शयनासनं शयनस्यासनं खट्वामित्यर्थः । दान्तानि दन्तविकारभूतानि । काञ्चनानि काञ्चनमयानि च । अत एव चित्राणि नानावर्णानि अङ्गानि येषां तैः । प्रान्ते दन्तमयैः ततः परं काञ्चनमयैः । सर्वत्र वैडूर्यनिर्मितैरित्यर्थः । महाधनैः महामूल्यैः । वरासनैः शयनावरोहणकाले विश्रमाय स्थापितैः । उपपन्नम् आवृतम् ॥ १ ॥ २ ॥ रामानु०—तत्रेति । शयनासनम् आस्यतेऽस्मिन्नित्यासनम्, शयनासनं पर्यङ्काधाराधिष्ण्यमिति यावत् ॥ १ ॥ तस्येति । एकतमे देशे शिरोभाग इत्यर्थः ॥ ३ ॥ रामानु०—तस्येति । तस्य चैकतमे देशे पर्यङ्काधाराधिष्ण्यस्य कस्मिंश्चित्प्रदेशे ॥ ३ ॥ उक्तमेव पर्यङ्कं पुनर्वर्णयन्नाह—जातरूपपरिक्षिप्तमित्यादिना । चित्रभानोः सूर्यस्य ।

आर्तरूपस्सन् पुनश्चाचिन्तयदिति सम्बन्धः ॥ ७३ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां नवमः सर्गः ॥ ९ ॥

तत्रेति श्लोकद्वयमेकं वाक्यम् । तत् प्रसिद्धम् । दिव्योपमम् इन्द्रशयनोपमम् । अवेक्षमाणः इतस्ततोऽवलोकयन् । शयनासनं शयनं च तदासनं च शयनासनं पर्यङ्कम्, उभयोपकारादुभयव्यपदेशः । यद्वा आस्यतेऽस्मिन्नित्यासनं शयनस्यासनं शयनासनम्, शयनगृहमित्यर्थः । वैडूर्यैर्वरासनैः उपपन्नमभित आवृतं शयनासनं ददर्शेति सम्बन्धः ॥ १ ॥ २ ॥ तस्येति । तस्य पर्यङ्कस्य । एकतमे देशे शिरोभागे ॥ ३ ॥ अथात्र रावणदर्शनाय पुनः पर्यङ्कदर्शनमाह—जातरूपेत्यादिश्लोक

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

आविकाजिनम् ऊर्णायुचर्म तेन पर्यङ्कस्योपरिफलका संधीयते। वरमाल्यानाम् अशोकादिरिक्तपुष्पाणाम् ॥४–६॥ रामानु०–तत्रैव प्रदेशे परमासनं च ददर्श त्याह–जातरूपपरिक्षिप्तमित्यादिना श्लोकत्रयेण। परमासनं पर्यङ्कम्। अस्माच्छ्लोकात्माक् तस्य चैकतमे देश इति श्लोकः। एतस्मादनन्तरं केषुचित्कोशेषु लेखकप्रमादालिखितः। वरमाल्यानां

वालव्यजनहस्ताभिर्वीज्यमानं समन्ततः । गन्धैश्च विविधैर्जुष्टं वरधूपेन धूपितम् ॥ ५ ॥ परमास्तरणास्तीर्णं माविकाजिनसंवृतम्। दामभिर्वरमाल्यानां समन्तादुपशोभितम्॥६॥ तस्मिन् जीमूतसङ्काशं प्रदीप्तोत्तमकुण्डलम्। लोहिताक्षं महाबाहुं महारजतवाससम् ॥ ७ ॥ लोहितेनानुलिप्ताङ्गं चन्दनेन सुगन्धिना । सन्ध्यारक्तमिवाकाशे तोयदं सतडिद्गणम् ॥ ८ ॥ वृतमाभरणैर्दिव्यैः सुरूपं कामरूपिणम्। सवृक्षवनगुल्माढ्यं प्रसुप्तमिव मन्दरम् ॥९॥ क्रीडित्वोपरतं रात्रौ वराभरणभूषितम्। प्रियं राक्षसकन्यानां राक्षसानां सुखावहम्। पीत्वाप्युपरतं चापि ददर्श स महाकपिः ॥ १० ॥ भास्वरे शयने वीरं प्रसुप्तं राक्षसाधिपम् ॥ ११ ॥ निःश्वसन्तं यथा नागं रावणं वानरर्षभः । आसाद्य परमोद्विग्नः सोऽपासर्पत् सुभीतवत् ॥१२॥ अथारोहणमासाद्य वेदिकान्तरमाश्रितः । सुप्तं राक्षसशार्दूलं प्रेक्षते स्म महाकपिः ॥ १३ ॥

वरपुष्पाणाम् ॥ ४–६ ॥ तस्मिन्नित्यादि। महारजतवाससं हेमचित्रितवाससम्। महारजतं हेम। महारजनवाससमिति पाठे कुसुम्भरागरञ्जितवस्त्रमित्यर्थः ॥ ७ ॥ ८ ॥ सवृक्षवनगुल्माढ्यं सवृक्षैर्वनैः गुल्मैश्चाढ्यम्। प्रसुप्तं निश्चलमित्यर्थः ॥९–१२॥ अथ अपसर्पणानन्तरम्। आरोहणं सोपानम्। आसाद्य

त्रयेण। जातरूपपरिक्षिप्तं स्वर्णनिर्मितं गन्धैर्जुष्टं दिव्यगन्धैरधिवासितम्। आविकाजिनसंवृतम् आविकाजिनम् ऊर्णायुचर्म। वरमाल्यानां वरपुष्पाणाम् ॥४–६॥ तस्मिन्निति। महारजतवाससं हेमविचित्रवसनम् ॥ ७ ॥ ८ ॥ सवृक्षवनगुल्माढ्यं पुष्पसहितवृक्षवरगुल्माढ्यं मन्दरमिव स्थितम्। बाहवो यस्य वृक्षाः नासादयो गुल्माः ॥ ९–११ ॥ यथा नागं गजमिव निश्वसन्तं रावणम् आसाद्य प्राप्य परमोद्विग्नः अयं पापी देवीं हृतवानित्येतत्समीपेऽवस्थानमनुचितमिति खिन्नचित्तोऽपा सर्पत्सुभीतवत् सुभीतो यथा भयहेतौ पिशाचादिसंमुखे स्थातुमशक्तोऽपसर्पति तद्वत ॥१२॥ अथेति। आरोहणं सोपानम्। वेदिकान्तरं सोपानपर्वमध्यम् ॥१३॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अधिरुह्य । वेदिकान्तरं सोपानपर्वमध्यम् ॥१३॥ रामानु०–अथेति । अथ अपसर्पणानन्तरम् आरोहणमासाद्य वेदिकान्तरमाश्रितः सोपानमार्गेणान्यवेदिकामारूढ इत्यर्थः ॥१३॥ यस्य गन्धेनान्ये हस्तिनो भीता भवन्ति स गन्धहस्ती । प्रस्रवणं निर्झरम् ॥१४॥ काञ्चनाङ्गदेत्यादि । विक्षिप्तौ प्रसारितौ । विष्णुचक्रपरिक्षतौ विष्णुः

शुशुभे राक्षसेन्द्रस्य स्वपतः शयनोत्तमम् । गन्धहस्तिनि संविष्टे यथा प्रस्रवणं महत् ॥ १४ ॥ काञ्चनाङ्गदनद्धौ च ददर्श स महात्मनः । विक्षिप्तौ राक्षसेन्द्रस्य भुजाविन्द्रध्वजोपमौ ॥ १५ ॥ ऐरावतविषाणाग्रैरापीडनकृतव्रणौ । वज्रोल्लिखितपीनांसौ विष्णुचक्रपरिक्षतौ ॥ १६ ॥ पीनौ समसुजातांसौ सङ्गतौ बलसंयुतौ । सुलक्षणनखाङ्गुष्ठौ स्वङ्गुलीतललक्षितौ ॥ १७ ॥ संहतौ परिघाकारौ वृत्तौ करिकरोपमौ । विक्षिप्तौ शयने शुभ्रे पञ्चशीर्षाविवोरगौ ॥ १८ ॥ शशक्षतजकल्पेन सुशीतेन सुगन्धिना । चन्दनेन पराध्र्येन स्वनुलिप्तौ स्वलंकृतौ ॥ १९ ॥ उत्तमस्त्री विमृदितौ गन्धोत्तमनिषेवितौ । यक्षपन्नगगन्धर्वदेवदानवराविणौ ॥ २० ॥ ददर्श स कपिस्तस्य बाहू शयन संस्थितौ । मन्दरस्यान्तरे सुप्तौ महाही रूषिताविव ॥ २१ ॥ ताभ्यां स परिपूर्णाभ्यां भुजाभ्यां राक्षसेश्वरः । शुशुभेऽचलसङ्काशः शृङ्गाभ्यामिव मन्दरः ॥ २२ ॥

उपेन्द्रः । सङ्गतौ देहानुरूपौ । संहतौ दृढसन्धिबन्धौ । विक्षिप्तौ शयने निहितौ । पञ्चाङ्गुलिमत्तया पञ्चशीर्षावित्युक्तम् । एतदन्तस्य ददर्शेत्यनेनान्वयः अत्र द्विभुजत्वैकमुखत्वोक्तिः स्त्रीणां कामनीयत्वाय॥१५–१८॥ शशक्षतजेत्यादि । यक्षादीन् रावयितुं शीलमनयोरस्तीति तथा । ददर्शेति पुनरभिधानं विशेषणान्तरविवक्षया ॥ १९–२१ ॥ रामानु०–शशक्षतजकल्पेन शशरुधिरसदृशेन ॥ १९ ॥ ताभ्यामिति । परिपूर्णाभ्याम् दीर्घवृत्ताभ्यामित्यर्थः ॥ २२ ॥

गन्धहस्तिनि यस्य गन्धेन अन्ये गजा बिभ्यति स गन्धहस्ती ॥ १४ ॥ काञ्चनेति । विक्षिप्तौ दीर्घौ ॥ १५ ॥ वज्रोल्लिखितपीनांसौ वज्रेण उल्लिखितौ क्षतौ पीनांसौ ययोस्तौ ॥ १६ ॥ पीनाविति । समौ परस्परसदृशौ । सङ्गतौ दृढसन्धिबन्धौ । संहताविति पाठेऽप्ययमेवार्थः । विक्षिप्तौ प्रसारितौ । एतादृशौ बाहू ददर्शेति पूर्वेण सम्बन्धः । ददर्श स कपिरित्यत्र ददर्शेति क्रियापदावृत्तिर्विशेषणबाहुल्यात् ॥ १७–२१॥ ताभ्यामिति । भुजाभ्यामिति द्विभुजत्वं, महामुखादिति वक्ष्यमाण

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चूतेत्यादि । निश्वासस्य चूतादिसुरभित्वं तदधिवासितरसावल्यादिमधुसेवनात् । मृष्टान्नरससंयुक्तः षड्रसपदार्थगन्धयुक्तः । पानगन्धपुरस्सरः पीयत इति पानं मधु तद्गन्धयुक्तः ॥ २३ ॥ २४ ॥ मुक्तामणीति । अपवृत्तेन स्थानात् किञ्चिच्चलितेन । अपविद्धेन पर्यस्तेन । क्षौमेण उत्तरीयरूपेण । विद्युद्गणैरिव विद्युत्समूहैरिव । रावणं तस्य पत्नीश्च ददर्शेत्यन्वयः ॥ २५–२९ ॥ रामानु०–विराजता वक्षसेत्युपलक्षणे तृतीया । वक्षसा विराजितमिति वा पाठः ॥ २६ ॥

चूतपुन्नागसुरभिर्वकुलोत्तमसंयुतः । मृष्टान्नरससंयुक्तः पानगन्धपुरस्सरः ॥ २३ ॥ तस्य राक्षससिंहस्य निश्चक्राम महामुखात् । शयानस्य विनिःश्वासः पूरयन्निव तद्गृहम् ॥ २४ ॥ मुक्तामणिविचित्रेण काञ्चनेन विराजितम् । मुकुटेनापवृत्तेन कुण्डलोज्ज्वलिताननम् ॥ २५ ॥ रक्तचन्दनदिग्धेन तथा हारेण शोभिना । पीनायतविशालेन वक्षसाऽभिविराजितम् ॥ २६ ॥ पाण्डरेणापविद्धेन क्षौमेण क्षतजेक्षणम् । महार्हेण सुसंवीतं पीतेनोत्तमवाससा ॥ २७ ॥ माषराशिप्रतीकाशं निःश्वसन्तं भुजङ्गवत् । गाङ्गे महति तोयान्ते प्रसुप्तमिव कुञ्जरम् ॥ २८ ॥ चतुर्भिः काञ्चनैर्दीपैर्दीप्यमानचतुर्दिशम् । प्रकाशीकृतसर्वाङ्गं मेघं विद्युद्गणैरिव ॥ २९ ॥ पादमूलगताश्चापि ददर्श सुमहात्मनः । पत्नीः स प्रियभार्यस्य तस्य रक्षःपतेर्गृहे ॥ ३० ॥ शशिप्रकाशवदनाश्चारुकुण्डलभूषिताः । अम्लानमाल्याभरणा ददर्श हरियूथपः ॥ ३१ ॥ नृत्तवादित्रकुशला राक्षसेन्द्रभुजाङ्कगाः । वराभरणधारिण्यो निषण्णा ददृशे हरिः ॥ ३२ ॥

पादेति । रक्षःपतेर्गृह इति परशेषः ॥ ३० ॥ ३१ ॥ नृत्तेति । राक्षसेन्द्रस्य भुजम् अङ्कं गच्छन्तीति राक्षसेन्द्रभुजाङ्कगाः । उत्सङ्गोपवेशनालिङ्गनाभ्यां मेकमुखत्वं च रावणस्य कामरूपित्वात्सङ्गच्छते ॥ २२ ॥ चूतेति । निश्वासस्य चूतादिसुरभित्वं तदधिवासितवस्तुसेवनादिद्वारा । मृष्टान्नरससंयुक्तः षड्रसपदार्थगन्धोपेतः । पानगन्धपुरस्सरः पीयत इति पानं मधु तद्गन्धयुक्तः ॥ २३ ॥ २४ ॥ मुक्तेति । अपवृत्तेन स्वस्थानात्किञ्चिच्चलितेन उपलक्षितम् ॥ २५ ॥ रक्तेति । एतादृशवक्षसा उपलक्षितम् । अपविद्धेन पर्यस्तेन क्षौमेण उत्तरीयतया धृतेनोपलक्षितम् ॥ २६–२८ ॥ चतुर्भिरिति । विद्युल्लतैरिति पाठे लिङ्गव्यत्यय आर्षः । विद्युद्गणैरिति वा पाठः । उक्तविशेषणविशिष्टं रावणं तस्य पादमूलगताः पत्नीश्च ददर्शेति सम्बन्धः । रक्षःपतेर्गृह इति परशेषः ॥ २९–३१ ॥ नृत्तेति ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लालिता इत्यर्थः । वराभरणधारिण्य इति द्वितीयार्थे प्रथमा । निषण्णाः शयानाः । ददृश इत्यात्मनेपदमार्षम् ॥ ३२ ॥ वज्रेति । श्रवणान्तेष्वङ्गद दर्शनं बाहूनुपधाय शयनात् ॥ ३३–३५ ॥ अङ्गहारः नृत्तविशेषादङ्गविक्षेपविशेषः । तथोक्तं भरतशास्त्रे–" अङ्गानां योग्यदेशेषु हरणेन यथोचितम् । अङ्गनिर्वर्तनीयत्वादङ्गहारस्तथोच्यते ॥ " इत्यादि । कोमलैः सुकुमारैः । नृत्तशालिनी सुषुप्त्यवस्थायामपि वासनाबलेन नृत्तसन्निवेशविशिष्टा स्थिते

वज्रवैडूर्यगर्भाणि श्रवणान्तेषु योषिताम् । ददर्श तापनीयानि कुण्डलान्यङ्गदानि च ॥ ३३ ॥ तासां चन्द्रोपमैर्वक्त्रैः शुभैर्ललितकुण्डलैः । विरराज विमानं तन्नभस्तारागणैरिव ॥ ३४ ॥ मदव्यायामखिन्नास्ता राक्षसेन्द्रस्य योषितः । तेषु तेष्ववकाशेषु प्रसुप्तास्तनुमध्यमाः ॥ ३५ ॥ अङ्गहारैस्तथैवान्या कोमलैर्नृत्तशालिनी । विन्यस्तशुभसर्वाङ्गी प्रसुप्ता वरवर्णिनी ॥ ३६ ॥ काचिद्वीणां परिष्वज्य प्रसुप्ता संप्रकाशते । महानदीप्रकीर्णेव नलिनी पोतमाश्रिता ॥ ३७ ॥ अन्या कक्षगतेनैव मड्डुकेनासितेक्षणा । प्रसुप्ता भामिनी भाति बालपुत्रेव वत्सला ॥ ३८ ॥ पटहं चारु सर्वाङ्गी पीडय शेते शुभस्तनी । चिरस्य रमणं लब्ध्वा परिष्वज्येव भामिनी ॥ ३९ ॥ काचिद्वंशं परिष्वज्य सुप्ता कमललोचना । रहः प्रियतमं गृह्य सकामेव च कामिनी ॥ ४० ॥

त्युच्यते ॥ ३६ ॥ काचिद्वीणामिति । महानदीप्रकीर्णा महानदीप्रसृता । नलिनी समूलनालदलं पद्मजालकम् । पोतं यानपात्रम् । वीणां परिष्वज्य प्रसुप्ता काचित् नद्यां प्लवमाना यदृच्छया पोतसंयुक्ता नलिनीव प्रकाशत इत्यर्थः॥३७॥ मड्डुकेन वाद्यविशेषेण॥३८॥३९॥ काचिद्वंशमिति । वंशं वेणुम् ॥४०॥

राक्षसेन्द्रस्य भुजाङ्कगाः राक्षसेन्द्रस्य भुजावङ्कश्च गच्छन्तीति तथा, वल्लभा इति यावत् । धारिण्यः धारिणीः । निषण्णाः शयिताः ॥३२–३४॥ मदेति । मदव्यायामः मदाधिक्यम् ॥ ३५ ॥ अङ्गहारैरिति । अङ्गहारैः अङ्गविक्षेपैः । नृत्तशालिनीति विशेषणात्सुषुप्त्यवस्थायामपि वासनाबलेन नृत्तसन्निवेशविशिष्टा स्थितेति सूचयति ॥ ३६ ॥ महानदीप्रकीर्णेव महानद्यां प्लवमाना स्त्री नलिनीपोतं नलिनी समूलनालदलं पद्मजालकं पोतं यदृच्छयाऽऽगतं प्लवमाश्रितवतीव वीणां परिष्वज्य प्रकाशत इति सम्बन्धः ॥ ३७ ॥ मड्डुको वाद्यभेदः ॥ ३८ ॥ पीडय आलिङ्गचेत्यर्थः ॥ ३९ ॥ ४० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विपञ्चीमिति । विपञ्ची सप्ततन्त्री । षट्तन्त्री वीणा ॥४१॥४२॥ भुजेति । पणवेन मर्दलेन ॥ ४३ ॥ डिण्डिममिति । यथा पूर्वा तथैवासक्तडिण्डिमा अन्या तं डिण्डिमं परिगृह्य परिष्वज्य प्रसुप्ता । कथमिव ? तरुणं वत्समुपगुह्येव । डिण्डिमः पणवभेदः । यद्वा अन्या भामिनी डिण्डिमं परिगृह्यावलम्ब्य तथैव आसक्तडिण्डिमा आलिङ्गितान्यडिण्डिमा तरुणं रमणमुपगुह्य वत्सं पुत्रं परिगृह्येव प्रसुप्ता । यद्वा डिण्डिमं परिगृह्य वादनार्थं परिगृह्य तथैव

विपञ्चीं परिगृह्यान्या नियता नृत्तशालिनी । निद्रावशमनुप्राप्ता सहकान्तेव भामिनी ॥ ४१ ॥ अन्या कनकसङ्काशैर्मृदुपीनैर्मनोरमैः । मृदङ्गं परिपीड्याङ्गैः प्रसुप्ता मत्तलोचना ॥ ४२ ॥ भुजपार्श्वान्तरस्थेन कक्ष गेन कृशोदरी । पणवेन सहानिन्द्या सुप्ता मदकृतश्रमा ॥ ४३ ॥ डिण्डिमं परिगृह्यान्या तथैवासक्तडिण्डिमा । प्रसुप्ता तरुणं वत्समुपगुह्येव भामिनी ॥ ४४ ॥ काचिदाडम्बरं नारी भुजसंयोगपीडितम् । कृत्वा कमलपत्राक्षी प्रसुप्ता मदमोहिता ॥ ४५ ॥ कलशीमपविध्यान्या प्रसुप्ता भाति भामिनी । वसन्ते पुष्पशबला मालेव परि मार्जिता ॥ ४६ ॥पाणिभ्यां च कुचौ काचित् सुवर्णकलशोपमौ । उपगुह्यावला सुप्ता निद्राबलपराजिता ॥ ४७ ॥ अन्या कमलपत्राक्षी पूर्णेन्दुसदृशानना । अन्यामालिङ्ग्य सुश्रोणीं प्रसुप्ता मदविह्वला ॥ ४८ ॥

वादनकाल एव आसक्तडिण्डिमा अन्या तरुणं वत्समुपगुह्येव प्रसुप्ता ॥४४॥ काचिदिति । आडम्बरं तूर्यभेदम् । भुजसंभोगपीडितं भुजपरिणाहपीडितम् । भुजपरिश्लेषपीडितं वा ॥ ४५ ॥ रामानु०—आडम्बरस्तूर्यभेदः । "आडम्बरस्समारम्भे गजगर्जिततूर्ययोः" इति विश्वः ॥ ४५ ॥ कलशीमिति । अपविध्य पर्यस्य । अनेन सलिलसम्बन्धः सूच्यते । परिमार्जिता सलिललवसंमार्जिता । अपविद्धकलशनिर्गलितगन्धोदकसिक्ता काचित् वसन्ते म्लानिपरिहाराय सलिललव समुक्षिता मालेव बभावित्यर्थः । पुष्पशबलेत्यनेन कलशस्थजलस्य कुङ्कुमादिरससिक्तत्वमुच्यते, सर्वाभरणभूषितत्वं वा । इयं च रावणस्य करकधारिणीति

विपञ्चीं वीणाभेदम् ॥ ४१ ॥ ४२ ॥ मदकृतश्रमा मदवती वादनेन कृतश्रमा च ॥ ४३ ॥ परिगृह्य अवलम्ब्य । तथैवासक्तडिण्डिमा आलिङ्गितान्यडिण्डिमा । तरुणं रमणं वत्सं पुत्रं च परिगृह्य प्रसुप्ता ॥ ४४ ॥ आडम्बरः तूर्यभेदः । भुजसंयोगः भुजसंश्लेषः ॥ ४५ ॥ कलशीम् सलिलसम्भृतामित्यर्थः । अपविध्य पर्यस्य, परिमार्जिता विपर्यस्तस्वकीयकलशोदकार्द्रीकृतशरीरा नारी वसन्ते म्लानिपरिहाराय परिमार्जिता जलसिक्ता अत एव पुष्पशबला, शबलपुष्पेत्यर्थः । मालेव

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गम्यते ॥ ४६-४८ ॥ आतोद्यानि "ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् । वंशादिकं तु सुषिरं कांस्यतालादिकं घनम् । चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम्॥" इत्यमरः ॥ ४९-५१ ॥ किमिव गौरीमित्यत्राह-कनकवर्णाङ्गीमिति । इष्टाम्, रावणस्येति शेषः ॥५२॥ ५३ ॥ हर्षेणेत्यर्धम् ।

आतोद्यानि विचित्राणि परिष्वज्य वरस्त्रियः । निपीड्य च कुचैः सुप्ताः कामिन्यः कामुकानिव ॥ ४९ ॥ तासा मेकान्तविन्यस्ते शयानां शयने शुभे । ददर्श रूपसम्पन्नामपरां स कपिः स्त्रियम् ॥५०॥ मुक्तामणिसमायुक्तैर्भूषणैः सुविभूषिताम् । विभूषयन्तीमिव तत् स्वश्रिया भवनोत्तमम् ॥ ५१ ॥ गौरीं कनकवर्णाङ्गीमिष्टामन्तःपुरेश्वरीम् । कपिर्मन्दोदरीं तत्र शयानां चारुरूपिणीम् ॥ ५२ ॥ स तां दृष्ट्वा महाबाहुर्भूषितां मारुतात्मजः । तर्कयामास सीतेति रूपयौवनसम्पदा ॥ ५३ ॥ हर्षेण महता युक्तो ननन्द हरियूथपः ॥ ५४ ॥ आस्फोटयामास चुचुम्ब पुच्छं ननन्द चिक्रीड जगौ जगाम । स्तम्भानरोहन्निपपात भूमौ निदर्शयन् स्वां प्रकृतिं कपीनाम् ॥ ५५ ॥

इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे दशमः सर्गः ॥ १० ॥

हर्षेण युक्तः ननन्द उत्तरोत्तरमानन्दमवापेत्यर्थः ॥ ५४ ॥ रामानु०-हर्षेण रोमाञ्चेन ॥ ५४ ॥ तदेवोपपादयति-आस्फोटयामासेति । चिक्रीड, ननर्तेति यावत् । स्वां प्रकृतिं स्वासाधारणं चापल्यम् । अस्मिन्सर्गे सार्धचतुष्पञ्चाशच्छ्लोकाः ॥ ५५ ॥ इति० श्रीसुन्दरकाण्डव्याख्याने दशमःसर्गः ॥१०॥

भातीति सम्बन्धः ॥४६-४८॥ आतोद्यानि ततानद्धसुषिरघननामकानि चतुर्विधवाद्यानि । " ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् । वंशादिकं तु सुषिरं कांस्यतालादिकं घनम् । चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम् ॥" इत्यमरः ॥ ४९ ॥ अथ प्रधानमहिषीदर्शनम्-तासामिति । एकान्तविन्यस्ते तासां शयनात्पृथग्विन्यस्ते । तां वक्ष्यमाणगुणाम् ॥ ५० ॥ ५१ ॥ गौरीं हरिद्राभाम् । किमिव गौरीमित्यत आह-कनकवर्णाभामिति । इष्टां रावणस्यातिप्रियाम् । अन्तःपुरस्त्रीणामीश्वरीं कपिर्मन्दोदरीं ददर्शेत्यन्वयः ॥ ५२ ॥ तर्कयामास सीतेति रूपयौवनसम्पदा । औचित्यमनालोच्य रूपयौवनसम्पन्मात्रदर्शनेन सीतेति विचारितवानित्यर्थः ॥ ५३ ॥ हर्षो मुखविकासादिः, आनन्दो मानसः ॥ ५४ ॥ सीतेति व्यामोहात्कापेयं प्रदर्शितवानित्याह-आस्फोटयामासेति । जगौ हर्षात् मन्दगानं कृतवानित्यर्थः । आस्फोटपुच्छचुम्बनादिर्जातिधर्मः । जगाम स्तम्भानित्यनुकर्षः । सर्वा अप्येताश्चेष्टाः उपाधिति बोध्यम् । एवं चेष्टायां हेतुः स्वां कपीनां प्रकृतिं निदर्शयन् इति ॥ ५५ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां दशमः सर्गः ॥ १० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अवधूयेत्यादि । तां बुद्धिं मन्दोदर्या सीताबुद्धिम् । अवस्थितो बभूव स्वस्थचित्तो बभूव ॥ १ ॥ न रामेणेत्यादि । त्रिदशेष्वपीत्यनन्तरम् अन्येयमित्यर्धम् । पानभूमौ ततोऽन्यत्रेत्यर्थः ॥ २ ॥ ३ ॥ रामानु०—सीतां प्रति महाकपिरित्यतः परम् अन्येयमित्यर्धं प्रमादाल्लिखितम् । विद्यते त्रिदशेष्वपीत्यतः परमस्य स्थानम् । अत्र पुनरपि पानभूमौ स्त्रीणां रावणस्य च दर्शनाभिधानात् क्षणमन्यत्रान्विष्य विशेषेण मार्गितुं पुनः पानभूम्यादिकं दृष्टवानित्यवगम्यते ॥ २ ॥ ३ ॥ क्रीडितेनेत्यादि अपराः

अवधूय च तां बुद्धिं बभूवावस्थितस्तदा । जगाम चापरां चिन्तां सीतां प्रति महाकपिः ॥ १ ॥ न रामेण वियुक्ता सा स्वप्तुमर्हति भामिनी । न भोक्तुं नाप्यलङ्कर्तुं न पानमुपसेवितुम् ॥ २ ॥ नान्यं नरमुपस्थातुं सुराणामपि चेश्वरम् । नहि रामसमः कश्चिद्विद्यते त्रिदशेष्वपि । अन्येयमिति निश्चित्य पानभूमौ चचार सः ॥ ३ ॥ क्रीडितेनापराः क्लान्ता गीतेन च तथाऽपराः । नृत्तेन चापराः क्लान्ताः पानविप्रहतास्तथा । मुरजेषु मृदङ्गेषु पीठिकासु च संस्थिताः ॥ ४ ॥ तथाऽऽस्तरणमुख्येषु संविष्टाश्चापराः स्त्रियः ॥ ५ ॥ अङ्गनानां सहस्रेण भूषितेन विभूषणैः । रूपसँल्लापशीलेन युक्तगीतार्थभाषिणा । देशकालाभियुक्तेन युक्तवाक्याभिधायिना ॥ ६ ॥

स्त्रिय इत्यन्तमेकं वाक्यम् । ददर्शेत्यनुषज्यते । क्रीडितेन क्रीडया । भावे निष्ठा । विप्रहताः क्लान्ता इत्यर्थः । संस्थिताः उपधानीकृत्य शयिताः । संविष्टाः सुप्ताः ॥ ४ ॥ ५ ॥ तत्र सीताया अदर्शनात् पुनरपि रावणस्थानमागत्य ददर्शेत्याह—अङ्गनानामिति । रूपसँल्लापशीलेन स्वसौन्दर्य

अवधूयेति । तां बुद्धिं तस्यां तद्बुद्धिम् । अवस्थितः स्वस्थचित्तः । सीतां प्रति तद्विषयामन्यचिन्तां पूर्वचिन्ताविघटितां जगाम ॥ १ ॥ अविचारान्ममैतादृशी बुद्धिर्जातेत्याह—न रामेणेत्यादिश्लोकद्वयेन । अन्यं नरम् उपस्थातुमङ्गीकर्तुं नार्हति नाध्यवस्यति । तत्र हेतुः नहि रामेति । यद्येवमतोऽन्येयमनुभूतेति निश्चित्य तत्र गृहे पानभूमौ पानशालायां चचार, पुनस्सम्यगन्वेषणायेति शेषः ॥ २ ॥ ३ ॥ पानभूमावित्यारभ्य ददर्श हरियूथपः इत्यन्तमेकं वाक्यम् । रताभिरतसंसुप्तमित्यत्र विशेष्यत्वेन रावणमित्यध्याहर्तव्यम् । तथा च हरियूथपः पानभूमिं च उक्तविशेषणविशिष्टाः स्त्रियश्च अङ्गनासहस्रेण सह रावणं च ददर्शेति सम्बन्धः । क्रीडादिभिरुपलक्षिताः, पानविप्रहताः पानेन मत्ताः, संविष्टाः सुप्ताः । रूपसँल्लापशीलेन स्वस्वसौन्दर्यवर्णनस्वभावेनेत्यर्थः । युक्तगीतार्थभाषिणा युक्तमुपपन्नं यथा तथा गीतस्य भरतशास्त्रस्यार्थं भाषितुं शीलमस्येति तथा तेन, भरतशास्त्रार्थव्याख्यानचतुरेणेत्यर्थः । देशकालाभियुक्तेन देशकालाभिज्ञेनेत्यर्थः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वर्णनशीलेन, रावणविषयरूपप्रशंसाशीलेन वा । युक्तगीतार्थभाषिणा युक्तम् उपपन्नं गीतार्थं भाषितुं शीलमस्येति युक्तगीतार्थभाषी तेन । देशकालाभियुक्तेन देशकालाभिज्ञेनेत्यर्थः । अङ्गनानां सहस्रेण रताभिरतसंसुप्तमित्यन्वयः । रतशब्देन बाह्यसुरतमुच्यते । अभिरतशब्देन करणबन्धादिकमुच्यते । रताभिरतश्चासौ संसुप्तश्च तथा तम् । स्नातानुलिप्तादिवत्समासः । क्रीडाखेदेन सुप्तमित्यर्थः । रावणमिति शेषः ॥ ६-८ ॥ स इति ।

रताभिरतसंसुप्तं ददर्श हरियूथपः ॥ ७ ॥ तासां मध्ये महाबाहुः शुशुभे राक्षसेश्वरः । गोष्ठे महति मुख्यानां गवां मध्ये यथा वृषः ॥८॥ स राक्षसेन्द्रः शुशुभे ताभिः परिवृतः स्वयम् । करेणुभिर्यथाऽरण्ये परिकीर्णो महाद्विपः॥९॥ सर्वकामैरुपेतां च पानभूमिं महात्मनः । ददर्श हरिशार्दूलस्तस्य रक्षःपतेर्गृहे ॥ १० ॥ मृगाणां महिषाणां च वराहाणां च भागशः । तत्र न्यस्तानि मांसानि पानभूमौ ददर्श सः ॥ ११ ॥ रौक्मेषु च विशालेषु भाजनेष्वर्ध भक्षितान् । ददर्श हरिशार्दूलो मयूरान् कुक्कुटांस्तथा ॥ १२ ॥ वराहवार्ध्राणसकान् दधिसौवर्चलायुतान् । शल्यान् मृगमयूरांश्च हनुमानन्ववैक्षत ॥ १३ ॥

परिकीर्णः परिवृतः ॥ ९ ॥ सर्वकामैरिति । पानभूमेः पुनर्दर्शनोक्तिस्तत्रत्यपदार्थकथनाय ॥ १० ॥ मृगाणामिति । भागशः पिण्डशः ॥ ११ ॥ रौक्मेष्विति । मयूरादिशब्दाः मयूरादिविकारमांसपराः ॥ १२ ॥ रामानु०-मयूरान् कुक्कुटानिति स्वरूपेण निर्देशात्तत्तदाकारविशिष्टतया ते पक्वा इत्यवगम्यते ॥ १२ ॥ वराहेति । वार्ध्राणसाः छागविशेषाः । " त्रिपिबन्त्विन्द्रियक्षीणं यूपस्याग्रचरं तथा । रक्तवर्णं च राजेन्द्र च्छागं वार्ध्राणसं विदुः॥ " इति स्मृतेः । पक्षिविशेष इत्यन्ये । खड्गमृग इत्यपरे । " वार्ध्राणसः खड्गमृगः " इति हलायुधः । दधिसौवर्चलायुतान् दधिसौवर्चलाभ्यां संस्कृतानित्यर्थः । सौवर्चलं

युक्तवाक्याभिधायिना अवसरोचितभाषिणा ॥ ४-६ ॥ रताभिरतसंसुप्तं रताभिरतश्चासौ संसुप्तश्च तम्, रतिश्रान्त्या सुप्तमित्यर्थः ॥ ७ ॥ ८ ॥ परिकीर्णः परिवेष्टितः ॥ ९ ॥ सस्त्रीकरावणगृहे पुनस्सम्यगन्विष्य पुनर्बहिः पानभूमिमागत्य विचिनोति-सर्वकामैरिति । पूर्वं नृत्यादियुक्ततत्स्थस्त्रीमात्रदर्शनम्, इदानीं तस्यास्सर्वकामोपेतत्वदर्शनम् ॥ १० ॥ तदेव प्रपञ्चयति-मृगाणामिति ॥ ११ ॥ १२ ॥ वराहः सूकरः, वार्ध्राणसः पक्षिविशेषः "कृष्णग्रीवो रक्तशिराः श्वेतपक्षो विहङ्गमः । स वै वार्ध्राणसः पक्षी" इति विष्णुधर्मोक्तेः । छागविशेषो वा ॥ " त्रिपिबं त्विन्द्रियक्षीणं श्वेतं वृद्धमजापतिम् । वार्ध्राणसं च तं प्राहुर्याज्ञिकाः श्राद्धकर्मणि ॥ "

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रुचकाख्यो लवणविशेषः । " सौवर्चलेक्षरुचके " इत्यमरः । शल्यान् श्वाविधः । " श्वावित्तु शल्यः " इत्यमरः । मृगमयूरादीनां पुनः कथनं प्रदेश भेदात् ॥ १३ ॥ क्रकरान् पक्षिविशेषान् । "कृकणक्रकरौ समौ" इत्यमरः । सिद्धान् पक्वान् । एकशल्यान्मत्स्यविशेषान् । कृतनिष्ठितान् पर्याप्तपक्वान् । "युगपर्याप्तयोः कृतम्" इत्यमरः ॥१४॥१५॥ तथेत्यादि । आम्ललवणोत्तंसैः आम्लप्रधानैः लवणप्रधानैश्च । रागषाडवैः रागयुक्तैः षाडवैः । रागः श्वेत

क्रकरान् विविधान् सिद्धांश्चकोरानर्धभक्षितान् ॥ १४ ॥ महिषानेकशल्यांश्च च्छागांश्च कृतनिष्ठितान् । लेह्यानुच्चावचान् पेयान् भोज्यानि विविधानि च ॥ १५ ॥ तथाम्ललवणोत्तंसैर्विविधै रागषाडवैः । हारनूपुरकेयूररेपविद्धै र्महाधनैः ॥ १६ ॥ पानभाजनविक्षिप्तैः फलैश्च विविधैरपि । कृतपुष्पोपहारा भूरधिकं पुष्यति श्रियम् ॥ १७ ॥ तत्र तत्र च विन्यस्तैः सुश्लिष्टैः शयनासनैः । पानभूमिर्विना वह्निं प्रदीप्तेवोपलक्ष्यते ॥ १८ ॥ बहुप्रकारैर्विविधैर्वर संस्कारसंस्कृतैः । मांसैः कुशलसंयुक्तैः पानभूमिगतैः पृथक् ॥ १९ ॥

सर्षपः । " रागस्सिद्धार्थको ज्ञेयः " इति सूदशास्त्रम् । षाडवाः षड्ससंयोगकृता भक्ष्यविशेषाः । प्रदीपे त्वन्यथोक्तम्–" सितामध्वादिमधुरो द्राक्षा दाडिमजो रसः । विरलश्चेत्कृतो रागस्सान्द्रश्चेत् षाडवः स्मृतः॥" इति ॥ १६–१८ ॥ बहुप्रकारैरित्यादि । कुशलसंयुक्तैः समर्थसूदसंयोजितैः । एवंभूतैः

इति स्मरणात् । त्रिपिबं त्रिभिः मुखेन कर्णाभ्यां च पिबतीति त्रिपिबम् । खड्गमृगो वा । " वार्ध्राणसः खड्गमृगः " इति हलायुधः । दधिसौवर्चलायुतान् दधि सौवर्चलाभ्यां संस्कृतानित्यर्थः । सौवर्चलं रुचकाख्यं लवणम् । "सौवर्चलं स्याद्रुचकम्" इत्यमरः । शल्यान्, शल्यः श्वावित् ॥ १३ ॥ क्रकरान् क्रकराख्यपक्षिविशेषान् । कृसरानिति पाठे–तैलादिमिश्रितौदनान् । सिद्धान् पक्वान् ॥ १४ ॥ एकशल्यान् मत्स्यविशेषान् । कृतनिष्ठितान् कृतेन हिङ्गुमरीच्यादिना निष्ठितान् निष्पन्नान् पाकसंस्कारादिना संस्कृतानित्यर्थः ॥ १५ ॥ रागषाडवैः शर्कराक्षौद्रद्राक्षादाडिममधुरद्रव्याणां विकाराः विरलरसाः रागाः त एव वस्त्रगलिताः सान्द्राः षाडवाः । तदुक्तम्–" सितामध्वादिमधुरा रागास्ते स्वच्छतां गताः । ते सान्द्राः षाडवा लेह्यास्ते वस्त्रगलिताः " इति, " सितामध्वादिमधुरो द्राक्षादाडिमजो रसः । विरलश्चेत्कृतो रागः सान्द्रश्चेत्षाडवः स्मृतः॥" इति च ॥ १६ ॥१७॥ तत्र तत्रेत्यादि श्लोकद्वयमेकं वाक्यम् । पानभूमिः तैः प्रदीप्तेवोपलक्ष्यत इति सम्बन्धः ॥१८॥ बहुप्रकारैः बहूपादानभवैः अत एव विविधैः विविधरसवद्भिः, वरसंस्कारेण श्रेष्ठसंस्कारद्रव्ययोगेन संस्कृतैः, कुशलसंयुक्तैः निपुणपाचकपक्वैर्मांसैः ॥१९॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मांसैः सह दृष्टा इति वक्ष्यमाणेनान्वयः ॥ १९ ॥ दिव्याः अमृतमथनोद्भूतवारुणीजातीयाः । प्रसन्नाः निष्कल्मषाः । कृतसुराः कृत्रिमसुराः । कृत्रिमसुरा एवाह शर्करेति । शर्करासवाः शर्करया कृताः । माध्वीकाः मधुना कृताः । पुष्पासवाः पुष्पमकरन्दकृताः । फलासवाः फलरसकृताः । तथोक्तमर्णवे-- " पानकं द्राक्षमाधूकं खार्जूरं तालमैक्षवम् । मधूत्थं शीधुमाध्वीकं मैरेयं नारिकेलजम् ॥ " इति ॥२०॥ वासचूर्णैः अधिवासचूर्णैः सह दृष्टाः, हनुमतेति

दिव्याः प्रसन्ना विविधाः सुराः कृतसुरा अपि । शर्करासवमाध्वीकपुष्पासवफलासवाः ॥२०॥ वासचूर्णैश्च विविधै र्दृष्टास्तैस्तैः पृथक् पृथक् । सन्तता शुशुभे भूमिर्माल्यैश्च बहुसंस्थितैः ॥ २१ ॥ हिरण्मयैश्च विविधैर्भाजनैः स्फाटिकै रपि । जाम्बूनदमयैश्चान्यैः करकैरभिसंवृता ॥ २२ ॥ राजतेषु च कुम्भेषु जाम्बूनदमयेषु च । पानश्रेष्ठं तदा भूरि कपिस्तत्र ददर्श सः ॥ २३ ॥ सोऽपश्यच्छातकुम्भानि शीधोर्मणिमयानि च । राजतानि च पूर्णानि भाजनानि महाकपिः ॥ २४ ॥ क्वचिदर्धावशेषाणि क्वचित् पीतानि सर्वशः । क्वचिन्नैव प्रपीतानि पानानि स ददर्श ह ॥ २५ ॥

शेषः । बहुप्रकारैर्मांसैः सह सुराः वासचूर्णैः सह हनुमता तत्र पानभूमौ दृष्टा इति सम्बन्धः । तैस्तैरित्याद्युत्तरशेषः । तैस्तैर्मांसविशेषैस्सुराविशेषैर्वास चूर्णैश्च पृथक्पृथक् सन्ततेति संबन्धः । बहुसंस्थितैः बहुसंस्थानैः ॥२१॥ हिरण्मयैरिति । अत्रापि संततेति पूर्वेणान्वयः । हिरण्मयैः रजतमयैः । "कृताकृतं हेम रूप्यं हिरण्यमभिधीयते" इति वचनात् । तैस्तैः पृथक्पृथक् सन्तता बहुसंस्थितैर्माल्यैर्हिरण्मयैः स्फाटिकैरपि भाजनैस्सन्तता जाम्बूनदमयैरन्यैः करकैश्चाभिसंवृता भूमिः शुशुभ इति सम्बन्धः ॥ २२ ॥ २३ ॥ शीधोः मद्यस्य ॥ २४ ॥ पानानि पानपात्राणि ॥ २५ ॥

दिव्याः सुराः समुद्रमथनोत्पन्नाः सुराः । कृतसुराः कृत्रिमसुराः । ता एवाह-शर्करासवेत्यादिना । शर्करासवाः शर्करया कृताः, माध्वीकाः मधुना कृताः । माद्वीका इति पाठे द्राक्षाफलविकारा वा । " मृद्वीका गोस्तनी द्राक्षा " इत्यमरः । पुष्पासवाः पुष्पमकरन्दकृताः । फलासवाः फलरसैः कृताः । वासचूर्णैः अधिवासचूर्णैः, सुगन्धिचूर्णैरित्यर्थः । सह उक्तसुरा दृष्टाः, कपिनेति शेषः । सन्ततेत्यादिसार्धश्लोकमेकं वाक्यम् । हिरण्मयैः रजतमयैः माल्यादिभिः संवृता भूमिः शुशुभ इति सम्बन्धः ॥ २०-२३ ॥ स इति । शीधोः मद्यस्य ॥ २४ ॥ अर्धावशेषाणि अर्धावशिष्टपानानि । पीतानि पीतासवानि । नैवप्रपीतानि पूर्णासवान्येव ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

क्वचिद्भक्ष्यानित्यादि निद्राबलपराजिता इत्यन्तमेकं वाक्यम् । क्वचित्प्रभिन्नैरित्यादिषु सहयोगे तृतीया, हेतौ तृतीया वा । प्रभिन्नत्वादालोलित्वाच्च संपृक्तमाल्यानि माल्यमिश्राणीत्यर्थः । परस्परमित्यादि । पश्यन्वै विचचारेति पूर्वेणान्वयः ॥२६–२९॥ तासामिति । गात्रजं गात्रस्थम् । मन्दमनिलं

क्वचिद्भक्ष्यांश्च विविधान् क्वचित्पानानि भागशः । क्वचिदन्नावशेषाणि पश्यन् वै विचचार ह ॥ २६ ॥ क्वचित् प्रभिन्नैः करकैः क्वचिदालोलितैर्घटैः । क्वचित्संपृक्तमाल्यानि जलानि च फलानि च ॥ २७ ॥ शयनान्यत्र नारीणां शुभ्राणि बहुधा पुनः । परस्परं समाश्लिष्य काश्चित्सुप्ता वराङ्गनाः ॥ २८ ॥ काश्चिच्च वस्त्रमन्यस्याः स्वपन्त्याः परिधाय च । आहृत्य चाबलाः सुप्ता निद्राबलपराजिताः ॥ २९ ॥ तासामुच्छ्वासवातेन वस्त्रं माल्यं च गात्रजम् । नात्यर्थं स्पन्दते चित्रं प्राप्य मन्दमिवानिलम् ॥३०॥ चन्दनस्य च शीतस्य शीधोर्मधुरसस्य च । विविधस्य च माल्यस्य धूपस्य विविधस्य च । बहुधा मारुतस्तत्र गन्धं विविधमुद्वहन् ॥ ३१ ॥ रसानां चन्दनानां च धूपानां चैव मूर्च्छितः । प्रववौ सुरभिर्गन्धो विमाने पुष्पके तदा ॥३२॥ श्यामा वदातास्त्रान्याः काश्चित् कृष्णा वराङ्गनाः । काश्चित् काञ्चनवर्णाङ्ग्यः प्रमदा राक्षसालये ॥ ३३ ॥

प्राप्येव अत्यर्थं न स्पन्दत इत्यन्वयः ॥३०॥ चन्दनस्येत्यादि । उद्वहन् प्रववावित्यपकृष्यते ॥३१॥ रसादीनां सुरभिर्गन्धः विमाने मूर्च्छितः व्याप्तः सन् प्रववौ चचार॥३२॥रा०–चन्दनस्य अनुलेपनचन्दनस्य । धूपस्य गृहाधिवासार्थधूपस्य । स्नानानां चन्दनानां इति पाठः । स्नानार्हचन्दनानाम् । धूपानां केशाधिवासधूपानाम् । मारुतः एतेषां विविधं गन्धमुद्वहन् प्रववौ । अत एव सुरभिः घ्राणतर्पणो गन्धः विमाने पुष्पके मूर्च्छितः व्याप्त इति संबन्धः॥३१॥३२॥ श्यामा इति । वदाताः अवदाताः । भाषुरिमतेनाल्लोपः । पानानि पानभाजनानि ॥ २५ ॥ भागशः विभागेन । पानानि ददर्श इदममुकमिदममुकमिति विभज्य ददर्शेत्यर्थः ॥ २६ ॥ क्वचिदिति । करकैर्घटैरिति सहयोगे तृतीया ॥ २७ ॥ शून्यानि बहुधा पुनः इति पाठः । शून्यानि पतिशून्यानि, अत एव परस्परं समाश्लिष्येति । निद्राबलपराजिता इत्यन्तस्य पश्यन्वै विचचारेति पूर्वेण सम्बन्धः ॥ २८ ॥ २९ ॥ तासामिति । गात्रजं गात्रस्थम् ॥ ३० ॥ चन्दनस्येत्यादि । मारुतश्चन्दनादेश्च स्नानानां स्नानार्हचन्दनानां धूपानां विविधं गन्ध मुद्वहन् प्रववौ । अत एव सुरभिः घ्राणतर्पणः गन्धः विमाने मूर्च्छितः व्याप्त इति सम्बन्धः ॥ ३१ ॥ ३२ ॥ श्यामा इति । राक्षसालये अन्तरमध्यबहिःकक्ष्योप

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शुभ्रा इत्यर्थः ॥ ३३॥ तासामिति । चकारोऽप्यर्थकः । निद्रापरवशानामपि तासां रूपं प्रसुप्तानां पद्मिनीनां रूपमिव रम्यमासीदित्यर्थः ॥ ३४ ॥३५॥ निरीक्षमाण इत्यादि । धर्मसाध्वसशङ्कितः धर्मलोपभयाच्छङ्कितः । परदारावरोधस्य परदाररूपान्तःपुरस्य ॥ ३६ ॥ न हीति । मे दृष्टिः कदाचिदपि

तासां निद्रावशत्वाच्च मदनेन विमूर्च्छितम् । पद्मिनीनां प्रसुप्तानां रूपमासीद्यथैव हि ॥ ३४ ॥ एवं सर्वमशेषेण रावणान्तःपुरं कपिः । ददर्श सुमहातेजा न ददर्श च जानकीम् ॥ ३५ ॥ निरीक्षमाणश्च तदा ताः स्त्रियः स महा कपिः । जगाम महतीं चिन्तां धर्मसाध्वसशङ्कितः । परदारावरोधस्य प्रसुप्तस्य निरीक्षणम् ॥ ३६ ॥ इदं खलु ममात्यर्थं धर्मलोपं करिष्यति । नहि मे परदाराणां दृष्टिर्विषयवर्तिनी ॥ ३७ ॥ अयं चात्र मया दृष्टः परदारपरिग्रहः ॥ ३८ ॥ तस्य प्रादुरभूच्चिन्ता पुनरन्या मनस्विनः । निश्चितैकान्तचित्तस्य कार्यनिश्चयदर्शिनी ॥ ३९ ॥ कामं दृष्टा मया सर्वा विश्वस्ता रावणस्त्रियः । नहि मे मनसः किंचिद्वैकृत्यमुपपद्यते ॥ ४० ॥ मनो हि हेतुः सर्वेषामिन्द्रियाणां प्रवर्तने । शुभाशुभास्ववस्थासु तच्च मे सुव्यवस्थितम् ॥ ४१ ॥

परदाराणां विषयवर्तिनी नहि, परदारसम्बन्धिविषयपरा नहीत्यर्थः । तथाप्ययं परदारपरिग्रहः दृष्टः, इदमसङ्गतमित्यर्थः ॥ ३७ ॥ ३८ ॥ तस्येति । निश्चितैकान्तचित्तस्य नियतैकरूपचित्तस्य ॥ ३९ ॥ रामानु०—तस्येति । निश्चिते निश्चये एकान्तं नियतं चित्तं यस्य तस्य । यद्वा नियतैकचित्तस्य ॥ ३९ ॥ काममिति । वैकृत्यं विकारः । उपपद्यते उत्पद्यते ॥ ४० ॥ रामानु०—विश्वस्ताः विस्रब्धाः ॥ ४० ॥ मन इति । शुभाशुभास्ववस्थासु शुभकरणाशुभकरणेषु विषयेषु । लक्षिते सर्वत्र सुता इति शेषः ॥ ३३ ॥ तासामिति । निद्रापरवशत्वाच्च मदनेन मदनहेतुकरत्या च । विमूर्च्छितं क्लान्तम् तासां रूपं पद्मिनीनां रूपं यथा रमणीयं तथैवासीदित्यर्थः ॥ ३४ ॥ ३५ ॥ निरीक्षमाण इति । धर्मसाध्वसशङ्कितः धर्मलोपभयात् शङ्कितः । परदारपरिग्रहः परदारा एव परिग्रहः ॥३६–३८॥ निश्चितैकान्त चित्तस्य निश्चयनियतचित्तस्य ॥ ३९ ॥ वैकृत्यं विकृतत्वम् ॥ ४०–४२ ॥

ति०—धर्मलोपं दर्शयति—**परदारे**ति । परदारावरोधस्य । दारशब्दः स्त्रीसामान्यवाची । अवरोधशब्दः स्वयंमयुक्तकुलस्त्रीवाची । प्रसुप्तस्येत्यनेन नग्नप्रायत्वं सूचितम् तत्समये वसनानां विपर्यासात् । किञ्च परदारा एव परिग्रहो भार्या यस्य सः अतिपापी रावणश्च दृष्टः । तादृशदर्शनमपि धर्मलोपकारीति भावः ॥ ३६–३८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इन्द्रियाणां प्रवर्तने मन एव हेतुः। सुव्यवस्थितं न तदभिलाषि जातमित्यर्थः ॥ ४१ ॥ ननु परदारदर्शनमपि परिहरणीयम्, तत्किमर्थं कृतम् ? तत्राह– नान्यत्रेति। अन्यत्र स्त्रीव्यतिरिक्ते। संपरिमार्गणे कर्तव्ये। स्त्रीष्वेव हि स्त्रियो दृश्यन्ते ॥४२॥ यस्येति। योनिः जातिः, सजातीय इत्यर्थः ॥४३॥४४॥

नान्यत्र हि मया शक्या वैदेही परिमार्गितुम्। स्त्रियो हि स्त्रीषु दृश्यन्ते सदा सम्परिमार्गणे ॥४२॥ यस्य सत्त्वस्य या योनिस्तस्यां तत् परिमार्ग्यते। न शक्या प्रमदा नष्टा मृगीषु परिमार्गितुम् ॥४३॥ तदिदं मार्गितं तावच्छुद्धेन मनसा मया। रावणान्तःपुरं सर्वं दृश्यते न च जानकी ॥ ४४ ॥ देवगन्धर्वकन्याश्च नागकन्याश्च वीर्यवान्। अवेक्षमाणो हनुमान्नैवापश्यत जानकीम् ॥ ४५ ॥ तामपश्यन् कपिस्तत्र पश्यंश्चान्या वरस्त्रियः। अपक्रम्य तदा वीरः प्रध्यातुमुपचक्रमे ॥ ४६ ॥ स भूयस्तु परं श्रीमान् मारुतिर्यत्नमास्थितः। आपानभूमिमुत्सृज्य तद्विचेतुं प्रचक्रमे ॥ ४७ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे एकादशः सर्गः ॥ ११ ॥

स तस्य मध्ये भवनस्य मारुतिर्लतागृहांश्चित्रगृहान्निशागृहान्। जगाम सीतां प्रति दर्शनोत्सुको न चैव तां पश्यति चारुदर्शनाम् ॥ १ ॥ स चिन्तयामास ततो महाकपिः प्रियामपश्यन् रघुनन्दनस्य ताम्। ध्रुवं हि सीता म्रियते यथा न मे विचिन्वतो दर्शनमेति मैथिली ॥ २ ॥

रामानु०–तत् तस्मात् ॥ ४४ ॥ देवेति। अपश्यत अपश्यत् ॥ ४५ ॥ ४६ ॥ स भूयस्तु परमिति। तत् रावणान्तःपुरम् ॥ ४७ ॥ इति श्रीगोविन्दराज विरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकादशः सर्गः ॥ ११ ॥ स तस्येत्यादि। निशागृहान् रात्रिनिवासयोग्य गृहान्। "गृहाः पुंसि च भूम्न्येव" इति पुँल्लिङ्गत्वम्। पश्यति अपश्यत् ॥ १ ॥ स इति। यथा यस्मात् कारणात्। विचिन्वतो मे मैथिली दर्शनं

योनिः जातिः ॥ ४३–४६ ॥ स इति। तत् रावणस्य गृहम् ॥ ४७ ॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्व० सुन्दरकाण्डव्याख्यायाम् एकादशः सर्गः ॥ ११ ॥ स तस्येति। निशागृहान् रात्रिनिवासयोग्यान् गृहान्। पश्यति अपश्यत् ॥ १ ॥ स इति। जानकी विचिन्वतो मे दर्शनं यथा यस्मात्रेति तथा तस्मात्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नैति तस्मात् म्रियते ममार । यद्वा अथवा नेति वाक्यं पठनीयम् । तदा अपश्यन्निति हेतुगर्भम् । अदर्शनात् मृता वा अथवा दर्शनं नैति । कुत्रचित् गहने प्रदेशे स्थिता वेत्यर्थः ॥ २ ॥ सेति । प्रतिदुष्टकर्मणा अतिदुष्टकर्मणा । वीप्सायां प्रतिः । " प्रति प्रतिनिधौ वीप्सालक्षणादौ " इत्यमरः । परे उत्कृष्टे । आर्यपथे सन्मार्गे ॥ ३ ॥ विरूपाणि न्यूनाधिकानि रूपाणि शरीरावयवाः यासां ताः । विकृताः विकृतवेषाः । विवर्चसो निस्तेजस्काः ।

सा राक्षसानां प्रवरेण जानकी स्वशीलसंरक्षणतत्परा सती । अनेन नूनं प्रतिदुष्टकर्मणा हता भवेदार्यपथे परे स्थिता ॥ ३ ॥ विरूपरूपा विकृता विवर्चसो महानना दीर्घविरूपदर्शनाः । समीक्ष्य सा राक्षसराजयोषितो भयाद्विनष्टा जनकेश्वरात्मजा ॥ ४ ॥ सीतामदृष्ट्वा ह्यनवाप्य पौरुषं विहृत्य कालं सह वानरैश्चिरम् । न मेऽस्ति सुग्रीवसमीपगा गतिः सुतीक्ष्णदण्डो बलवांश्च वानरः ॥ ५ ॥ दृष्टमन्तःपुरं सर्वं दृष्टा रावणयोषितः । न सीता दृश्यते साध्वी वृथा जातो मम श्रमः ॥ ६ ॥ किन्नु मां वानराः सर्वे गतं वक्ष्यन्ति सङ्गताः । गत्वा तत्र त्वया वीर किं कृतं तद्वदस्व नः । अदृष्ट्वा किं प्रवक्ष्यामि तामहं जनकात्मजाम् ॥ ७ ॥

महाननाः अतिविशालमुखाः । दीर्घाणि विरूपाणि दर्शनानि चक्षूंषि यासां ताः । राक्षसराजयोषितः रावणस्याज्ञाकारिणीः स्त्रियः ॥ ४ ॥ सीतामिति । पौरुषं शत्रुविषयपराक्रमम् । चिरं कालं विहृत्य अतिक्रम्येत्यर्थः । एवम्भूतस्य मे सुग्रीवसमीपगा तत्समीपगामिनी गतिः मार्गः नास्ति । सुग्रीवसमीप गतिः ममायोग्येत्यर्थः । तत्र हेतुमाह–सुतीक्ष्णेति । यत इति शेषः ॥ ५ ॥ ६ ॥ किंन्विति सामान्येन निर्वेदोक्तिः । विशेषतश्चाह–गत्वेति । इत्युक्त इति शेषः । वदस्व न इत्युक्तः किं प्रवक्ष्यामि । यद्वा किन्त्विति पाठः । पूर्ववदर्धत्रयमेकं वाक्यम् । किन्त्विति पूर्वस्माद्विशेषोक्तिः । मां वानराः वदस्व नः इति वक्ष्यन्ति तदा अदृष्ट्वा किं प्रवक्ष्यामीति योजना ॥ ७ ॥

ध्रुवं म्रियते ममारेति सम्बन्धः॥२॥ सेति । स्वशीलसंरक्षणं पातिव्रत्यसंरक्षणम् । प्रतिदुष्टकर्मणा अतिदुष्टकर्मणा । आर्यपथे सन्मार्गे ॥३॥ विरूपदर्शनाः विरूपाणि दर्शनानि चक्षूंषि दीर्घाश्च विरूपदर्शनाश्च तास्तथोक्ताः । राक्षसराजयोषितः रावणस्याज्ञाकारिणीः ॥ ४ ॥ सुग्रीवसमीपगा गतिः, गम्यत इति गतिर्मार्गः सुग्रीवसमीप सम्बन्धी मार्गो मे नास्ति, सुग्रीवसमीपं प्रति न गन्तव्यमिति भावः ॥ ५॥६॥ माऽस्तु तत्समीपगमनम्, जाम्बवदादिसमीपगमनमपि दुरन्तमित्याह–किन्त्विति । त्यादि ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तर्हि अत्रैव कालविलम्बः क्रियतां तत्राह–ध्रुवमिति । कालस्य व्यतिवर्तने अस्मदागमनकालेऽतीते प्रायमुपैष्यन्ति, जाम्बवत्प्रभृतय इति शेषः ॥ ८ ॥ सामान्येन निर्वेदं प्रतिवक्ति–किं वेति । समुद्रलङ्घनरूपं महत् कर्म कृतवन्तं मां ते किं वक्ष्यन्ति किमपि वक्ष्यन्ति । यद्वा मद्वृत्तान्तं प्रशंसन् जाम्बवान् तदुत्साहकोऽङ्गदस्तदुपश्रृण्वन्तोऽन्ये च मां किं वा जुगुप्सितं वक्ष्यन्ति । " किं पृच्छायां जुगुप्सने " इत्यमरः ॥ ९ ॥ रामानु०–किं मामिति ।

ध्रुवं प्रायमुपैष्यन्ति कालस्य व्यतिवर्तने ॥ ८ ॥ किं वा वक्ष्यति वृद्धश्च जाम्बवानङ्गदश्च सः । गतं पारं समुद्रस्य वानराश्च समागताः ॥९॥ अनिर्वेदः श्रियो मूलमनिर्वेदः परं सुखम् । अनिर्वेदो हि सततं सर्वार्थेषु प्रवर्तकः ॥१०॥ करोति सफलं जन्तोः कर्म यत्तत्करोति सः । तस्मादनिर्वेदकृतं यत्नं चेष्टेऽहमुत्तमम् ॥ ११ ॥ भूयस्तावद्विचेष्यामि देशान् रावणपालितान् । आपानशाला विचितास्तथा पुष्पगृहाणि च ॥ १२ ॥ चित्रशालाश्च विचिता भूयः क्रीडागृहाणि च । निष्कुटान्तररथ्याश्च विमानानि च सर्वशः॥१३॥ [भूयस्तत्र विचेष्यामि न यत्र विचयः कृतः ।]

समुद्रस्य पारं तीरं गतं मां वृद्धो जाम्बवान् किं वक्ष्यति जुगुप्सितं वक्ष्यति जन्मप्रभृति मत्पराक्रमकथनेन प्रशस्य प्रेषयित्वा जाम्बवान् मां प्रति जुगुप्सितवाक्यो भविष्यति । सोऽङ्गदश्च बिल प्रवेशनोद्योगान्मया विघटितोऽङ्गदश्च जुगुप्सितवाक्यो भविष्यति । समागता वानराश्च सर्वथा कृतकार्योऽहमेष्यामीति मदुक्त्या जनितविश्वासा वानराश्च जुगुप्सितवाक्या भविष्यन्तीत्यर्थः ॥९॥ चिरं निर्वेदे कार्यहानिः स्यादिति मत्वा अनिर्वेदमवलम्बते–अनिर्वेद इति । अनिर्वेद उत्साहः तत्कृतं तत्प्रयुक्तं यत्नम् । चेष्टे, करोमीत्यर्थः । यत्करोति जन्तुरिति सिद्धम् । जन्तोस्सम्बन्धि तत्सर्वं कर्म सः अनिर्वेद एव सफलं करोतीत्यन्वयः ॥ १० ॥ ११ ॥ आपानेति । एता विचिताः अथापि पुन र्विचेष्यामीत्यनुषज्यते ॥ १२ ॥ निष्कुटाः गृहारामाः, अन्तररथ्याः अवान्तरवीथ्यः ॥ १३ ॥

तद्वदस्त्र नः इत्युक्त इति शेषः । तामदृष्ट्वा किं प्रवक्ष्यामीति सम्बन्धः । न किमपि वक्तुं शक्यमित्यर्थः ॥ ७ ॥ तत्र हेतुमाह–ध्रुवमिति । सीता न दृष्टेति वचनं श्रुत्वा ध्रुवं प्रायोपवेशनेन प्राणांस्त्यक्ष्यन्तीत्यर्थः ॥ ८ ॥ हेत्वन्तरमाह–किमिति । समुद्रस्य पारं तीरं गतं मां जाम्बवान् किं कुत्सितं वक्ष्यति । सोऽङ्गदः किं कुत्सितं वक्ष्यति । समागताः सीतान्वेषणार्थमागताः किं कुत्सितं वक्ष्यन्तीत्यर्थः ॥ ९ ॥ एवं क्षणमात्रं निर्विद्य पुनरुत्साहमवलम्ब्याह–अनिर्वेद इत्यादिना । अनिर्वेदः अलम्बुद्धिराहित्यम्, उत्साह इत्यर्थः । अनिर्वेदकृतम् उत्साहप्रयुक्तम् ॥ १०–१२ ॥ निष्कुटाः गृहारामाः । तन्मध्यगाः वीथीश्च ॥ १३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भूमीगृहान् भूमीबिलगृहान् । चैत्यगृहान् चतुष्पथमण्डपान् । गृहातिगृहकान् गृहानतीत्य दूरे स्वैरविहारार्थं निर्मितान् गृहान् ॥ १४ ॥ उत्पतन्निपतन् पूर्वमुच्चस्थानान्याधिरुह्य ततोऽवरोहन् । अवघाटयन् पाटयन् ॥ १५ ॥ निष्पतन् निर्गच्छन् । प्रपतन्नुत्पतन् बिलगृहादीनि नीचस्थानानि प्रथम

इति संचिन्त्य भूयोऽपि विचेतुमुपचक्रमे । भूमीगृहांश्चैत्यगृहान् गृहातिगृहकानपि ॥ १४ ॥ उत्पतन्निपतंश्चापि तिष्ठन् गच्छन् पुनः पुनः । अपावृण्वंश्च द्वाराणि कपाटान्यवघाटयन् ॥ १५ ॥ प्रविशन्निष्पतंश्चापि प्रपतन्नुत्पतन्नपि । सर्वमप्यवकाशं स विचचार महाकपिः ॥ १६ ॥ चतुरङ्गुलमात्रोऽपि नावकाशः स विद्यते । रावणान्तःपुरे तस्मिन् यं कपिर्न जगाम सः ॥ १७ ॥ प्राकारान्तररथ्याश्च वेदिकाश्चैत्यसंश्रयाः । दीर्घिकाः पुष्करिण्यश्च सर्वं तेनावलोकितम् ॥ १८ ॥ राक्षस्यो विविधाकारा विरूपा विकृतास्तथा । दृष्टा हनुमता तत्र न तु सा जनकात्मजा ॥ १९ ॥ रूपेणाप्रतिमा लोके वरा विद्याधरस्त्रियः । दृष्टा हनुमता तत्र न तु राघवनन्दिनी ॥ २० ॥ नागकन्या वरारोहाः पूर्णचन्द्रनिभाननाः । दृष्टा हनुमता तत्र न तु सीता सुमध्यमा ॥ २१ ॥ प्रमथ्य राक्षसेन्द्रेण नागकन्या बलाद्धृताः । दृष्टा हनुमता तत्र न सा जनकनन्दिनी ॥ २२ ॥ सोऽपश्यंस्तां महाबाहुः पश्यंश्चान्या वरस्त्रियः । विषसाद मुहुर्धीमान् हनुमान् मारुतात्मजः ॥ २३ ॥

मधिरुह्य ततः समुद्गच्छन्॥१६॥१७॥ प्राकारान्तररथ्याः प्राकारमध्यवर्तिवीथ्यः । वेदिकाश्चैत्यसंश्रयाः चैत्यवृक्षमूलपीठिकाबन्धाः ॥१८–२१॥ प्रमथ्य

भूमीगृहान् भूबिलगृहान् । चैत्यगृहान् बुद्धायतनानि । गृहातिगृहकानपि गृहानतीत्य अनतिदूरे स्वैरविहारार्थं निर्मितगृहान्॥१४॥ उत्पतन् उन्नतमारुहन् । निपतन् ततोऽवरोहन् । निष्पतन् निष्क्रामन् । बिलगृहेष्ववतरन् । उत्पतन पुनस्तेभ्य उद्गच्छन् ॥ १५–१७ ॥ प्राकारान्तररथ्याः प्राकारान्तरमध्यवर्तिमन्त्रिकुमारादिगृहवीथ्यः । वेदिकाश्चैत्यसंश्रयाः चतुष्पथवर्तिवृक्षाधारभूतवेदिकाः ॥ १८ ॥ १९ ॥ राघवनन्दिनी रामप्रिया ॥ २० ॥ २१ ॥ प्रमथ्य नागकन्या बलाद्धृता इत्यनेन बन्दीकृतानां

स०–भूमीगृहान् भूविवरस्थगृहान् । चैत्यगृहान् देवायतनानि ॥ १४ ॥ अपावृण्वन् अपगतावरणानि कुर्वन् ॥ १५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रसह्य । बलाद्धृता नागकन्या इत्यभिधानादत्र बन्दीकृतानां ग्रहणम् । पूर्वश्लोके ऊढानां नागकन्यानामित्यपुनरुक्तिः ॥ २२–२५ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्वादशः सर्गः ॥ १२ ॥ विमानादित्यादि । इदानीं विमानादव तरणोक्त्या मध्ये विमानमधिरूढ इत्यवगम्यते । वेगवत्त्वे दृष्टान्तमाह–विद्युदिति ॥ १ ॥ सम्परिक्रम्येति । संपरिक्रम्य, प्राकारमिति शेषः ।

उद्योगं वानरेन्द्राणां प्लवनं सागरस्य च । व्यर्थं वीक्ष्यानिलसुतश्चिन्तां पुनरुपागमत् ॥२४॥ अवतीर्य विमानाच्च हनुमान् मारुतात्मजः । चिन्तामुपजगामाथ शोकोपहतचेतनः ॥२५॥ इत्यार्षे० श्रीमत्सुन्दरकाण्डे द्वादशः सर्गः ॥ १२

विमानात्तु सुसंक्रम्य प्राकारं हरियूथपः । हनुमान् वेगवानासीद्यथा विद्युद् घनान्तरे ॥ १ ॥ संपरिक्रम्य हनुमान् रावणस्य निवेशनात् । अदृष्ट्वा जानकीं सीतामब्रवीद्वचनं कपिः ॥ २ ॥ भूयिष्ठं लोलिता लङ्का रामस्य चरता प्रियम् । न हि पश्यामि वैदेहीं सीतां सर्वाङ्गशोभनाम् ॥ ३ ॥ पल्वलानि तटाकानि सरांसि सरितस्तथा । नद्योऽनूपवनान्ताश्च दुर्गाश्च धरणीधराः । लोलिता वसुधा सर्वा न तु पश्यामि जानकीम् ॥४॥ इह सम्पातिना सीता रावणस्य निवेशने । आख्याता गृध्रराजेन न च पश्यामि तामहम् ॥ ५ ॥ किन्नु सीताऽथ वैदेही मैथिली जनकात्मजा । उपतिष्ठेत विवशा रावणं दुष्टचारित्रम् ॥ ६ ॥

अब्रवीत्, स्वयमिति शेषः ॥ २ ॥ लोलिता बहुशोऽन्विष्टेत्यर्थः ॥ ३ ॥ सरितः क्षुद्रनद्यः । अनूपवनान्ताः जलप्रायवनप्रदेशाः ॥ ४ ॥ ५ ॥ किंन्विति । सीता अयोनिजा । वैदेही जन्मभूमिप्रयुक्तातिशयवती । मैथिली आचारप्रधानकुलोत्कर्षवती । अथशब्दस्समुच्चये । एवंभूता जनकात्मजा ग्रहणम् । पूर्वं तूढानां नागकन्यानाम् अतो न पुनरुक्तिः ॥ २२–२४ ॥ अवतीर्य विमानाच्चेति पुनरारुह्यावरुह्य चेत्यर्थः । विमान एवैतत्सर्वदर्शनमिति तत्त्वम् ॥२५॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां द्वादशः सर्गः ॥ १२ ॥ विमानादिति । स वेगवान् हनुमान् विमानात् प्राकारं संक्रम्य घनान्तरे विद्युदिवासीदित्यन्वयः । अनेनौपम्येन प्राकार इन्द्रनीलकृत इत्यवगम्यते ॥ १ ॥ निवेशनात्संपरिक्रम्य, प्राकारमिति शेषः ॥ २ ॥ भूयिष्ठं लोलिता बहुशोऽन्विष्टेत्यर्थः ॥ ३ ॥ सरितः क्षुद्रनद्यः । अनूपवनान्ताः जलप्रचुरप्रदेशाः ॥ ४ ॥ नन्वनुपलब्धिप्रमाणादभावनिश्चय एवास्त्वित्यत आह–इहेति । रावणनिवेशन एवाख्याता तद्वचश्च प्रमाणम् न तु दृश्यतेऽत्र किमिदमिति ॥ ५ ॥ किंन्विति । सीतेत्यनेन अयोनिजत्वप्रयुक्तं वैशिष्ट्यं द्योत्यते । अथशब्द

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दुष्टचारिणं रावणं विवशा कामपरवशा सती उपतिष्ठेत किंनु ? नेत्यर्थः ॥ ६ ॥ रामानु०–किंन्विति । सीतेत्यनेन अयोनिजत्वप्रयुक्तवैशिष्ट्यं द्योत्यते । अयशब्दार्थो गुणसमुच्चयः । वैदेहीत्यनेन देशसंबन्धकृतवैशिष्ट्यम्, मैथिलीत्यनेन सदाचारयुक्तसत्पुरुषवासभूतनगरसंबन्धकृतवैशिष्ट्यम्, जनकात्मजेत्यनेन " कर्मणैव हि संसिद्धिमास्थिता जनकादयः " इति प्रसिद्धजनकसंबन्धकृतवैशिष्ट्यम् । एवंगुणविशिष्टा देवी दुष्टचारिणं रावणम् उपतिष्ठेत किन्नु मित्रत्वेन प्राप्नुयात्किंनु ? न प्राप्नुयादेवेत्यर्थः । " उपाद्देवपूजासङ्गतिकरण मित्रकरणपथिष्विति वक्तव्यम् " इत्यात्मनेपदम् ॥ ६ ॥ अथास्या अदर्शने हेतूनुत्प्रेक्षते–क्षिप्रमित्यादिना । रामबाणानां रामबाणेभ्यः ॥ ७ ॥ अथवेति ।

क्षिप्रमुत्पततो मन्ये सीतामादाय रक्षसः । बिभ्यतो रामबाणानामन्तरा पतिता भवेत् ॥ ७ ॥ अथवा ह्रियमाणायाः पथि सिद्धनिषेविते । मन्ये पतितमार्याया हृदयं प्रेक्ष्य सागरम् ॥ ८ ॥ रावणस्योरुवेगेन भुजाभ्यां पीडितेन च । तया मन्ये विशालाक्ष्या त्यक्तं जीवितमार्यया ॥ ९ ॥ उपर्युपरि वा नूनं सागरं क्रमतस्तथा । विवेष्टमाना पतिता समुद्रे जनकात्मजा ॥ १० ॥ अहो क्षुद्रेण वाऽनेन रक्षन्ती शीलमात्मनः । अबन्धुर्भक्षिता सीता रावणेन तपस्विनी ॥ ११ ॥ अथवा राक्षसेन्द्रस्य पत्नीभिरसितेक्षणा । अदुष्टा दुष्टभावाभिर्भक्षिता सा भविष्यति ॥ १२ ॥

सागरं प्रेक्ष्य भीतं हृदयं सागरे पतितमिति मन्ये । हृदयस्य भयस्थानत्वेन तन्मूलतया तच्छरीरं लक्ष्यते ॥ ८ ॥ पीडितेन पीडनेन ॥ ९ ॥ उपर्युपरि सागरं सागरस्य सन्निहितोपरिप्रदेशे । " उपर्यध्यधसस्सामीप्ये " इति द्विर्वचनम् । " धिगुपर्यादिषु त्रिषु " इति द्वितीया ॥ १० ॥ अहो इति खेदे ॥ ११ ॥ दुष्टभावाभिः सापत्न्यप्रयुक्तक्रोधाभिः ॥ १२ ॥ १३ ॥

श्चार्थो गुणसमुच्चयपरः । वैदेहीत्यनेन देशसम्बन्धकृतवैशिष्ट्यम्, मैथिलीत्यनेन सदाचारयुक्तसत्पुरुषावासनगरसम्बन्धनिबन्धनवैशिष्ट्यम्, जनकात्मजेत्यनेन 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' इति प्रसिद्धजनकसम्बन्धकृतवैशिष्ट्यम् । एवङ्गुणविशिष्टा देवी दुष्टचारिणं रावणमुपतिष्ठेत किन्नु मित्रत्वेन प्राप्नुयात्किन्नु ? न प्राप्नुयादेवेत्यर्थः ॥ ६ ॥ अदर्शने हेतूनाह–क्षिप्रमित्यादिना । रामबाणानां बाणेभ्यः ॥ ७ ॥ रामपरोक्षं तथा भयायोगात्पक्षान्तरम्–अथवेति । हृदयं पतितं मन उत्क्रान्तम्, मनउत्क्रमणस्यैव मरणत्वात् ॥ ८ ॥ पीडितेन पीडनेन ॥ ९–१४ ॥

स०–क्षिप्रमिति । यद्यपि सम्पातिना लङ्कायां सीताऽस्तीत्यभिधानादेवमाद्युत्प्रेक्षा न शक्या कर्तुम् । तथापि सम्पात्युक्तरीत्याऽन्वेषणेऽपि यतो न दृश्यते अतस्तद्वचनमेव विचारणीयमिति मतिमतो हनुमतः सा युक्तेति ज्ञेयम् ॥ ७ ॥ अबन्धुः असन्निहितबन्धुः ॥ ११ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हा रामेति । न्यस्तदेहा त्यक्तदेहा । भविष्यति भवेदित्यर्थः ॥ १४ ॥ निहिता भूगृहादौ गूढं स्थापिता । लालप्यते मुहुर्मुहुः प्रलपति ॥ १५ ॥ एवं निरुद्ध्यमानापि सीता रावणस्य वशं न व्रजेदित्याह–जनकस्येति । कथं व्रजेत् ? न व्रजेदेवेत्यर्थः ॥ १६ ॥ ननु किं चिन्तया, गत्वा यथावृत्तं निवेद्यतामित्याशङ्क्य तदनुचितमित्याह–विनष्टेति । विनष्टा भूगृहादौ स्थापनेनादर्शनं गता । " णश अदर्शने " इति धातोर्निष्ठा । प्रनष्टा

सम्पूर्णचन्द्रप्रतिमं पद्मपत्रनिभेक्षणम् । रामस्य ध्यायती वक्त्रं पञ्चत्व कृपणा गता ॥ १३ ॥ हा राम लक्ष्मणेत्येवं हाऽयोध्ये चेति मैथिली । विलप्य बहु वैदेही न्यस्तदेहा भविष्यति ॥ १४ ॥ अथवा निहिता मन्ये रावणस्य निवेशने । नूनं लालप्यते सीता पञ्जरस्थेव शारिका ॥ १५ ॥ जनकस्य सुता सीता रामपत्नी सुमध्यमा । कथमुत्पलपत्राक्षी रावणस्य वशं व्रजेत् ॥ १६ ॥ विनष्टा वा प्र(ण)नष्टा वा मृता वा जनकात्मजा । रामस्य प्रियभार्यस्य न निवेदयितुं क्षमम् ॥ १७ ॥ निवेद्यमाने दोषः स्याद्दोषः स्यादनिवेदने । कथन्नु खलु कर्तव्यं विषमं प्रतिभाति मे ॥ १८ ॥ अस्मिन्नेवं गते कार्ये प्राप्तकालं क्षमं च किम् । भवेदिति मतं भूयो हनुमान् प्रविचारयत् ॥ १९ ॥ यदि सीतामदृष्ट्वाऽहं वानरेन्द्रपुरीमितः । गमिष्यामि ततः को मे पुरुषार्थो भविष्यति ॥ २० ॥

समुद्रपतनादिना त्यक्तजीविता । (" उपसर्गादसमासेपि णोपदेशस्य " इति णत्वम् ।) मृता रामविरहदुःखासहिष्णुतया स्वयं मृता ॥ १७ ॥ निवेद्यमाने वक्ष्यमाणो दोषः स्यात् । दोषः स्यादनिवेदने यथावृत्तानिवेदने स्वामिवञ्चनदोषः स्यात् । विषमं परस्परविरुद्धम् ॥ १८ ॥ अस्मिन्निति । हनुमान् अस्मिन्कार्ये एवं गते एवं विषमत्वं प्राप्ते सति । किं प्राप्तकालं कालोचितं क्षमं समर्थं च भवेदिति मतं पक्षम् । भूयः प्रविचारयत् ॥ १९ ॥ २० ॥

निहितां भूगृहादौ स्थापितां मन्ये ॥ १५ ॥ एवं पीड्यमानापि सीता रावणस्य वशं न व्रजेदित्याह–जनकस्येति ॥ १६ ॥ ननु किमेतादृशविचारेण ? गत्वा यथावृत्तं निवेद्यतामित्यत आह–विनष्टेत्यादि । दृश्यदेशे मायया अदर्शनं विनाशः, अदृश्यदेशे अवस्थानं प्रणाशः । रामविश्लेषजनितदुःखेन स्वयं मृता वा ॥ १७ ॥ दोषो वक्ष्यमाणः, अनिवेदने यथावृत्तान्ताकथने दोषः स्वामिवञ्चनकरणरूपः स्यात् ॥ १८ ॥ अस्मिन्निति । प्राप्तकालं कालोचितम् । क्षमं समर्थं किं

स०–रिपुभिर्योधयितुं शक्यो योध्यः । स न भवतीत्ययोध्यः, तस्य सम्बुद्धिः । हाऽयोध्येत्युपपन्नम् । (हाऽयोध्येति च इति पाठो भवितुमर्हति) ॥ १४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पुरुषार्थाभावमाह—ममेदमिति ॥ २१ ॥ २२ ॥ निवेद्यमाने दोषः स्यादित्येतदुपपादयति—गत्वेत्यादिना । अप्रियमिति च्छेदः ॥ २३ ॥ परुषं श्रवण

ममेदं लङ्घनं व्यर्थं सागरस्य भविष्यति । प्रवेशश्चैव लङ्कायां राक्षसानां च दर्शनम् ॥ २१ ॥ किं मां वक्ष्यति सुग्रीवो हरयो वा समागताः । किष्किन्धां समनुप्राप्तं तौ वा दशरथात्मजौ ॥ २२ ॥ गत्वा तु यदि काकुत्स्थं वक्ष्यामि परमप्रियम् । न दृष्टेति मया सीता ततस्त्यक्ष्यति जीवितम् ॥ २३ ॥ परुषं दारुणं क्रूरं तीक्ष्णमिन्द्रिय तापनम् । सीतानिमित्तं दुर्वाक्यं श्रुत्वा स न भविष्यति● ॥ २४ ॥ तं तु कृच्छ्रगतं दृष्ट्वा पञ्चत्वगतमानसम् । भृशानुरक्तो मेधावी न भविष्यति लक्ष्मणः ॥ २५ ॥ विनष्टौ भ्रातरौ श्रुत्वा भरतोऽपि मरिष्यति । भरतं च मृतं दृष्ट्वा शत्रुघ्नो न भविष्यति ॥ २६ ॥ पुत्रान् मृतान् समीक्ष्याथ न भविष्यन्ति मातरः । कौसल्या च सुमित्रा च कैकेयी च न संशयः ॥ २७ ॥ कृतज्ञः सत्यसन्धश्च सुग्रीवः प्लवगाधिपः । रामं तथागतं दृष्ट्वा ततस्त्यक्ष्यति जीवितम् ॥ २८ ॥ दुर्मना व्यथिता दीना निरानन्दा तपस्विनी । पीडिता भर्तृशोकेन रुमा त्यक्ष्यति जीवितम् ॥ २९ ॥ वालिजेन तु दुःखेन पीडिता शोककर्शिता । पञ्चत्वं च गते राज्ञि तारापि न भविष्यति ॥ ३० ॥ माता पित्रोर्विनाशेन सुग्रीवव्यसनेन च । कुमारोऽप्यङ्गदः कस्माद्धारयिष्यति जीवितम् ॥ ३१ ॥

कटुकम् । दारुणं भयंकरम् । क्रूरम् उग्रम् । तीक्ष्णम् असह्यम् । इन्द्रियतापनम् इन्द्रियक्षोभकम् । सीतानिमित्तं सीताविषयम् ॥ २४ ॥ तं त्विति ।

भवेत् इति मतं पक्षं भूयः प्रविचारयत् प्रव्यचारयत् ॥ १९–२३ ॥ परुषं कर्णकठोरम् । दारुणं भयङ्करम् । क्रूरमुग्रम् । तीक्ष्णमसह्यम् । इन्द्रियतापनम् इन्द्रिय क्षोभकम् । स रामः ॥ २४ ॥ पञ्चत्वगतमानसं मरणे कृतनिश्चयम् ॥ २९–३३ ॥

● स०—सत्यसन्धः प्रागिति शेषः । यद्वा मनसा सीतां सम्बोध्य वदति—सतीति । असन्धः अनिष्पन्नस्वप्रतिज्ञः । अथवा अनुवादेन सीताया अनानयने प्राणांस्त्यक्ष्यामीति वाद ऊह्यः । ततश्च सत्यसन्ध इति यथावस्थितमन्वेति ॥ २८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पञ्चत्वगतमानसं मरणे कृतनिश्चयम् ॥ २५–३२ ॥ सान्त्वेनेति । मानेन प्रत्युत्थानादिना ॥ ३३ ॥ न वनेष्विति । निरोधेषु गृहादिसंवृत प्रदेशेषु ॥३४॥३५॥ विषमिति । प्रचरिष्यन्ति करिष्यन्तीत्यर्थः । शस्त्रं शस्त्रपतनम् ॥ ३६ ॥ घोरमिति । आरोदनम् आ समन्ताद्रोदनम् ॥ ३७–३९ ॥

भर्तृजेन तु दुःखेन ह्यभिभूता वनौकसः । शिरांस्यभिहनिष्यन्ति तलैर्मुष्टिभिरेव च ॥ ३२ ॥ सान्त्वेनानुप्रदानेन मानेन च यशस्विना । लालिताः कपिराजेन प्राणांस्त्यक्ष्यन्ति वानराः ॥ ३३ ॥ न वनेषु न शैलेषु न निरोधेषु वा पुनः । क्रीडामनुभविष्यन्ति समेत्य कपिकुञ्जराः ॥ ३४ ॥ सपुत्रदाराः सामात्या भर्तृव्यसनपीडिताः । शैलाग्रेभ्यः पतिष्यन्ति समेत्य विषमेषु च ॥ ३५ ॥ विषमुद्बन्धनं वापि प्रवेशं ज्वलनस्य वा । उपवासमथो शस्त्रं प्रचरिष्यन्ति वानराः ॥ ३६ ॥ घोरमारोदनं मन्ये गते मयि भविष्यति । इक्ष्वाकुकुलनाशश्च नाशश्चैव वनौकसाम् ॥ ३७ ॥ सोऽहं नैव गमिष्यामि किष्किन्धां नगरीमितः । न च शक्ष्याम्यहं द्रष्टुं सुग्रीवं मैथिलीं विना ॥३८॥ मय्य गच्छति चेहस्थे धर्मात्मानौ महारथौ । आशया तौ धरिष्येते वानराश्च मनस्विनः ॥ ३९ ॥ हस्तादानो मुखादानो नियतो वृक्षमूलिकः । वानप्रस्थो भविष्यामि ह्यदृष्ट्वा जनकात्मजाम् ॥ ४० ॥ सागरानूपजे देशे बहुमूलफलोदके । चितां कृत्वा प्रवेक्ष्यामि समिद्धमरणीसुतम् ॥ ४१ ॥ उपविष्टस्य वा सम्यग् लिङ्गिनीं साधयिष्यतः । शरीरं भक्षयिष्यन्ति वायसाः श्वापदानि च ॥ ४२ ॥

हस्तेति । हस्तादानः हस्तपतितभोजी । मुखादानः मुखपतितभोजी । वृक्षमूलिकः वृक्षमूलवासी ॥ ४० ॥ सागरानूपज इति । बहुमूलफलोदक इति स्वरूपकथनम् । अरणीसुतम् अरण्युत्पन्नम् ॥ ४१ ॥ उपविष्टस्य प्रायोपविष्टस्य । लिङ्गिनीम्, लिङ्गं संन्यासः अनशनं तद्वती लिङ्गिनी ताम् साध

नेति । निरोधेषु गृहादिसंवृतप्रदेशेषु ॥३४–३८॥धरिष्यति, प्राणानिति शेषः॥३९॥ हस्तादानः हस्तपतितफलपर्णाद्याशी । मुखादानः मुखपतितभोजी । वृक्षमूलिकः वृक्षमूलवासी ॥ ४० ॥ अरणीसुतम् अग्निम् ॥ ४१ ॥ उपविष्टस्य प्रायोपविष्टस्य । लिङ्गिनं लिङ्गं शरीरमस्यास्तीति लिङ्गी तम्, आत्मानमित्यर्थः । साधयिष्यतः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यिष्यतः। लिङ्गिनमिति क्वचित्पाठः। तत्र लिङ्गं शरीरं तद्वान् लिङ्गी आत्मा तं साधयिष्यतः, शरीरादात्मानं मोचयिष्यत इत्यर्थः। श्वापदानि श्वापदाः व्याघ्रादयः ॥ ४२ ॥ न चैवमात्मत्यागे दोष इत्याह–इदमिति। निर्याणं मरणम्। आपः अपः ॥ ४३ ॥ सुजातेति। सुजातमूला आदौ लङ्काधिदेवता

इदं महर्षिभिर्दृष्टं निर्याणमिति मे मतिः। सम्यगापः प्रवेक्ष्यामि न चेत्पश्यामि जानकीम् ॥४३॥ सुजातमूला सुभगा कीर्तिमाला यशस्विनी। प्रभग्ना चिररात्रीयं मम सीतामपश्यतः ॥ ४४ ॥ तापसो वा भविष्यामि नियतो वृक्ष मूलिकः। नेतः प्रतिगमिष्यामि तामदृष्ट्वाऽसितेक्षणाम् ॥ ४५ ॥ यदीतः प्रतिगच्छामि सीतामनधिगम्य ताम्। अङ्गदः सह तैः सर्वैर्वानरैर्न भविष्यति ॥ ४६ ॥ विनाशे बहवो दोषा जीवन् भद्राणि पश्यति। तस्मात्प्राणान् धरिष्यामि ध्रुवो जीवितसङ्गमः ॥ ४७ ॥ एवं बहुविधं दुःखं मनसा धारयन् मुहुः। नाध्यगच्छत्तदा पारं शोकस्य कपिकुञ्जरः ॥ ४८ ॥ रावणं वा वधिष्यामि दशग्रीवं महाबलम्। काममस्तु हृता सीता प्रत्याचीर्णं भविष्यति ॥४९॥

जयेन शोभनप्रारम्भा। सुभगा चन्द्रोदयेन रम्या। कीर्तिमाला मम कीर्तिमयमाला। यशस्विनी हनुमतो लङ्काप्रवेशरात्रिरिति लोके विख्याता। चिररात्री जागरणेन दीर्घभूता रात्रिः। प्रभग्ना समाप्ता। एवं कल्याणीयं रात्रिः सीतामपश्यतो मे व्यर्थैव जातेत्यर्थः। "कृदिकारादक्तिनः" इति दीर्घः ॥ ४४ ॥ आत्मत्यागापेक्षया तापसभाव एव ज्यायानित्याह–तापस इति। वाशब्दोऽवधारणे। "वा स्याद्विकल्पोपमयोरेवार्थे च समुच्चये" इति विश्वः ॥४५॥ मा भूत् सुग्रीवसमीपगमनम्। अङ्गदादिभिस्संयुज्यतामित्याशङ्क्याह–यदीत इति ॥ ४६ ॥ विनाश इति। बहवो दोषाः पूर्वोक्तास्सर्वविनाशादयः। संगमः श्रेय स्संगमः ॥ ४७ ॥४८॥ रावणमिति। प्रत्याचीर्णं प्रत्याचरितम्, प्रतिकृतमिति यावत् ॥ ४९ ॥ रामानु०–रावणमिति। वाशब्दोऽवधारणे। हृता सीता काममस्तु यथा

शरीरान्मोचयिष्यतः। श्वापदानि श्वापदाः व्याघ्रादयः ॥ ४२ ॥ न चात्महत्यादोषोऽपीत्याह–इदमिति। निर्याणं मरणम्। आपः अपः ॥ ४३ ॥ सुजातमूला आदित आरभ्य सीतान्वेषणोपयुक्ततया शोभनमूला। सुभगा सीतान्वेषणसौकर्यापादकचन्द्रिकया मनोहरा। कीर्तिमाला कीर्तनं कीर्तिः सीतान्वेषणसहकारि णीति सर्वैः क्रियमाणा कीर्तिरेव माला यस्यास्सा। यशस्विनी हनुमल्लङ्काप्रवेशरात्रिरिति ख्यातिमती। चिररात्रिः चिरकालविशिष्टरात्रिः, दीर्घरात्रिरिति यावत्। अनेन रामकार्यसहायेच्छया रात्रिरपि वर्द्धितवतीत्यवगम्यते। सीतामपश्यतो मम प्रभग्ना निष्फला जातेत्यर्थः ॥ ४४ ॥ पूर्वोक्तयोः तापसपक्षमरणपक्षयोः प्रथमं पक्षमवलम्ब्याह–तापस इत्यादिना ॥ ४५ ॥ ४६ ॥ विनाश इति। जीवितसङ्गमः जीविते सङ्गमः श्रेयस्सङ्गमः ध्रुवः ॥ ४७ ॥ ४८ ॥ किं दैन्येन? विक्रमिष्यामी

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तथा वा भवतु । रावणं वधिष्याम्येव । वधेन किं भविष्यतीत्यत्राह । प्रत्याचीर्णं भविष्यतीति । प्रत्याचीर्णं प्रत्याचरणम्, वैरनिर्यातनमिति यावत् ॥ ४९ ॥ पशुं पशुपतेरिवेति । पशुपतेः अग्नेः पशुम् अजमिव । "इमं पशुं पशुपते ते अद्य बध्नाम्यग्ने" इति श्रुतेः । अनेन सुप्रापत्वमुक्तम् ॥५०॥ इतीति । प्रथमं चिन्ताविचारः । ततो

अथवैनं समुत्क्षिप्य उपर्युपरि सागरम् । रामायोपहरिष्यामि पशुं पशुपतेरिव ॥ ५० ॥ इति चिन्तां समापन्नः सीतामनधिगम्य ताम् । ध्यानशोकपरीतात्मा चिन्तयामास वानरः ॥ ५१ ॥ यावत्सीतां हि पश्यामि रामपत्नीं यशस्विनीम् । तावदेतां पुरीं लङ्कां विचिनोमि पुनः पुनः ॥ ५२ ॥ संपातिवचनाच्चापि रामं यद्यानयाम्यहम् । अपश्यन् राघवो भार्यां निर्दहेत् सर्ववानरान् ॥ ५३ ॥ इहैव नियताहारो वत्स्यामि नियतेन्द्रियः । न मत्कृते विनश्येयुः सर्वे ते नरवानराः ॥ ५४ ॥ अशोकवनिका चेयं दृश्यते या महाद्रुमा । इमामधिगमिष्यामि न हीयं विचिता मया ॥ ५५ ॥ वसून् रुद्रांस्तथाऽऽदित्यानश्विनौ मरुतोऽपि च । नमस्कृत्वा गमिष्यामि रक्षसां शोकवर्धनः ॥ ५६ ॥ जित्वा तु राक्षसान् सर्वानिक्ष्वाकुकुलनन्दिनीम् । संप्रदास्यामि रामाय यथा सिद्धिं तपस्विने ॥ ५७ ॥ स मुहूर्तमिव ध्यात्वा चिन्तावग्रथितेन्द्रियः । उदतिष्ठन्महातेजा हनूमान् मारुतात्मजः ॥ ५८ ॥ नमोऽस्तु रामाय सलक्ष्मणाय देव्यै च तस्यै जनकात्मजायै । नमोऽस्तु रुद्रेन्द्रयमानिलेभ्यो नमोऽस्तु चन्द्रार्कमरुद्गणेभ्यः ॥ ५९ ॥

ध्यानं ज्ञातव्यविषयनिरन्तरप्रत्ययः । ततश्चिन्तेति दुरन्तचिन्तोच्यते ॥ ५१ ॥ चिन्ताप्रकारमाह—यावदिति ॥ ५२ ॥ यदि पूर्वमेव संपातिवचनप्रामाण्येन रामोऽत्रानीयेत तदा महान् प्रमादः स्यादित्याह—संपातीति ॥५३–५६॥ सिद्धिं तपःफलम् ॥५७॥५८॥ "सर्वान् देवान्नमस्यन्ति रामस्यार्थे यशस्विनः"

त्याह—रावणमिति । हता सीता काममस्तु यथा तथा वा भवतु रावणं वधिष्याम्येव, तेन किं ? प्रत्याचीर्णं प्रत्याचरणम्, वैरनिर्यातनमिति यावत् ॥४९–५१॥ चिन्ता प्रकारमेवाह—यावदिति । पश्यामि विचिनोमीति च लट् भविष्यदर्थे ॥ ५२ ॥ सीतामदृष्ट्वैव सम्पातिवचनाद्रामस्समानीयेत तदा महाननर्थो भवेदित्याह—सम्पा तीति ॥ ५३ ॥ इहेति । विनश्येयुः सीतामदृष्ट्वा तत्र मद्गमनानन्तरमिति भावः ॥ ५४–५६ ॥ जित्वेति । सिद्धिमिव तपःफलमिव ॥ ५७ ॥ चिन्ताविग्रथितेन्द्रियः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इत्युक्तरीत्या अभिमतलाभत्वरया सर्वान्नमस्करोति--नमोऽस्त्विति ॥ ५९ ॥ स तेभ्यस्त्वित्यादिश्लोकद्वयमेकान्वयम् । नमस्कृत्यालोकनरूपक्रिया भेदात्तच्छब्दद्वयम् । नमस्कृत्य अशोकवनिकां प्रति उद्दिश्य सर्वा दिशस्समालोक्य अशोकवनिकां परिच्छेत्तुं तस्यास्सर्वा दिशो दृष्ट्वा तां स मनसा

स तेभ्यस्तु नमस्कृत्य सुग्रीवाय च मारुतिः। दिशः सर्वाः समालोक्य ह्यशोकवनिकां प्रति ॥ ६० ॥ स गत्वा मनसा पूर्वमशोकवनिकां शुभाम्। उत्तरं चिन्तयामास वानरो मारुतात्मजः ॥ ६१ ॥ ध्रुवं तु रक्षोबहुला भविष्यति वनाकुला। अशोकवनिका चिन्त्या सर्वसंस्कारसंस्कृता॥६२॥रक्षिणश्चात्र विहिता नूनं रक्षन्ति पादपान्। भगवानपि सर्वात्मा नातिक्षोभं प्रवाति वै ॥ ६३ ॥ संक्षिप्तोऽयं मयाऽऽत्मा च रामार्थे रावणस्य च । सिद्धिं मे संविधास्यन्ति देवाः सर्षिगणास्त्विह ॥ ६४ ॥

त्वा उत्तरं चिन्तयामासेति योजना। अशोकशब्दः संक्षेपे व्याख्यातः ॥ ६० ॥ ६१ ॥ ध्रुवमिति। रक्षोबहुला रक्षकराक्षसबहुला । वनाकुला जला वृता द्रुमषण्डमण्डिता वा। सर्वसंस्कारैः कर्पणतृणनिरसनादिभिः संस्कृता कृतातिशयाधाना अशोकवनिका ध्रुवं चिन्त्या भविष्यति । अवश्यमन्वेषणीया भवेदित्यर्थः ॥ ६२ ॥ रक्षिण इति । अत्र अशोकवनिकायाम् । विहिताः नियुक्ताः । सर्वात्मा सर्वमाप्नोतीति सर्वात्मा वायुः । सोपि नातिक्षोभं प्रवाति । अतिकम्पनपूर्वकं नात्र सञ्चरतीत्यथः ॥ ६३ ॥ एवंभूतप्रदेशे भवतः कथं गमनमित्याशङ्क्याह--संक्षिप्त इति । मया अयमात्मा देहः । रामार्थे रामप्रयोजनसिद्ध्यर्थम् । रावणस्य चार्थे रावणादृश्यत्वार्थं च संक्षिप्तः अल्पीकृतः। एवं मया कार्यानुकूलो यत्नः कृतः, कार्यसिद्धिं तु देवा विधास्यन्ती

व्याकुलेन्द्रियः ॥ ५८ ॥ ५९ ॥ सुग्रीवाय चेत्यत्र नमश्चक्र इति करोतेर्विपरिणामः । अशोकवनिकां गतः, मनसेति शेषः । अशोकवनिकां प्रतीति पाठे--समालोक्य दित्यालोकयतेर्विपरिणामः । अन्यथा तच्छब्दोऽतिरिच्यते ॥ ६० ॥ मनसा गत्वा, गन्तुं निश्चित्येत्यर्थः । उत्तरम् उत्तरकर्तव्यम् । वनाकुला काननावृता ॥ ६१ ॥ ॥ ६२ ॥ रक्षिण इति । अत्र अशोकवनिकायाम् । निहिताः नियुक्ताः । सर्वात्मा वायुः ॥ ६३ ॥ संक्षिप्त इति । रामार्थे रावणस्य चेति गूढवृत्त्या सीतादर्शनस्या काङ्क्षितत्वात रावणदर्शनपरिहारार्थत्वाच्चोभयार्थत्वम् ॥ ६४-६६॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्याह--सिद्धिमिति । संविधास्यन्ति ददत्वित्यर्थः ॥ ६४ ॥ ब्रह्मेत्यादि । शर्वः रुद्रः ॥ ६५ ॥ ६६ ॥ उक्तमर्थं पुनः संग्रहेणाह--सिद्धिं सर्वाणि भूतानीति । भूतानां प्रभुः उक्तब्रह्मरुद्राद्यधिपतिः, परिशेषाद्विष्णुरित्यवगम्यते । पन्थाः गोचरः येषां ते पथिगोचराः मार्गवर्तिनः ॥ ६७ ॥ तदिति । तत्तस्मात्

ब्रह्मा स्वयम्भूर्भगवान् देवाश्चैव दिशन्तु मे । सिद्धिमग्निश्च वायुश्च पुरुहूतश्च वज्रभृत् ॥ ६५ ॥ वरुणः पाशहस्तश्च सोमादित्यौ तथैव च । अश्विनौ च महात्मानौ मरुतः शर्व एव च ॥ ६६ ॥ सिद्धिं सर्वाणि भूतानि भूतानां चैव यः प्रभुः । दास्यन्ति मम ये चान्ये ह्यदृष्टाः पथिगोचराः ॥ ६७ ॥ तदुन्नसं पाण्डुरदन्तमव्रणं शुचिस्मितं पद्म पलाशलोचनम् । द्रक्ष्ये तदार्यावदनं कदान्वहं प्रसन्नताराधिपतुल्यदर्शनम् ॥ ६८ ॥ क्षुद्रेण पापेन नृशंसकर्मणा सुदारुणालंकृतवेषधारिणा । बलाभिभूता ह्यबला तपस्विनी कथं नु मे दृष्टिपथेऽद्य सा भवेत् ॥ ६९ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

स मुहूर्तमिव ध्यात्वा मनसा चाधिगम्य ताम् । अवप्लुतो महातेजाः प्राकारं तस्य वेश्मनः ॥ १ ॥

स तु संहृष्टसर्वाङ्गः प्राकारस्थो महाकपिः । पुष्पिताग्रान् वसन्तादौ ददर्श विविधान् द्रुमान् ॥ २ ॥

कारणात् । उन्नता नासिका यस्य तदुन्नसम् । " उपसर्गाच्च " इति समासान्तोऽच् प्रत्ययः नसादेशश्च । अव्रणम् अनवद्यम् । तत् अभिज्ञातत्वेन रामेण निवेदितम् ॥ ६८ ॥ सुदारुणालंकृतवेषधारिणा सुदारुणत्वेऽप्यापातप्रसन्नवेषधारिणा ॥ ६९ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने त्रयोदशः सर्गः ॥ १३ ॥ स मुहूर्तमित्यादि । इवशब्दो वाक्यालङ्कारे । प्राकारम् अशोकवनिकाप्राकारम् । तस्य वेश्मनः रावणस्य गृहात् । अवप्लुतः प्राप्तः ॥१॥ स त्विति । संहृष्टसर्वाङ्गः पुलकितसर्वाङ्गः । वसन्तादौ "पौर्णमास्या मासान् संपाद्यं" इति पक्षमनुसृत्य फाल्गुन

दास्यन्ति ददतीत्यर्थः । पथिगोचराः अदृष्टाश्च ये ते सिद्धिं दास्यन्ति ॥ ६७ ॥ तदिति । समुन्नता नासा यस्य तत् समुन्नसम् । अव्रणमनवद्यम् ॥६८॥ क्षुद्रेणेति । सुदारुणत्वेऽप्यलंकृतवेषधारिणा प्रसन्नवेषधारिणा, रावणेनेति शेषः ॥ ६९ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्ड व्याख्यायां त्रयोदशस्सर्गः ॥१३॥ स इति । ताम् अशोकवनिकाम् मनसा अधिगम्य, तत्र मनो निधायेत्यर्थः । तस्य रावणस्य । वेश्मनः वेश्मप्राकारादित्यर्थः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पौर्णमासीप्रपूर्वदिनत्वेन वसन्तादावित्युक्तम् ॥ २ ॥ सालान् सर्जकान् । भव्यान् शुभानित्यशोकविशेषणम् । यद्वा भवं रुद्रमर्हन्तीति भव्यान् रुद्रप्रियपुष्पान् वृक्षविशेषान् । उद्दालकान् बहुवारकान् । नागवृक्षान् नागकेसरवृक्षान् । कपिमुखान् मर्कटकान् ॥ ३ ॥ ४ ॥ स प्रविश्येत्यादि ।

सालानशोकान् भव्यांश्च चम्पकांश्च सुपुष्पितान् । उद्दालकान्नागवृक्षांश्चूतान् कपिमुखानपि ॥ ३ ॥ अथाम्रवण संछन्नां लताशतसमावृताम् । ज्यामुक्त इव नाराचः पुप्लुवे वृक्षवाटिकाम् ॥ ४ ॥ स प्रविश्य विचित्रां तां विहगै रभिनादिताम् । राजतैः काञ्चनैश्चैव पादपैः सर्वतो वृताम् ॥ ५ ॥ विहगैर्मृगसङ्घैश्च विचित्रां चित्रकाननाम् । उदितादित्यसङ्काशां ददर्श हनुमान् कपिः ॥ ६ ॥ वृतां नानाविधैर्वृक्षैः पुष्पोपगफलोपगैः । कौकिलैर्भृङ्गराजैश्च मत्तैर्नित्यनिषेविताम् ॥ ७ ॥ प्रहृष्टमनुजे काले मृगपक्षिसमाकुले । मत्तबर्हिणसंघुष्टां नानाद्विजगणायुताम् ॥८॥ मार्गमाणो वरारोहां राजपुत्रीमनिन्दिताम् । सुखप्रसुप्तान् विहगान् बोधयामास वानरः ॥९॥ उत्पतद्भिर्द्विजगणैः पक्षैः सालाः समाहताः । अनेकवर्णा विविधा मुमुचुः पुष्पवृष्टयः ॥ १० ॥ पुष्पावकीर्णः शुशुभे हनुमान् मारुतात्मजः । अशोकवनिकामध्ये यथा पुष्पमयो गिरिः ॥ ११ ॥ दिशः सर्वाः प्रधावन्तं वृक्षषण्डगतं कपिम् । दृष्ट्वा सर्वाणि भूतानि वसन्त इति मेनिरे ॥ १२ ॥

काञ्चनैः काञ्चनमयैरिव स्थितैः ॥ ५ ॥ चित्रकाननां चित्रावान्तरवनाम्, चम्पकवनं चूतवनमित्येवंविधवनवतीम् ॥ ६ ॥ पुष्पाण्युपगच्छन्तीति पुष्पोपगाः पुष्पसंपन्नाः तैः, फलोपगैः फलसंपन्नैः ॥ ७ ॥ प्रहृष्टमनुजे काले वसन्ते । वसन्तस्य प्रचुरमन्मथत्वात् प्रहृष्टमनुजत्वम् ॥ ८ ॥ ९ ॥ सालाः वृक्षाः । " अनोकहः कुटः सालः " इत्यमरः । पुष्पवृष्टयः पुष्पवृष्टीः ॥ १०–१४ ॥

प्राकारं वनप्राकारम्, अवप्लुतः प्राप्तः ॥ १–३ ॥ अथेति । आम्रवणं चूतवनम् ॥ ४ ॥ ५ ॥ चित्रकाननां चित्रद्रुमषण्डाम् ॥ ६ ॥ पुष्पोपगफलोपगैः पुष्पाण्युपगच्छन्तीति पुष्पोपगाः पुष्पसंपन्नाः । एवं फलोपगाः ॥ ७ ॥ प्रहृष्टमनुजे प्रहृष्टजने काले, वसन्तादावित्यर्थः ॥ ८ ॥ ९ ॥ पुष्पवृष्टयः पुष्पवृष्टीः ॥ १०–१४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

धूर्ताः अक्षधूर्ताः ॥ १५ ॥ १६ ॥ स्कन्धमात्राश्रयाः पुष्पादीनामनाश्रया इत्यर्थः । अत एव अगमाः अगम्याः, असेव्या इत्यर्थः । निर्धुताः कम्पिताः ॥ १७ ॥ निर्धूतेति । मृदितवर्णका मृष्टाङ्गरागा । " अङ्गरागस्समालम्भो वर्णकश्च विलेपनम्" इत्युक्तेः । निष्पीतशुभदन्तोष्ठी निष्पीततया शुभदन्त

वृक्षेभ्यः पतितैः पुष्पैरवकीर्णा पृथग्विधैः । रराज वसुधा तत्र प्रमदेव विभूषिता ॥ १३ ॥ तरस्विना ते तरव स्तरसाऽभिप्रकम्पिताः । कुसुमानि विचित्राणि ससृजुः कपिना तदा ॥ १४ ॥ निर्धूतपत्रशिखराः शीर्णपुष्पफलद्रुमाः । निक्षिप्तवस्त्राभरणा धूर्ता इव पराजिताः ॥ १५ ॥ हनूमता वेगवता कम्पितास्ते नगोत्तमाः । पुष्पपर्णफलान्याशु मुमुचुः पुष्पशालिनः ॥ १६ ॥ विहङ्गसङ्घैर्हीनास्ते स्कन्धमात्राश्रया द्रुमाः । बभूवुरगमाः सर्वे मारुतेनेव निर्धुताः ॥ १७ ॥ निर्धूतकेशी युवतिर्यथा मृदितवर्णका । निष्पीतशुभदन्तोष्ठी नखैर्दन्तैश्च विक्षता ॥ १८ ॥ तथा लांगूल हस्तैश्च चरणाभ्यां च मर्दिता । बभूवाशोकवनिका प्रभग्नवरपादपा ॥ १९ ॥ महालतानां दामानि व्यधमत्तरसा कपिः । यथा प्रावृषि विन्ध्यस्य मेघजालानि मारुतः ॥ २० ॥ स तत्र मणिभूमीश्च राजतीश्च मनोरमाः । तथा काञ्चनभूमीश्च ददर्श विचरन् कपिः ॥ २१ ॥ वापीश्च विविधाकाराः पूर्णाः परमवारिणा । महार्हैर्मणिसोपानैरुपपन्ना स्ततस्ततः ॥ २२ ॥ मुक्ताप्रवालसिकताः स्फाटिकान्तरकुट्टिमाः । काञ्चनैस्तरुभिश्चित्रैस्तीरजैरुपशोभिताः ॥ २३ ॥ फुल्लपद्मोत्पलवनाश्चक्रवाकोपकूजिताः । नत्यूहरुतसंघुष्टा हंससारसनादिताः ॥ २४ ॥ दीर्घाभिर्द्रुमयुक्ताभिः सरिद्भिश्च समन्ततः । अमृतोपमतोयाभिः शिवाभिरुपसंस्कृताः ॥ २५ ॥

तुल्योष्ठी ॥ १८ ॥ १९ ॥ महालतानामिति । लतानां दामानि प्रतानानि ॥ २०–२३ ॥ नत्यूहाः दात्यूहाः ॥ २४ ॥ २५ ॥

निर्द्धूतेति । धूर्ताः अक्षधूर्ताः ॥ १५ ॥ १६ ॥ स्कन्धमात्राश्रयाः स्कन्धानामेवाश्रयाः न तु पत्रपुष्पादीनाम् । अत एवागमाः अगम्याः, असेव्या इति यावत् । निर्धुताः कम्पिताः ॥ १७ ॥ मृदितवर्णका मृदिताङ्गरागा ॥ १८ ॥ १९ ॥ दामानि समूहान् ॥ २० ॥ २१ ॥ वापीरित्यादि सार्धश्लोकचतुष्टयमेकं वाक्यम् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सन्तानकाः कल्पवृक्षास्तैस्समावृताः । घनाः निबिडाः । नानागुल्मावृताश्च ताः घनाश्चेति समासः । करवीरकृतान्तराः करवीरैः कृतविशेषाः॥२६॥२७॥ जगति लोके रम्यम्, एतत्सदृशं रम्यं किंचिन्नास्तीत्यर्थः । पर्वतं ददर्शेत्यन्वयः ॥ २८ ॥ रामानु०—शिलागृहैरिति । जगतिपर्वतं जगतीशब्दस्य

लताशतैरवततां सन्तानकसमावृताः । नानागुल्मावृतघनाः करवीरकृतान्तराः ॥ २६ ॥ ततोऽम्बुधरसङ्काशं प्रवृद्धशिखरं गिरिम् । विचित्रकूटं कूटैश्च सर्वतः परिवारितम् ॥ २७ ॥ शिलागृहैरवततं नानावृक्षैः समावृतम् । ददर्श हरिशार्दूलो रम्यं जगति पर्वतम् ॥ २८ ॥ ददर्श च नगात्तस्मान्नदीं निपतितां कपिः । अङ्कादिव समुत्पत्य प्रियस्य पतितां प्रियाम् ॥ २९ ॥ जले निपतिताग्रैश्च पादपैरुपशोभिताम् । वार्यमाणामिव क्रुद्धां प्रमदां प्रिय बन्धुभिः ॥ ३० ॥ पुनरावृत्ततोयां च ददर्श स महाकपिः । प्रसन्नामिव कान्तस्य कान्तां पुनरुपस्थिताम् ॥ ३१ ॥ तस्यादूरात्स पद्मिन्यो नानाद्विजगणायुताः । ददर्श हरिशार्दूलो हनुमान् मारुतात्मजः॥ ३२ ॥ कृत्रिमां दीर्घिकां चापि पूर्णां शीतेन वारिणा । मणिप्रवरसोपानां मुक्तासिकतशोभिताम् ॥ ३३ ॥

हस्वभाव आर्षः । जगती भूमिः मृदिति यावत् । तत्प्राधान्याज्जगतिपर्वतामित्युक्तम् । यद्वा जगतिपर्वत इति संज्ञा ॥ २८ ॥ अथ नद्याः कुपितया निर्गतया सखीसान्त्वनेन पुनरागतया साम्यं दर्शयति-ददर्श चेति । पुनरावृत्ततोयां वृक्षाग्रप्रतिहत्या पुनः पर्वताभिमुखतोयप्रवाहाम् । उपमाने उपमेये चान्वयाय ददर्शेति पदद्वयम् ॥ २९–३१ ॥ तस्येति । तस्य पर्वतस्य । पद्मिन्यः पद्मिनीः ॥ ३२ ॥ कृत्रिमां क्रियया निर्वृत्ताम्, निर्मितामित्यर्थः ॥३३–३५॥

उक्तविशेषणविशिष्टा वापीर्ददर्शेति पूर्वेणान्वयः ॥ २२–२५ ॥ लताशतैरिति । सन्तानकुसुमावृताः कल्पवृक्षकुसुमावृताः । करवीरकृतान्तराः करवीरैः कृत विशेषाः ॥ २६ ॥ गिरिं क्रीडापर्वतम् । तस्य विशेषणं जगतिपर्वतमिति । ह्रस्व आर्षः । जगती भूमिः, मृदिति यावत् । तत्प्राधान्याज्जगतिपर्वतमित्युक्तिः ॥ २७ ॥ २८ ॥ ददर्शेति । निपतितां निर्गताम् । अस्या नद्याः कुपितकान्तासाम्यं सार्धश्लोकद्वयेनाह–अङ्कादिति । पतितां क्रोधान्निर्गताम् । जले निपतिताग्रैः पादपैः प्रियबन्धुभिः वार्यमाणां क्रुद्धां प्रमदामिव शोभिताम् अत एव कान्तस्य प्रसन्नामत एव पुनरुपस्थितां कान्तामिव पुनरावृत्ततोयां ददर्शेति सम्बन्धः ॥ २९–३१ ॥ तस्येति । पद्मिन्यः पद्मिनीः ॥ ३२ ॥ कृत्रिमां दीर्घिकामित्यादिसार्धश्लोकद्वयस्य ददर्शेति पूर्वक्रियया सम्बन्धः ॥ ३३–३५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ये केचिदिति । सच्छत्राः सवितानाः इत्यर्थः । सवितर्दिकाः सवेदिकाः । सौवर्णवेदिकाः वितर्दिकारोहणार्थं सुवर्णमयसोपानवेदिकायुक्ताः ॥ ३६–३९ ॥ तामिति । काञ्चनैस्तरुगणैः उपलक्षितां तां शिंशुपाम् । किङ्किणीशतनिर्घोषाम्, किङ्किण्यः क्षुद्रघण्टिकाः तासां निर्घोषो यस्याः । यद्वा किङ्किणीभिः

विविधैर्मृगसङ्घैश्च विचित्रां चित्रकाननाम् । प्रासादैः सुमहद्भिश्च निर्मितैर्विश्वकर्मणा ॥ ३४ ॥ काननैः कृत्रिमैश्चापि सर्वतः समलंकृताम् ॥ ३५ ॥ ये केचित् पादपास्तत्र पुष्पोपगफलोपगाः । सच्छत्राः सवितर्दीकाः सर्वे सौवर्ण वेदिकाः ॥ ३६ ॥ लताप्रतानैर्बहुभिः पर्णैश्च बहुभिर्वृताम् । काञ्चनीं शिंशुपामेकां ददर्श हनुमान् कपिः । वृतां हेममयीभिस्तु वेदिकाभिः समन्ततः ॥३७॥ सोऽपश्यद्भूमिभागांश्च गर्तप्रस्रवणानि च । सुवर्णवृक्षानपरान् ददर्श शिखिसन्निभान् ॥३८॥ तेषां द्रुमाणां प्रभया मेरोरिव दिवाकरः । अमन्यत तदा वीरः काञ्चनोऽस्मीति वानरः ॥ ३९ ॥ तां काञ्चनैस्तरुगणैर्मारुतेन च वीजिताम् । किङ्किणीशतनिर्घोषां दृष्ट्वा विस्मयमागमत् ॥ ४० ॥ स पुष्पिताग्रां रुचिरां तरुणाङ्कुरपल्लवाम् । तामारुह्य महाबाहुः शिंशुपां पर्णसंवृताम् ॥ ४१ ॥ इतो द्रक्ष्यामि वैदेहीं रामदर्शनलालसाम् । इतश्चेतश्च दुःखार्तां संपतन्तीं यदृच्छया ॥ ४२ ॥ अशोकवनिका चेयं दृढं रम्या दुरात्मनः । चम्पकैश्चन्दनैश्चापि वकुलैश्च विभूषिता ॥ ४३ ॥

शतमनन्ताः निर्घोषा यस्याः सा ताम् ॥४०॥ स पुष्पिताग्रामित्याद्यासर्गसमाप्त्येकं वाक्यम् ॥ ४१ ॥ इतो द्रक्ष्यामि इमामारुह्य द्रक्ष्यामि । ल्यब्लोपे पञ्चमी ॥ ४२ ॥ दुरात्मनः रावणस्य ॥ ४३–४५ ॥

सच्छत्रा इत्येतत् शयनासनादीनामप्युपलक्षणम् । सवितर्दीकाः सौवर्णवेदिकाश्चेति महावेदिकोपरिकृतकाञ्चनवेदिकाः, आसन्निति शेषः ॥ ३६ ॥ लताप्रतानैरिति सार्धश्लोकमेकं वाक्यम् ॥ ३७ ॥ ३८ ॥ तेषामिति । मेरोः प्रभयेव द्रुमाणां प्रभया काञ्चनः काञ्चनमयोऽस्मीत्यमन्यत ॥ ३९ ॥ तामिति । काञ्चनैस्तरुगणैरुपलक्षितां शिंशुपां दृष्ट्वा ॥ ४० ॥ स पुष्पिताग्रामिति । शिंशुपामारुह्य वक्ष्यमाणमचिन्तयदिति शेषः ॥ ४१ ॥ चिन्ताप्रकारमेवाह–इतो द्रक्ष्यामीत्यादिना ॥ ४२ ॥ चन्दनादिभिर्भूषिता रम्येयमशोकवनिका दुरात्मनो रावणस्य रावणसम्बन्धिनी । दृढं ध्रुवम् ॥ ४३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अथवेति पक्षान्तरे । विचक्षणा तापापनोदनचतुरा । अस्य वनस्य अशोकवनस्य । इह वनं नलिनीपरिसरवर्तिवनम् । रामचिन्तानुकर्शिता सती एष्यति । रामविश्लेषजनितितापापनोदनार्थमेतद्वनप्रदेशमागमिष्यतीत्यर्थः । सा आर्येति पदच्छेदः ॥ ४६ ॥ एष्यते एष्यति ॥ ४७ ॥ वनेचराणां स्पृहयते

इयं च नलिनी रम्या द्विजसङ्घनिषेविता । इमां सा राममहिषी नूनमेष्यति जानकी ॥ ४४ ॥ सा रामा राममहिषी राघवस्य प्रिया सती । वनसञ्चारकुशला नूनमेष्यति जानकी ॥४५॥ अथवा मृगशावाक्षी वनस्यास्य विचक्षणा । वनमेष्यति साऽऽर्येह रामचिन्तानुकर्शिता ॥ ४६ ॥ रामशोकाभिसंतप्ता सा देवी वामलोचना । वनवासे रता नित्य मेष्यते वनचारिणी ॥ ४७ ॥ वनेचराणां सततं नूनं स्पृहयते पुरा । रामस्य दयिता भार्या जनकस्य सुता सती ॥ ४८ ॥ सन्ध्याकालमनाः श्यामा ध्रुवमेष्यति जानकी । नदीं चेमां शिवजलां सन्ध्यार्थे वरवर्णिनी ॥ ४९ ॥ तस्याश्चाप्यनुरूपेयमशोकवनिका शुभा । शुभा या पार्थिवेन्द्रस्य पत्नी रामस्य सम्मता ॥ ५० ॥ यदि जीवति सा देवी ताराधिपनिभानना । आगमिष्यति साऽवश्यमिमां शिवजलां नदीम् ॥ ५१ ॥

वनेचरेभ्यस्स्पृहयते ॥४८॥ सन्ध्याकाले मनः यस्यास्सा सन्ध्याकालमनाः, सन्ध्योपासनतत्परेत्यर्थः । सन्ध्यार्थे एष्यति, प्रतिदिनमिति शेषः॥४९–५१॥

इयमिति । द्विजसङ्घनिषेविता इयं च नलिनी रम्या, सा राममहिषी इमां नलिनीं नूनमेष्यतीति योजना ॥ ४४ ॥ वनसञ्चारकुशला राममहिषीत्वादुद्यानवनसञ्चार चतुरेत्यर्थः ॥ ४५ ॥ अथवेति पक्षान्तरे । वनस्यास्य अशोकवनस्य विचक्षणा वनसम्बन्धिसुखानुभवचतुरेत्यर्थः । इह वनं नलिनीपरिसरवर्तिवनम् । वने चराणां स्पृहयते, कुशलमिति शेषः ॥ ४६–४८ ॥ सन्ध्याकालमनाः सन्ध्याकाले मनो यस्यास्सा तथा, सन्ध्यावन्दनतत्परेत्यर्थः ॥ ४९–५१ ॥

ति० -सन्ध्या दिनरात्र्योः सन्धिरूपाऽनुष्ठानकालो यस्य कर्मणस्तत्र मनो यस्यास्सा तथा । सन्ध्यार्थे सन्ध्याकालक्रियमाणस्नानार्थे । पूर्ववदेवात्राप्युक्तस्यैवार्थस्यावृत्तिः । रात्रिशेषे हनुमतोऽस्य वचसः प्रवृत्तेः सन्ध्याशब्देनात्र प्रातःकालो विवक्षितः । तत्र कर्तव्यस्नानादौ चास्येव स्त्रीणामप्यधिकार इति कथं स्त्रीणां सन्ध्यावन्दनमिति परास्तं वेदितव्यम् । किञ्च सम्यग्भगवद्ध्यानस्यैव सन्ध्यापदार्थत्वेनास्येव तत्र स्त्रिया अधिकारः । गायत्रीमन्त्रेण तदर्थस्मरणपूर्वकध्याने तु द्विजस्यैवाधिकार इत्यन्यत् ॥ ४९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पर्णघने पर्णसमूहे । महात्मा स हनुमान् । पुष्पिताग्रत्वादिविशिष्टां तामारुह्य इतो द्रक्ष्यामीत्यारभ्य आगमिष्यति साऽवश्यमिमां शिवजलां नदीमित्यन्तेन यः प्रकार उक्तः एवमुक्तप्रकारेण मत्वा मनुजेन्द्रपत्नीं प्रतीक्षमाणः अवेक्षमाणः मार्गमाणः सुपुष्पिते पर्णघने निलीनश्च सन् सर्वं ददर्शेत्यन्वयः ॥ ५२ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुर्दशः सर्गः ॥ १४ ॥

एवं तु मत्वा हनुमान् महात्मा प्रतीक्षमाणो मनुजेन्द्रपत्नीम् । अवेक्षमाणश्च ददर्श सर्वं सुपुष्पिते पर्णघने निलीनः ॥ ५२ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

स वीक्षमाणस्तत्रस्थो मार्गमाणश्च मैथिलीम् । अवेक्षमाणश्च महीं सर्वां तामन्ववैक्षत ॥ १ ॥ सन्तानकलताभिश्च पादपैरुपशोभिताम् । दिव्यगन्धरसोपेतां सर्वतः समलंकृताम् ॥ २ ॥ तां स नन्दनसङ्काशां मृगपक्षिभिरावृताम् । हर्म्यप्रासादसंबाधां कोकिलाकुलनिस्वनाम् ॥ ३ ॥ काञ्चनोत्पलपद्माभिर्वापीभिरुपशोभिताम् । बह्वासनकुथोपेतां बहुभूमिगृहायुताम् ॥ ४ ॥ सर्वर्तुकुसुमै रम्यां फलवद्भिश्च पादपैः । पुष्पितानामशोकानां श्रिया सूर्योदयप्रभाम् ॥ ५ ॥

स वीक्षमाण इत्यादि । सः तत्रस्थः शिंशुपास्थः । मैथिलीं मार्गमाणः मैथिलीमार्गणाद्धेतोः । "लक्षणहेत्वोः क्रियायाः" इति शानच् । वीक्षमाणः विविधं चक्षुर्विक्षिपन् महीं चावेक्षमाणः सर्वां ताम् अशोकवनिकाम् अन्ववैक्षतेत्यन्वयः ॥ १–३ ॥ बह्वासनैः कुथैः आस्तरणैश्चोपेताम् । भूमिगृहाणि बिलगृहाणि ॥ ४ ॥ सर्वर्तुकुसुमैः पादपैः रम्यामित्यन्वयः । सूर्योदयप्रभाम् उद्यत्सूर्यप्रभाम् ॥ ५ ॥

एवमिति । पर्णघने पर्णसान्द्रे पूर्वोक्तशिंशुपावृक्षे निलीनः, अभूदिति शेषः ॥५२॥ इति श्रीमहे० श्रीरामायणतत्त्व सुन्दरकाण्डव्याख्यायां चतुर्दशः सर्गः ॥ १४ ॥

स वीक्षमाण इति । सः हनुमान् । तत्रस्थः शिंशुपापर्णघनस्थः । शिंशुपा तीक्ष्णधारः । मैथिलीं मार्गमाणः मैथिलीमार्गणाद्धेतोः "लक्षणहेत्वोः क्रियायाः' इति शानच् । वीक्षमाणः विविधं चक्षुर्विक्षिपन् । महीं चावेक्षमाणः महीं प्रत्यधोवीक्षणं कुर्वन् सर्वां तामशोकवनिकामन्ववैक्षतेत्यन्वयः ॥ १–३ ॥ बह्वासनकुथोपेतां बह्वासनैः कुथास्तरणैश्चोपेताम् । भूमिगृहाः भूबिलगृहाः ॥ ४ ॥ सर्वर्तुकुसुमैः सर्वर्तुषु कुसुमानि येषु तैः पादपैरुपलक्षिताम् । सूर्योदयप्रभाम् उद्यत्सूर्यप्रभा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विहगैः निष्पत्रशाखां क्रियमाणामिव स्थिताम्। युगपत्पातिपक्षिपक्षविहतपत्रतया पत्ररहितशाखामिव स्थितामित्यर्थः ॥ ६ ॥ पुष्पावतंसकैः चञ्चु पुटलग्नपुष्पालंकृतैरित्यर्थः। आमूलेति । आमूलं पुष्पैर्निचितैः व्याप्तैः । पुन्नागादौ तथा दृष्टम् ॥ ७ ॥ पुष्पभारः पुष्पसमूहः स एवातिभारो

प्रदीप्तामिव तत्रस्थो मारुतिः समुदैक्षत। निष्पत्रशाखां विहगैः क्रियमाणामिवासकृत् ॥६॥ विनिष्पतद्भिः शतश श्चित्रैः पुष्पावतंसकैः। आमूलपुष्पनिचितैरशोकैः शोकनाशनैः ॥ ७ ॥ पुष्पभारातिभारैश्च स्पृशद्भिरिव मेदि नीम्। कर्णिकारैः कुसुमितैः किंशुकैश्च सुपुष्पितैः ॥ ८ ॥ स देशः प्रभया तेषां प्रदीप्त इव सर्वतः। पुन्नागाः सप्त पर्णाश्च चम्पकोद्दालकास्तथा ॥९॥ विवृद्धमूला बहवः शोभन्ते स्म सुपुष्पिताः। शातकुम्भनिभाः केचित् केचि दग्निशिखोपमाः। नीलाञ्जननिभाः केचित्तत्राशोकाः सहस्रशः ॥ १० ॥ नन्दनं विविधोद्यानं चित्रं चैत्ररथं यथा। अतिवृत्तमिवाचिन्त्यं दिव्यं रम्यं श्रियावृतम् ॥ ११ ॥ द्वितीयमिव चाकाशं पुष्पज्योतिर्गणायुतम्। पुष्परत्नशतै श्चित्रं पञ्चमं सागरं यथा॥ १२॥ सर्वर्तुपुष्पैर्निचितं पादपैर्मधुगन्धिभिः। नानानिनादैरुद्यानं रम्यं मृगगणैर्द्विजैः॥ १३॥

येषां तैः। अशोकैरित्यादावुपलक्षणे तृतीया। अशोकादिभिरुपलक्षितां समुदैक्षतेति पूर्वेणान्वयः ॥ ८–१० ॥ पुनरशोकवनं विविधोपमानदर्शनेन वर्णयति–नन्दनमित्यादिना श्लोकचतुष्टयेन । उद्यानम् अशोकवनम्। अत्र ददर्शेत्यपकृष्यते। नन्दनम् इन्द्रक्रीडावनम्। विविधोद्यानं विविधवृक्षषण्डम्। चैत्ररथं कुबेरक्रीडावनम्। नन्दनमतिवृत्तमिव अतिक्रम्य स्थितमिव। चैत्ररथं यथा चैत्ररथमिव चित्रमित्यन्वयः। आकाशसाम्ये

मित्यर्थः ॥ ५ ॥ ६ ॥ पुष्पावतंसकैः पुष्पाण्यवतंसवत् प्रतीयमानानि येषां पक्षिणां तैः, युगपत्पातिबहुपक्षिपक्षापिहितपर्णतया पत्ररहितशाखामिव स्थितामित्यर्थः। किञ्च आमूलपुष्पनिचितैः मूलादारभ्य पुष्पपूर्णैः ॥ ७ ॥ पुष्पभारः पुष्पसमूहः। कुसुमितैः कर्णिकारादिभिरुपलक्षिताम्। अशोकवनिकामन्ववैक्षतेति पूर्वेण सम्बन्धः ॥ ८ ॥ स इति। तेषां वृक्षाणाम् प्रदीप्त इव, स्थित इति शेषः। पुन्नागा इत्यादि श्लोकद्वयमेकं वाक्यम् ॥ ९ ॥ १० ॥ अथ पुनः प्रकारान्तरेणाशोकवनं वर्णयति–नन्दनमित्यादिना। विविधोद्यानं नानाविधावान्तरवनं चित्रं यन्नन्दनम् इन्द्रोद्यानं, चैत्ररथं कुबेरोद्यानम्, तदुभयमतिवृत्तमतिक्रान्तमिव स्थितमित्यर्थः।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

साधारणधर्ममाह पुष्पेति । एवं सागरोपम्ये पुष्परत्नेति ॥ ११–१४ ॥ अशोकवनिकायामित्यादि । चैत्यप्रासादं चैत्यं बुद्धमन्दिरं तदाकारं प्रासादम् ॥ १५ ॥ १६ ॥ प्रांशुभावत्वात् दीर्घस्वभावत्वात् ॥ १७ ॥ मलिनसंवीतां मलिनवस्त्रेणावृताम्, मलिनैरङ्गैः संवीतां वा ॥ १८ ॥

अनेकगन्धप्रवहं पुण्यगन्धं मनोरमम् । शैलेन्द्रमिव गन्धाढ्यं द्वितीयं गन्धमादनम् ॥ १४ ॥ अशोकवनिकायां तु तस्यां वानरपुङ्गवः । स ददर्शाविदूरस्थं चैत्यप्रासादमुच्छ्रितम् ॥ १५ ॥ मध्ये स्तम्भसहस्रेण स्थितं कैलास पाण्डुरम् । प्रवालकृतसोपानं तप्तकाञ्चनवेदिकम् ॥ १६ ॥ मुष्णन्तमिव चक्षूंषि द्योतमानमिव श्रिया । विमलं प्रांशुभावत्वादुल्लिखन्तमिवाम्बरम् ॥ १७ ॥ ततो मलिनसंवीतां राक्षसीभिः समावृताम् । उपवासकृशां दीनां निःश्वसन्तीं पुनः पुनः ॥१८॥ ददर्श शुक्लपक्षादौ चन्द्ररेखामिवामलाम् । मन्दं प्रख्यायमानेन रूपेण रुचिरप्रभाम् ॥ १९ ॥ पिनद्धां धूमजालेन शिखामिव विभावसोः । पीतेनैकेन संवीतां क्लिष्टेनोत्तमवाससा ॥ २० ॥ सपङ्कामनलङ्कारां विपद्मामिव पद्मिनीम् । व्रीडितां दुःखसंतप्तां परिम्लानां तपस्विनीम् ॥ २१ ॥ ग्रहेणाङ्गारकेणेव पीडितामिव रोहिणीम् । अश्रुपूर्णमुखीं दीनां कृशामनशनेन च ॥ २२ ॥

शुक्लपक्षादावित्यनेन वर्धिष्णुत्वं द्योतितम् । मन्दं प्रख्यायमानेन इदं तदिति कथञ्चित्प्रत्यभिज्ञायमानेन रूपेणोपलक्षिताम् ॥ १९ ॥ पिनद्धामिति मलिनसंवीतत्वे उपमा । पिनद्धां बद्धाम् । उत्तरीयराहित्यं द्योतयितुमेकेनेत्युक्तिः ॥ २० ॥ सपङ्कां भूमेराविर्भवन्तीमिव स्थिताम् । अनलङ्कारां पङ्कं निवर्त्य अलङ्कुर्वतोऽसन्निधानादलङ्काररहिताम् । रामागमनेऽप्ययमाश्रयो नोत्सादयितुमर्हतीत्येवं मन्यमानाम् । विपद्मामिव पद्मिनीं पद्मरहितां सरसीमिव स्थिताम् ॥ २१ ॥ ग्रहेण क्रूरग्रहेण । द्वितीय इवशब्दो वाक्यालङ्कारे । अश्रिवति । कृशां दीनामिति पुनःपुनरुक्तिः कार्श्यदैन्ययोरतिशय ॥५३॥

पुष्पज्योतिर्गणायुतम् पुष्पाण्येव ज्योतिर्गणा नक्षत्रगणाः । उद्यानम् अशोकवनम्, अपश्यदिति शेषः॥११–१४॥ अशोकवनिकायामित्यादि श्लोकत्रयमेकं वाक्यम् । चैत्यप्रासादं बुद्धाण्डाकारप्रासादम् । प्रांशुभावत्वात् उन्नतस्वरूपत्वात् ॥१५–१७॥ तत इत्यारभ्य दुःखसन्तप्तां व्यसनानामकोविदाम् इत्यन्तस्य ग्रन्थस्य ददर्शेति क्रियया सम्बन्धः । मलिनसंवीतां मलिनवस्त्रोपेताम् ॥१८॥ मन्दं प्रख्यायमानेन इदं तदिति कथञ्चिदूह्यमानेन रूपेणोपलक्षिताम्॥१९॥ क्लिष्टेन जीर्णेन ॥२०–२३॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रदर्शनाय । अत्र उपवासकृशां कृशामनशनेनेत्युक्त्या पूर्वकाण्डान्ते इन्द्रदत्तपायसाशनवृत्तान्तः कल्पित इति तत्रैवोक्तम् ॥ २२ ॥ २३ ॥ नीलनागा भया कृष्णसर्पतुल्यया ॥ २४ ॥ नीरदापाये शरदि ॥ २५ ॥ उपपादिभिः उपपादनशीलैः । मन्दं प्रख्यायमानेनेत्यारभ्य सीतां समीक्ष्य उपपा दिभिः कारणैस्सीतेति तर्कयामासेत्यन्वयः ॥ २६ ॥ एवं लिङ्गैः सीतेति विचार्य प्रत्यभिज्ञयापि तथा तर्कयामासेत्याह—ह्रियमाणेति । इति तर्कया

शोकध्यानपरां दीनां नित्यं दुःखपरायणाम् । प्रियं जनमपश्यन्तीं पश्यन्तीं राक्षसीगणम् ॥ २३ ॥ स्वगणेन मृगीं हीनां श्वगणाभिवृतामिव । नीलनागाभया वेण्या जघनं गतयैकया ॥ २४ ॥ नीलया नीरदापाये वन राज्या महीमिव । सुखार्हां दुःखसंतप्तां व्यसनानामकोविदाम् ॥ २५ ॥ तां समीक्ष्य विशालाक्षीमधिकं मलिनां कृशाम् । तर्कयामास सीतेति कारणैरुपपादिभिः ॥ २६ ॥ ह्रियमाणा तदा तेन रक्षसा कामरूपिणा । यथारूपा हि दृष्टा वै तथारूपेयमङ्गना ॥ २७ ॥ पूर्णचन्द्राननां सुभ्रूं चारुवृत्तपयोधराम् । कुर्वन्तीं प्रभया देवीं सर्वा वितिमिरा दिशः ॥ २८ ॥ तां नीलकेशीं बिम्बोष्ठीं सुमध्यां सुप्रतिष्ठिताम् । सीतां पद्मपलाशाक्षीं मन्मथस्य रतिं यथा ॥ २९ ॥ इष्टां सर्वस्य जगतः पूर्णचन्द्रप्रभामिव । भूमौ सुतनुमासीनां नियतामिव तापसीम् ॥ ३० ॥ निश्वासबहुलां भीरुं भुजगेन्द्रवधूमिव । शोकजालेन महता विततेन न राजतीम् ॥ ३१ ॥

मासेति शेषः ॥ २७ ॥ पूर्णचन्द्राननामित्यारभ्य विद्यां प्रशिथिलामित्यन्तमेकं वाक्यम् । सुभ्रूं सुभ्रुवम् । उवङभाव आर्षः । कुर्वन्तीमिति । दशमासान् स्नानेन विना मलिनापि प्रभया दिशः वितिमिराः कुर्वन्तीमिति प्रभातिशयोक्तिः ॥ २८ ॥ सुप्रतिष्ठितां सुप्रतिष्ठितपादतलाम् ॥२९॥ ३० ॥ न राजतीं

नीलनागाभया कृष्णसर्पतुल्यया । वनराज्या उपलक्षितां महीमिव स्थिताम् ॥ २४ ॥ २५ ॥ तामिति । तां पूर्वोक्तविशेषणविशिष्टाम् । उपपादिभिः उपपादन शीलैर्वक्ष्यमाणलिङ्गैः सीतेति तर्कयामास, संशयितवानित्यर्थः ॥ २६ ॥ कारणान्येवाह—ह्रियमाणेति । अतः सीतेयमिति तर्कयामासेति पूर्वेण सम्बन्धः ॥ २७ ॥ पूर्णचन्द्रेत्यादि । सुभ्रूं सुभ्रुवम् ॥ २८ ॥ २९ ॥ चन्द्रप्रभामिवेति सर्वानन्दकरत्वमुक्तम् ॥ ३० ॥ भुजगेन्द्रवधूमिवेति दुष्प्रधर्षत्वम् ॥ ३१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न राजन्तीम् । तां प्रसिद्धाम् ॥ ३१ ॥ स्मृतिं मन्वाद्युक्तिम् । सन्दिग्धां सन्दिग्धार्थाम् । ऋद्धिं सम्पदम् । निपतितां क्षीणाम् ॥ ३२ ॥ विहताम् अविश्वासबहुलाम् । प्रतिहताम् अलब्धकार्याम् । सोपसर्गां सविघ्नाम् । सकलुषां सकालुष्याम् । भावप्रधानो निर्देशः ॥ ३३ ॥ अभूतेन

संसक्तां धूमजालेन शिखामिव विभावसोः । तां स्मृतीमिव सन्दिग्धामृद्धिं निपतितामिव ॥ ३२ ॥ विहतामिव च श्रद्धामाशां प्रतिहतामिव । सोपसर्गां यथा सिद्धिं बुद्धिं सकलुषामिव ॥ ३३ ॥ अभूतेनापवादेन कीर्तिं निपतितामिव । रामोपरोधव्यथितां रक्षोहरणकर्शिताम् ॥ ३४ ॥ अबलां मृगशावाक्षीं वीक्षमाणां ततस्ततः । बाष्पाम्बुपरिपूर्णेन कृष्णवक्त्राक्षिपक्ष्मणा ॥ ३५ ॥ वदनेनाप्रसन्नेन निःश्वसन्तीं पुनः पुनः ॥ ३६ ॥ मलपङ्कधरां दीनां मण्डनार्हाममण्डिताम् । प्रभां नक्षत्रराजस्य कालमेघैरिवावृताम् ॥ ३७ ॥ तस्य सन्दिदिहे बुद्धिर्मुहुः सीतां निरीक्ष्य तु । आम्नायानामयोगेन विद्यां प्रशिथिलामिव ॥ ३८ ॥ दुःखेन बुबुधे सीतां हनुमाननलंकृताम् । संस्कारेण यथा हीनां वाचमर्थान्तरं गताम् ॥ ३९ ॥

असत्येन । रामोपरोधव्यथितां रामप्राप्तिनिरोधेन व्यथिताम् ॥ ३४–३७ ॥ पुनः सीताशब्दो व्यवहितानुस्मरणार्थः । आम्नायानां वेदानाम् । अयोगेन असम्बन्धेन । प्रशिथिलाम् अप्रातिष्ठाम् । विद्यां वेदबाह्यविद्याम् । यद्वा आम्नायानाम् अभ्यासानामभावेन प्रशिथिलाम् अस्थिरपदां विद्यामिव सीतां निरीक्ष्य तस्य हनुमतो बुद्धिः सन्दिदिहे इत्यन्वयः । काश्यमालिन्यादिना तिरोहितरूपत्वादिति भावः ॥ ३८ ॥ दुःखेनेति । संस्कारः शब्दव्युत्पत्तिः तेन हीनाम् अत एव विवक्षितादर्थान्तरं गतां विपरीतार्थामित्यर्थः । संस्कारहीनतया प्रतिपिपादयिषितार्थं वक्तुमशक्नुवन्तीमविवक्षितमर्थं

शिखामिव विभावसोरिति पातिव्रत्यम् । तां प्रसिद्धाम् । स्मृतिः मन्वादिवाक्यम् । दीर्घस्त्वार्षः । सन्दिग्धां सन्दिग्धार्थाम् ॥ ३२ ॥ सोपसर्गां सान्तरायाम् । सकलुषां सकपटाम् ॥ ३३ ॥ अभूतेनापवादेन मिथ्यापवादेन । रामोपरोधव्यथितां रामप्राप्तिनिरोधेन व्यथिताम् ॥ ३४–३७ ॥ तस्य हनूमतः बुद्धिः सन्दिदिहे काश्यमालिन्यादिना तिरोहितत्वादिति भावः । आम्नायानामयोगेन अभ्यासानामभावेन ॥ ३८ ॥ दुःखेनेति । दुःखेन कृच्छ्रेण । संस्कारेण यथा हीनां

स०–रामोपरोधव्यथितां रामाभिः राक्षसस्त्रीभिः य उपरोधः इतस्ततोगमनप्रतिबन्धस्तेन व्यथिताम् ॥ ३४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तां समीक्ष्य विशालाक्षीं राजपुत्रीमनिन्दिताम् । तर्कयामास सीतेति कारणैरुपपादिभिः ॥ ४० ॥ वैदेह्या यानि चाङ्गेषु तदा रामोऽन्वकीर्तयत् । तान्याभरणजालानि शाखाशोभीन्यलक्षयत् ॥४१॥ सुकृतौ कर्णवेष्टौ च श्वदंष्ट्रौ च सुसंस्थितौ । मणिविद्रुमचित्राणि हस्तेष्वाभरणानि च । श्यामानि चिरयुक्तत्वात्तथा संस्थानवन्ति च ॥ ४२ ॥ तान्येवैतानि मन्येऽहं यानि रामोऽन्वकीर्तयत् ॥ ४३ ॥ तत्र यान्यवहीनानि तान्यहं नोपलक्षये । यान्यस्या नावहीनानि तानीमानि न संशयः ॥ ४४ ॥ पीतं कनकपट्टाभं स्रस्तं तद्वसनं शुभम् । उत्तरीयं नगासक्तं तदा दृष्टं प्लवङ्गमैः ॥ ४५ ॥ भूषणानि च मुख्यानि दृष्टानि धरणीतले । अनयैवापविद्धानि स्वनवन्ति महान्ति च ॥४६॥

बोधयन्तीं वाचमिव । सम्यग्व्युत्पत्त्यभावादर्थान्तरं गतां व्युत्पत्त्यनन्तरं स्वार्थं प्रतिपादयन्तीमिव स्थितामित्यर्थः ॥ ३९ ॥ ४० ॥ वैदेह्या इति । शाखायां शोभन्त इति शाखाशोभीनि । भर्तृविरहकाले भूषणधारणस्यानुचितत्वात् स्वाङ्गेभ्य उन्मुच्य शाखायां न्यस्तानीत्यर्थः ॥ ४१ ॥ कर्णवेष्टौ कुण्डले । " कर्णिका तालपत्रं स्यात्कुण्डलं कर्णवेष्टनम् " इति सज्जनः । श्वदंष्ट्रः त्रिकर्णकाख्यः पुष्पाकारः कर्णपार्श्वभूषणविशेषः । " त्रिकर्णकः श्वदंष्ट्रश्च" इत्यभिधानरत्नमाला । हस्तेषु हस्तावयवेषु । श्यामानि विरहतापौष्ण्यवशाच्छ्यामीभूतानि । तथा चिरयुक्तत्वात् चिरधृतत्वात् संस्थानवन्ति हस्तेषु तत्तदाभरणसंस्थानानि दृश्यन्त इत्यर्थः ॥४२॥ तान्येवेत्यर्धमेकं वाक्यम् ॥ ४३ ॥ तत्र ऋश्यमूके यान्यवहीनानि पतितानि तान्यहं नोपलक्षये, अत्रेति शेषः । अस्याः सीतायाः सकाशाद्यानि नावहीनानि न पतितानि तानीमानि तत्तुल्यत्वात् ॥४४॥ प्लवङ्गमैः सुग्रीवादिप्लवङ्गमैः । यदुत्तरीयं

वाचमर्थान्तरं गताम् संस्कारो व्युत्पत्तिः तया हीनाम् अत एव विवक्षितादर्थान्तरं गतां विपरीतार्थं बोधयन्तीम्, सम्यक् व्युत्पत्त्यभावदशायामर्थान्तरं गता वाग्व्युत्पत्त्यनन्तरं स्वार्थं यदर्शयति तद्वत् । सीतां दुःखेन बुबुध इत्यर्थः ॥ ३९ ॥ तामिति । कारणैः लिङ्गैः ॥ ४० ॥ तान्येवाह–वैदेह्या इत्यादि । शाखाशोभीनि शाखायां शोभन्त इति तथा । अनेन रामविश्लेषसमये भूषणधारणस्यानुचितत्वात् वैदेह्या भूषणानि स्वाङ्गेभ्य उन्मुच्य शाखायां न्यस्तानीत्यवगम्यते ॥ ४१ ॥ कर्णवेष्टौ कुण्डले । "कुण्डलं कर्णवेष्टनम्" इत्यमरः । श्वदंष्ट्रौ त्रिकर्णाख्यौ कुसुमाकारकर्णभूषणविशेषौ । "त्रिकर्णकः श्वदंष्ट्रश्च" इत्यभिधानरत्नमालायाम् । हस्तेषु हस्ततदवयवेषु । चिरयुक्तत्वात् चिरधृतत्वात् संस्थानवन्ति चिरमङ्गेष्वेवावस्थानवन्ति च ॥ ४२ ॥ ४३ ॥ तत्रेति । तत्र ऋश्यमूके । यान्याभरणानि अवहीनानि पतितानि यानि नावहीनानि तत्र न पतितानि अस्याः सकाशात्तानीमानीति सम्बन्धः ॥ ४४ ॥ स्रस्तमन्तरिक्षाद्भ्रष्टम् । नगासक्तम् वृक्षलग्नम् । प्लवङ्गमैः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दृष्टं यानि भूषणानि दृष्टानि तानि सर्वाण्यनयैव अपविद्धानि पातितानि । नगात्तत्कमित्यनेन पतनदशायामुत्तरीयाग्रं वृक्षे किंचित्सक्तमिति द्योत्यते ॥४५॥४६॥ इदमिति । इतरत् उत्सृष्टम् तदुत्तरीयं यथा यादृशवर्णयुक्तं यथा श्रीमत् इदम् इदानीं धार्यमाणं तद्वर्णं तथा श्रीमत् नूनमिति योजना॥४७॥

इदं चिरगृहीतत्वाद्वसनं क्लिष्टवत्तरम् । तथापि नूनं तद्वर्णं तथा श्रीमद्यथेतरत् ॥ ४७ ॥ इयं कनकवर्णाङ्गी रामस्य महिषी प्रिया । प्रनष्टापि सती याऽस्य मनसो न प्रणश्यति ॥ ४८ ॥ इयं सा यत्कृते रामश्चतुर्भिः परितप्यते । कारुण्यैरानृशंस्येन शोकेन मदनेन च ॥ ४९ ॥ स्त्री प्रनष्टेति कारुण्यादाश्रितेत्यानृशंस्यतः । पत्नी नष्टेति शोकेन प्रियेति मदनेन च ॥ ५० ॥ अस्या देव्या यथा रूपमङ्गप्रत्यङ्गसौष्ठवम् । रामस्य च यथारूपं तस्येयमसितेक्षणा ॥ ५१ ॥

इयमिति । या रामस्य प्रिया सती महिषीति कृत्वा प्रनष्टापि अस्य रामस्य मनसः सकाशात् न प्रणश्यति । सदा मनसा दृष्टा भवतीत्यर्थः । सा कनकवर्णाङ्गी इयम् । मया परिदृश्यमानेत्यर्थः ॥ ४८ ॥ रामः कारुण्यादिभिश्चतुर्भिः यत्कृते परितप्यते सेयम् ॥ ४९ ॥ कारुण्यादीनां परितापहेतुत्वं विभज्य दर्शयति–स्त्रीति । आपत्काले स्त्रियो रक्षणीयाः, तन्न कृतमिति कारुण्यात्परितप्यते । आनृशंस्यमक्रूरत्वम् । आश्रितसंरक्षणैकस्वभावत्वमिति यावत् । तस्मात् आश्रिता न रक्षितेति परितप्यते । "अर्धो वा एष आत्मनो यत्पत्नी" इत्युक्तरीत्या आत्मार्धभूता पत्नी नष्टेति शोकेन परितप्यते । प्रिया नष्टेति मदनेन परितप्यत इति योजना ॥५०॥ अथानयोरन्योन्याभिरूप्यानुगुण्यमाह–अस्या इति । अस्याः सीतायाः रूपं शरीरम् अङ्गप्रत्यङ्गसौष्ठवं च

सुश्रीवादिभिः ॥ ४५ ॥ ४६ ॥ चिरगृहीतत्वात् चिरधृतत्वात् । इतरत् अस्तमुत्तरीयं यथा यादृशवर्णयुक्तम् यथा श्रीमत् । इदमिदानीं धार्यमाणं तथावर्णं तथा श्रीमत् नूनमिति योजना ॥ ४७ ॥ इयमिति । इयं रामस्य प्रिया सती महिषीति कृत्वा प्रनष्टापि अस्य रामस्य मनसः सकाशात् न प्रणश्यति, सदानुचिन्तयतीत्यर्थः ॥ ४८ ॥ इयमिति । कारुण्यादिभिश्चतुर्भिर्यत्कृते परितप्यते सेयमिति सम्बन्धः ॥ ४९ ॥ कारुण्यादीनां परितापहेतुत्वं विभज्य दर्शयति–स्त्रीति । स्त्री प्रनष्टेति कारुण्यात् आपत्काले स्त्रियो रक्षणीयाः तन्न कृतमिति कारुण्यात् परितप्यते । आश्रितेत्यानृशंस्यतः, आनृशंस्यमक्रूरत्वम् । आश्रितसंरक्षकस्वभावत्वमिति यावत् । तस्मादाश्रिता न रक्षितेति परितप्यते । पत्नी नष्टेति शोकेन आत्मार्धभूतपत्नीनाशो जात इति शोकेन परितप्यते । प्रियेति मदनेन च प्रिया नष्टेति मदनेन परितप्यत इति योजना ॥ ५० ॥ अथ सीतारामयोरन्योन्याभिरूप्यानुगुण्यमाह–अस्या इति । अस्याः सीतायाः यथा यथाविधं रूपम् अङ्ग

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यथा यथाविधम्, तथाविधमेव रामस्यापि रूपम् अङ्गप्रत्यङ्गसौष्ठवं च । तथा रामस्य रूपमङ्गप्रत्यङ्गसौष्ठवं च यथा यथाविधम्, तथाविधमेवास्या रूपमङ्गप्रत्यङ्गसौष्ठवं च । अतः इयमसितेक्षणा तस्य योग्येति शेषः ॥ ५१ ॥ तथाऽनयोरन्योन्यस्यानुरागमाह–अस्या इति । अस्या देव्याः मनस्तस्मिन् रामे प्रतिष्ठितम्, तेन हेतुना इयं मुहूर्तमपि जीवति । तस्य च मनोऽस्यां प्रतिष्ठितम्, तेन कारणेन स मुहूर्तमपि जीवति । तयोरन्योन्यं मनोनिवेशनाभावे मुहूर्तजीवनमपि न घटत इति भावः ॥ ५२ ॥ माल्यवति शैले रामस्य सीताविरहक्लेशातिशयं निशाम्य हन्त वसिष्ठशिष्यः कस्याश्चित् स्त्रियाः कृते

अस्या देव्या मनस्तस्मिंस्तस्य चास्यां प्रतिष्ठितम् । तेनेयं स च धर्मात्मा मुहूर्तमपि जीवति ॥ ५२ ॥ दुष्करं कृतवान् रामो हीनो यदनया प्रभुः । धारयत्यात्मनो देहं न शोकेनावसीदति ॥ ५३ ॥ दुष्करं कुरुते रामो य इमां मत्तकाशिनीम् । सीतां विना महाबाहुर्मुहूर्तमपि जीवति ॥ ५४ ॥

कथमेवमभूदिति विनिन्द्य परिहसितवान् स्वयं विरक्ततया, संप्रत्यस्या वैलक्षण्यातिशयदर्शनेन विशेषज्ञतया एतद्विरहे रामस्य देहधारणं सर्वात्मना अशक्यमित्याह–दुष्करमिति । दुष्करं कृतवान् रामः । इमां वियुज्य समाधानपरो रामः प्रकाममशक्यं कृत्यमकरोत् । हीनो यदनया प्रभुः । अनया विना देहं धृत्वाऽवस्थित इति यत्तदत्यन्तमशक्यम् । प्रभुः गजाश्वादिकं शिक्षयितुं राज्यं पालयितुं च जानाति । न प्रणयधारायां प्रथमांशमपि भुक्तवान् । धारयत्यात्मनो देहम् । किमिदं याचितकं शरीरं धारयति स्वस्यैव हि देहोऽयं देहं भोगायतनं हीदं न दुःखायतनम् " दिह उपचये " इत्यस्माद्धातोः "इगुपध०" इत्यादिना कः । तेनायमर्थो लभ्यते । सीताशरीरस्य परतन्त्रतया तत्त्यक्तुमयुक्तं नतु स्वाधीनशरीरस्य धारणं युक्तमिति भावः । विशेषज्ञेनापि कथमिदं त्यक्तुं शक्यम् ! तत्राह न शोकेनावसीदति ॥ ५३ ॥ उक्तमर्थं किञ्चिद्विशेषान्तरेण दर्शयति–दुष्करं कुरुत इति ॥ ५४ ॥

प्रत्यङ्गसौष्ठवं तथाविधमेव रामस्यापि रूपं रामस्य यथाविधं रूपं तथाविधमेव अस्या रूपम् । अत एवेयमसितेक्षणा तस्य योग्येति शेषः ॥ ५१ ॥ अथानयोरन्योन्यानुरागमाह–अस्या इति । अस्याः सीतायाः मनः तस्मिन् रामे प्रतिष्ठितम् । तेन हेतुना इयं स च जीवतीति सम्बन्धः ॥ ५२ ॥ सीताविरहेण रामस्य शरीराकार्श्यं प्राणधारणं च विचित्रमित्याह–दुष्करमित्यादिश्लोकद्वयेन । मत्तकाशिनीं वरारोहाम् " वरारोहा मत्तकाशिनी " इत्यमरः । रामग्रहणं सीताया अप्युप

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

एवं दृष्ट्वा मलिनसंवीतत्वोपवासकृशत्वशोकध्यानपरायणत्वादिपतिव्रताधर्मयुक्तां सीतां दृष्ट्वा हृष्टः सन् मनसा रामं जगाम सस्मार । तं प्रभुं बुद्धिस्थं रामं प्रशशंस च पुनःप्राप्त्युपयुक्तपतिव्रताधर्मनिष्ठत्वदर्शनात् भाग्योत्तरो राम इत्यस्तौषीत् । यद्वा एतादृशसौन्दर्यवतीं सीतां दृष्ट्वा एतद्विरहितस्य महान् शोकः प्राप्तः अतः युक्तमेव कृतवान् राम इत्यस्तौषीत् ॥ ५५ ॥ इति श्रीगोविन्द० श्रीरामायण० शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चदशः सर्गः ॥ १५ ॥ प्रशस्य त्वित्यादि । प्रशस्तव्यां प्रशंसितव्याम् । रामं सीतां च प्रशस्येति । अस्या देव्या इत्यादिनोभयोरपि प्रशंसितत्वात् ॥ १ ॥

एवं सीतां तदा दृष्ट्वा हृष्टः पवनसंभवः । जगाम मनसा रामं प्रशशंस च तं प्रभुम् ॥ ५५ ॥
इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे पञ्चदशः सर्गः ॥ १५ ॥
प्रशस्य तु प्रशस्तव्यां सीतां तां हरिपुङ्गवः । गुणाभिरामं रामं च पुनश्चिन्तापरोऽभवत् ॥ १ ॥
स मुहूर्तमिव ध्यात्वा बाष्पपर्याकुलेक्षणः । सीतामाश्रित्य तेजस्वी हनुमान् विललाप ह ॥ २ ॥
मान्या गुरुविनीतस्य लक्ष्मणस्य गुरुप्रिया । यदि सीतापि दुःखार्ता कालो हि दुरतिक्रमः ॥ ३ ॥

स इति । सीतामाश्रित्य सीतां विषयीकृत्य ॥ २ ॥ मान्येति । गुरुविनीतस्य गुरुभिः शिक्षितस्य । गुरुप्रिया रामप्रिया । कालो हि दुरतिक्रमः कालो दुरतिक्रम एवेत्ययमर्थः सिद्धो भवतीत्यर्थः । हिशब्दोऽवधारणे अव्ययानामनेकार्थत्वात् । जगद्रक्षकरामलक्ष्मणगुप्तायास्सीताया अपि यदीदृशं दुःखं लक्ष्मणम् । सापि तं विना जीवतीति चित्रमेवेत्यर्थः ॥ ५३ ॥ ५४ ॥ एवं मलिनसंवीतत्वोपवासकृशत्वशोकध्यानपरायणत्वादिपतिव्रताधर्मयुक्तां सीतां दृष्ट्वा हृष्टस्सन् मनसा रामं जगाम सस्मार । तं प्रभुं बुद्धिस्थं रामं प्रशशंस च । पुनःप्राप्त्युपयुक्तपतिव्रताधर्मनिष्ठत्वदर्शनात् भाग्योत्तरो राम इत्यस्तौषीदिति भावः ॥ ५५ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां पञ्चदशः सर्गः ॥ १५ ॥ प्रशस्येति । प्रशस्तव्यां प्रशंसितव्याम् ॥ १ ॥ स इति । सीतामाश्रित्य सीतामुद्दिश्य ॥ २ ॥ गुरुविनीतस्य गुरुभिः शिक्षितस्य । गुरुप्रिया रामप्रिया । सीतापि यदि दुःखार्ता, कालो दुरतिक्रमो हि,

स०—**गुरुविनीतस्य** बहुनम्रस्य लक्ष्मणस्य गुरुप्रिया ज्येष्ठभ्रातृभार्या मान्या । यद्वा गुरुविनीतस्य ब्रह्मादेर्लक्ष्मणस्य चेति व्यधिकरणषष्ठ्यौ । सर्वमान्या यदि सीता दुःखार्ता सेवाभूत् । हि यतः ततः कालो हि दुरतिक्रमः । दैव्या देवेन च स्वसमयावनाय कालो दुरतिक्रमः अनुल्लङ्घ्यस्वपराक्रम इव दर्शित इति भावः । यद्वा सुखार्होपि यदुःखार्त्तवदात्मानं दर्शयामास स हि ततः कालः रावणमृत्युः दुरतिक्रमः अनुल्लङ्घ्यः रावणेनेति शेषः ॥ ३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्राप्तं तदा कालो दुरतिक्रम एवेति भावः ॥ ३ ॥ रामस्येति । व्यवसायज्ञा स्वयत्नं विहाय तद्व्यवसायमेव प्रेक्षमाणा ' एतद्भृतं मम । अप्यहं जीवितं जह्याम् ' इत्येवं रामव्यवसायं जानन्तीत्यर्थः । लक्ष्मणस्य च धीमतः रामे मायामृगानुसारिण्यपि मारीचोऽयमिति तदानीमपि निश्चितवतो लक्ष्मणस्य । यद्वा सर्वेश्वरादप्याश्रितसंरक्षणे समुद्युक्तस्य । नात्यर्थं क्षुभ्यते अत्यर्थमिति क्षोभाभावविशेषणम्, क्षोभविशेषणत्वे यत्किंचित्क्षोभ प्राप्तः स्यात् । सत्तानाशकाले प्राप्तेपि क्षोभलेशरहितेत्यर्थः । देवी रामेण शिरसा वोढव्यवाल्भ्यवती । गङ्गेव जलदागमे, क्षोभहेतौ सत्यपि यथा गङ्गा न क्षुभ्यते तथेत्यर्थः ॥ ४ ॥ तुल्येति । तुल्यशीलवयोवृत्ताम्, शीलं स्वभावः, " अस्या देव्या मनस्तस्मिंस्तस्य चास्यां प्रतिष्ठितम् " इति प्रक्रियया तुल्य

रामस्य व्यवसायज्ञा लक्ष्मणस्य च धीमतः । नात्यर्थं क्षुभ्यते देवी गङ्गेव जलदागमे ॥ ४ ॥
तुल्यशीलवयोवृत्तां तुल्याभिजनलक्षणाम् । राघवोऽर्हति वैदेहीं तं चेयमसितेक्षणा ॥ ५ ॥
तां दृष्ट्वा नवहेमाभां लोककान्तामिव श्रियम् । जगाम मनसा रामं वचनं चेदमब्रवीत् ॥ ६ ॥
अस्या हेतोर्विशालाक्ष्या हतो वाली महाबलः । रावणप्रतिमो वीर्ये कबन्धश्च निपातितः ॥ ७ ॥

स्वभावात् । तुल्यवयस्काम् षोडशवार्षिकस्य द्वादशवार्षिकी तुल्या अन्यथा वैरस्यापत्तेः शास्त्रविरोधाच्च । अत एव विष्णुः—"वर्षैरेकगुणां भार्यामुद्वहेत् त्रिगुणो वरः । द्व्यष्टवर्षोऽष्टवर्षां वा वयोमात्रावरा च या ॥ " इति । तुल्यवृत्ताम् " दोषो यद्यपि तस्य स्यात् सतामेतदगर्हितम् " इति रामवृत्तम्, " पापानां वा शुभानां वा वधार्हाणां प्लवंगम । कार्यं करुणमार्येण न कश्चिन्नापराध्यति ॥ " इत्युक्तवत्यास्सीताया वृत्तेन तुल्यम् । तुल्यशब्दोऽनुरूप परः । रामानुरूपशीलवयश्चारित्रामित्यर्थः । तुल्याभिजनलक्षणाम् अभिजनः कुलम्, लक्षणं सामुद्रिकं, सार्वभौमलक्षणवतो भार्याया यैस्सामुद्रिकलक्षणै र्भाव्यं तैर्युक्तामित्यर्थः । एवंविधत्वाद्राघवो वैदेहीमर्हति, वैदेही राघवमर्हति । लोके सौन्दर्यादिमतः सौन्दर्यादिसर्वसहिता न लभ्यते । सौन्दर्यादिमत्या न सौन्दर्यादिसर्ववान् । अनयोस्तु सर्वं सम्पन्नमिति विस्मयते । असितेक्षणेत्यधिकविशेषणदानाद्रामापेक्षया सीताया नयनसौन्दर्यमधिकमित्युच्यते । अत एव रामो वक्ष्यति—"न जीवेयं क्षणमपि विना तामसितेक्षणाम्" इति ॥ ५ ॥ ६ ॥ अस्या हेतोरिति । " सर्वनाम्नस्तृतीया च " इति षष्ठी ।

सकलजगद्रक्षकरामलक्ष्मणगुप्तायाः सीतायाः ईदृशं दुःखं प्राप्तं यतः अतः कालो दुरतिक्रम एवेत्यर्थः ॥ ३ ॥ व्यवसायज्ञा अभिप्रायज्ञा, पराक्रमज्ञेत्यर्थः ॥ ४ ॥
तुल्यशीलवयोवृत्ता रामानुरूपस्वभाववयश्चारित्रा । तुल्याभिजनलक्षणा अभिजनं कुलम्, लक्षणं सामुद्रिकोक्तम् ॥ ५ ॥ ६ ॥ अस्या हेतोः अनया हेतुनेत्यर्थः ॥ ७–१० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अनया हेतुनेत्यर्थः ॥७-१०॥ ऐश्वर्यमिति । अस्या निमित्ते " निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम्" इति षष्ठी सप्तम्यर्थे । अस्यां निमित्ते सत्यामित्यर्थः ॥ ११ ॥ १२ ॥ परिवर्तयेत् अधरोत्तरां कुर्यात् । अस्याः कृते एतदर्थम् । जगच्चापि, न केवलं मेदिनीं सर्वलोकानपि परिवर्तयेदित्यर्थः॥१३॥

विराधश्च हतः सङ्ख्ये राक्षसो भीमविक्रमः । वने रामेण विक्रम्य महेन्द्रेणेव शम्बरः ॥ ८ ॥ चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम् । निहतानि जनस्थाने शरैरग्निशिखोपमैः ॥ ९ ॥ खरश्च निहतः सङ्ख्ये त्रिशिराश्च निपातितः । दूषणश्च महातेजा रामेण विदितात्मना ॥१०॥ ऐश्वर्यं वानराणां च दुर्लभं वालिपालितम् । अस्या निमित्ते सुग्रीवः प्राप्तवान् लोकसत्कृतम् ॥ ११ ॥ सागरश्च मया क्रान्तः श्रीमान्नदनदीपतिः । अस्या हेतो र्विशालाक्ष्याः पुरी चेयं निरीक्षिता ॥ १२ ॥ यदि रामः समुद्रान्तां मेदिनीं परिवर्तयेत् । अस्याः कृते जगच्चापि युक्तमित्येव मे मतिः ॥ १३ ॥ राज्यं वा त्रिषु लोकेषु सीता वा जनकात्मजा । त्रैलोक्यराज्यं सकलं सीताया नाप्नुयात् कलाम् ॥१४॥ इयं सा धर्मशीलस्य मैथिलस्य महात्मनः । सुता जनकराजस्य सीता भर्तृदृढव्रता ॥१५॥ उत्थिता मेदिनीं भित्त्वा क्षेत्रे हलमुखक्षते । पद्मरेणुनिभैः कीर्णा शुभैः केदारपांसुभिः ॥ १६ ॥ विक्रान्तस्यार्यशीलस्य संयुगेष्वनिवर्तिनः । स्नुषा दशरथस्यैषा ज्येष्ठा राज्ञो यशस्विनी ॥ १७ ॥ धर्मज्ञस्य कृतज्ञस्य रामस्य विदितात्मनः । इयं सा दयिता भार्या राक्षसीवशमागता ॥ १८ ॥

राज्यं वेति । राज्यमुत्कृष्टं वा सीता उत्कृष्टा वा, इति विचार्यमाण इति शेषः । कलां लेशम् ॥ १४ ॥ भर्तृदृढव्रता भर्तरि दृढव्रता । केदारपांसुभिः यज्ञक्षेत्रपांसुभिः ॥ १५ ॥ १६ ॥ आर्यशीलस्य श्रेष्ठस्वभावस्य ॥ १७ ॥ १८ ॥

ऐश्वर्यमिति । अस्या निमित्त इति सप्तम्यर्थे षष्ठी । अस्यां निमित्तभूतायां सत्यामित्यर्थः ॥ ११ ॥ १२ ॥ रामः मेदिनीं किञ्च जगच्च, सर्वलोकानपीत्यर्थः । अस्याः कृते सीतार्थं परिवर्तयेद्यदि अधरोत्तरां कुर्यात्, संहरेदित्यर्थः । युक्तमित्येव मे मतिरिति सम्बन्धः ॥ १३ ॥ राज्यमुत्कृष्टं वा सीता उत्कृष्टा वा ? इति विचार्यमाणे सतीति शेषः । कलां लेशम् ॥ १४ ॥ भर्तृदृढव्रता भर्तरि दृढव्रता ॥ १५-१८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सर्वान् भोगान्, भुज्यन्ते इति भोगाः शुकसारिकाकन्तुकप्रभृतिभोगसाधनानि मातृप्रभृतींश्च । परित्यज्य परि विशेषेण पुनस्तत्राशालेशं विनैव त्यक्त्वा । अयं च परित्यागो न स्ववशेनेत्याह भर्तृस्नेहबलात्कृता । अभिमतविषयस्नेहातिरेकस्तादितरमाखिलमपि त्याजयति हि । त्यक्तेषु स्मरणाभावेऽपि गन्तव्यदेशीयदुःखं वा किं स्मरति ? नेत्याह अचिन्तयित्वा दुःखानि । रामातिरिक्तवस्त्वनुभवे हि दुःखानुभवसम्भावनेति भावः । प्रविष्टा निर्जनं

सर्वान् भोगान् परित्यज्य भर्तृस्नेहबलात्कृता । अचिन्तयित्वा दुःखानि प्रविष्टा निर्जनं वनम् ॥ १९ ॥ सन्तुष्टा फलमूलेन भर्तृशुश्रूषणे रता । या परां भजते प्रीतिं वनेऽपि भवने यथा ॥ २० ॥ सेयं कनकवर्णाङ्गी नित्यं सुस्मितभाषिणी । सहते यातनामेतामनर्थानामभागिनी ॥२१॥ इमां तु शीलसम्पन्नां द्रष्टुमर्हति राघवः । रावणेन प्रमथितां प्रपामिव पिपासितः ॥ २२ ॥ अस्या नूनं पुनर्लाभाद्राघवः प्रीतिमेष्यति । राजा राज्यपरिभ्रष्टः पुनः प्राप्येव मेदिनीम् ॥ २३ ॥ कामभोगैः परित्यक्ता हीना बन्धुजनेन च । धारयत्यात्मनो देहं तत्समागमकांक्षिणी ॥ २४ ॥ नैषा पश्यति राक्षस्यो नेमान् पुष्पफलद्रुमान् । एकस्थहृदया नूनं राममेवानुपश्यति ॥२५॥ भर्ता नाम परं नार्या भूषणं भूषणादपि । एषा तु रहिता तेन भूषणार्हा न शोभते ॥२६॥ दुष्करं कुरुते रामो हीनो यदनया प्रभुः । धारयत्यात्मनो देहं न दुःखेनावसीदति ॥ २७ ॥

वनम्, भोगस्यैकान्तस्थलमिति ह्यस्या हृदि लग्नमिति भावः ॥ १९ ॥ २० ॥ यातनां तीव्रवेदनाम् । अनर्थानामभागिनी आपदामनर्हेत्यर्थः ॥ २१ ॥ प्रपां पानीयशालिकाम् । "प्रपा पानीयशालिका" इत्यमरः ॥ २२ ॥ २३ ॥ काम्यन्त इति कामाः ते च ते भोगाश्च स्रक्चन्दनादयः तैः ॥ २४ ॥ नैषा पश्यति राक्षस्यः राक्षसीर्न पश्यति । नेमान् पुष्पफलद्रुमान्, रामविरहक्लेशातिशयेन राक्षसीदर्शनवत् सुपुष्पफलवतां द्रुमाणामपि दर्शनमस्याः

भर्तृस्नेहबलात्कृता भर्तुः स्नेहबलाज्जीवतीत्यर्थः ॥ १९ ॥ २० ॥ यातनां तीव्रवेदनाम् । अनर्थानामभागिनी आपदामनर्हा ॥ २१ ॥ प्रपां पानीयशालाम् ॥ २२ ॥ २३ ॥ कामेति । कामभोगैः काम्यन्त इति कामाः ते च ते भोगाः स्रक्चन्दनादयः ॥ २४ ॥ राक्षस्यः राक्षसीः । एकस्थहृदया एकाग्रचित्ता ॥२५॥२६॥ प्रभुः रामः अनया हीनः सन् आत्मनो देहं धारयति शोकेन नावसीदतीति च यत् एतत् दुष्करं कुरुत इति सम्बन्धः ॥ २७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

असह्यमित्यर्थः । एकस्थहृदया एकाग्रचित्ता । राममेवानुपश्यति ध्यायतीत्यर्थः । रामागमनसंभावनावती दिशोऽवलोकयतीति वाऽर्थः। यद्वा निरन्तरेण रामानुभवेन परिसरवर्ती कोऽपि पदार्थो न दृष्टिपथं गच्छतीत्यर्थः ॥ २५–२७ ॥ इमामिति । असितः केशान्तः यस्यास्ताम् । केशानाम्रे नैल्यं स्त्रीणां दुर्लभम् । अतस्तदेवाह असितकेशान्तां गुडालकावृतस्यापि व्यामोहकरीम् । शतपत्रनिभेक्षणां यद्यपीयमसितेक्षणा तथापि संस्थानविशेषे उपमेयम् ।

इमामसितकेशान्तां शतपत्रनिभेक्षणाम् । सुखार्हां दुःखितां दृष्ट्वा ममापि व्यथितं मनः ॥ २८ ॥ क्षितिक्षमा पुष्करसन्निभाक्षी या रक्षिता राघवलक्ष्मणाभ्याम् । सा राक्षसीभिर्विकृतेक्षणाभिः संरक्ष्यते संप्रति वृक्षमूले ॥ २९ ॥ हिमहतनलिनीव नष्टशोभा व्यसनपरम्परयाऽतिपीड्यमाना । सहचररहितेव चक्रवाकी जनकसुता कृपणां दशां प्रपन्ना ॥ ३० ॥ अस्या हि पुष्पावनताग्रशाखाः शोकं दृढं वै जनयन्त्यशोकाः । हिमव्यपायेन च मन्दरश्मिरभ्युत्थितो नैकसहस्ररश्मिः ॥ ३१ ॥

कमलपत्राक्षस्यापि व्यामोहदायिनीम् । सुखार्हां रामोत्सङ्गे स्थातुमर्हाम् । दुःखितां राक्षसीमध्ये स्थितां दृष्ट्वा ममापि व्यथितं मनः, शाखामृगस्य ममापि मनो व्यथितम्, किमुत परमदयालो रामस्येति भावः । शोकहर्षयोरपदस्य ममापि मनो व्यथितम् किंपुनः कामिन इति वा ॥२८॥२९॥ हिमहतेति । हिमहतेति विशेषणेन नलिन्याः पूर्वं बहुकालशोभितत्वं सिद्धम्, तद्वन्नष्टशोभा द्वादशवर्षं निष्प्रतिबन्धं भोगान् भुञ्जानाया आगन्तुको हि विश्लेषः तेन हि नष्टशोभेत्युक्तम् । व्यसनपरम्परया विरह इव संश्लेषोपि मध्ये मध्ये नागत्य निवृत्तः व्यसनमेव नैरन्तर्येण वृत्तम् । अतिपीड्यमाना अतिक्रम्य पीड्यमाना, आश्रयाननुरूपं व्यसनमनुभवन्तीत्यर्थः । सहचररहितेव चक्रवाकी लाभकालमवगम्य दुःखं सोढुमसमर्था । चक्रवाकीसाम्येनायमर्थो लभ्यते–सा हि रात्रिविरामकालं प्रबुध्य दुःखं सोढुमदक्षेति प्रसिद्धम् । जनकसुता एवं व्यसनं भविष्यतीति ज्ञात्वा न संवर्धिता, केवलं सुखसंवर्धितेत्यर्थः । कृपणां दशां प्रपन्ना । पूर्वोक्तनलिन्यादिकं नोपमानं भवितुमर्हति । किञ्चिदुक्तिमात्रम् । वाङ्मनसाऽपरिच्छेद्यां दुर्दशां प्राप्तेत्यर्थः ॥ ३० ॥ हिमव्यपायेन

इमामिति । ममापि, किमुत परमदयालो रामस्येति भावः ॥ २८ ॥ क्षितिरिव क्षमा क्षान्तिर्यस्याः सा क्षितिक्षमा ॥ २९ ॥ ३० ॥ अशोकाः शोकं जनयन्ति । हिमव्यपायेन नैकसहस्ररश्मिः मन्दरश्मिश्च अतीक्ष्णरश्मिः, शीतांशुरिति यावत् । अभ्युत्थितः सन्, शोकं जनयतीति शेषः ॥ ३१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वसन्तेन । नैकसहस्ररश्मिरभ्युत्थितः । मन्दरश्मिः सूर्यापेक्षया मन्दकरः, चन्द्र इति यावत् । शोकं जनयतीति वचनविपरिणामेन सम्बन्धः ॥ ३१ ॥ ३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षोडशः सर्गः ॥ १६ ॥

इत्येवमर्थं कपिरन्ववेक्ष्य सीतेयमित्येव निविष्टबुद्धिः । संश्रित्य तस्मिन्निषसाद वृक्षे बली हरीणामृषभस्तरस्वी ॥ ३२ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे षोडशः सर्गः ॥ १६ ॥

ततः कुमुदषण्डाभो निर्मलो निर्मलं स्वयम्। प्रजगाम नभश्चन्द्रो हंसो नीलमिवोदकम् ॥ १ ॥ साचिव्यमिव कुर्वन् स प्रभया निर्मलप्रभः । चन्द्रमा रश्मिभिः शीतैः सिषेवे पवनात्मजम् ॥ २ ॥ स ददर्श ततः सीतां पूर्णचन्द्र निभाननाम् । शोकभारैरिव न्यस्तां भारैर्नावमिवाम्भसि ॥ ३ ॥ दिदृक्षमाणो वैदेहीं हनुमान् मारुतात्मजः । स ददर्शाविदूरस्था राक्षसीर्घोरदर्शनाः ॥ ४ ॥ एकाक्षीमेककर्णां च कर्णप्रावरणां तथा । अकर्णां शङ्कुकर्णां च मस्त कोच्छ्वासनासिकाम् ॥ ५ ॥

तत इत्यादि । प्रजगाम प्रकर्षेण जगाम, आकाशपरभागं प्राप्त इत्यर्थः ॥ १ ॥ २ ॥ स इति । शोकभारैर्न्यस्तामिव आक्रान्तामिव स्थिताम् । अत एव भारैर्न्यस्तां नावमिव स्थिताम् ॥ ३ ॥ दिदृक्षमाण इत्यादि । कर्णौ प्रावरणे शिरस आच्छादकौ यस्याः सा कर्णप्रावरणा ताम् । शङ्कुवत्कर्णौ इत्येवमिति । सीतेयमित्येव इयं सीतैवेति जातबुद्धिः तामेव बुद्धिं संश्रित्य ततःपरानुष्ठेयचिकीर्षया शिंशपावृक्ष एव निषसाद । तद्रात्रिशेषं परदिनं च स्थित इत्यर्थः । एवञ्च सरावणान्तःपुरा सर्वापि लङ्का यामत्रयेण समुद्रलङ्घनदिनरात्रावेव विचिता । तुर्ये यामे अशोकवनिकाप्रवेश इति बोध्यम् ॥ ३२ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां षोडशः सर्गः॥ १६ ॥ तत इति । नभः प्रजगाम आकाशपरभागं प्राप्तः ॥ १ ॥ साचिव्यमिति । सीतादर्शनादौ प्रभया स्वकान्त्या साचिव्यमिव साहाय्यमिव, दिवा क्वचिदेकान्तप्रदेशे स्थितत्वान्निद्राव्याकुलत्वाच्च न सम्यग्राक्षसीनां सीतायाश्च दर्शनम्, रात्रौ चन्द्रोदये सति तु पुनः समीपदेशे आगत्य स्थितस्य सम्यक् सर्वदर्शनम् ॥ २ ॥ शोकभारैः न्यस्तामिव अधोनीतामिव मज्जमाना

स०—कुमुदषण्डाभः कुमुदानां श्वेतोत्पलानां षण्डः समूहः तस्याभेवाभा यस्येति वा । तस्य आ सम्यक् भा कान्तिर्यस्मादिति वा । " सिते कुमुदकैरवे " इत्यमरः । निर्मलं स्वच्छम् । नीलमिवोदकमित्यनेन गगने नैल्यमपि ध्वनितम् । आकाशे नैल्यं च " आकाशो नीलिमोदेति " इति श्रुतेः ॥ १ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यस्यास्तां शङ्कुकर्णाम् । मस्तकोच्छ्वासनासिकाम् ऊर्ध्वमुखनासिकामित्यर्थः ॥ ४–६ ॥ अतिकायोत्तमाङ्गीम् । अत्रातिकायशब्देन महत्त्वमुच्यते । महाशिरस्कामित्यर्थः । ध्वस्तकेशीं स्वल्पकेशीम् । अकेशीम् अनुत्पन्नकेशीम् । केशकम्बलधारिणीं कम्बलरूपकेशधारिणीम् । लम्बे कर्णललाटे यस्यास्सा लम्बकर्णललाटा ताम् । चुबुके ओष्ठः यस्याः सा चुबुकोष्ठी ताम् ॥ ७ ॥ ह्रस्वदीर्घाम् अधःकाये ऊर्ध्वकाये च क्वचित् ह्रस्वां क्वचिद्दीर्घां

अतिकायोत्तमाङ्गीं च तनुदीर्घशिरोधराम् । ध्वस्तकेशीं तथाऽकेशीं केशकम्बलधारिणीम् ॥ ६ ॥ लम्बकर्णललाटां च लम्बोदरपयोधराम् । लम्बोष्ठीं चुबुकोष्ठीं च लम्बास्यां लम्बजानुकाम् ॥ ७ ॥ ह्रस्वदीर्घां तथा कुब्जां विकटां वामनां तथा । करालां भुग्नवक्त्रां च पिङ्गाक्षीं विकृताननाम् ॥ ८ ॥ विकृताः पिङ्गलाः कालीः क्रोधनाः कलह प्रियाः । कालायसमहाशूलकूटमुद्गरधारिणीः ॥ ९ ॥ वराहमृगशार्दूलमहिषाजशिवामुखीः । गजोष्ट्रहयपादीश्च निखातशिरसोऽपराः ॥ १० ॥ एकहस्तैकपादाश्च खरकर्ण्यः श्वकर्णिकाः । गोकर्णीर्हस्तिकर्णीश्च हरिकर्णीस्तथाऽपराः ॥ ११ ॥ अनासा अतिनासाश्च तिर्यङ्नासा विनासिकाः । गजसन्निभनासाश्च ललाटोच्छ्वासनासिकाः ॥ १२ ॥ हस्तिपादा महापादा गोपादाः पादचूडिकाः । अतिमात्रशिरोग्रीवा अतिमात्रकुचोदरीः ॥ १३ ॥

मित्यर्थः । कुब्जां स्थगुमतीम् । विकटां स्थूलजङ्घाम् । करालां दन्तुराम् । " करालो दन्तुरे तुङ्गे " इत्यमरः । भुग्नवक्त्रां निम्नवक्त्राम् । विकृताननां नासिकोष्ठविरहिताननामित्यर्थः । एतदन्तस्य पूर्वेण ददर्शेत्यनेनान्वयः ॥ ८ ॥ विकृता इत्यादेरुत्तरेण ददर्शेत्यनेनान्वयः । एता एकाक्ष्यादि राक्षसीभ्योऽन्याः । विकृताः विकृतवेषाः ॥ ९ ॥ निखातशिरसः गात्रान्तर्वर्तिशिरसः ॥ १० ॥ हरिकर्णीः कपिकर्णीः ॥११॥१२॥ पादे चूडिका यासां

मित्येत्यर्थः ॥ ३–५ ॥ अतिकायोत्तमाङ्गीम् अतिकायं महदुत्तमाङ्गं यस्यास्ता । तनुदीर्घशिरोधराम्, अस्थूलदीर्घकण्ठीमित्यर्थः । केशकम्बलधारिणीम्, कम्बला इव केशाः केशकम्बलाः तान् धारयितुं शीलमस्तीति तथा । लम्बकर्णललाटां लम्बे कर्णललाटे यस्यास्ताम् । चुबुकोष्ठीं चुबुके ओष्ठो यस्यास्ताम् ॥ ६ ॥ ७ ॥ कुब्जां स्थगुमतीम् । करालां दन्तुराम् । पिङ्गाक्षीमित्यन्तस्य पूर्वेण सम्बन्धः ॥ ८ ॥ विकृता इत्यादि श्लोकनवकमेकं वाक्यम् । निखातशिरसः गात्रान्तर्वर्ति शिरसः ॥ ९–१२ ॥ पादचूडिकाः पादे चूडा शिखा यासां ताः ॥ १३–१५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ताः पादचूडिकाः। " शिखा चूडा केशपाशी " इत्यमरः ॥ १२-१५ ॥ राक्षसीर्विकृताननाः इत्यत्र पुनः राक्षसीपदमविस्मरणार्थम् ॥ १६ ॥ १७ ॥ लक्ष्मीवान् सीतादर्शनजनितशोभायुक्तः ॥ १८ ॥ १९ ॥ च्युतां स्थानाच्चलिताम् । चारित्रव्यपदेशाढ्यां पतिव्रताधर्माचरणख्यातिसम्पन्नाम् । भर्तृ

अतिमात्रास्यनेत्राश्च दीर्घजिह्वानखास्तथा । अजामुखीर्हस्तिमुखीर्गोमुखीः सूकरीमुखीः ॥ १४ ॥ हयोष्ट्रखरवक्त्राश्च राक्षसीर्घोरदर्शनाः । शूलमुद्गरहस्ताश्च क्रोधनाः कलहप्रियाः ॥ १५ ॥ कराला धूम्रकेशीश्च राक्षसीर्विकृताननाः । पिबन्तीः सततं पानं सदा मांसमुराप्रियाः ॥ १६ ॥ मांसशोणितदिग्धाङ्गीर्मांसशोणितभोजनाः । ता ददर्श कपिश्रेष्ठो रोमहर्षणदर्शनाः । स्कन्धवन्तमुपासीनाः परिवार्य वनस्पतिम् ॥ १७ ॥ तस्याधस्ताच्च तां देवीं राजपुत्रीमनिन्दिताम् । लक्षयामास लक्ष्मीवान् हनुमान् जनकात्मजाम् ॥ १८ ॥ निष्प्रभां शोकसन्तप्तां मलसङ्कुलमूर्धजाम् ॥ १९ ॥ क्षीणपुण्यां च्युतां भूमौ तारां निपतितामिव । चारित्रव्यपदेशाढ्यां भर्तृदर्शनदुर्गताम् ॥ २० ॥ भूषणैरुत्तमैर्हीनां भर्तृवात्सल्यभूषणाम् । राक्षसाधिपसंरुद्धां बन्धुभिश्च विनाकृताम् ॥ २१ ॥ वियूथां सिंहसंरुद्धां बद्धां गजवधूमिव । चन्द्ररेखां पयोदान्ते शारदाभ्रैरिवावृताम् । क्लिष्टरूपामसंस्पर्शादयुक्तामिव वल्लकीम् ॥ २२ ॥ सीतां भर्तृवशे युक्तामयुक्तां राक्षसीवशे ॥ २३ ॥ अशोकवनिकामध्ये शोकसागरमाप्लुताम् । ताभिः परिवृतां तत्र सग्रहामिव रोहिणीम् ॥ २४ ॥

दर्शनेन दुर्गतां दरिद्राम्, भर्तृदर्शनरहितामित्यर्थः ॥ २० ॥ भर्तृवात्सल्यभूषणां वात्सल्यपदमत्र स्नेहमात्रवाचि ॥ २१ ॥ पयोदान्ते वर्षान्ते । चन्द्ररेखायाः स्पष्टास्पष्टत्वद्योतनायेदं विशेषणम् । असंस्पर्शात् उद्वर्तनादिसंस्काररहित्यात् । अयुक्ताम् अनारोपिततन्त्रीम् । वल्लकीं वीणाम् ॥ २२ ॥ सीता राक्षसीर्विकृताननाः इत्यत्र अपरा इति शेषः । अतो न पौनरुक्त्यम् ॥ १६-१७ ॥ तस्याधस्तादित्यारभ्य वल्लकीमिव इत्यन्तमेकं वाक्यम् ॥ १८ ॥ १९ ॥ क्षीणेति । च्युताम्, दिव इति शेषः । चारित्रव्यपदेशाढ्यां पातिव्रत्यव्रतसम्पन्नाम् । भर्तृदर्शनदुर्गतां भर्तृदर्शनहीनाम् ॥ २० ॥ २१ ॥ पयोदान्ते वर्षान्ते । असंस्पर्शात् उद्वर्तनादिसंस्काराभावात् । अयुक्ताम् अनारोपिततन्त्रीम् ॥ २२ ॥ सीतामित्यादि श्लोकद्वयमेकं वाक्यम् । रक्षसां वशे अयुक्ताम् अयोग्याम् शोकसागरमाप्लुतां

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ददर्श हनुमान् देवीं लतां कुसुमितामिव। सा मलेन च दिग्धाङ्गी वपुषा चाप्यलंकृता। मृणाली पङ्कदिग्धेव विभाति न विभाति च ॥ २५ ॥ मलिनेन तु वस्त्रेण परिक्लिष्टेन भामिनीम् ॥ २६ ॥ संवृतां मृगशावाक्षीं ददर्श हनुमान् कपिः। तां देवीं दीनवदनामदीनां भर्तृतेजसा। रक्षितां स्वेन शीलेन सीतामसितलोचनाम्॥२७॥ तां दृष्ट्वा हनुमान् सीतां मृगशावनिभेक्षणाम् ॥ २८ ॥ मृगकन्यामिव त्रस्तां वीक्षमाणां समन्ततः। दहन्तीमिव निःश्वासैर्वृक्षान् पल्लवधारिणः ॥२९॥ सङ्गतमिव शोकानां दुःखस्योर्मिमिवोत्थिताम्। तां क्षमां सुविभक्ताङ्गीं विनाभरणशोभिनीम्। प्रहर्षमतुलं लेभे मारुतिः प्रेक्ष्य मैथिलीम् ॥३०॥ हर्षजानि च सोऽश्रूणि तां दृष्ट्वा मदिरेक्षणाम्। मुमोच हनुमांस्तत्र नमश्चक्रे च राघवम् ॥ ३१ ॥ नमस्कृत्वा स रामाय लक्ष्मणाय च वीर्यवान्। सीतादर्शनसंहृष्टो हनुमान् संवृतोऽभवत् ॥ ३२ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे सप्तदशः सर्गः ॥ १७ ॥

मित्यादिपरशेषः। राक्षसीवशे अयुक्ताम् अनवस्थिताम्, तद्वचनान्यशृण्वन्तीमित्यर्थः ॥ २३ ॥ २४ ॥ लतां कुसुमितामिव तथा दर्शनीया मित्यर्थः ॥ २५ ॥ मलिनेनेत्यादिश्लोकद्वयमेकं वाक्यम् ॥२६॥२७ ॥ तामित्यादिश्लोकत्रयमेकं वाक्यम्। क्षमां क्षमामिव स्थिताम्। निर्गीर्याध्यवसाना दभेदोक्तिः। तां दृष्ट्वा तां प्रेक्ष्येत्यनयोर्विशेषणविशेष्यभेदान्न पौनरुक्त्यम्। दूरप्रयुक्तस्यानुस्मरणार्थं वा पुनरुक्तिः ॥ २८–३० ॥ हर्षजानीति। राघवं नमश्चक्रे। उपपदविभक्त्यपेक्षया कारकविभक्तेर्बलीयस्त्वान्नमस्करोति देवानित्यादाविव द्वितीया ॥ ३१ ॥ नमस्कृत्वेति। संवृतः राक्षस्यदर्शनाय शिंशुपापर्णैर्गूढोऽभूत् ॥३२॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तदशः सर्गः ॥ १७ ॥

तत्र मन्नाम् सग्रहां क्रूरग्रहाविष्टाम् ॥२३॥२४॥ लतामकुसुमामिवेति पाठः। आभरणपरिहारादिति भावः। वपुषाऽलंकृता स्वभावरमणीयेत्यर्थः। विभाति न विभाति चेति। स्वभावसौन्दर्यादसंस्काराच्चेति भावः। अत्र तां तामिति तच्छब्दावृत्त्या तत्तदवस्थाभेदस्य वर्णितत्वादपौनरुक्त्यम् ॥२५॥२६॥ भर्तृतेजसा भर्तृपराक्रमानुसन्धानेन अदीनहृदयाम् ॥२७–२९॥ दुःखस्य दुःखसागरस्य। अत्राधेयेनाधारनिगरणम्। क्षामाम् इति पाठः। क्षामां कृशाम् विनाऽऽभरणशोभिनीम् आभरणानुग्रहमन्तरेणैव स्वसौन्दर्येण शोभमानाम्॥३०॥ नमश्चक्रे च राघवमिति। भगवतो राघवस्यानुग्रहादेवेयं मया दृष्टेति पुनः पुनः स्मृत्वा नमस्कारः॥३१॥ संवृतोऽभवत् राक्षसीनां दर्शनपरिहाराय सूक्ष्मरूपमवलम्ब्य वृक्षमूलसमीपशाखासु निलीनोऽभवत् ॥३२॥ इतिं श्रीमहे० श्रीरामायण०सुन्दरकाण्डव्याख्यायां सप्तदशः सर्गः ॥१७॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तथेत्यादि । विप्रेक्षमाणस्य विचिन्वतश्च । विप्रेक्षमाणे विचिन्वति च तस्मिन्नित्यर्थः। "यस्य च भावेन०—" इत्यर्थे षष्ठी ॥१॥ विरात्रे अपररात्रे । " अहस्सर्वैकदेशसङ्ख्यातपुण्याच्च रात्रेः " इत्यत्र चकारादव्ययादुत्तरस्य रात्रिशब्दस्य समासान्तोऽच् प्रत्ययः । ब्रह्मरक्षसां ब्राह्मणत्वविशिष्ट

तथा विप्रेक्षमाणस्य वनं पुष्पितपादपम्। विचिन्वतश्च वैदेहीं किंचिच्छेषा निशाऽभवत् ॥ १ ॥ षडङ्गवेदविदुषां क्रतुप्रवरयाजिनाम् । शुश्राव ब्रह्मघोषांश्च विरात्रे ब्रह्मरक्षसाम् ॥ २ ॥ अथ मङ्गलवादित्रैः शब्दैः श्रोत्रमनोहरैः । प्राबुध्यत महाबाहुर्दशग्रीवो महाबलः ॥ ३ ॥ विबुध्य तु यथाकालं राक्षसेन्द्रः प्रतापवान् । स्रस्तमाल्याम्बरधरो वैदेहीमन्वचिन्तयत् ॥ ४ ॥ भृशं नियुक्तस्तस्यां च मदनेन मदोत्कटः । न स तं राक्षसः कामं शशाकात्मनि गूहितुम् ॥ ५ ॥ स सर्वाभरणैर्युक्तो बिभ्रच्छ्रियमनुत्तमाम् । तां नगैर्बहुभिर्जुष्टां सर्वपुष्पफलोपगैः ॥ ६ ॥ वृतां पुष्करिणीभिश्च नानापुष्पोपशोभिताम् । सदामदैश्च विहगैर्विचित्रां परमाद्भुताम् ॥ ७ ॥

रक्षसाम् । ब्रह्मघोषान् वेदघोषान् ॥ २–४ ॥ नियुक्तः प्रेरितः ॥ ५–७ ॥

तथेति । किञ्चिच्छेषा अपरयाममात्रशेषा । विचिन्वतः तस्याः स्पष्टदर्शनाय राक्षसीनिद्रारूपमवसरमन्वेषयतः ॥१॥ षडङ्गानि शिक्षादीनि । विरात्रेः विपर्यस्त रात्रेः, अपररात्र इत्यर्थः । अस्मिन् ब्रह्मरक्षसां ब्राह्मणत्वविशिष्टराक्षसानाम् ॥ २ ॥३॥ निद्रावशादेव स्रस्तमाल्याम्बरधरः ॥४॥ नियुक्तः प्रेरितः वस्तुतस्तु मदने सत्यपि मदेनोत्कटो न अत एव तस्यां सीतायां नियुक्तः नितरां युक्तः, विनीत इत्यर्थः । अत एव राक्षसः तं काममात्मनि गूहितुं न शशाकेति काकुः॥ ५–७ ॥

तिल०—भृशं नियुक्तः गूढाभिनिवेशचित्तः । कामं कामवेगम् । इदंशेषु तीर्थेस्यान्यथायोजनं आन्त्यैव । रक्षसस्तमोगुणाविष्टस्य भगवन्मायामोहितस्याकृत्येष्वेव प्रवृत्तेः । तथा क्रियमाण भगवद्ध्यानमपि पाप भोगोत्तरं जन्मान्तरे उत्तमफलायेति बोध्यम् । अत एव ऋक्षाश्वमेधनाम्नो राज्ञो दानस्तावककङ्कमन्त्रः—" न युष्मे वाजबन्धवो निनित्सुश्च न मर्त्यः । अवद्यमपि दीधरत् " इति । अस्यार्थः—वाजमित्यन्ननाम, अन्न दानेन ये सर्वेषां बन्धवस्तेषां सम्बोधनम् । हे वाजबन्धवः ! युष्मे युष्मासु । अधिस्सप्तम्यर्थानुवादी । निनित्सुश्च निन्दनेच्छाशीलोपि मर्त्यः अवद्यं न दीधरत् न धारयति । भवदनुसन्धानेनैव निष्पापत्वादिति । एवञ्च भगवतो निन्दाबरुद्धभावेन ध्यानमपि नरकभोगोत्तरं जन्मान्तरे उत्तमफलाय, अत एवास्य मरणोत्तरं चतुर्थचतुर्युग्यां चेदिराजकुले जन्म, चतुर्विंशतिचतुर्युग्यां रामावतार इति हरिवंशोक्तेः । तावत्पर्यन्तं चैतत्पापफल भोग इत्यर्थायतमिति बोध्यम् ॥ ५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वीथीः उद्यानवीथीः ॥ ८ ॥ ९ ॥ महेन्द्रं देवगन्धर्वयोषित इव व्रजन्तं तम् अङ्गनाशतमात्रम् अनुव्रजत् अन्वव्रजत् ॥ १० ॥ तालवृन्तानि व्यजनानि ॥ ११ ॥ भृङ्गारैः कनकालुकाभिः । " भृङ्गारः कनकालुका " इत्यमरः । मण्डलाग्रान् असिविशेषान् । " मण्डलाग्रो नतार्थकः " इति वैजयन्ती ।

ईहामृगैश्च विविधैर्जुष्टां दृष्टिमनोहरैः । वीथीः संप्रेक्षमाणश्च मणिकाञ्चनतोरणाः ॥ ८ ॥ नानामृगगणाकीर्णां फलैः प्रपतितैर्वृताम् । अशोकवनिकामेव प्राविशत् सन्ततद्रुमाम् ॥ ९ ॥ अङ्गनाशतमात्रं तु तं व्रजन्तमनुव्रजत् । महेन्द्रमिव पौलस्त्यं देवगन्धर्वयोषितः॥ १०॥ दीपिकाः काञ्चनीः काश्चिज्जगृहुस्तत्र योषितः । वालव्यजनहस्ताश्च तालवृन्तानि चापराः ॥ ११ ॥ काञ्चनैरपि भृङ्गारैर्जहुः सलिलमग्रतः । मण्डलाग्रान् बृसीं चैव गृह्यान्याः पृष्ठतो ययुः ॥ १२ ॥ काचिद्रत्नमयीं स्थालीं पूर्णां पानस्य भामिनी । दक्षिणा दक्षिणेनैव तदा जग्राह पाणिना ॥ १३ ॥ राजहंसप्रतीकाशं छत्रं पूर्णशशिप्रभम् । सौवर्णदण्डमपरा गृहीत्वा पृष्ठतो ययौ ॥ १४ ॥ निद्रामदपरीताक्ष्यो रावणस्योत्तमाः स्त्रियः । अनुजग्मुः पतिं वीरं घनं विद्युल्लता इव ॥ १५ ॥ व्याविद्धहारकेयूराः समामृदितवर्णकाः । समागलितकेशान्ताः सस्वेदवदनास्तथा ॥ १६ ॥ घूर्णन्त्यो मदशेषेण निद्रया च शुभाननाः । स्वेदक्लिष्टाङ्गकुसुमाः सुमाल्याकुलमूर्धजाः॥ १७॥ प्रयान्तं नैर्ऋतपतिं नार्यो मदिरलोचनाः । बहुमानाच्च कामाच्च प्रिया भार्यास्तमन्वयुः॥ १८

बृसीम् आस्तरणम् । गृह्य गृहीत्वा ॥ १२ ॥ काचिदिति । पानस्य पूर्णां पीयत इति पानं मधु तस्य पूर्णां तेन पूर्णाम् । "पूरणगुण०—" इत्यादिना सुहितार्थयोगे षष्ठीसमासनिषेधज्ञापकादत्र षष्ठी । स्थालीं पात्रीम् ॥ १३–१५ ॥ व्याविद्धेति । व्याविद्धाः व्यत्यस्ततया न्यस्ताः । समामृदित वर्णकाः सम्मृष्टानुलेपनाः । " अङ्गरागः समालम्भो वर्णकश्च विलेपनम् " इति निघण्टुः ॥ १६–१८ ॥

वीथीः अशोकवनिकामार्गगमनवीथीः ॥ ८ ॥ ९ ॥ अङ्गनेति । अनुव्रजत् । अडभाव आर्षः ॥ १० ॥ दीपिकाः काञ्चनीः काञ्चनदण्डारोपितदीपिकाः ॥ ११ ॥ काञ्चनैः भृङ्गारैः कनकालुभिः । भृङ्गाराः धुत्तूरकुसुमसदृशजलपात्राणि । गृह्य गृहीत्वा ॥ १२ ॥ काचिदिति । पानेन पूर्णाम् ॥ १३–१५ ॥ समामृदितवर्णकाः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मदेनाञ्चिता गतिर्यस्य स मदाञ्चितगतिः ॥ १९ ॥ २० ॥ तं चेत्यादि । द्वारदेशम् अशोकवनद्वारदेशम् ॥ २१ ॥ गन्धतैलं गन्धवासित तैलम् ॥ २२ ॥ समक्षं प्रत्यक्षम् । अपविद्धशरासनम् अधृतशरासनम् ॥ २३ ॥ मथितामृतफेनाभं मथितं तक्रम् अमृतं धारोष्णं तयोर्यत् फेनं तदाभम् । " निरम्बु बोलं मथितं धारोष्णं त्वमृतं पयः " इत्युभयत्र वैजयन्ती । विमुक्तं स्वस्थानात्प्रचलितम् अङ्गदे सक्तं वस्त्रं सलीलं यथा भवति

स च कामपराधीनः पतिस्तासां महाबलः । सीतासक्तमना मन्दो मदाञ्चितगतिर्बभौ ॥ १९ ॥ ततः काञ्चीनिनादं च नूपुराणां च निःस्वनम् । शुश्राव परमस्त्रीणां स कपिर्मारुतात्मजः ॥ २० ॥ तं चाप्रतिमकर्माणमचिन्त्यबल पौरुषम् । द्वारदेशमनुप्राप्तं ददर्श हनुमान् कपिः ॥ २१ ॥ दीपिकाभिरनेकाभिः समन्तादवभासितम् । गन्धतैलाव सिक्ताभिर्ध्रियमाणाभिरग्रतः ॥ २२ ॥ कामदर्पमदैर्युक्तं जिह्मताम्रायतेक्षणम् । समक्षमिव कन्दर्पमपविद्धशरासनम् ॥ २३ ॥ मथितामृतफेनाभमरजो वस्त्रमुत्तमम् । सलीलमनुकर्षन्तं विमुक्तं सक्तमङ्गदे ॥ २४ ॥ तं पत्रविटपे लीनः पत्रपुष्पघनावृतः । समीपमिव संक्रान्तं निध्यातुमुपचक्रमे ॥ २५ ॥ अवेक्षमाणस्तु ततो ददर्श कपिकुञ्जरः । रूपयौवनसम्पन्ना रावणस्य वरस्त्रियः॥२६॥ ताभिः परिवृतो राजा सुरूपाभिर्महायशाः । तन्मृगद्विजसंघुष्टं प्रविष्टः प्रमदावनम् ॥ २७ ॥ क्षीबो विचित्राभरणः शङ्कुकर्णो महाबलः । तेन विश्रवसः पुत्रः स दृष्टो राक्षसाधिपः ॥२८॥

तथा अनुकर्षन्तमित्यन्वयः ॥२४॥ तामिति । पत्रविटपे पत्रवति विटपे । लीनः छन्नः । पत्रपुष्पघनावृतः पत्रपुष्पसमूहावृतः । इवशब्दो वाक्यालङ्कारे । यद्वा दूरे समागतमपि तेजसा समीपे संक्रान्तमिव स्थितम् । तं निध्यातुं द्रष्टुमुपचक्रमे । "निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम्" इत्यमरः ॥२५॥२६॥ प्रमदावनम् अन्तःपुरोद्यानम् ॥ २७ ॥ क्षीब इति । क्षीबः मत्तः । शङ्कुकर्णः गर्वेण स्तब्धकर्ण इत्यर्थः ॥ २८॥ २९ ॥

सम्यगामृष्टाङ्गरागाः ॥ १६–१८ ॥ मन्दो दुर्मतिः । मन्दं यथा तथा अञ्चिता गतिर्यस्य ॥ १९ ॥ २० ॥ द्वारदेशम् अशोकवनिकाप्राकारदेशम् ॥ २१ ॥ २२ ॥ अपविद्धशरासनं त्यक्तेक्षुचापम् । समक्षं प्रत्यक्षं कन्दर्पमिव स्थितम् ॥ २३ ॥ सलीलमनुकर्षन्तमिति । विमुक्तं स्वस्थानाच्चलितम् ॥ २४ ॥ पत्रविटपे पत्रबहुल विटपे । निध्यातुमीक्षितुम् ॥ २५ ॥ २६ ॥ ताभिरिति । प्रमदावनं प्रमदानां वनम् ॥ २७ ॥ क्षीबो मत्तः ॥ २८ ॥ २९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अवप्लुतः अवरूढः । रावणचेष्टास्सर्वा द्रष्टुं पूर्वस्थानादधःशाखां समाश्रित इत्यर्थः ॥ ३० ॥ सः हनुमान् । तथा पूर्वोक्तरीत्या । उग्रतेजास्सन्नपि । तस्य रावणस्य । तेजसा निर्धूतः सन् । पत्रगुह्यान्तरे पत्रगूढप्रदेशे । संवृतोऽभवत् गूढोऽभवत् ॥ ३१ ॥ ३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टादशः सर्गः ॥ १८ ॥ तस्मिन्नित्यादिश्लोकद्वयमेकान्वयम् । ततः रावणागमना

वृतः परमनारीभिस्ताराभिरिव चन्द्रमाः । तं ददर्श महातेजास्तेजोवन्तं महाकपिः ॥२९॥ रावणोऽयं महाबाहुरिति संचिन्त्य वानरः । अवप्लुतो महातेजा हनुमान् मारुतात्मजः ॥३०॥ स तथा प्युग्रतेजाः सन् निर्धूतस्तस्य तेजसा । पत्रगुह्यान्तरे सक्तो हनुमान् संवृतोऽभवत् ॥३१॥ स तामसितकेशान्तां सुश्रोणीं संहतस्तनीम् । दिदृक्षुरसितापाङ्गा मुपावर्तत रावणः ॥३२॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे अष्टादशः सर्गः ॥१८॥

तस्मिन्नेव ततः काले राजपुत्री त्वनिन्दिता । रूपयौवनसम्पन्नं भूषणोत्तमभूषितम् ॥१॥ ततो दृष्ट्वैव वैदेही रावणं राक्षसाधिपम् । प्रावेपत वरारोहा प्रवाते कदली यथा ॥ २ ॥ आच्छाद्योदरमूरुभ्यां बाहुभ्यां च पयोधरौ । उप विष्टा विशालाक्षी रुदन्ती वरवर्णिनी ॥ ३ ॥ दशग्रीवस्तु वैदेहीं रक्षितां राक्षसीगणैः । ददर्श सीतां दुःखार्तां नावं सन्नामिवार्णवे ॥ ४ ॥ असंवृतायामासीनां धरण्यां संशितव्रताम् । छिन्नां प्रपतितां भूमौ शाखामिव वनस्पतेः ॥ ५ ॥ मलमण्डनचित्राङ्गीं मण्डनार्हाममण्डिताम् । मृणाली पङ्कदिग्धेव विभाति न विभाति च ॥ ६ ॥

नन्तरम् । तस्मिन्नेव काले तदागमनानन्तरकाल एव । भूषणोत्तमभूषितं रूपयौवनसम्पन्नं रावणं ततो दृष्ट्वैव तत्र दूरदेश एव दृष्ट्वा प्रावेपतेति संबन्धः ॥ १--५ ॥ मलमण्डनचित्राङ्गीं मलरूपमण्डनेन चित्राङ्गीम्, मलावृतामप्याश्चर्यावहदेहामित्यर्थः । मृणाली पङ्कदिग्धेवेत्यत्र येत्यध्याहार्यम् ॥ ६-८ ॥

अवप्लुतः रावणरूपचेष्टितावलोकनार्थमग्रविटपारूढ इत्यर्थः ॥ ३० ॥ पत्रगुह्यान्तरे पत्रगूढप्रदेशे ॥ ३१ ॥ उपावर्तत समीपं प्राप्तः ॥ ३२ ॥ इति श्रीमहेश्वरतीर्थ विरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायामष्टादशः सर्गः ॥ १८ ॥ तस्मिन्नित्यादिश्लोकद्वयमेकं वाक्यम् । तस्मिन्नेव काले आगमनकाल एव । तं रावणम् ॥ १ ॥ ततो दृष्ट्वा तत्र दूरदेशे एव दृष्ट्वा । ततः दर्शनानन्तरं प्रावेपतेति सम्बन्धः ॥ २ ॥ रुदन्ती उपविष्टाऽभूत । भीतस्वभावोक्त्या स्वभावोक्तिरत्रालङ्कारः ॥३॥ दशग्रीव इति । सन्नां शीर्णाम् नावम् ॥ ४ ॥ संशितव्रताम् अतितीक्ष्णव्रताम् । मलमण्डनचित्राङ्गीं मलमेव मण्डनं तेन चित्राङ्गीं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

आविष्टां मणिमन्त्राद्यभिभूताम् । धूप्यमानां सन्तप्यमानाम् । धूमः केतुरिव धूमकेतुः, केतुना ग्रहेणेत्यर्थः । यद्वा ग्रहेण ग्राहकेण आच्छादके नेति धूमकेतुर्विशिष्यते ॥ ९ ॥ वृत्तेति । वृत्तं दृढं शीलं स्वभावो यस्य तत् तच्च तत् कुलं च तस्मिन् । आचारवति समयाचारवति । धार्मिके यज्ञादिधर्मप्रधाने एवंभूते कुले जाताम् । संस्कारमापन्नां विवाहरूपसंस्कारमापन्नाम् । अतः संस्कारद्वारा दुष्कुले पुनर्जातामिव स्थिताम् । कुमाराणा

समीपं राजसिंहस्य रामस्य विदितात्मनः । सङ्कल्पहयसंयुक्तैर्यान्तीमिव मनोरथैः ॥ ७ ॥ शुष्यन्तीं रुदतीमेकां ध्यानशोकपरायणाम् । दुःखस्यान्तमपश्यन्तीं रामां राममनुव्रताम् ॥८॥ वेष्टमानां तथाऽऽविष्टां पन्नगेन्द्रवधूमिव । धूप्यमानां ग्रहेणेव रोहिणीं धूमकेतुना ॥९॥ वृत्तशीलकुले जातामाचारवति धार्मिके । पुनः संस्कारमापन्नां जातामिव च दुष्कुले ॥१०॥ अभूतेनापवादेन कीर्तिं निपतितामिव । आम्नायानामयोगेन विद्यां प्रशिथिलामिव ॥ ११ ॥ सन्नामिव महाकीर्तिं श्रद्धामिव विमानिताम् । पूजामिव परिक्षीणामाशां प्रतिहतामिव ॥ १२॥ आयतीमिव विध्वस्ता माज्ञां प्रतिहतामिव । दीप्तामिव दिशं काले पूजामपहृतामिव ॥ १३ ॥

मुपनयनमिव कुमारीणां विवाहो द्वितीयं जन्म । "वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृतः" इति स्मृतेः ॥ १० ॥ ११ ॥ सन्नां क्षीणाम् । श्रद्धामिव विमानिताम् अवमानितामित्यर्थः । अवमाने हि कृते अवमन्तरि श्रद्धा मन्दीभवति । पूजामिव परिक्षीणां स्वल्पपूजाद्रव्यामित्यर्थः । प्रतिहतां निष्फलाम् ॥१२॥ आयतीं धनलाभम् । विध्वस्तां मन्दीभूताम् । प्रतिहताम् अननुष्ठिताम् । दीप्तां दाहयुक्ताम् । काले उत्पातकाले । पूजामपहृतामिव ।

कर्बुरगात्रीम्, तां ददर्शेति पूर्वेण सम्बन्धः॥ ५ ॥ ६ ॥ सङ्कल्पहयसंयुक्तैः सङ्कल्पाः एवमेवं करिष्यामीति विचाराः, त एव हयाः तत्संयुक्तैः मनोरथैः रामस्य समीपं यान्तीं गतामिव स्थिताम् ॥ ७ ॥ ८ ॥ आविष्टां मणिमन्त्रादिभिरभिभूताम् । धूप्यमानां सन्तप्यमानाम् ॥ ९ ॥ वृत्तशीलकुले जातां वृत्तं मर्यादानुल्लङ्घनम्, शीलं तत्स्वभावः । आचारवति विहितकर्मानुष्ठानवति । दुष्कुले संस्कारमापन्नां दुष्कुले पाणिग्रहणलक्षणं संस्कारं प्राप्ताम् अत एव दुष्कुले पुनर्जातामिव विवाहलक्षणं द्वितीयं जन्म गताम्, सत्कुलप्रसूतां दुष्कुलोढामित्यर्थः । स्त्रीणां विवाहस्योपनयनस्थानत्वात्तदेव द्वितीयं जन्मेति भावः ॥ १० ॥ ११ ॥ सन्नां क्षीणाम् । विमानिताम् अनादृताम् ॥ १२ ॥ आयतीमागामिफलम् । दीप्तां दह्यमानाम् । काले उत्पातकाले ॥ १३ ॥ १४ ॥

स०—धार्मिके एतादृशे पितृकुले जाता । सैव दुष्कुले वृत्तादिरहिते विवाहाख्यसंस्कारेण पुनर्जाता चेत्सा यथा वर्तेत तथा विद्यमानाम् ॥ १० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अत्र पूजाशब्देन पूजाद्रव्यमुच्यते ॥ १३ ॥ विध्वस्तां हिमादिहताम् । तमोध्वस्तां तमस्संवृताम् । उपक्षीणां स्वल्पजलामित्यर्थः ॥ १४ ॥ परामृष्टां, शूद्रादिभिरिति शेषः ॥ १५ ॥ उत्कृष्टपर्णकमलाम् उद्धृतपत्रकमलाम् ॥ १६ ॥ विस्रावितां रोधोभङ्गादिना अन्यनिर्गमितजलामित्यर्थः । मृजया उद्वर्तनाद्यङ्गशोधनेन ॥ १७ ॥ सुजाताङ्गीं सुन्दराङ्गीम् ॥ १८ ॥ आलितां बद्धाम् ॥ १९ ॥ २० ॥ अल्पाहारां तोयमात्राहारामित्यर्थः । यद्वा

पद्मिनीमिव विध्वस्तां हतशूरां चमूमिव । प्रभामिव तमोध्वस्तामुपक्षीणामिवापगाम् ॥ १४ ॥ वेदीमिव परामृष्टां शान्तामग्निशिखामिव । पौर्णमासीमिव निशां राहुग्रस्तेन्दुमण्डलाम् ॥ १५ ॥ उत्कृष्टपर्णकमलां वित्रासित विहङ्गमाम् । हस्तिहस्तपरामृष्टामाकुलां पद्मिनीमिव ॥ १६ ॥ पतिशोकातुरां शुष्कां नदीं विस्रावितामिव । परया मृजया हीनां कृष्णपक्षनिशामिव ॥ १७ ॥ सुकुमारीं सुजाताङ्गीं रत्नगर्भगृहोचिताम् । तप्यमानामिवोष्णेन मृणालीमचिरोद्धृताम् ॥ १८ ॥ गृहीतामालितां स्तम्भे यूथपेन विनाकृताम् । निःश्वसन्तीं सुदुःखार्तां गजराजवधूमिव ॥ १९ ॥ एकया दीर्घया वेण्या शोभमानामयत्नतः । नीलया नीरदापाये वनराज्या महीमिव ॥ २० ॥ उपवासेन शोकेन ध्यानेन च भयेन च । परिक्षीणां कृशां दीनामल्पाहारां तपोधनाम् ॥२१॥ आयाचमानां दुःखार्तां प्राञ्जलिं देवतामिव । भावेन रघुमुख्यस्य दशग्रीवपराभवम् ॥ २२ ॥

अल्पाहारां मितभोजिनीमित्युत्तमस्त्रीलक्षणमुच्यते ॥ २१ ॥ आयाचमानामिति । रघुमुख्यस्य कर्तुः दशग्रीवपराभवं भावेन मनसा आयाचमानां प्रार्थयन्तीमिव स्थिताम् ॥ २२ ॥

परामृष्टाम् अपवित्रैरुपहताम् ॥ १५ ॥ उत्कृष्टपर्णकमलाम् उद्धृतपत्रपद्माम् ॥ १६ ॥ विस्रावितां रोधोभङ्गादिना निर्जलीकृताम् । मृजया उद्वर्तनाद्यङ्गपरिशोधनेन ॥ १७ ॥ १८ ॥ आलितां बद्धाम् ॥ १९–२१ ॥ आयाचमानामिति । प्राञ्जलिं बद्धाञ्जलिम् । रघुमुख्यस्य कर्तुः दशग्रीवविषयकपराभवं भावेन मनसा देवता

स०—शोकेन रामविश्लेषजेन । ध्यानेन पत्युः। भयेन रावणजन्येन । अल्पाहारां पत्युरुच्छिष्टं विनाऽन्यस्य स्वीकारायोग्यत्वाच्छरीरयात्रार्थं नीरस्याशितानशितत्वोक्तेस्तद्ग्रहणस्यादोषत्वात्। पत्युर्नाराय[illegible]तत्र तत्सान्निध्यविशेषात्तद्ग्रहो युक्तः । उपेन्द्रावतारत्वाद्रामस्य, इन्द्रस्य तदग्रजत्वात्तदत्तपायसाशनं गौरवतः स्वान्नत्वाच्च भोजनं युक्तमिति मन्तव्यम् ॥ २१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

समीक्षमाणां रक्षकं समीक्षमाणाम् । सुपक्ष्मेति अन्ते ताम्रं मध्ये शुक्लमस्या लोचनमित्युच्यते ॥ २३ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायण भूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकोनविंशः सर्गः ॥ १९ ॥ स तामित्यादि । साकारैः सेङ्गितैः । " आकाराविङ्गिताकृती "इत्यमरः ।

समीक्षमाणां रुदतीमनिन्दितां सुपक्ष्मताम्रायतशुक्ललोचनाम् । अनुव्रतां राममतीव मैथिलीं प्रलोभयामास वधाय रावणः ॥ २३ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

स तां पतिव्रतां दीनां निरानन्दां तपस्विनीम् । साकारैर्मधुरैर्वाक्यैर्न्यदर्शयत रावणः ॥ १ ॥ मां दृष्ट्वा नाग नासोरु गूहमाना स्तनोदरम् । अदर्शनमिवात्मानं भयान्नेतुं त्वमिच्छसि ॥ २ ॥ कामये त्वां विशालाक्षि बहु मन्यस्व मां प्रिये । सर्वाङ्गगुणसम्पन्ने सर्वलोकमनोहरे ॥ ३ ॥ नेह केचिन्मनुष्या वा राक्षसाः कामरूपिणः । व्यप सर्पतु ते सीते भयं मत्तः समुत्थितम् ॥ ४ ॥ स्वधर्मो रक्षसां भीरु सर्वथैव न संशयः । गमनं वा परस्त्रीणां हरणं संप्रमथ्य वा॥५॥ एवं चैतदकामां तु न त्वां स्प्रक्ष्यामि मैथिलि । काम कामः शरीरे मे यथाकामं प्रवर्तताम्॥६॥

न्यदर्शयत, स्वाभिप्रायमिति शेषः । सीतायै स्वाभिप्रायं प्रकाशितवानित्यर्थः ॥ १ ॥ अदर्शनं अदृश्यत्वम ॥ २ ॥ मां दृष्ट्वा भीतिर्न कर्तव्येत्याह– कामय इति ॥ ३ ॥ अन्ये च भयहेतवोऽत्र न सन्तीत्याह–नेहेति ॥ ४ ॥ परदारेच्छादोष इत्याशङ्क्याह–स्वधर्म इति । संप्रमथ्य बलात्कृत्य । कामम्

मायाचमानामिव प्रार्थयन्तीमिवेति सम्बन्धः ॥२२॥२३॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायामेकोनविंशः सर्गः ॥ १९ ॥

स इति । साकारैः साभिप्रायैः, सेङ्गितैरित्यर्थः । न्यदर्शयत, स्वाभिप्रायमिति शेषः ॥ १ ॥ अदर्शनम् अदृश्यत्वम् । भयादिव नेतुं नाययितुम् । वस्तुतस्तु पुत्रसमभृत्यदर्शनविषये भयादिकं नोचितमिति भावः ॥ २ ॥ कामय इति । वस्तुतस्तु–त्वां कामये, ईश्वरीत्वेनेति शेषः । अतो मां बहुमन्यस्व ॥ ३ ॥ नेहेति । मनुष्या राक्षसा वा, त्वद्भयकर्तार इति शेषः । वस्तुतस्तु–सर्वेश्वर्यास्तव न कुत्रापि भयशङ्केति भावः ॥ ४ ॥ यद्यपि परदाराभिमर्शः स्वधर्मः तथापि नाहं त्वामकामयमानां स्प्रक्ष्यामीत्याह–स्वधर्म इत्यादिश्लोकद्वयेन । काममत्यर्थम् । यथाकामं यथेच्छं मे शरीरे कामः, तवेति शेषः । मयि तव इच्छा प्रवर्ततामिति भावः । स्वधर्म इत्यादिश्लोकद्वयस्य वास्तवार्थस्तु–कामुकः त्वं न विश्वसनीय इत्यत आह–स्वधर्म इत्यादि । यद्यपि रक्षसां परदाराहरणादिः स्वधर्मः स्वभावः । मे

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अत्यन्तम् । यथाकामं यथेच्छम् ॥ ५ ॥ ६ ॥ देवीति । प्रणयस्व स्नेहं कुरु ॥७॥ एकवेणीति । एकवेणी असीमन्तितवेणी । धराशय्या भूशयनम् । औपयिकानि युक्तानि । " युक्तमौपयिकम् " इत्यमरः ॥ ८–१० ॥ स्त्रीरत्नमिति । मां प्राप्य हीति । हिः पादपूरणे अप्यर्थो वा । हे सुविग्रहे मां

देवि नेह भयं कार्यं मयि विश्वसिहि प्रिये । प्रणयस्व च तत्त्वेन मैवं भूः शोकलालसा ॥ ७ ॥ एकवेणी धराशय्या ध्यानं मलिनमम्बरम् । अस्थानेऽप्युपवासश्च नैतान्यौपयिकानि ते ॥ ८ ॥ विचित्राणि च माल्यानि चन्दना न्यगुरूणि च । विविधानि च वासांसि दिव्यान्याभरणानि च ॥९॥ महार्हाणि च पानानि शयनान्यासनानि च । गीतं नृत्त च वाद्यं च लभ मां प्राप्य मैथिलि ॥ १० ॥ स्त्रीरत्नमसि मैवं भूः कुरु गात्रेषु भूषणम् । मां प्राप्य हि कथं नु स्यास्त्वमनर्हा सुविग्रहे ॥ ११ ॥ इदं ते चारु संजातं यौवनं व्यतिवर्तते । यदतीतं पुनर्नैति स्रोतः शीघ्रमपामिव ॥ १२ ॥ त्वां कृत्वोपरतो मन्ये रूपकर्ता स विश्वसृक् । न हि रूपोपमा त्वन्या तवास्ति शुभदर्शने ॥ १३ ॥

प्राप्यापि कथमनर्हा स्याः ॥ ११ ॥ १२ ॥ उपरतः निवृत्तः । अत्र इतिकरणं द्रष्टव्यम् । उत्तरोत्तरं सातिशयं रूपं सिसृक्षुर्विधाता त्वां सृष्ट्वा इतःपरं सातिशयं रूपं स्रष्टुं न शक्यत इति धिया सृष्टेरुपरत इति मन्य इत्यर्थः ॥ १३ ॥

शरीरे काममत्यर्थम् यथाकामं यथेच्छं कामः प्रवर्ततां नाम मन्मथविकारोऽस्तु नाम, तथाप्येतत्सर्वं ममेष्टदेवतायां त्वयि न घटत इति शेषः । अत एव अकामां मयि भृत्यत्वकामनारहिताम् । यद्वा अकामां विष्णुकामां त्वां न स्पक्ष्यामि त्वदाज्ञां विना पूजां कर्तुमपि बिभेमीति शेषः ॥ ५ ॥ ६ ॥ देवीति । प्रणयस्व प्रसीद ॥ ७ ॥ एकेति । धराशय्या भूशयनम् । नौपयिकानि न युक्तानि ॥ ८ ॥ विचित्राणीत्यादिः स्पष्टार्थः । वस्तुतस्तु–विचित्राणीत्यादिश्लोकद्वयमेकं वाक्यम् । मां प्राप्य, भृत्यत्वेनेति शेषः । माल्यादीनि लभ प्राप्नुहीति सम्बन्धः ॥ ९॥ १० ॥ स्त्रीरत्नमिति । मां प्राप्य हि प्राप्यापि भूषणादीनामनर्हा स्या इति सम्बन्धः॥११॥ इदमिति । यदिदं ते सञ्जातं यौवनं तत् व्यतिवर्तते अतिक्रम्य गच्छति । अतीतं न पुनरेति । अतो भुङ्क्ष्व भोगानिति शेषः । वस्तुतस्तु–त्वत्पूजाक्षमं मदीयमायुः व्यर्थं गच्छतीति खिद्यति–इदं ते इति । ते तव भृत्यस्य, ममेति शेषः । यौवनं दाढर्यावस्था यद् यतो भृत्यस्य ममायुः व्यर्थं गच्छति, अतो मम तव पूजार्थमनुज्ञां देहीति शेषः ॥१२॥ रूपकर्ता दिव्यरूपस्रष्टा त्वां कृत्वा निर्माय उपरतो दिव्यरूपनिर्माणाद्विरत इति मन्ये । उत्प्रेक्षायां हेतुः हि यतः तव रूपोपमा नास्ति यदि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्वामिति । कः अतिवर्तेत ? न कोऽपीत्यर्थः ॥ १४–१९ ॥ असकृदिति । विमृदितध्वजाः भग्नध्वजाः । प्रत्यनीकेषु शत्रुषु मध्ये ॥ २० ॥ इच्छयेति ।

त्वां समासाद्य वैदेहि रूपयौवनशालिनीम् । कः पुमानतिवर्तेत साक्षादपि पितामहः ॥ १४ ॥ यद्यत् पश्यामि ते गात्रं शीतांशुसदृशानने । तस्मिंस्तस्मिन् पृथुश्रोणि चक्षुर्मम निबद्ध्यते ॥ १५ ॥ भव मैथिलि भार्या मे मोहमेनं विसर्जय । बह्वीनामुत्तमस्त्रीणामाहृतानामितस्ततः । सर्वासामेव भद्रं ते ममाग्रमहिषी भव ॥ १६ ॥ लोकेभ्यो यानि रत्नानि सम्प्रमथ्याहृतानि वै । तानि मे भीरु सर्वाणि राज्यं चैतदहं च ते ॥ १७ ॥ विजित्य पृथिवीं सर्वां नानानगरमालिनीम् । जनकाय प्रदास्यामि तव हेतोर्विलासिनि ॥ १८ ॥ नेह पश्यामि लोकेऽन्यं यो मे प्रतिबलो भवेत् । पश्य मे सुमहद्वीर्यमप्रतिद्वन्द्वमाहवे ॥ १९ ॥ असकृत् संयुगे भग्ना मया विमृदितध्वजाः । अशक्ताः प्रत्यनीकेषु स्थातुं मम सुरासुराः ॥ २० ॥ इच्छया क्रियतामद्य प्रतिकर्म तवोत्तमम् ॥ २१ ॥ सप्रभाण्यवसज्यन्तां तवाङ्गे भूषणानि च । साधु पश्यामि ते रूपं संयुक्तं प्रतिकर्मणा ॥ २२ ॥

प्रतिकर्म अलङ्कारः । " प्रतिकर्म प्रसाधनम् " इत्यमरः । अवसज्यन्ताम् अर्प्यन्ताम् । प्रतिकर्मणा संयुक्तं पश्यामि पश्येयम् ॥ २१ ॥ २२ ॥

पुनः स उत्तमरूपनिर्माणे यतेत न तथापि तवोपमेत्याशयः ॥ १३ ॥ त्वामिति । नातिवर्तेत न क्षुभ्येत । कः पुमानतिवर्तेत इति पाठे न कोप्यतिक्रमेतेत्यर्थः । वस्तुतस्तु-मदाराधने तव बुद्धिः कथं स्यादत आह–त्वामिति । त्वां लक्ष्मीम् " सीता लक्ष्मीर्भवान् विष्णुः " इति वक्ष्यमाणत्वात् । समासाद्य साक्षात्पितामहोऽपि नातिवर्तेत अनाराधितुं न शक्नुयात् पुमांस्तु को वा अतिवर्तेतेत्यर्थः ॥ १४ ॥ यद्यदिति । गात्रम् अवयवविशेषम् । तस्मिंस्तस्मिन् अवयवविशेषे चक्षुर्निबध्यते इष्ट देवतायास्तव दर्शनस्य मुक्तिसाधकत्वादिति भावः ॥ १५ ॥ भवेति प्रकृतार्थः स्पष्टः । वस्तुतस्तु–भवेति । मैथिली भार्या मया कान्त्या आर्या श्रेष्ठा भव एतं मोहं मयि शत्रुत्वशङ्कां विसर्जय । मे मम उत्तमस्त्रीणां मम या अग्रमहिषी मन्दोदरी तस्याश्च मम च भव, ईश्वरीति शेषः ॥ १६ ॥ लोकेभ्य इत्यस्य वास्तवार्थस्तु–इष्टदेवतायै देव्यै रावणः स्वात्मात्मीयसमर्पणं करोति–लोकेभ्य इति श्लोकद्वयेन । अहमित्यनेनात्मसमर्पणम् । रत्नानीत्यादिना आत्मीयसमर्पणमिति ज्ञेयम् ॥ १७ ॥ तव हेतोः त्वत्प्रीत्यर्थम् ॥ १८ ॥ प्रतिबलो युद्धे जेता ॥ १९ ॥ प्रत्यनीकेषु शत्रुषु ॥ २० ॥ इच्छयेति । वस्तुतस्तु–मां लक्ष्मीम्, सम्पदमित्यर्थः ॥ २१ ॥ प्रतिकर्मणा युक्तं ते रूपं पश्यामि । भाविकमत्रालङ्कारः ॥ २२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रतिकर्मेति । दाक्षिण्येन सरलत्वेन । भुङ्क्ष्व अनुभव । "दक्षिणे सरलोदारौ" इत्यमरः ॥२३॥ यथेष्टमिति । ललस्व प्रीतिं कुरु । "ल ईप्सायाम्" इति धातुः ॥ २४ ॥ २५ ॥ रामानु०—ऋद्धिमित्यादि । ऋद्धिं संपदम् । श्रियं भाम् ॥ २५ ॥ एवमात्मानं प्रशस्य रामं निन्दति—किं करिष्यसीत्यादिना । निक्षिप्त

प्रतिकर्माभिसंयुक्ता दाक्षिण्येन वरानने। भुङ्क्ष्व भोगान् यथाकामं पिब भीरु रमस्व च ॥२३॥ यथेष्टं च प्रयच्छ त्वं पृथिवीं वा धनानि च। ललस्व मयि विस्रब्धा धृष्टमाज्ञापयस्व च। मत्प्रसादाल्ललन्त्याश्च ललन्तां बान्धवास्तव ॥ २४ ॥ ऋद्धिं ममानुपश्य त्वं श्रियं भद्रे यशश्च मे ॥ २५ ॥ किं करिष्यसि रामेण सुभगे चीरवाससा। निक्षिप्त विजयो रामो गतश्रीर्वनगोचरः। व्रती स्थण्डिलशायी च शङ्के जीवति वा न वा ॥ २६ ॥ नहि वैदेहि रामस्त्वां द्रष्टुं वाप्युपलप्स्यते। पुरोबलाकैरसितैर्मेघवैज्यौत्स्नामिवावृताम् ॥ २७ ॥ न चापि मम हस्तात्त्वां प्राप्तुमर्हति राघवः। हिरण्यकशिपुः कीर्तिमिन्द्रहस्तगतामिव ॥ २८ ॥

विजयः त्यक्तविजय इत्यर्थः । स्थण्डिलशायी भूतलशायी ॥२६॥ नहीति । वाशब्दोऽवधारणे, द्रष्टुमपि नोपलप्स्यत एवेत्यर्थः । दर्शनमात्रफलमपि दर्शनं (च) न प्राप्स्यतीत्यर्थः पुरोऽग्रे बलाका येषां ते पुरोबलाकाः तैः । अनेन मेघानामतिविपुलतोच्यते । महामेघेष्वेव बलाकासञ्चार वर्णनात् ॥ २७ ॥ रामानु०—नहीति । वाशब्दोऽवधारणे । द्रष्टुं वा नोपलप्स्यत एवेत्यर्थः । पुरोबलाकैरसितैरिति विशेषणाद्वर्षासंबन्धिता द्योत्यते ॥ २७ ॥ न चापीति । हिरण्य

प्रतिकर्मेति । दाक्षिण्येन, मयीति शेषः॥२३॥ ललन्तां रमन्ताम् । वस्तुतस्तु—मत्प्रसादात् मयि प्रसादोऽनुग्रहः तस्मात् तव ललन्त्याः रमन्त्याः सत्याः बान्धवाश्च रमन्तामिति सम्बन्धः ॥ २४ ॥ ऋद्धिमित्यादीनां वास्तवार्थस्तु—सरामाऽहं तेऽखिलसम्पत्समृद्धिं ददामि मां रामेण सह संयोजयेत्याशङ्क्य नाहं सम्पदाद्यर्थी किन्तु मोक्षकामी अतो यावन्मोक्षं त्वत्पादाब्जं न त्यजामीत्यभिप्रायेणाह—ऋद्धिं ममेत्यादिश्लोकचतुष्टयेन । हे सुभगे ! मम ऋद्ध्यादिकं पश्य । निक्षिप्तविजयः स्वतस्सिद्धविजय इत्यर्थः । वनगोचरः वनं जलं गोचरं निवासस्थानं यस्य सः नारायण इत्यर्थः । अत एव गतश्रीः गता प्राप्ता श्रीः लक्ष्मीः येन अत एव प्रतिभक्तसंरक्षणव्रतशीलः अत एव पितृवाक्यपरिपालनाय स्थण्डिलशायी यो रामः, अचीरवाससेति छेदः । चीरवाससोरहितेन पीताम्बरधारिणेत्यर्थः । एतादृशेन तेन रामेण सह वा त्वम् इदानीं विद्यमानैश्वर्याद्यपेक्षया न किमपि करिष्यसीति शङ्के मन्ये अतो जीवति, मयि सतीति शेषः । रामस्त्वां द्रष्टुमपि नोपलप्स्यते न च मम हस्तात् त्वां राघवः प्राप्तुमर्हति, मद्बधानन्तरं रामस्त्वां द्रष्टुमप्युपलप्स्यते प्राप्तुमप्यर्हतीति भावः । हिरण्यकशिपुः कीर्तिमिन्द्रहस्तगता

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

काशिपुः कीर्तिमिन्द्रहस्तगतामिवेति वैधर्म्यदृष्टान्तः । अत्र कीर्तिशब्देन भार्या लक्ष्यते । हिरण्यकाशिपुरिन्द्रहस्तगतां भार्यां पुनः प्राप्तवानित्येतत् भागवते प्रसिद्धम् । " व्यलुम्पद् राजशिबिरममरा राज्यकाङ्क्षिणः । इन्द्रस्तु राजमहिषीं मातरं मम चाग्रहीत् ॥ " इत्यादिप्रह्लाद

चारुस्मिते चारुदति चारुनेत्रे विलासिनि। मनो हरसि मे भीरु सुपर्णः पन्नगं यथा ॥ २९ ॥ क्लिष्टकौशेयवसनां तन्वीमप्यनलंकृताम् । त्वां दृष्ट्वा स्वेषु दारेषु रतिं नोपलभाम्यहम् ॥ ३० ॥ अन्तःपुरनिवासिन्यः स्त्रियः सर्वगुणान्विताः । यावन्त्यो मम सर्वासामैश्वर्यं कुरु जानकि ॥ ३१ ॥ मम ह्यसितकेशान्ते त्रैलोक्यप्रवराः स्त्रियः । तास्त्वां परिचरिष्यन्ति श्रियमप्सरसो यथा ॥ ३२ ॥ यानि वैश्रवणे सुभ्रु रत्नानि च धनानि च । तानि लोकांश्च सुश्रोणि मां च भुङ्क्ष्व यथासुखम् ॥ ३३ ॥ न रामस्तपसा देवि न बलेन न विक्रमैः । न धनेन मया तुल्यस्तेजसा यशसापि वा ॥ ३४ ॥ पिब विहर रमस्व भुङ्क्ष्व भोगान् धननिचयं प्रदिशामि मेदिनीं च । मयि लल ललने यथासुखं त्वं त्वयि च समेत्य ललन्तु बान्धवास्ते ॥ ३५ ॥

वचनात् ॥ २८–३० ॥ अन्तःपुरेति । ऐश्वर्यम् अन्तःपुरैश्वर्यम् । स्वामिनीत्वं कुरु प्राप्नुहीत्यर्थः ॥ ३१ ॥ ३२ ॥ भुङ्क्ष्व स्वाधीनं कुरु ॥ ३३ ॥ ॥ ३४ ॥ पिब, मद्यमिति शेषः । विहर सञ्चर । विहारशब्दस्य सञ्चारेऽपि प्रयोगात् ॥ ३५ ॥

मिव इति वैधर्म्यदृष्टान्तः । पुरा किल हिरण्यकशिपोर्भार्यां हृत्वा नारदमुखेन प्रार्थितः तस्मै पुनः प्रादादिति भागवते कथाऽस्ति । तथा च भार्याहरणमेव कीर्तिहरणमिति भावः ॥२६–२९॥ क्लिष्टकौशेयेत्यस्य वास्तवार्थस्तु–त्वां ममेष्टदेवतां दृष्ट्वा स्वेषु धनेषु दारेषु च रतिं नोपलभामि, इष्टदेवतायास्तव दर्शनमात्रेणानन्दपूर्णोऽहं सर्वतो निवृत्तोस्मीति भावः ॥ ३० ॥ ऐश्वर्यम् आधिपत्यम् ॥ ३१–३३ ॥ न राम इत्यस्य वास्तवार्थस्तु–रामः तपआदिना मया तुल्यो न भवति किन्तु निरवधिक षड्गुणैश्वर्यसम्पन्नो भगवान् श्रीरामो मत्तोप्यधिक एवेति भावः ॥ ३४ ॥ पिब, मद्धिति शेषः । मयि लल रमस्व । वस्तुतस्तु -मयि भृत्ये सति लल ॥ ३५ ॥

स०–अनलंकृतामपि त्वां दृष्ट्वा स्वभार्यासु रतिं नोपलभामि नोपलभे । अलंकृतां पुनर्दृष्ट्वा तत्र रतिं नोपलभे इति किं वक्तव्यमित्यर्थः । एतेन सौन्दर्यातिशयो द्योत्यते ॥ ३० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ ३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने विंशः सर्गः ॥ २० ॥ तस्येत्यादि ॥ १ ॥ दुःखार्तेत्यादि । तृणमिति । रावणस्य साक्षात्संभाषणानर्हत्वात्तृणव्यवधानकरणम् । प्रत्युवाचेति पुनरभिधानं वचनप्रकारविशेषकथनार्थम् । दुःखार्तायां अपि शुचिस्मितत्वाभिधानं वस्तुस्वभावेन सस्मितवत् प्रतीयमानत्वात् ॥ २ ॥ ३ ॥ तनि०—तृणमन्तरतः कृत्वेति । परपुरुषमुखं निरीक्ष्य

कुसुमिततरुजालसन्ततानि भ्रमरयुतानि समुद्रतीरजानि । कनकविमलहारभूषिताङ्गी विहर मया सह भीरु काननानि ॥ ३६ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे विंशः सर्गः ॥ २० ॥

तस्य तद्वचनं श्रुत्वा सीता रौद्रस्य रक्षसः । आर्ता दीनस्वरा दीनं प्रत्युवाच शनैर्वचः ॥ १ ॥ दुःखार्ता रुदती सीता वेपमाना तपस्विनी । चिन्तयन्ती वरारोहा पतिमेव पतिव्रता । तृणमन्तरतः कृत्वा प्रत्युवाच शुचिस्मिता ॥ २ ॥ निवर्तय मनो मत्तः स्वजने क्रियतां मनः । न मां प्रार्थयितुं युक्तं सुसिद्धिमिव पापकृत् ॥ ३ ॥

वार्ता न कर्तव्येति मर्यादया वा तृणवदलक्षीकृत्य वा अस्मद्वक्ष्यमाणवचनं तृणसमानमित्ययं न लक्षीकरोतीति बुद्धया वा । " स श्लाघ्यः स गुणी धन्यः स कुलीनः स बुद्धिमान् । स शूरः स च विक्रान्तो यं त्वं देवि निरीक्षसे ॥ " इत्युक्तकटाक्षपातार्हो मा भूदिति वा । स्वामिना तृणमादाय काकासुरनिरासवत् अनेन तृणेनैत न्निरासः कार्य इति वा । अचेतनं चेतनं कृत्वा सम्बोधनेन वाक्यं वदामीति बुद्धया वा । आसन्नस्यास्य व्यवधानेन भाव्यमिति बुद्धया वा । पशुसमानस्य तव इदमेव भोग्यमिति बुद्धया वा । रामाविरोधेन भवान् सानुबन्धो नशिष्यतीति तृणं छित्त्वा निवेदये इति वा तृणं मध्ये स्थापयित्वा ॥ २ ॥

कुसुमितेति । मया सह । वस्तुतस्तु—सह एकदैव मया, संवर्द्धितानीति शेषः । काननानि विहर ॥ ३६ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्व दीपिकाख्यायां सुन्दरकाण्डव्याख्यायां विंशस्सर्गः ॥ २० ॥ तस्येति । दीनमिति क्रियाविशेषणम् ॥ १ ॥ दुःखार्तेत्यादि । तृणमन्तरतः कृत्वा रावणस्य साक्षात्सम्भाषणानर्हत्वात् तृणव्यवधानकरणम् । प्रत्युवाचेति पुनरभिधानं वचनप्रकारविशेषकथनार्थम् । शुचिस्मितेति । वस्तुतः स्वभाववर्णनम् ॥ २ ॥ निवर्तयेति । स्वजने स्वीयभार्यादिजने । सिद्धिं मुक्तिम् ॥ ३ ॥

स०—प्रत्युवाचेति पूर्वं प्रतिज्ञातम् । तत्रेत्थंकारमाह-तृणमन्तरतः कृत्वा प्रत्युवाचेति । अतो न पुनर्वचनम् ॥ २ ॥ युक्तः योग्यः । सिद्धिं मोक्षम् युक्तस्त्वं सिद्धिमिव इति पाठः ॥ ३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अकार्यमिति । एकः पतिर्यस्यास्सा एकपत्नी तया । "नित्यं सपत्न्यादिषु" इति ङीप्॥४॥ एवमिति । पृष्ठतः कृत्वा अनादृत्येत्यर्थः॥५॥ नाहमिति । सती अहं तव औपयिकी युक्ता भार्या न किन्तु परिहार्या । साधूनां सतां धर्मं साधुधर्मम् । साधूनां व्रतं साधुव्रतम् । साधु सम्यक् चर ॥६॥ आत्मानमुपमां कृत्वा यथा तव दारा रक्ष्यास्तथाऽन्येषां दारा रक्ष्याः । तस्मात् स्वेषु दारेषु रम्यताम् ॥ ७ ॥ अतुष्टम् अतृप्तम् । निकृतिप्रज्ञम् निकृतौ शाठ्ये प्रज्ञा

अकार्यं न मया कार्यमेकपत्न्या विगर्हितम् । कुलं संप्राप्तया पुण्यं कुले महति जातया ॥ ४ ॥ एवमुक्ता तु वैदेही रावणं तं यशस्विनी । राक्षसं पृष्ठतः कृत्वा भूयो वचनमब्रवीत् ॥५॥ नाहमौपयिकी भार्या परभार्या सती तव । साधु धर्ममवेक्षस्व साधु साधुव्रतं चर ॥ ६ ॥ यथा तव तथाऽन्येषां दारा रक्ष्या निशाचर । आत्मानमुपमां कृत्वा स्वेषु दारेषु रम्यताम् ॥ ७ ॥ अतुष्टं स्वेषु दारेषु चपलं चलितेन्द्रियम् । नयन्ति निकृतिप्रज्ञं परदाराः पराभवम् ॥ ८ ॥ इह सन्तो न वा सन्ति सतो वा नानुवर्तसे । तथाहि विपरीता ते बुद्धिराचारवर्जिता ॥ ९ ॥

यस्य तम् । पराभवम् आयुरैश्वर्यादिक्षयरूपम् ॥८॥ इह अतिविशालेऽपि दुर्जनसङ्कुले देशे । सन्तः त्वामनर्थान्निवारयन्तः । न सन्ति वा न सन्ति किम् ? सन्त्येव । श्रीविभीषणप्रभृतीनां सम्भवान्न सन्तीति कथं वक्तुं शक्यम् ? सतो वा नानुवर्तसे । " तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया । उपदेक्ष्यन्ति

एकपत्न्या एकः पतिर्यस्यास्तया मया, पतिव्रतयेत्यर्थः । कुलं भर्तृकुलम् । पुण्यं पवित्रम् ॥४॥ पृष्ठतः कृत्वा पराकृत्येत्यर्थः॥ ५ ॥ परभार्या सती पतिव्रताहम् औपयिकी युक्ता भार्या न, साधूनां धर्मं साधुधर्मम् । साधूनां व्रतं साधुव्रतम् । वस्तुतस्तु—नाहमिति । अहं तव त्वया भार्या भर्तव्या न, किन्तु परभार्या परेण रामेण भार्या भर्तव्या ॥६॥ यथा तव निजदाराणां शुद्धिरिष्टा, एवमन्येषामपीत्यात्मदृष्टान्तादेव निश्चित्य त्वमपि परदारनिस्स्पृहः स्वदारनिरतो भवेत्यर्थः ॥७॥ अतुष्टम् अतृप्तम् । निकृतिप्रज्ञं निकृतौ शाठ्ये प्रज्ञा यस्य तम् । पराभवम् आयुरैश्वर्यादिक्षयरूपम् ॥ ८॥ इहेत्यादिश्लोकद्वयमेकं वाक्यम् । इह सन्तो न सन्ति वा सतो वा

स०—एकपत्न्या एकः पतिर्यस्याः सा रामकृतयज्ञफलभोक्त्री, पतिव्रतेति यावत् । तया विगर्हितं विनिन्दितम् । तर्हि कदापि गर्हितं त्वया नानुष्ठितं किमित्यतस्तथैवेत्याह—मयेति । मया यदकारि तत्सर्वं अंमत्पतिं विष्णुमुद्दिश्यैवाकारीति विगर्हितं न कार्यमिति भावः॥४॥**औपयिकी** उपभोगयोग्या न । तत्र हेतुः—परभार्येति । तत्रापि न स्वैरिणीत्युदीरयति—सतीति । साधूनां सतां धर्मं धर्मशास्त्राद्याशंसितम् अवेक्षस्व । साधुव्रतं साधोः साध्व्याः पतिव्रताया मम व्रतं परित्यजनं चर । " वोतो गुणवचनात् " इति साधुस्साधुः ॥ ६ ॥ दाराः रक्ष्याः शीलतः संरक्षणीयाः । आत्मानं स्वम् । उपमां निदर्शनम् । स्वदारधर्षणं दुर्मर्षणं मम यथा तथान्येषामित्यत्र ॥ ७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥" इत्युक्तरीत्या प्रणिपातमन्तरेण न ते उपदिशन्ति । त्वं च तत्पादेषु कदाचिदपि न प्रणतवानसि । कथमिदं भवती जानातीत्याशङ्क्याह तथाहीति । तथाहि विपरीता ते बुद्धिः तव बुद्धिर्वैपरीत्यमेव तव शिष्टाननुवर्तनं सूचयतीत्यर्थः । परबुद्धेरप्रत्यक्षत्वात् कथं मदीया बुद्धिस्त्वया ज्ञायत इत्यत्राह आचारवर्जितेति । आचारवर्जिता, तव दुरनुष्ठानमेव तव बुद्धिं द्योतयतीति भावः ॥ ९ ॥ वच इति । पूर्वश्लोके

वचो मिथ्याप्रणीतात्मा पथ्यमुक्तं विचक्षणैः । राक्षसानामभावाय त्वं वा न प्रतिपद्यसे ॥ १० ॥ अकृतात्मानमासाद्य राजानमनये रतम् । समृद्धानि विनश्यन्ति राष्ट्राणि नगराणि च ॥ ११ ॥ तथेयं त्वां समासाद्य लङ्का रत्नौघसङ्कुला । अपराधात्तवैकस्य नचिराद्विनशिष्यति ॥ १२ ॥ स्वकृतैर्हन्यमानस्य रावणादीर्घदर्शिनः । अभिनन्दन्ति भूतानि विनाशे पापकर्मणः ॥ १३ ॥ एवं त्वां पापकर्माणं वक्ष्यन्ति निकृता जनाः । दिष्ट्यैतद्व्यसनं प्राप्तो रौद्र इत्येव हर्षिताः ॥ १४ ॥ शक्या लोभयितुं नाहमैश्वर्येण धनेन वा । अनन्या राघवेणाहं भास्करेण प्रभा यथा ॥ १५ ॥

रावणस्याभाव उपन्यस्तः । अनेन राक्षसाभावपक्ष उपन्यस्यते । मिथ्याप्रणीतात्मा मिथ्यास्निग्धात्मा, स्नेहीति भावयन्निवेति यावत् । त्वं विचक्षणैः साधुभिरुक्तं पथ्यं हितं वचः राक्षसानामभावाय न प्रतिपद्यसे नाङ्गीकरोषि वा । राक्षसेषु स्नेहं भावयन् तद्विनाशमेव हृदि कृत्वा साधुवचनं न शृणोषीत्यर्थः ॥ १०–१२ ॥ रावणादीर्घदर्शिन इत्यत्र रावणेति संबुद्धिः । निकृताः त्वया वञ्चिताः ॥ १३ ॥ १४ ॥ शक्येति । अनेन रावणोक्त प्रलोभनानामुत्तरमुच्यते । ऐश्वर्येण अन्तःपुरस्त्रीणामीश्वरत्वेन । धनेन आभरणादिना वा । लोभयितुं वञ्चयितुम् । अहं न शक्या । अत्र हेतुमाह

नानुवर्तसे विद्यमानानपि तान् धर्मजिज्ञासया नानुवर्तसे वा ? मिथ्या प्रणीतात्मा मिथ्या विनीतात्मा । त्वं विचक्षणैः विद्वद्भिरुक्तं पथ्यं वचः राक्षसानामभावाय न प्रतिपद्यसे नाङ्गीकरोषि वा ? तथाहि अत एव खलु तव बुद्धिः आचारवर्जिता विहिताचारविमुखा विपरीतानिषिद्धाचारपरेति योजना ॥ ९ ॥ १० ॥ ननु मया सज्जनोपदेशास्वीकारे कृतो राक्षसनाशप्रसङ्ग इत्यशोत्तरं वक्तुं लोकस्थितिमाह–अकृतेति । अकृतात्मानं सदुपदेशाग्राहिबुद्धिम् ॥ ११ ॥ तथेयमिति । राजापराधतोऽशेषप्रजानाशस्य लोकप्रसिद्धत्वादिति भावः ॥ १२ ॥ स्वकृतैरपराधैः । रावणेति सम्बोधनम् । रौद्रः दिष्ट्या व्यसनं प्राप्त इति वक्ष्यन्तीति सम्बन्धः ॥ १३ ॥ ॥ १४ ॥ रावणोक्तप्रलोभनवाक्यानामुत्तरमाह–शक्येति । ऐश्वर्येण अन्तःपुरनियन्तृत्वेन ॥ १५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अनन्येति । अहं नित्यानपायिनी । राघवेण रघुकुलावतीर्णेन विष्णुना अनन्या अविभक्ता । यत्र यत्र कुले विष्णुरवतरति तत्र तत्रावतीर्णा लक्ष्मीरित्यर्थः । तृतीयया तत्परतन्त्रा चास्मीति द्योत्यते । न केवलं तस्य परतन्त्राऽहम्, प्रत्युत तस्याप्यतिशयावहेति दृष्टान्तेन द्योतयति भास्करेणेति । प्रभा हि भास्करस्याप्यतिशयमावहति, तथैव हि मारीचो भवन्तं प्रति निवेदितवान्—"अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा" इति । किं तद्धितवचनमपि मोहेन

उपधाय भुजं तस्य लोकनाथस्य सत्कृतम् । कथं नामोपधास्यामि भुजमन्यस्य कस्यचित् ॥ १६ ॥
अहमौपयिकी भार्या तस्यैव वसुधापतेः । व्रतस्नातस्य धीरस्य विद्येव विदितात्मनः ॥ १७ ॥
साधु रावण रामेण मां समानय दुःखिताम् । वने वासितया सार्धं करेण्वेव गजाधिपम् ॥ १८ ॥

विस्मृतोऽसीति तत्त्वमाह ॥१५॥ उपधायेति । लोकनाथस्य सर्वैर्ब्रह्मादिदेवगणैः स्वस्वपदप्राप्तये नाथ्यमानस्य याच्यमानस्य । "नाथृ याच्ञायाम्" इति धातुः । तस्य रामस्य । सत्कृतं भुजं दक्षिणं भुजमित्यर्थः । उपधाय उपधानीकृत्य । तेन तत्परिष्वक्तत्वं गम्यते । एवं श्लाघिताऽहम् अन्यस्य ततो भोगं याचमानस्य कस्यचिदनामधेयस्य क्षुद्रस्य त्वादृशः भुजम् असत्कृतं कथं नामोपधास्यामि ? न कथंचिदपीत्यर्थः ॥१६॥ अहं तु शीलवयोवृत्ता तस्यैव तुल्यशीलवयोवृत्तस्य वसुधापतेः औपयिकी उचिता भार्या । "ह्रीश्च ते लक्ष्मीश्च पत्न्यौ" इति भूमिनाथस्याहं लक्ष्मीदेव्युचितेति हृदयम् । कथमिव ? व्रतस्नातस्य वेदव्रतैः स्नातस्य । धीरस्य धीमतः ब्राह्मणस्य । विदितात्मनः आत्मज्ञानवतः विद्येव योगाभ्यासरूपविद्येव॥१७॥ पथिचोरं पानीययाचक वद्रावणमर्थयते-साध्विति। साधु रावण! मद्वियोगेन त्वत्कौर्यमधिकं जातमिति भावः। एवमुत्कटकौर्यं प्रति याचनात् स्वस्यातिशयो व्यज्यते। रामेण सर्वाङ्ग

उपधाय शीर्षोपधानं कृत्वा ॥१६॥ व्रतस्नातस्य विद्याव्रतस्नातस्य । विद्येव साङ्गवेदविद्येव ॥१७॥ समानय सङ्गमय। वने वासितया सार्धं करेण्वेव गजाधिपमिति । वने वासितां बद्धां करेणुं गजाधिपेन सार्धमिति विभक्तिविपरिणामेन योज्यम् । अन्यथा विरोधात् ॥ १८ ॥

स०—भुजमित्यनेन मत्परिरम्भणकामनया तव भुजानां छेदः " ये मैथ्याः परिरम्भणं चकमिरे तेषां भुजांश्चिच्छिदुः " इत्यायुक्तेर्भावीति द्योतयति ॥ १६ ॥ विदितात्मनः अवगतभगवत्तत्त्वस्य । व्रत स्नातस्य नखचर्यादिव्रतसङ्कल्पपूर्वं स्नातस्य अभिषिक्तस्य विप्रस्य विद्येव उपनिषदादिविद्येव । विप्रस्येत्यनेनोत्तरवर्णद्वयापेक्षया पृथग्जातेरेव मुख्याधिकारः यथाऽहं तथा मुख्या तस्यौपयिकीति सूचयति ॥ १७ ॥ यद्यपि नीधातुर्द्विकर्मक इति रामं मां समानयेति वक्तव्यम्, तथापि रामेणेति तृतीयया सहयोगः सावकालिकः, त्वया संमलनं तु लोकदृष्टयेति सूचयितुम्। गजाधिपेन करिणीमिवेति दार्ष्टान्तिकानुगुण्यार्थं वक्तव्यम् । तथापीत्थमुक्त्या तद्दाम्पत्यमक्लृप्तमिति द्योतयति ॥ १८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सुन्दरेण। मां तस्यानन्यार्हाम्, तद्वियोगे जीवितं धारयितुमशक्ताम् "नच सीता" इत्यादि। समानय सङ्गमय। तत्र हेतुः दुःखितामिति। करेण्वा गजवध्वा। वाशितया यौवनं गतया। "वाशिता युवतिः प्रोक्ता कलभः करिपोतकः"इति वचनात्। यद्वा वासितयेति पाठः। वने वासितया बद्धया। अत्र विभक्ति व्यत्यासः कार्यः, वने वासितां करेणुं गजाधिपेनेवेति। वस्तुतस्तु यथान्यास एवान्वेति। रामेण सङ्गमनं नाम रामाह्वानम्। नहि पुनरपि रामस्थानं तेन नेतुमीष्टे, किंत्वत्र राममाहूय समर्पणमेव। अत एव करेण्वा गजाधिपमित्युक्तम्॥१८॥एवं रावणे जननीत्वप्रतिपत्तिं विहाय कानिचिदसङ्गतानि जल्पति,

मित्रमौपयिकं कर्तुं रामः स्थानं परीप्सता। वधं चानिच्छता घोरं त्वयाऽसौ पुरुषर्षभः। विदितः स हि धर्मज्ञः शरणागतवत्सलः॥ १९॥ तेन मैत्री भवतु ते यदि जीवितुमिच्छसि। प्रसादयस्व त्वं चैनं शरणागतवत्सलम् ॥ २०॥ मां चास्मै प्रयतो भूत्वा निर्यातयितुमर्हसि॥ २१॥

देवी खिन्ना सती कोऽयमस्य स्वभावः कथमस्य कोऽप्युपदेष्टा सेत्स्यतीति इह सन्तो न वा सन्तीत्यादिना विचिन्त्य दयावती स्वयमेवोपदिशति मातृत्व प्रयुक्तवात्सल्येन–मित्रमिति। रामं शरणं गच्छेत्युक्ते तत्र रावणस्सहेत दुर्मानितया, आत्मसद्बुद्धयनुसारेण मित्रमित्याह। किंच शरणागतं स्वस्याधीनं मन्यते देवी देवश्च। अत एव रामो वक्ष्यति "मित्रभावेन संप्राप्तं न त्यजेयं कथंचन" इति। इयं च तथाऽऽह मित्रमिति। रामः मित्रं कर्तुं युक्तमित्यर्थः। मित्रशब्दापेक्षया औपयिकामिति नपुंसकानिर्देशः। स्थानं परीप्सता मार्गचोरस्यापि भूमौ पदानि स्थापयित्वा चौर्यं कर्तव्यम्। तवापि यदि स्थान मभीप्सितं तर्हि तमेव भजेत्यर्थः। शरणागतिर्दैन्यादपि मरणमेव वरमिति यदि मन्यसे तदानीं तद्वजनं कर्तव्यमित्याह–वधं चानिच्छता घोरम्। तव सम्यङ् मरणं न दास्यति त्वां संस्थाप्य त्वत्समक्षं त्वत्सन्तानजान् हिंसित्वा ततस्ते चित्रवधं करिष्यति, तं यदि नेच्छसि तदा प्रपत्तव्य इत्यर्थः। त्वया तत्प्रतीकारावलोकनेन त्वयाऽवश्यं तच्छरणागतिः कर्तव्या। एवं स रक्षक इत्यत्र किं प्रमाणम्? तत्राह–असौ निरन्तरप्रत्ययेनास्या रामः प्रत्यक्ष इव भासते। रावणस्यापि मायामृगानुसरणसमये तदाकारदर्शनजभयेन 'वृक्षेवृक्षे च पश्यामि' इत्युक्तरीत्या पुरःस्थित इव भासते। पुरुषर्षभः मत्कृता

मित्रमिति। स्थानं परीप्सता, लङ्कावासमिच्छतेत्यर्थः। अथवा घोरं वधं बहुविधपीडाकरवधम्। रामेण अनिच्छता वा त्वया पुरुषर्षभो रामः, मित्रं कर्तुं मौपयिकम्, योग्य इत्यर्थः। सापराधं मां शरणागतत्वमात्रेण कथं रक्षिष्यतीति शङ्का न कर्तव्येत्याह–विदित इति ॥१९॥२०॥ निर्यातयितुं प्रत्यर्पयितुम् ॥२१॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पराधेन कथं मामङ्गीकरिष्यतीत्येवं त्वया न चिन्तनीयम्; आनुकूल्यलेशे सति सर्वमपराधं विस्मरिष्यति पुरुषधौरेयत्वात् । मित्रकरणप्रकारमाह प्रसादयस्वेति । त्वं चेत्यनेनाहमपि प्रसादयिष्यामीति सिद्धम् । प्रयतो भूत्वा मनःकालुष्यं त्यक्त्वेत्यर्थः । निर्यातयितुं प्रत्यर्पयितुम् ॥ १९–२१ ॥ एवमिति । सम्प्रदाय, स्थितायेति शेषः ॥ २२ ॥ उत्सृष्टम् इन्द्रमुक्तं वज्रम्, अन्तकश्च त्वद्विधं वर्जयेत् । राघवस्त्वद्विधं न वर्जयेदिति सम्बन्धः ॥ २३ ॥

एवं हि ते भवेत् स्वस्ति सम्प्रदाय रघूत्तमे । अन्यथा त्वं हि कुर्वाणो वधं प्राप्स्यसि रावण ॥२२॥ वर्जयेद्वज्रमुत्सृष्टं वर्जयेदन्तकश्चिरम् । त्वद्विधं तु न संक्रुद्धो लोकनाथः स राघवः ॥ २३ ॥ रामस्य धनुषः शब्दं श्रोष्यसि त्वं महास्वनम् । शतक्रतुविसृष्टस्य निर्घोषमशनेरिव ॥ २४ ॥ इह शीघ्रं सुपर्वाणो ज्वलितास्या इवोरगाः । इषवो निपतिष्यन्ति रामलक्ष्मणलक्षणाः ॥ २५॥ रक्षांसि परिनिघ्नन्तः पुर्यामस्यां समन्ततः । असम्पातं करिष्यन्ति पतन्तः कङ्कवाससः ॥ २६ ॥ राक्षसेन्द्रमहासर्पान् स रामगरुडो महान् । उद्धरिष्यति वेगेन वैनतेय इवोरगान् ॥ २७ ॥ अपनेष्यति मां भर्ता त्वत्तः शीघ्रमरिन्दमः । असुरेभ्यः श्रियं दीप्तां विष्णुस्त्रिभिरिव क्रमैः ॥ २८ ॥ जनस्थाने हतस्थाने निहते रक्षसां बले । अशक्तेन त्वया रक्षः कृतमेतदसाधु वै ॥ २९ ॥

महास्वनं महानादम्, नादो नाम स्वरावयवविशेषः ॥ २४ ॥ रामलक्ष्मणलक्षणाः रामलक्ष्मणनामाङ्काः ॥ २५ ॥ असम्पातम् अनवकाशम् ॥ २६ ॥ राक्षसेन्द्रमहासर्पानिति रूपकोक्तमेवोपमयाप्याह वैनतेय इति ॥ २७ ॥ न चापि मम हस्तात्त्वां प्राप्तुमर्हतीत्युक्तस्योत्तरमाह–अपनेष्यतीति ॥ २८ ॥ जनस्थान इति । एतत् युद्धं विना चौर्येणापहरणम् ॥ २९ ॥

एवमिति । मामित्यनुवर्तते । मां रघूत्तमे संप्रदाय दत्त्वा, स्थितायेति शेषः ॥ २२ ॥ वर्जयेदिति । उत्सृष्टम् इन्द्रमुक्तं वज्रं कश्चित्, त्वद्विधं वर्जयेत्, संक्रुद्धो राघवस्तु न वर्जयेत् ॥ २३ ॥ महास्वनं महानादम्, नादो नाम कश्चिच्छब्दधर्मः ॥ २४ ॥ इहेति । रामलक्ष्मणलक्षणाः रामलक्ष्मणनामाङ्काः असंपातम् अनवकाशम् ॥ २५ ॥ ॥ २६ ॥ राक्षसेन्द्ररूपान् महासर्पान् । उद्धरणशौघ्र्ये उपमा वैनतेय इवेति ॥२७॥ " न चापि मम हस्तात्त्वां प्राप्तुमर्हति राघवः " इत्यस्योत्तरमाह–अपनेष्यतीति ॥ २८ ॥ जनस्थान इति । एतत् युद्धं विना चौर्येणापहरणम् ॥ २९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गोचरं गतयोः बाह्यदेशं गतयोः ॥३०॥३१॥ तस्य ते असमर्थतया चोरवृत्तेस्तव ताभ्यां रामलक्ष्मणाभ्यां विग्रहे सति युद्धे सति । युगग्रहणं संयुगे जयग्रहणम् । अस्थिरम् असम्भावितम् । यद्वा युगग्रहणं युद्धारम्भः। अस्थिरम् अध्रुवम्।किंतु ताभ्यां प्रसह्य वधस्ते सिद्ध इति दृष्टान्तेनाह वृत्रस्येवेति ।

आश्रमं तु तयोः शून्यं प्रविश्य नरसिंहयोः । गोचरं गतयोर्भ्रात्रोरपनीता त्वयाऽधम ॥ ३० ॥ नहि गन्धमुपाघ्राय रामलक्ष्मणयोस्त्वया । शक्यं सन्दर्शने स्थातुं शुना शार्दूलयोरिव ॥ ३१ ॥ तस्य ते विग्रहे ताभ्यां युगग्रहण मस्थिरम् । वृत्रस्येवेन्द्रबाहुभ्यां बाहोरेकस्य निग्रहः ॥ ३२ ॥ क्षिप्रं तव स नाथो मे रामः सौमित्रिणा सह । तोयमल्पमिवादित्यः प्राणानादास्यते शरैः ॥ ३३ ॥ गिरिं कुबेरस्य गतोऽपधाय वा सभां गतो वा वरुणस्य राज्ञः । असंशयं दाशरथेर्न मोक्ष्यसे महाद्रुमः कालहतोऽशनेरिव ॥ ३४ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे एकविंशः सर्गः ॥ २१ ॥

वृत्रस्य एकस्य बाहोर्द्वाभ्यामिन्द्रस्य बाहुभ्यां सह विग्रहे सति निग्रह इव जय इव वृत्रस्यैकेन बाहुना इन्द्रस्य द्वयोर्बाह्वोरिव एकेन त्वया तयो र्द्वयोर्जयो न शक्य इत्यर्थः ॥३२॥ सः नाथ इति पदच्छेदः॥३३॥ गिरिमिति। अपधाय अपक्रम्य। कुबेरस्य गिरिं कैलासम् । "कैलासः स्थानमलका" इत्यमरः ॥ ३४ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकविंशः सर्गः ॥ २१ ॥

आश्रममिति । गोचरं गतयोः मायामृगरूपमिन्द्रियार्थं गतयोः ॥ ३० ॥ यस्माद्रामलक्ष्मणयोर्गन्धमाघ्राय शार्दूलयोः सन्दर्शने शुनेव समक्षं स्थातुं त्वया न शक्यम् ॥ ३१ ॥ तस्य ते युद्धासमर्थतया चौर्यवृत्तेः तव ताभ्यां रामलक्ष्मणाभ्यां सह विग्रहे युद्धे सति । युगग्रहणं युद्धजयः । अस्थिरम् अध्रुवम् । वृत्रस्येकस्य बाहोः द्वाभ्यामिन्द्रस्य बाहुभ्यां सह विग्रहे सति निग्रह इव वृत्रस्यैकेन बाहुना इन्द्रस्य द्वयोर्बाह्वोरिव एकेन त्वया तयोः द्वयोः जयो न शक्य इत्यर्थः ॥ ३२ ॥ मे नाथः स राम इत्यन्वयः ॥ ३३ ॥ गिरिमिति । कुबेरस्य गिरिं गन्धमादनम् । अपधाय अतिक्रम्य । पुरीमिति पाठे–कुबेरस्य पुरीमित्येतदुपरितनलोकानामुप लक्षणम् । वरुणस्य सभामित्यनेन अधस्तनलोकानामुपलक्षणम् । तत्त्वदृष्ट्या अपरुषवचनं तं रावणमुद्दिश्य सीतयोक्तानां परुषवाक्यानामयमाशयः–रावणेन देवीं प्रति तत्त्वदृष्ट्या सौम्यरूपाण्येव वाक्यान्युक्तानि यद्यपि तथापि बाह्यदृष्ट्या परुषवाक्यवत् प्रतीयमानत्वेन देव्यपि तत्त्वदृष्टिं सङ्कोच्य बाह्यदृष्टिमनुसृत्य परुषवाक्यैरेव तस्योत्तरमाहेति ॥ ३४ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायाम् एकविंशः सर्गः ॥ २१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सीताया इत्यादि ॥१॥ सान्त्वयिता अनुनेता ॥२॥ सन्नियच्छति निरुणद्धि । द्रवतः धावतः । अमार्गमिति च्छेदः ॥३॥ वामः प्रतिकूलः । मनुष्याणां प्राणिनाम् । अनुक्रोशः कृपा । परिभवादिप्रदानेन मनुष्याणां प्रतिकूलः कामः यस्मिन् जने निबद्ध्यते तस्मिंस्त्वनुक्रोशः स्नेहश्च जायते किल ॥ ४ ॥

सीताया वचनं श्रुत्वा परुषं राक्षसाधिपः । प्रत्युवाच ततः सीतां विप्रियं प्रियदर्शनाम् ॥१॥ यथा यथा सान्त्वयिता वश्यः स्त्रीणां तथा तथा । यथा यथा प्रियं वक्ता परिभूतस्तथा तथा ॥ २ ॥ सन्नियच्छति मे क्रोधं त्वयि कामः समुत्थितः । द्रवतोऽमार्गमासाद्य हयानिव सुसारथिः ॥ ३ ॥ वामः कामो मनुष्याणां यस्मिन् किल निबद्ध्यते । जने तस्मिंस्त्वनुक्रोशः स्नेहश्च किल जायते ॥४॥ एतस्मात्कारणान्न त्वां घातयामि वरानने । वधार्हामवमानार्हां मिथ्या प्रव्रजिते रताम् ॥ ५ ॥ परुषाणीह वाक्यानि यानि यानि ब्रवीषि माम् । तेषु तेषु वधो युक्तस्तव मैथिलि दारुणः ॥ ६ ॥ एवमुक्त्वा तु वैदेहीं रावणो राक्षसाधिपः । क्रोधसंरम्भसंयुक्तः सीतामुत्तरमब्रवीत् ॥ ७ ॥ द्वौ मासौ रक्षितव्यौ मे योऽवधिस्ते मया कृतः । ततः शयनमारोह मम त्वं वरवर्णिनि ॥ ८ ॥

मिथ्या प्रव्रजिते कपटेन वन्यवृत्तिभाजि रामे । रतां सक्ताम् ॥५॥६॥ क्रोधसंरम्भसंयुक्तः क्रोधप्रणयाभ्यां संयुक्तः ॥७॥ द्वौ मासाविति । ते मया योऽवधिः

सीताया इत्यस्य वास्तवार्थस्तु—राक्षसाधिपः सीतायाः परुषम् अत एव विप्रियं वचनं श्रुत्वा प्रत्युवाचेति सम्बन्धः ॥ १ ॥ सान्त्वयिता अनुनेता । वश्यः वशं गतः ॥ २ ॥ सन्नियच्छति साध्निरुणद्धि । द्रवतः धावतः । अमार्गमिति छेदः । वस्तुतस्तु—इष्टदेवतायां समुत्थितः कामः इच्छा, समुत्पन्ना भक्तिरित्यर्थः । मे क्रोधं राक्षसजातेर्मम सर्वदा विद्यमानं नैजं क्रोधम्, क्रोधशब्देन कामक्रोधाद्यरिषड्वर्ग उच्यते । तं संनियच्छतीति सम्बन्धः ॥ ३ ॥ मनुष्याणां वामः प्रतिकूलः यस्मिन् जने कामो निबध्यते तस्मिन् जने शिक्षणीये तस्मिन् जने अनुक्रोशश्च स्नेहश्च जायते किलेति योजना ॥ ४ ॥ मिथ्या प्रव्रजिते रतां कपटवृत्ते रामे सक्ताम् । एतस्मादित्यादिश्लोकद्वयस्य वास्तवार्थस्तु—ननु भद्रधोद्युक्तः स्त्रीघातकश्च त्वं न संभाष्य इत्यत्राह—एतस्मादिति । एतस्मात्कारणात् त्वद्भर्तृकारणात् प्रव्रजिते मत्स्वामिनि, राम इति शेषः । रतां त्वां ममेष्टदेवतां त्वां न घातयाम्येव, वधार्होमवमानार्होमपि स्त्रियं घातयामीति मिथ्येति सम्बन्धः ॥ ५ ॥ परुषाणीति । तव मां त्वदीयभृत्यं मामित्यर्थः । यानि यानि परुषवाक्यानि ब्रवीषि तेषु तेषु तेभ्यस्तेभ्यः दारुणो वधो युक्तः, ममेति शेषः ॥ ६ ॥ ७ ॥ द्वौ मासाविति । ते मया योऽवधिः कृतः " शृणु मैथिलि मद्वाक्यं मासान् द्वादश भामिनि " इत्यारण्यकाण्डे । द्वौ मासौ तत्र अवशिष्टौ द्वौ मासौ मे मया रक्षितव्यौ परिपालनीयौ, ततः तस्मात्कारणात् मम शयनमारोहेति योजना ॥ ८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कृतः "मासान् द्वादश भामिनि" इत्यारण्यकाण्डोक्तो द्वादशमासात्मकोऽवधिः कल्पितः। अत्र द्वौ मासावनाशिष्टौ। तौ द्वौ मासौ मे मया रक्षितव्यौ प्रतीक्षणीयौ। ततः तस्मात्कारणात्। मम शयनमारोहेत्यन्वयः ॥८॥ प्रातराशार्थं मासद्वयान्तर्गतरात्रितमाप्त्यनन्तरं हिंसायां कालविलम्बं विना प्रातःकालिकाशनार्थ

ऊर्ध्वं द्वाभ्यां तु मासाभ्यां भर्तारं मामनिच्छतीम्। मम त्वां प्रातराशार्थमारभन्ते महानसे ॥ ९ ॥ तां तर्ज्यमानां संप्रेक्ष्य राक्षसेन्द्रेण जानकीम्। देवगन्धर्वकन्यास्ता विषेदुर्विकृतेक्षणाः ॥ १० ॥ ओष्ठप्रकारैरपरा वक्त्रनेत्रैस्तथाऽपराः। सीतामाश्वासयामासुस्तर्जितां तेन रक्षसा ॥ ११ ॥ ताभिराश्वासिता सीता रावणं राक्षसाधिपम्। उवाचात्महितं वाक्यं वृत्तशौण्डीर्यगर्वितम् ॥ १२ ॥ नूनं न ते जनः कश्चिदस्ति निःश्रेयसे स्थितः। निवारयति यो न त्वां कर्मणोऽस्माद्विगर्हितात् ॥ १३ ॥

मित्यर्थः। आरम्भते आलभन्ते। रलयोरभेदः। "आलम्भस्स्पर्शहिंसयोः" इत्यमरः। महानसे पाकशालायाम्॥९॥१०॥ ओष्ठप्रकारैः रुरुदिषतामोष्ठेषु भङ्गस्फुरणादयो ये विकारास्ते ओष्ठप्रकाराः, ओष्ठभङ्गादिरूपसंज्ञादिभिरित्यर्थः। एवं वक्त्रनेत्रैः वक्त्रनेत्रसंज्ञादिभिरित्यर्थः ॥११॥ वृत्तशौण्डीर्यगर्वितं वृत्तं पातिव्रत्यं तस्य शौण्डीर्यं बलं तेन गर्वितमिति क्रियाविशेषणम् ॥ १२ ॥ नूनमिति। ते निःश्रेयसे स्थितः कश्चिज्जनः नास्ति। यः अस्मात्

ऊर्ध्वमिति। प्रातराशार्थमित्यत्र प्रातश्शब्देन मासद्वयसमाप्त्यनन्तरमातःकाल उच्यते। एवमुक्त्वेत्यादिश्लोकत्रयस्य वास्तवार्थस्तु–क्रोधसंरम्भसंयुक्त इत्यनेन राक्षसस्वभावो वर्णितः। पतिवियोगदुःखितां निद्राहाररहितां प्रत्याह–द्वौ मासावित्यादिश्लोकद्वयेन। हे मे लक्ष्मि सीते! मया योऽवधिः कृतः 'मासान् द्वादश भामिनि प्रतीक्षस्व' इति यः समयः प्रार्थितः तन्मध्यतः परं रक्षितव्यौ प्रतीक्षणीयौ द्वौ मासावेव, द्वाभ्यां मासाभ्यामूर्ध्वं न, ततः तदनन्तरम् ते तव भर्तारम् अनिच्छन्तीं मामनङ्गीकुर्वाणाम् मम मां मदीयराज्यलक्ष्मीं च प्राप्स्यसीति शेषः। त्वां प्रार्थय इति शेषः। मम महानसे प्रातराशार्थं आलभन्ते पशून् तान् भक्षयेति शेषः। शयनमारोह शयनं कुर्वित्यर्थः ॥ ९ ॥ तामित्यस्य वास्तवार्थस्तु–तर्ज्यमानामिति। तासां तथा प्रतीतेरिति भावः ॥ १० ॥ ओष्ठेति। ओष्ठप्रकारैः ओष्ठभङ्गादिरूपसंज्ञाभिः वक्त्रनेत्रैः वक्त्रनेत्रसंज्ञाभिः ॥ ११ ॥ वृत्तशौण्डीर्यगर्वितं वृत्तं पातिव्रत्यम्, शौण्डीर्यं बलम्, पातिव्रत्यबलगर्वितमित्यर्थः ॥ १२ ॥ ते तव। निश्रेयसे स्थितः कश्चिज्जनोऽस्ति यः अस्माद्विगर्हितात्कर्मणः त्वां निवारयति। स च नास्ति नूनमिति योजना। तव इष्टप्रापकः अनिष्टनिवर्तकश्च नास्तीति भावः॥१३॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विगर्हितात् कर्मणस्त्वां निवारयति स चापि नास्ति नूनमिति योजना। तवेष्टप्रापकः अनिष्टनिवारकश्च नास्तीत्यर्थः ॥ १३ ॥ १४ ॥ तस्य मोक्ष्यसे तस्मान्मोक्ष्यसे ॥ १५ ॥ यथा मातङ्गः शशश्च, सहितः युयुत्सादिना संगतः तथाऽन्योन्यसङ्गतो रामस्त्वं च। अत्र रावणः स्वस्य मातङ्गसाम्यमुक्त

मां हि धर्मात्मनः पत्नीं शचीमिव शचीपतेः। त्वदन्यस्त्रिषु लोकेषु प्रार्थयेन्मनसाऽपि कः ॥ १४ ॥ राक्षसाधम रामस्य भार्यामिततेजसः। उक्तवानसि यच्छापं क्व गतस्तस्य मोक्ष्यसे ॥ १५ ॥ यथा दृप्तश्च मातङ्गः शशश्च सहितो वने। तथा द्विरदवद्रामस्त्वं नीच शशवत् स्मृतः ॥ १६ ॥ स त्वमिक्ष्वाकुनाथं वै क्षिपन्निह न लज्जसे। चक्षुषोर्विषयं तस्य न तावदुपगच्छसि ॥ १७ ॥ इमे ते नयने क्रूरे विरूपे कृष्णपिङ्गले। क्षितौ न पतिते कस्मान्मामनार्य निरीक्षतः ॥ १८ ॥ तस्य धर्मात्मनः पत्नीं स्नुषां दशरथस्य च। कथं व्याहरतो मां ते न जिह्वा व्यवशीर्यते ॥ १९ ॥ असन्देशात्तु रामस्य तपसश्चानुपालनात्। न त्वां कुर्मि दशग्रीव भस्म भस्मार्हं तेजसा ॥ २० ॥ नापहर्तुमहं शक्या तस्य रामस्य धीमतः। विधिस्तव वधार्थाय विहितो नात्र संशयः ॥ २१ ॥ शूरेण धनदभ्रात्रा बलैः समुदितेन च। अपोह्य रामं कस्माद्धि दारचौर्यं त्वया कृतम् ॥ २२ ॥

मिति भ्राम्येदिति परिहरति—तथेति। तत्र गज इव रामः। शश इव त्वम् ॥ १६ ॥ इक्ष्वाकुनाथं क्षिपन् मायामृगव्याजेन दूरं निस्सारयन्। इह स्वजनेषु न तावदुपगच्छसि। यद्युपगच्छसि तदा तत्प्रभावं वेत्स्यसीत्यर्थः ॥ १७–१९ ॥ असन्देशादिति। रामस्य भर्तुः। असन्देशात् अपकारिषु शपेथा इति सन्देशाभावात्। तपसः पातिव्रत्यरूपस्य। कुर्मि करोमि। उत्त्वविकरणप्रत्ययलोपावार्षौ। भस्मार्हं भस्मीकरणार्हं !। तेजसा पातिव्रत्यप्रभावेन ॥२०॥तस्य रामस्य तस्मात् रामात्। विधिः चौर्येणापहरणम्। विहितः, दैवेनेति शेषः ॥२१॥ बलैस्समुदितेन बलेन सर्वश्रेष्ठेनेत्यर्थः। अपोह्य रामं मृग

मनसापि कः प्रार्थयेत् ? किं पुनर्वचसेति भावः ॥१४॥ तस्य तस्मात्॥१५॥दृप्तो मातङ्गः शशश्च यथा वने दैवात्। साहितौ इति पाठः, युयुत्सू भवतः तयोश्च शशो यथाऽतिक्षुद्रस्तथा रामेण संयुगे त्वं शशवत् क्षुद्रः रामो गजवदित्यर्थः ॥ १६॥ उपगच्छसि। व्यत्ययेन भूते लट् ॥१७–१९॥ रामस्य असन्देशात् रामानुज्ञाभावात् तपसः पातिव्रत्यतपसः। भस्मार्हा भस्मीकरणार्हा। कुर्मि करोमि। भस्मार्हा भस्म इति पाठः॥ २० ॥ नेति। रामस्याहं रामसम्बन्धिन्यहम्। विधिः विधानं मदपहरणरूपम् विहितः, दैवेनेति शेषः ॥ २१ ॥ शूरेणेति। अपोह्य मायामृगच्छद्मना अन्यत्र नीत्वा ॥ २२–२५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

च्छन्नाऽपवाह्य ॥ २२ ॥ विवृत्य विदर्त्य ॥ २३ ॥ सिंहरयेव बलगमने यस्यासौ सिंहसत्त्वगतिः । जिह्वाग्रं लोचने च दीप्तानि यस्य सोऽयं दीप्तजिह्वाग्र लोचनः ॥ २४ ॥ कोपेन चलम् अग्रं यस्य तत् चलाग्रं च तत् मुकुटं च तेन प्रांशुः दीर्घः । चित्रमाल्यवत्त्वेऽपि रक्तमाल्यवत्त्वं तत्प्राचुर्यादुक्तम् ।

सीताया वचनं श्रुत्वा रावणो राक्षसाधिपः । विवृत्य नयने क्रूरे जानकीमन्ववैक्षत ॥ २३ ॥ नीलजीमूतसङ्काशो महाभुजशिरोधरः । सिंहसत्त्वगतिः श्रीमान् दीप्तजिह्वाग्रलोचनः ॥ २४ ॥ चलाग्रमुकुटप्रांशुश्चित्रमाल्यानुलेपनः । रक्तमाल्याम्बरधरस्तप्ताङ्गदविभूषणः ॥२५॥ श्रोणीसूत्रेण महता मेचकेन सुसंवृतः । अमृतोत्पादनद्धेन भुजगेनेव मन्दरः ॥२६॥ ताभ्यां स परिपूर्णाभ्यां भुजाभ्यां राक्षसेश्वरः । शुशुभेऽचलसङ्काशः शृङ्गाभ्यामिव मन्दरः॥२७॥ तरुणादित्यवर्णाभ्यां कुण्डलाभ्यां विभूषितः । रक्तपल्लवपुष्पाभ्यामशोकाभ्यामिवाचलः ॥ २८ ॥ स कल्पवृक्ष प्रतिमो वसन्त इव मूर्तिमान् । श्मशानचैत्यप्रतिमो भूषितोऽपि भयङ्करः ॥ २९ ॥ अवेक्षमाणो वैदेहीं कोपसंरक्त लोचनः । उवाच रावणः सीतां भुजङ्ग इव निःश्वसन् ॥ ३० ॥ अनयेनाभिसंपन्नमर्थहीनमनुव्रते । नाशयाम्यहमद्य त्वां सूर्यः सन्ध्यामिवौजसा ॥ ३१ ॥ इत्युक्ता मैथिलीं राजा रावणः शत्रुरावणः । सन्दिदेश ततः सर्वा राक्षसी र्घोरदर्शनाः ॥३२॥ एकाक्षीमेककर्णां च कर्णप्रावरणां तथा । गोकर्णीं हस्तिकर्णीं च लम्बकर्णीमकर्णिकाम् ॥३३॥

तप्ताङ्गदविभूषणः तप्तशब्देन तेजिष्ठत्वमुक्तम् ॥ २५ ॥ मेचकेन नीलेन । अमृतोत्पादनद्धेन अमृतोत्पादनार्थं नद्धेन ॥ २६ ॥ ताभ्यां प्रसिद्धाभ्याम् ॥ २७ ॥ २८ ॥ अलंकृतत्वे कल्पकसाम्यम् । भयंकरत्वे पुनश्चैत्यसाम्यम् । चैत्यं श्मशानवृक्षः, श्मशानमण्डपो वा । सीताया अत्यन्तभयंकरत्व ज्ञापनाय रावणवर्णनं कृतम्॥२९–३१॥ इत्युक्त्वेत्यादि । प्रधानाप्रधानभूते द्वे एकाक्ष्यौ । अतो न पुनरुक्तिः। अथवा अक्षम् इन्द्रियम्, एकाक्षीम् एकै

श्रोणीसूत्रेण रशनागुणेन । मेचकेन इन्द्रनीलनद्धमुखत्वान्मेचकत्वम्॥२६–३०॥ अनयेनेति श्लोकः केषुचित्कोशेषु नास्तीति कृत्वा न व्याख्यातः ॥३१॥३२॥ एकाक्षी

स०–अनयेन स्त्रीवधतन्नासिकाच्छेदाद्यन्यायेन । अभिसम्पन्नं युक्तम् । अर्थहीनं निर्भाग्यम् । एतादृशं राममनुव्रते सीते ! त्वां नाशयामि । सन्ध्यां सन्ध्याकालिकं तमः ॥ ३१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

केन्द्रियाम् । श्रोत्रनासादावेकमात्रवतीमित्यर्थः ॥३२–३६॥ प्रतिलोमानुलोमैः प्रतिकूलानुकूलाचरणैः । सामदानादिभेदनैः सामदानमुख्यैर्भेदैः । प्रथम प्रयुक्तसामदानैरित्यर्थः । आवर्जयत वशीकुरुत ॥३७॥३८॥ उपगम्येति । धान्यमालिनी रावणस्य कनिष्ठपत्नी । इदं मन्दोदर्या अप्युपलक्षणम् । उत्तरत्र

हस्तिपाद्यश्वपाद्यौ च गोपादीं पादचूलिकाम् । एकाक्षीमेकपादीं च पृथुपादीमपादिकाम् ॥ ३४ ॥ अतिमात्रशिरोग्रीवामतिमात्रकुचोदरीम् । अतिमात्रास्यनेत्रां च दीर्घजिह्वामजिह्विकाम् ॥ ३५ ॥ अनासिकां सिंहमुखीं गोमुखीं सूकरीमुखीम् । यथा मद्वशगा सीता क्षिप्रं भवति जानकी । तथा कुरुत राक्षस्यः सर्वाः क्षिप्रं समेत्य च ॥३६॥ प्रतिलोमानुलोमैश्च सामदानादिभेदनैः । आवर्जयत वैदेहीं दण्डस्योद्यमनेन च ॥ ३७ ॥ इति प्रतिसमादिश्य राक्षसेन्द्रः पुनः पुनः । काममन्युपरीतात्मा जानकीं पर्यतर्जयत् ॥३८॥ उपगम्य ततः क्षिप्रं राक्षसी धान्यमालिनी । परिष्वज्य दशग्रीवमिदं वचनमब्रवीत् ॥ ३९ ॥ मया क्रीड महाराज सीतया किं तवानया । विवर्णया कृपणया मानुष्या राक्षसेश्वर ॥ ४० ॥ नूनमस्या महाराज न दिव्यान् भोगसत्तमान् । विदधात्यमरश्रेष्ठस्तव बाहुबलार्जितान् ॥ ४१ ॥ अकामां कामयानस्य शरीरमुपतप्यते । इच्छन्तीं कामयानस्य प्रीतिर्भवति शोभना ॥ ४२ ॥

वानरान् प्रति हनुमद्वचने तथा वक्ष्यमाणत्वात् ॥३९॥४०॥ अस्यास्सीतायाः। अमरश्रेष्ठो ब्रह्मा । दिव्यान् भोगान्न विदधाति, अस्या दिव्यभोगे भाग्यं

मिति द्विरुपादानं व्यक्तिभेदात ॥ ३३–३६ ॥ प्रतिलोमेति । प्रतिलोमानुलोमैः प्रतिकूलानुकूलाचरणैः सामदानादिभेदनैः ॥ ३७–३९ ॥ मयेति । अकृपणयेति छेदः । अकृपणया पतिव्रतया सीतया किं करिष्यसि । अमानुष्येति छेदः । अमानुष्या अत एव विवर्णया मनुष्यभोगविलक्षणया, उत्तमवर्णयेत्यर्थः । मया सह क्रीडेति सम्बन्धः ॥ ४० ॥ नूनमिति । भोगसत्तमान् उत्तमभोगान् ॥ ४१ ॥ ४२ ॥

स०–पुनरेकाक्षीमित्युपादानं व्यक्तिभेदाभिप्रायेण अथवा पूर्वमेकाक्षीमिति मैथिलीविशेषणम् । एकस्मिन् रामे अक्षिणी यस्यास्सा तामित्यर्थः । एकमक्षि यस्यास्तेत्येकत्र । अपरत्र च एकस्मिन् भागे अक्षिणी यस्याः सापि निर्नासिकाव्यवधानमक्षिद्वयमेकस्मिन् प्रदेशे वर्तत इति नैकाक्षीमिति पुनरुक्तम् ॥ ३४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नास्तीत्यर्थः॥४१–४५॥ सर्गार्थं संग्रहेण दर्शयति–स इति ॥४६॥ इति श्रीगोविन्दराज० श्रीरामायणभूषणे शृङ्गार०सुन्दरकाण्ड०द्वाविंशः सर्गः॥२२॥

एवमुक्तस्तु राक्षस्या समुत्क्षिप्तस्ततो बली । प्रहसन् मेघसङ्काशो राक्षसः स न्यवर्तत ॥ ४३ ॥ प्रस्थितः स दशग्रीवः कम्पयन्निव मेदिनीम् । ज्वलद्भास्करवर्णाभं प्रविवेश निवेशनम् ॥४४॥ देवगन्धर्वकन्याश्च नागकन्याश्च सर्वतः । परिवार्य दशग्रीवं विविशुस्तद्गृहोत्तमम् ॥ ४५ ॥ स मैथिलीं धर्मपरामवस्थितां प्रवेपमानां परिभर्त्स्य रावणः । विहाय सीतां मदनेन मोहितः स्वमेव वेश्म प्रविवेश भास्वरम् ॥ ४६ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

इत्युक्त्वा मैथिलीं राजा रावणः शत्रुरावणः । संदिश्य च ततः सर्वा राक्षसीर्निर्जगाम ह ॥ १ ॥ निष्क्रान्ते राक्षसेन्द्रे तु पुनरन्तःपुरं गते । राक्षस्यो भीमरूपास्ताः सीतां समभिदुद्रुवुः ॥ २ ॥ ततः सीतामुपागम्य राक्षस्यः क्रोधमूर्च्छिताः । परं परुषया वाचा वैदेहीमिदमब्रुवन् ॥ ३ ॥ पौलस्त्यस्य वरिष्ठस्य रावणस्य महात्मनः । दशग्रीवस्य भार्यात्वं सीते न बहु मन्यसे ॥ ४ ॥ ततस्त्वेकजटा नाम राक्षसी वाक्यमब्रवीत् । आमन्त्र्य क्रोधताम्राक्षी सीतां करतलोदरीम् ॥ ५ ॥ प्रजापतीनां षण्णां तु चतुर्थो यः प्रजापतिः । मानसो ब्रह्मणः पुत्रः पुलस्त्य इति विश्रुतः ॥ ६ ॥ पुलस्त्यस्य तु तेजस्वी महर्षिर्मानसः सुतः । नाम्ना स विश्रवा नाम प्रजापतिसमप्रभः ॥ ७ ॥

इत्युक्त्वेत्यादि ॥ १–५ ॥ प्रजापतीनामिति । "मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः" इति षट् प्रजापतयः । तेषां चतुर्थः पुलस्त्यः ॥६–१२॥

एवमिति । राक्षस्या धान्यमालिन्या ॥ ४३–४५ ॥ मदनेन मोहित इति तस्य स्वरूपकथनम् ॥ ४६ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां द्वाविंशः सर्गः ॥ २२ ॥ अस्मिन् सर्गद्वयेऽपि विद्यमानभार्याशब्दस्य वास्तवार्थस्तु-भार्या भर्तव्या, भार्यात्वं भर्तव्यात्वमित्यर्थः । शत्रून् रावयति महाशब्दं कारयति स शत्रुरावणः ॥ १ ॥ २ ॥ ततः परं रावणगमनानन्तरम् लोकोक्तौ वा परमिति ॥ ३ ॥ भार्यात्वं भार्याभावम् । न बहुमन्यसे, मोहादिति शेषः ॥ ४ ॥ ततस्सर्वसाधारणेनद्राक्यप्रयोगोत्तरम् एकजटा विशिष्याब्रवीत् । करतलोदरीम् अतुन्दिलमध्यामित्यर्थः ॥५॥ प्रजापतीनामिति " मरीचि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तस्य पुत्रो विशालाक्षि रावणः शत्रुरावणः । तस्य त्वं राक्षसेन्द्रस्य भार्या भवितुमर्हसि ॥ ८ ॥ मयोक्तं चारु सर्वाङ्गि वाक्यं किन्नानुमन्यसे । ततो हरिजटा नाम राक्षसी वाक्यमब्रवीत् । विवर्त्य नयने कोपान्मार्जारसदृशेक्षणा ॥ ९ ॥ येन देवास्त्रयस्त्रिंशद्देवराजश्च निर्जिताः । तस्य त्वं राक्षसेन्द्रस्य भार्या भवितुमर्हसि ॥ १० ॥ ततस्तु प्रघसा नाम राक्षसी क्रोधमूर्च्छिता । भर्त्सयन्ती तदा घोरमिदं वचनमब्रवीत् ॥ ११ ॥ वीर्योत्सिक्तस्य शूरस्य सङ्ग्रामेष्वनिवर्तिनः । बलिनो वीर्ययुक्तस्य भार्यात्वं किं न लप्स्यसे ॥ १२ ॥ प्रियां बहुमतां भार्यां त्यक्त्वा राजा महाबलः । सर्वासां च महाभागां त्वामुपैष्यति रावणः ॥ १३ ॥ समृद्धं स्त्रीसहस्रेण नानारत्नोपशोभितम् । अन्तःपुरं समुत्सृज्य त्वामुपैष्यति रावणः ॥ १४ ॥ अन्या तु विकटा नाम राक्षसी वाक्यमब्रवीत् ॥ १५ ॥ असकृद्देवता युद्धे नागगन्धर्वदानवाः । निर्जिताः समरे येन स ते पार्श्वमुपागतः ॥ १६ ॥ तस्य सर्वसमृद्धस्य रावणस्य महात्मनः । किमद्य राक्षसेन्द्रस्य भार्यात्वं नेच्छसेऽधमे । ततस्तु दुर्मुखी नाम राक्षसी वाक्यमब्रवीत् ॥ १७ ॥ यस्य सूर्यो न तपति भीतो यस्य च मारुतः । न वाति स्मायतापाङ्गे किं त्वं तस्य न तिष्ठसि ॥ १८ ॥ पुष्पवृष्टिं च तरवो मुमुचुर्यस्य वै भयात् । शैलाश्च सुभ्रूः पानीयं जलदाश्च यदेच्छति ॥ १९ ॥ तस्य नैर्ऋत राजस्य राजराजस्य भामिनि किं त्वं न कुरुषे बुद्धिं भार्यार्थे रावणस्य हि ॥ २० ॥

प्रियामिति । सर्वासां मध्ये प्रियां बहुमताम् महाभागां च भार्यां मन्दोदरीं त्यक्त्वा त्वामुपैष्यति ॥ १३–१७ ॥ यस्य यस्मात् । तस्य न तिष्ठसि तस्मै न तिष्ठसे । प्रकाशनार्थेष्यार्षत्वात्परस्मैपदं षष्ठी च ॥ १८ ॥ पुष्पवृष्टिमित्यादि । शैलाश्च जलदाश्च पानीयं रावणः यदेच्छति तदा मुञ्चन्तीति रत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः " इति षट् प्रजापतयः, तेषां चतुर्थः पुलस्त्यः ॥ ६ ॥ ७ ॥ तस्य पुत्र इत्यनेन कुलीनत्वं सूचितम् ॥ ८–११ ॥ किं किमर्थम् ॥ १२ ॥ प्रियामिति । सर्वासां मध्ये बहुमतां प्रियां भार्यां मन्दोदरीमपि त्यक्त्वा त्वामुपैष्यतीति सम्बन्धः ॥ १३–१७ ॥ यस्य यस्मात् । तस्य न तिष्ठसे,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विपरिणम्यते ॥ १९ ॥ २० ॥ साधु ते कथितम् साधु गृहाणेति साधुशब्दद्वयस्य निर्वाहः ॥ २१ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रयोविंशः सर्गः ॥ २३ ॥ तत इत्यादि ॥ १ ॥ २ ॥ मानुषीति । न त्वं जातु भविष्यसि, तस्येति शेषः ।

साधु ते तत्त्वतो देवि कथितं साधु भामिनि । गृहाण सुस्मिते वाक्यमन्यथा न भविष्यसि ॥ २१ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

ततः सीतामुपागम्य राक्षस्यो विकृताननाः । परुषं परुषा नार्य ऊचुस्तां वाक्यमप्रियम् ॥ १ ॥ किं त्वमन्तःपुरे सीते सर्वभूतमनोहरे । महार्हशयनोपेते न वासमनुमन्यसे ॥ २ ॥ मानुषी मानुषस्यैव भार्यात्वं बहु मन्यसे । प्रत्याहर मनो रामान्न त्वं जातु भविष्यसि ॥ ३ ॥ त्रैलोक्यवसुभोक्तारं रावणं राक्षसेश्वरम् । भर्तारमुपसङ्गम्य विहरस्व यथासुखम् ॥ ४ ॥ मानुषी मानुषं तं तु राममिच्छसि शोभने । राज्याद् भ्रष्टमसिद्धार्थं विक्लवं त्व मनिन्दिते ॥ ५ ॥ राक्षसीनां वचः श्रुत्वा सीता पद्मनिभेक्षणा । नेत्राभ्यामश्रुपूर्णाभ्यामिदं वचनमब्रवीत् ॥ ६ ॥ यदिदं लोकविद्विष्टमुदाहरथ सङ्गताः । नैतन्मनसि वाक्यं मे किल्बिषं प्रतिभाति वः ॥ ७ ॥

मानुषीति हेतुगर्भम् । मानुषी त्वं मानुषं तमिच्छसि ॥ ३–६ ॥ किल्बिषं पापावहम् ॥ ७ ॥ ८ ॥

वश इति शेषः । तस्मै न तिष्ठस इति वाऽर्थः॥१८–२०॥साधु कथितं साधु गृहाण चेति सम्बन्धः॥२१॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां त्रयोविंशः सर्गः ॥ २३ ॥ १ ॥ २ ॥ मानुषीति । प्रत्याहर निवर्तय । न त्वं जातु, भविष्यसि, रामस्येति शेषः । मानुषीत्वस्य वास्तवार्थस्तु–मानुषीत्वं मानुषस्य मनुष्यावतारस्य रामस्य भार्यात्वमनुमन्यसे । तदुक्तम् अतः रामात् मनो न प्रत्याहर त्वं जातु भविष्यसि, रामस्येति शेषः ॥ ३ ॥ ॥ ४ ॥ मानुषीति। राज्याद्भ्रष्टं पितृवाक्यपरिपालनाय त्यक्तराज्यमित्यर्थः । असिद्धार्थम् अश्रासौ सिद्धार्थश्च असिद्धार्थः तम्, सिद्धसर्वप्रयोजनं विष्णुमित्यर्थः । विक्लवं दयालुम् ॥ ५ ॥ राक्षसीनामिति । नेत्राभ्यामुपलक्षिता ॥ ६ ॥ किल्बिषं किल्बिषविषयम् ॥ ७ ॥

स०—परुषमपि सरुषा पित्रा पुत्रं प्रत्युदीरितं शठ तर्हि न पठेत्येवमादि वाक्यमन्ततो गत्वा प्रायः प्रियपर्यवसायि दृष्टमित्यतोऽप्रियमित्युक्तम् ॥ १ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सुवर्चलेत्यादिबहुदृष्टान्तप्रदर्शनं स्वस्याः पातिव्रत्यदार्ढ्यद्योतनाय ॥ ९–१३ ॥ अवलीनः छन्नः । राक्षसीरशृणोत् राक्षसीवाक्यान्यशृणोदित्यर्थः

न मानुषी राक्षसस्य भार्या भवितुमर्हति । कामं खादत मां सर्वा न करिष्यामि वो वचः ॥ ८ ॥ दीनो वा राज्य हीनो वा यो मे भर्ता स मे गुरुः । तं नित्यमनुरक्ताऽस्मि यथा सूर्यं सुवर्चला ॥ ९ ॥ यथा शची महाभागा शक्रं समुपतिष्ठति । अरुन्धती वसिष्ठं च रोहिणी शशिनं यथा ॥ १० ॥ लोपामुद्रा यथाऽगस्त्यं सुकन्या च्यवनं यथा । सावित्री सत्यवन्तं च कपिलं श्रीमती यथा ॥ ११ ॥ सौदासं मदयन्तीव केशिनी सगरं यथा । नैषधं दमयन्तीव भैमी पतिमनुव्रता । तथाऽहमिक्ष्वाकुवरं रामं पतिमनुव्रता ॥ १२ ॥ सीताया वचनं श्रुत्वा राक्षस्यः क्रोधमूर्च्छिताः । भर्त्सयन्ति स्म परुषैर्वाक्यै रावणचोदिताः ॥ १३ ॥ अवलीनः स निर्वाक्यो हनुमान् शिंशुपाद्रुमे । सीतां सन्तर्जयन्तीस्ता राक्षसीरशृणोत् कपिः ॥ १४ ॥ तामभिक्रम्य संक्रुद्धा वेपमानां समन्ततः । भृशं संलिलिहुर्दीप्तान् प्रलम्बान् दशनच्छदान् ॥ १५ ॥ ऊचुश्च परमक्रुद्धाः प्रगृह्याशु परश्वधान् । नेयमर्हति भर्तारं रावणं राक्षसाधिपम् ॥ १६ ॥ संभर्त्स्यमाना भीमाभी राक्षसीभिर्वरानना । सा बाष्पमुपमार्जन्ती शिंशुपां तामुपागमत् ॥ १७ ॥ ततस्तां शिंशुपां सीता राक्षसीभिः समावृता । अभिगम्य विशालाक्षी तस्थौ शोकपरिप्लुता ॥ १८ ॥ तां कृशां दीनवदनां मलिनाम्बरधारिणीम् । भर्त्सयाञ्चक्रिरे सीतां राक्षस्यस्तां समन्ततः ॥ १९ ॥

॥ १४ ॥ नेयमर्हतीत्यत्रेतिकरणं बोध्यम् । अस्य ऊचुरित्यनेन सम्बन्धः ॥ १५ ॥ १६ ॥ सा भर्त्स्यमानेति पाठे–भर्त्सनोपगमनरूपक्रियाभेदात्

नेति । भार्या भर्तव्या ॥ ८ ॥ तं नित्यमित्यादि । अत्रातिदुर्दशास्वपि दृढव्रतत्वद्योतनाय नानाविधानेकसाध्वीनिदर्शनोपन्यास इत्यनुसन्धेयम् ॥ ९–१३ ॥ अवलीन इति । तर्जयन्तीरशृणोत् राक्षसीनां तर्जनवाक्यान्यशृणोदित्यर्थः ॥ १४ ॥ १५ ॥ ऊचुरिति नेयमर्हतीत्यूचुरिति सम्बन्धः ॥ १६ ॥ सा भर्त्स्यमाना, अभूदिति शेषः । सेति । सा तां हनुमदधिष्ठितां शिंशुपामुपागमदिति योजना ॥ १७–१९ ॥

स०–साभर्त्स्यमाना इति पाठः । साभर्त्स्यमानेति पदमेकम् । सां हिंसामुद्दिश्य भर्त्स्यमाना साभर्त्स्यमाना " सा तु हिंसायाम् " इति विश्वः । या सेत्यन्वयः । उपेत्यनेनातिसामीप्य सूचयति ॥ १७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तच्छब्दद्वयम् । तां हनुमदधिष्ठितां शिंशुपाम् ॥ १७–१९ ॥ ततस्तां विनता नामेति । निर्णतोदरी उन्नतोदरी ॥ २० ॥ अतिकृतम् अतिमात्रकृतम्

ततस्तां विनता नाम राक्षसी भीमदर्शना । अब्रवीत् कुपिताकारा कराला निर्णतोदरी ॥ २० ॥ सीते पर्याप्त मेतावद्भर्तुः स्नेहो निदर्शितः । सर्वत्रातिकृतं भद्रे व्यसनायोपकल्पते ॥ २१ ॥ परितुष्टाऽस्मि भद्रं ते मानुषस्ते कृतो विधिः । ममापि तु वचः पथ्यं ब्रुवन्त्याः कुरु मैथिलि ॥२२॥ रावणं भज भर्तारं भर्तारं सर्वरक्षसाम् । विक्रान्तं रूपवन्तं च सुरेशमिव वासवम् ॥ २३ ॥ दक्षिणं त्यागशीलं च सर्वस्य प्रियदर्शनम् ॥ २४ ॥ मानुषं कृपणं रामं त्यक्त्वा रावणमाश्रय । दिव्याङ्गरागा वैदेहि दिव्याभरणभूषिता ॥ २५ ॥ अद्यप्रभृति सर्वेषां लोकानामीश्वरी भव । अग्नेः स्वाहा यथा देवी शचीवेन्द्रस्य शोभने ॥ २६ ॥ किं ते रामेण वैदेहि कृपणेन गतायुषा । एतदुक्तं च मे वाक्यं यदि त्वं न करिष्यसि । अस्मिन् मुहूर्ते सर्वास्त्वां भक्षयिष्यामहे वयम् ॥ २७ ॥ अन्या तु विकटा नाम लम्बमानपयोधरा । अब्रवीत् कुपिता सीतां मुष्टिमुद्यम्य गर्जती ॥ २८ ॥ बहून्यप्रियरूपाणि वचनानि सुदुर्मते । अनुक्रोशान्मृदुत्वाच्च सोढानि तव मैथिलि ॥ २९ ॥

॥ २१ ॥ मानुषो विधिः कृतः, मनुष्यजात्युचितपातिव्रत्यप्रकटनं कृतम् एतावत्कालमित्यर्थः॥२२–२८॥ बहूनीनि । सोढानि, रावणेनेति शेषः॥२९॥

निर्णतोदरी कृशोदरी ॥ २० ॥ अतिकृतम् अतिमात्राचरणम् ॥ २१ ॥ मानुषो विधिः मनुष्यजात्युचितपातिव्रत्यप्रकटनं कृतम्, किंतु एतावता अलमित्यर्थः । वास्तवार्थस्तु–परितुष्टाऽस्मीत्यादिश्लोकत्रयं कुलकम् । अस्यार्थः–हे मैथिलि ! मानुषं मनुष्यधर्मं भयं त्यक्त्वा । रावयतीति रावणं दशाननम्, तथापि कृपणम् भर्तारं भ्रियते शुश्रूषादिना स्वामिनमिति भर्ता भृत्यः तम् आश्रय, रावणं भृत्यत्वेन अङ्गीकुर्वित्यर्थः । विक्रान्तादिगुणयुक्तं रामं च भजेति सम्बन्धः ॥२२–२९॥ अद्येति । अग्नेः स्वाहा, इन्द्रस्य शची यथा तथा अद्यप्रभृति लोकानामीश्वरी भवेति सम्बन्धः । दिव्याङ्गरागेत्यादि श्लोकत्रयं कुलकम् । तस्य वास्तवार्थस्तु– हे वैदेहि ! गतायुषा प्राप्तायुषा रामेण, सङ्गमो भविष्यतीति शेषः । ते तव, कृपणेन कार्पण्येनेत्यर्थः । किं ? माऽस्तु । अग्नेः स्वाहा इन्द्रस्य शची यथा तथा अद्यप्रभृति

स०–गतायुषा अस्मदाहाररूपत्वाद्गतायुष्केति भावः । सर्वास्त्वां भक्षयिष्यामह इत्युक्त्या नैकापि त्वत्पक्षपातिनी वर्तत इति द्योतयति ॥ २७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न चेति । कालपुरस्सरं कालानुरूपम् ॥ ३०–३३ ॥ प्रीतिं रावणविषयप्रीतिम् । प्रहर्षं कालकृतमनोविकासम् ॥ ३४ ॥ रामानु०–भजेति । प्रीतिं स्नेहम् । प्रहर्षम् आनन्दम् । नित्यदैन्यतां नित्यं दैन्यं यस्याः सा नित्यदैन्या तस्या भावो नित्यदैन्यता ताम् ॥ ३४ ॥ ॥ ३५–३७ ॥ उत्पाट्य वा उत्पाट्यैव ॥ ३८॥३९ ॥ दौर्हृदः

न च नः कुरुषे वाक्यं हितं कालपुरस्सरम् ॥३०॥ आनीतासि समुद्रस्य पारमन्यैर्दुरासदम् । रावणान्तःपुरं घोरं प्रविष्टा चासि मैथिलि ॥ ३१ ॥ रावणस्य गृहे रुद्धामस्माभिस्तु सुरक्षिताम् । न त्वां शक्तः परित्रातुमपि साक्षात् पुरन्दरः ॥ ३२ ॥ कुरुष्व हितवादिन्या वचनं मम मैथिलि । अलमश्रुप्रपातेन त्यज शोकमनर्थकम् ॥ ३३ ॥ भज प्रीतिं प्रहर्षं च त्यजैतां नित्यदैन्यताम् । सीते राक्षसराजेन सह क्रीड यथासुखम् ॥ ३४ ॥ जानासि हि यथा भीरु स्त्रीणां यौवनमध्रुवम् । यावन्न ते व्यतिक्रामेत्तावत् सुखमवाप्नुहि ॥ ३५ ॥ उद्यानानि च रम्याणि पर्वतोपवनानि च । सह राक्षसराजेन चर त्वं मदिरेक्षणे ॥ ३६ ॥ स्त्रीसहस्राणि ते सप्त वशे स्थास्यन्ति सुन्दरि । रावणं भज भर्तारं भर्तारं सर्वरक्षसाम् ॥ ३७ ॥ उत्पाट्य वा ते हृदयं भक्षयिष्यामि मैथिलि । यदि मे व्याहृतं वाक्यं न यथावत् करिष्यसि ॥ ३८ ॥ ततश्चण्डोदरी नाम राक्षसी क्रोधमूर्च्छिता । भ्रामयन्ती महच्छूलमिदं वचनमब्रवीत् ॥ ३९ ॥ इमां हरिणलोलाक्षीं त्रासोत्कम्पिपयोधराम् । रावणेन हृतां दृष्ट्वा दौर्हृदो मे महानभूत् ॥ ४० ॥ यकृत्प्लीहमथोत्पीडं हृदयं च सबन्धनम् । अन्त्राण्यपि तथा शीर्षं खादेयमिति मे मतिः ॥ ४१ ॥

इच्छा ॥ ४० ॥ कुक्षिदक्षिणभागस्थः कालखण्डाख्यो मांसपिण्डो यकृत् । "स्नायुस्त्रियां कालखण्डयकृती तु समे इमे" इत्यमरः । प्लीहा तु गुल्माख्यो दिव्याङ्गरागादियुक्ता सती,सर्वेषामस्मदादीनां लोकानां चेश्वरी भव । मे मया उक्तमेतद्वाक्यं न करिष्यसि यदि तर्हि त्वामुद्दिश्य अस्मिन्मुहूर्ते सर्वा वयं भक्षयिष्यामहे, विषमिति शेषः । सुदुर्मते वस्तुनस्तु-सुदुष्टेष्वपि मतिः अनुग्राहिका यस्याः सा । कालपुरस्सरं कालोचितम् नो वाक्यं न च कुरुषे, नैनत्ते हितमिति शेषः ॥ २६–३२ ॥ तुल्यं सहेत्यर्थः । अलमश्रुनिपातेन इत्यपि पाठः ॥ ३३ ॥ प्रीतिं स्नेहम् । प्रहर्षम् आनन्दम् । नित्यदैन्यतां निरन्तरदैन्यत्वम । सीते इत्यस्य वास्तवार्थस्तु राक्षसराजेन, यत्किञ्चिदुक्तमिति शेषः । सह सहस्व, यथासुखं क्रीड ॥ ३४ ॥ तत्र हेतुः–जानासि हीति ॥ ३५ ॥ उद्यानानीत्यस्य वास्तवार्थस्तु–राक्षसराजेन सह एकदा, संवर्द्धिनानीति शेषः । उद्यानानि च रावणं भर्तारं भृत्यत्वेन भज, अङ्गीकुर्वित्यर्थः ॥ ३६ ॥ ३७ ॥ उत्पाट्य वा उत्पाट्यैव ॥ ३८ ॥ ३९ ॥ दौर्हृदः इच्छा ॥ ४० ॥ यकृत्प्लीहमित्यादिना दौर्हृदस्य स्वरूपं कथयति–यकृत्प्लीहं महत्क्रोडमिति । यकृन्नाम हृदयस्य दक्षिण

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वामभागस्थो मांसपिण्डविशेषः । नकारान्तस्य प्लीहन्शब्दस्य अकारान्तत्वमार्षम् । "अन्त्रं पुरीतद्गुल्मस्तु प्लीहा पुंसि" इत्यमरः । उत्पीडं तस्यो परि स्थितं मांसम् । हृदयम् पद्मकोशप्रतीकाशं मांसम् । बन्धनं तस्य धारणमधोमांसम् । उत्क्रोडमिति पाठे उत्क्रोडो हृदयस्य स्थानम् । अन्त्रं पुरीतत् ॥ ४१–४३ ॥ ततस्त्वजामुखी नामेत्यादि । पीलुकान् मांसखण्डान् ॥ ४४॥ पेयं लेह्यं चास्या उपदंशत्वेनोच्यते ॥ ४५ ॥४६ ॥ निकुम्भिला

ततस्तु प्रघसा नाम राक्षसी वाक्यमब्रवीत् । कण्ठमस्या नृशंसायाः पीडयाम किमास्यते ॥ ४२ ॥ निवेद्यतां ततो राज्ञे मानुषी सा मृतेति ह । नात्र कश्चन सन्देहः खादतेति स वक्ष्यति ॥४३॥ ततस्त्वजामुखी नाम राक्षसी वाक्यमब्रवीत् । विशस्येमां ततः सर्वाः समान् कुरुत पीलुकान् ॥४४॥ विभजाम ततः सर्वा विवादो मे न रोचते । पेयमानीयतां क्षिप्रं लेह्यमुच्चावचं बहु ॥ ४५ ॥ ततः शूर्पणखा नाम राक्षसी वाक्यमब्रवीत् । अजामुख्या यदुक्तं हि तदेव मम रोचते ॥ ४६ ॥ सुरा चानीयतां क्षिप्रं सर्वशोकविनाशिनी । मानुषं मांसमास्वाद्य नृत्यामोऽथं निकुम्भिलाम् ॥४७॥ एवं संभर्त्स्यमाना सा सीता सुरसुतोपमा । राक्षसीभिः सुघोराभिर्धैर्यमुत्सृज्य रोदिति ॥ ४८ ॥

इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

नाम लङ्कायाः पश्चिमद्वारप्रदेशवासिनी भद्रकाली ॥ ४७ ॥ एवमिति । रोदिति अरुदत् ॥ ४८ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुर्विंशः सर्गः ॥ २४ ॥

भागस्थो मांसविशेषः । प्लीहा तु हृदि वामभागस्थो मांसविशेषः । "अन्त्रं पुरीतद् गुल्मस्तु प्लीहा पुंस्यथ वस्नसा" इत्यमरः । क्रोडं भुजान्तरम्, वक्षः गोमुखाकृतिमांसयुक्तमस्थि हृदयोपरिस्थितमांसविशेषो वा । अथोत्पीडमिति पाठे–उत्पीडं प्लीहोपरिस्थितं मांसम् । हृदयं च सबन्धनं नाडीबन्धनसहितं सुकुलाकारहृत्पद्माख्यं मांसविशेषम् ॥ ४१–४४ ॥ तत इति । पिण्डकान् मांसखण्डान् ॥ ४५ ॥ ४६ ॥ सुरेति । निकुम्भिला नाम लङ्कायाः पश्चिमभाग वर्तिनी काचन शक्तिः ॥ ४७ ॥ रोदिति अरुदत् । सुरसुतोपमा देवकन्योपमा । "स्त्रीसहस्राणि ते सप्त" इत्यारभ्य सर्गसमाप्तिपर्यन्तस्य वास्तवार्थस्तु–रावणं भर्तारं भज भृत्यत्वेनाङ्गीकुर्वित्यर्थः । उत्पाटयेति । हे मैथिलि ! ते तुभ्यं व्याहृतं वाक्यम् रावणं भृत्यत्वेनाङ्गीकुर्वीति वाक्यमित्यर्थः । यथावन्न करिष्यसि यदि मे मम हृदयमुत्पाट्य भक्षयिष्यामीति सम्बन्धः । सीतामुद्दिश्योक्तानि विकटायाः परुषवाक्यान्यसहमानानां चण्डोदरीप्रभृतीनां विविधप्रलापानाह–ततश्चण्डोदरी

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तथा तासां वदन्तीनामित्यादि । तासां वदन्तीनां तासु वदन्तीषु ॥ १ ॥ एवमुक्तेति । मनस्विनी पातिव्रत्ये दृढमनाः ॥२॥ रामानु०—तथेति । तासां वदन्तीनां तासु वदन्तीषु सतीष्वित्यर्थः । अस्माच्छ्लोकात् परम् एवमुक्तेति श्लोकः । मनस्विनीति । पातिव्रत्ये दृढमनाः । अतः परं न मानुषीति श्लोकः ॥ १ ॥ २ ॥ खादत भक्षयत ॥ ३ ॥ शर्म सुखम् ॥ ४ ॥ रामानु०—न मानुषीति । कामं खादत यथेच्छं भक्षयत । अतः परं सा राक्षसीति श्लोकः । अतः परम् वेपत इति श्लोकः ॥ ३ ॥ ४ ॥ कोकैः ईहामृगैः ।

तथा तासां वदन्तीनां परुषं दारुणं बहु । राक्षसीनामसौम्यानां रुरोद जनकात्मजा ॥ १ ॥ एवमुक्ता तु वैदेही राक्षसीभिर्मनस्विनी । उवाच परमत्रस्ता बाष्पगद्गदया गिरा ॥२॥ न मानुषी राक्षसस्य भार्या भवितुमर्हति । कामं खादत मां सर्वा न करिष्यामि वो वचः ॥ ३ ॥ सा राक्षसीमध्यगता सीता सुरसुतोपमा । न शर्म लेभे दुःखार्ता रावणेन च तर्जिता ॥ ४ ॥ वेपते स्माधिकं सीता विशन्तीवाङ्गमात्मनः । वने यूथपरिभ्रष्टा मृगी कोकैरिवार्दिता ॥ ५ ॥ सा त्वशोकस्य विपुलां शाखामालम्ब्य पुष्पिताम् । चिन्तयामास शोकेन भर्तारं भग्नमानसा ॥ ६ ॥ सा स्नापयन्ती विपुलौ स्तनौ नेत्रजलस्रवैः । चिन्तयन्ती न शोकस्य तदाऽन्तमधिगच्छति ॥ ७ ॥

"कोकस्त्वीहामृगो वृकः" इत्यमरः ॥५॥ रामानु०—कोकैः ईहामृगैः । " कोकस्त्वीहामृगो वृकः " इत्यमरः । अतः परम् सा त्विति श्लोकः ॥ ५ ॥ अशोकस्य हनुमदधिष्ठितशिंशुपासन्निहितस्य ॥६॥ अन्तम् अवधिम् । अधिगच्छति अध्यगच्छत् ॥७॥ रामा०—अशोकस्य विपुलां शाखामालम्ब्य । हनुमदधिष्ठितशिंशुपामूलं प्राप्तायास्सीतायाः इत्यादिना नृत्यामोऽथ निकुम्भिलामित्यन्तेन । तत इत्यादि श्लोकत्रयमेकं वाक्यम् । रावणेन हतामिमां सीतां दृष्ट्वा मे मम दौर्हृदः स्नेहः अस्यामभूदिति शेषः । एवं परुषं वदन्त्या विकटायाः यकृत्प्लीहादीनि खादेयमिति मे मतिरिति चण्डोदरी नाम राक्षसी वचनमब्रवीदिति सम्बन्धः । ततस्तु प्रघसेत्यादिश्लोकद्वयमेकं वाक्यम् । नृशंसायाः क्रूरायाः अस्या विकटायाः कण्ठं पीडयामः । अमानुषीति छेदः । अमानुषी विकटा नाम राक्षसी । ततस्त्वजामुखीत्यादिश्लोकद्वयमेकं वाक्यम् । इमां विकटाम् ॥ ४८ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां चतुर्विंशः सर्गः ॥ २४ ॥

तथा तासामिति ॥ १ ॥ मनस्विनी पातिव्रत्ये दृढमनाः ॥ २ ॥ कामं यथेच्छम् । सीताविलापस्य वास्तवार्थस्तु—श्रीरामवियोगेन घोरराक्षसपुरावस्थानेन विरूप राक्षसीसमागमेन च विविधप्रलापादिकमिति ज्ञेयम् । अस्मिन् काण्डे यत्र यत्र सीताप्रलापः तत्र तत्र एवमेवोहनीयः ॥ ३ ॥ ४ ॥ कोकैः वृकैः ॥ ५ ॥ अशोकस्य विपुलां शाखामालम्ब्य हनुमदधिष्ठितशिंशुपामूलं प्राप्तायास्सीताया अशोकशाखालम्बनाभिधानात् अशोकशाखाः शिंशुपाशाखाश्च सम्मिलिता वर्तन्त

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अशोकशाखालम्बनाभिधानादशोकार्शिशुपाशाखाः परस्परं संमिलिता वर्तन्त इत्यवगम्यते । अतः परं सा वेपमानेति श्लोकः ॥ ६ ॥७॥ राक्षसीनां राक्षसीभ्यः ॥ ८ ॥ सीतयेति व्यत्ययेन षष्ठ्यर्थे तृतीया । परिसर्पती परिसर्पन्ती । नुमभाव आर्षः ॥ ९ ॥ दुःखार्ता राक्षसीवचनश्रवणजदुःखार्ता । आर्ता रामविरहार्ता ॥ १० ॥

रामानु०–राक्षसीनां राक्षसीभ्यः । अतः परं तस्या इति श्लोकः । वेपन्त्या सीतयेत्यत्र षष्ठ्यर्थे तृतीया । परिसर्पती परिसर्पन्ती । नुमभाव आर्षः । अतः परं सा निःश्वसन्तीति श्लोकः । अतः

सा वेपमाना पतिता प्रवाते कदली यथा । राक्षसीनां भयत्रस्ता विवर्णवदनाऽभवत् ॥ ८ ॥ तस्याः सा दीर्घ विपुला वेपन्त्या सीतया तदा। ददृशे कम्पिनी वेणी व्यालीव परिसर्पती ॥ ९ ॥ सा निःश्वसन्ती दुःखार्ता शोको पहतचेतना । आर्ता व्यसृजदश्रूणि मैथिली विललाप ह ॥ १० ॥ हा रामेति च दुःखार्ता हा पुनर्लक्ष्मणेति च । हा श्वश्रु मम कौसल्ये हा सुमित्रेति भामिनी ॥ ११ ॥ लोकप्रवादः सत्योऽयं पण्डितैः समुदाहृतः । अकाले दुर्लभो मृत्युः स्त्रिया वा पुरुषस्य वा ॥ १२ ॥ यत्राहमेवं क्रूराभी राक्षसीभिरिहार्दिता । जीवामि हीना रामेण मुहूर्तमपि दुःखिता ॥ १३ ॥ एषाऽल्पपुण्या कृपणा विनशिष्याम्यनाथवत् । समुद्रमध्ये नौः पूर्णा वायुवेगैरिवाहता ॥ १४ ॥ भर्तारं तमपश्यन्ती राक्षसीवशमागता । सीदामि खलु शोकेन कूलं तोयहतं यथा ॥ १५ ॥ तं पद्मदल पत्राक्षं सिंहविक्रान्तगामिनम् । धन्याः पश्यन्ति मे नाथं कृतज्ञं प्रियवादिनम् ॥ १६ ॥

परं हा रामेति श्लोकः ॥ ८–१० ॥ सुमित्रेत्यत्र सम्बुद्धावाप एकारादेशाभाव आर्षः ॥ ११ ॥ रामानु०–हा सुमित्रेतीत्यत्र एकाराभाव आर्षः ॥ ११ ॥ लोकप्रवाद इत्यादिश्लोकद्वयमेकं वाक्यम् । अकाले अप्राप्तकाले । दुर्लभ इत्यत्र इतिकरणं बोध्यम् ॥ १२ ॥ यत्र यतः ॥ १३ ॥ रामानु०–अतः परं लोकप्रवाद इत्यादि श्लोकद्वयमेकं वाक्यम् । दुर्लभ इत्यत्रेतिकरणं द्रष्टव्यम् । यत्र यतः । एवं पाठक्रमः । केषुचित्कोशेषु व्युत्क्रमस्तु लेखकप्रमादकृतः ॥ १२ ॥ १३ ॥ एषेति । पूर्णा, पदार्थैरिति शेषः ॥ १४ ॥ १५ ॥ मम धनं सर्वेषां स्वं भविष्यतीत्याह–तमिति । तम् "बहवो नृप कल्याणगुणाः पुत्रस्य सन्ति ते" इति प्रसिद्धम् ।

इत्यवगम्यते ॥ ६ ॥ ७ ॥ राक्षसीनां राक्षसीभ्यः ॥ ८ ॥ वेपन्त्या सीतयेत्यत्र षष्ठ्यर्थे तृतीया । परिसर्पती परिसर्पन्ती ॥ ९ ॥ १० ॥ हा सुमित्रेत्यत्र एकाराभाव आर्षः ॥ ११ ॥ लोकप्रवाद इत्यादिश्लोकद्वयमेकं वाक्यम । दुर्लभ इत्यत्र इतिकरणं द्रष्टव्यम् । यत्र यतः ॥ १२ ॥ १३ ॥ पूर्णा पदार्थैः ॥ १४ ॥ १५ ॥ पद्मदल

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

आत्मगुणानुक्त्वा विग्रहगुणानाह पद्मदलपत्राक्षम् । दलतीति दलं विकसितपद्माक्षमित्यर्थः । यद्वा दलतीति दलं गर्भपत्रम् । विस्पष्टार्थमेकार्थं शब्दद्वयं वा । सिंहविक्रान्तगामिनं विक्रान्तं विक्रमः गमनं तद्वत् गच्छतीति तथा ॥ १६ ॥ १७ ॥ पुरा जन्मान्तरे पूर्वजन्मनि । घोरं सुदारुणम् अत्यन्तघोर

सर्वथा तेन हीनाया रामेण विदितात्मना । तीक्ष्णं विषमिवास्वाद्य दुर्लभं मम जीवितम् ॥ १७ ॥ कीदृशं तु मया पापं पुरा जन्मान्तरे कृतम् । येनेदं प्राप्यते दुःखं मया घोरं सुदारुणम् ॥ १८ ॥ जीवितं त्यक्तुमिच्छामि शोकेन महता वृता । राक्षसीभिश्च रक्ष्यन्त्या रामो नासाद्यते मया ॥ १९ ॥ धिगस्तु खलु मानुष्यं धिगस्तु परवश्यताम् । न शक्यं यत् परित्यक्तुमात्मच्छन्देन जीवितम् ॥ २० ॥

इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

प्रसक्ताश्रुमुखीत्येवं ब्रुवन्ती जनकात्मजा । अधोमुखमुखी बाला विलप्तुमुपचक्रमे ॥ १ ॥
उन्मत्तेव प्रमत्तेव भ्रान्तचित्तेव शोचती । उपावृत्ता किशोरीव विवेष्टन्ती महीतले ॥ २ ॥

मित्यर्थः ॥ १८ ॥ रक्ष्यन्त्या रक्ष्यमाणया ॥ १९ ॥ परवश्यतां भर्तृपरतन्त्रताम् । परस्वभूतं शरीरं न स्वेच्छया त्यक्तुं शक्यमित्यर्थः । आत्मच्छन्देन मदिच्छया ॥ २० ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चविंशः सर्गः ॥ २५ ॥

प्रसक्तेत्यादि । उन्मत्ता चित्तविभ्रमवती । " उन्मादश्चित्तविभ्रमः " इत्युक्तेः । प्रमत्ता अनवधाना । " प्रमादोऽनवधानता " इत्यमरः । भ्रान्तचित्ता

पद्माक्षं दलतीति दलं विकसितपद्मम्, तस्य पद्ममिवाक्षं विकसितपद्मपद्माक्षमित्यर्थः ॥ १६ ॥ तीक्ष्णं विषं वत्सनाभादिकमास्वाद्य स्थितस्येव मम मे जीवितं दुर्लभम् ॥ १७ ॥ १८ ॥ रक्ष्यन्त्या रक्ष्यमाणयेत्यर्थः ॥ १९ ॥ छन्देन इच्छया ॥ २०॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां पञ्चविंशः सर्गः ॥ २५ ॥ प्रसक्ताश्रुमुखी प्रसक्तानि प्रवृत्तानि अश्रूणि मुखे यस्यास्सा । एवं ब्रुवन्ती वक्ष्यमाणरीत्या ब्रुवन्ती । विलप्तुं विलपितुम् ॥ १ ॥ उन्मत्तेव भूताविष्टेव । प्रमत्तेव मदकरद्रव्यसेवनात् प्रकर्षेण मत्तेव । भ्रान्तचित्तेव व्यामूढचित्तेव । उपावृत्ता किशोरीव श्रमापनोदनार्थं वेष्टिता वडवेव ॥ २ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अनवस्थितचित्ता । उपावृत्ता श्रमापनोदनार्थं वेष्टिता । किंशोरीव बडवेव ॥ १ ॥२ ॥ राघवस्येत्यादि । प्रमत्तस्य अनवहितस्य ॥ ३॥४ ॥ न ईति । मे जीवितेर्जीवनैः कोऽप्यर्थो नास्ति । केवलजीवितस्यानपेक्षितत्वेप्यर्थसहितत्वेन तदपेक्षा स्यात् नेत्याह नैवार्थैर्न च भूषणैः । भूषणैरर्थैश्च सहितैर्जीवनैर्मे नार्थः । कुत इत्यत्राह वसन्त्या इति । राक्षसीमध्यवासाद्रामाविरहाच्च सर्वोपकरणसहितमपि जीवितं नापेक्षितमित्यर्थः ॥ ९–१० ॥ प्रत्याख्यातं प्रत्या

राघवस्य प्रमत्तस्य रक्षसा कामरूपिणा । रावणेन प्रमथ्याहमानीता क्रोशती बलात् ॥३॥ राक्षसीवशमापन्ना भर्त्स्यमाना सुदारुणम् । चिन्तयन्ती सुदुःखार्ता नाहं जीवितुमुत्सहे ॥ ४ ॥ नहि मे जीवितैरर्थो नैवार्थैर्न च भूषणैः । वसन्त्या राक्षसीमध्ये विना रामं महारथम् ॥ ५ ॥ अश्मसारमिदं नूनमथवाप्यजरामरम् । हृदयं मम येनेदं न दुःखेनावशीर्यते ॥ ६ ॥ धिङ्मामनार्यामसतीं याऽहं तेन विना कृता । मुहूर्तमपि रक्षामि जीवितं पापजीविता ॥७॥ का च मे जीविते श्रद्धा सुखे वा तं प्रियं विना । भर्तारं सागरान्ताया वसुधायाः प्रियंवदम् ॥८॥ भिद्यतां भक्ष्यतां वापि शरीरं विसृजाम्यहम् । न चाप्यहं चिरं दुःखं सहेयं प्रियवर्जिता॥९॥ चरणेनापि सव्येन न स्पृशेयं निशाचरम् । रावणं किं पुनरहं कामयेयं विगर्हितम् ॥१०॥ प्रत्याख्यातं न जानाति नात्मानं नात्मनः कुलम् । यो नृशंसस्वभावेन मां प्रार्थयितुमिच्छति ॥ ११ ॥ छिन्ना भिन्ना विभक्ता वा दीप्तेवाग्नौ प्रदीपिता । रावणं नोपतिष्ठेयं किं प्रलापेन वश्चिरम् ॥१२॥ ख्यातः प्राज्ञः कृतज्ञश्च सानुक्रोशश्च राघवः । सद्वृत्तो निरनुक्रोशः शङ्के मद्भाग्यसंक्षयात् ॥ १३ ॥

ख्यानम् । भावे निष्ठा । आत्मानं स्वस्वरूपम् ॥ ११ ॥ छिन्नेति । छिन्ना द्विखण्डतया कृता । भिन्ना दलिता । विभक्ता अवयवशः कृता । दीप्तेव अग्नौ प्रदीपिता वा ॥ १२ ॥ एवं पातिव्रत्यदार्ढ्यमुक्त्वा रामस्यानागमने कारणानि बहुधा शङ्कते–ख्यात इत्यादिना । प्राज्ञः दोषवत्यपि गुणदर्शी । "न तेऽम्बा मध्यमा माता गर्हितव्या कथंचन" इत्युक्तम् । कृतज्ञः "कथंचिदुपकारेण कृतेनैकेन तुष्यति" इत्युक्तरीत्या स्वाश्रितैः कृतं किंचित्कारं सर्वदा मनसि

प्रमत्तस्य अनवहितस्य ॥ ३ ॥ ४ ॥ अर्थैः धनैः ॥ ५ ॥ ६ ॥ असतीम् असतीवत्परगृहस्थाम् ॥ ७–१० ॥ प्रत्याख्यातं निराकरणम् ॥ ११ ॥ छिन्ना लूना । भिन्ना विदारिता । विभक्ता शीर्णा ॥ १२ ॥ प्राज्ञत्वादिगुणो रामः मद्भाग्यसंक्षयान्निरनुक्रोश इति शङ्क इति सम्बन्धः ॥ १३–१८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कुर्वन्नित्यर्थः। सानुक्रोशः किंचित्कारकरणे "भृशं भवति दुःखितः" इत्युक्तरीत्या तेषां व्यसने साति अतिदुःखितः राघवः, जनित्वार्जितानां गुणान्तराणामुपसंग्रहणमिदम्। सद्वृत्तः परसमृद्धचेकप्रयोजनः। ख्यातः एवं शत्रुगोष्ठ्यामपि प्रसिद्धः। निरनुक्रोशः शङ्के अस्यामप्यवस्थायां सुखप्रदानाभावात् नृशंसमाशङ्के। मद्भाग्यसंक्षयात् मद्भाग्यविपर्ययेणैवं वैपरीत्यं जातम् ॥ १३ ॥एकमात्रसहायः स किं करिष्यतीत्यत्राह—राक्षसानामिति। जनस्थाने

राक्षसानां सहस्राणि जनस्थाने चतुर्दश। येनैकेन निरस्तानि स मां किं नाभिपद्यते ॥ १४ ॥ निरुद्धा रावणेनाह मल्पवीर्येण रक्षसा। समर्थः खलु मे भर्ता रावणं हन्तुमाहवे ॥ १५ ॥ विराधो दण्डकारण्ये येन राक्षसपुङ्गवः। रणे रामेण निहतः स मां किं नाभिपद्यते ॥ १६ ॥ कामं मध्ये समुद्रस्य लङ्केयं दुष्प्रधर्षणा। न तु राघवबाणानां गतिरोधीह विद्यते ॥१७॥ किं तु तत्कारणं येन रामो दृढपराक्रमः। रक्षसाऽपहृतां भार्यामिष्टां नाभ्यवपद्यते॥ १८॥ इहस्थां मां न जानीते शङ्के लक्ष्मणपूर्वजः। जानन्नपि हि तेजस्वी धर्षणं मर्षयिष्यति ॥ १९ ॥ हृतेति योऽधिगत्वा मां राघवाय निवेदयेत्। गृध्रराजोऽपि स रणे रावणेन निपातितः ॥२०॥ कृतं कर्म महत्तेन मां तथाऽभ्यवपद्यता। तिष्ठता रावणद्वन्द्वे वृद्धेनापि जटायुषा ॥ २१ ॥ यदि मामिह जानीयाद्वर्तमानां स राघवः। अद्य बाणैरभिक्रुद्धः कुर्याल्लोकमराक्षसम् ॥ २२ ॥

रक्षसां चतुर्दश सहस्राणि एकेन येन रामेण निरस्तानि घातितानि सः नाभिपद्यते न रक्षति ॥१४॥ प्रबलो रावणः कथं निरस्य इत्यत्राह—निरुद्धेति ॥ १५ ॥ सामर्थ्यं निदर्शयति--विराध इति ॥ १६ ॥ अस्तु रामः समर्थः, तथापि समुद्रमध्यस्था लङ्का दुष्प्रधर्षेत्याशङ्क्याह--काममिति। गतिरोधि गतिप्रतिबन्धकम्, किंचिदिति शेषः ॥ १७ ॥ एतत्फलितमाह-किन्त्विति ॥१८॥ इहेति। लक्ष्मणपूर्वज इत्यनेन निरनुक्रोशत्वादिप्रसक्तत्वभावः सूच्यते। मर्षयिष्यतीत्यत्र काकुरनुसन्धेया ॥ १९ ॥ इहास्तीत्यज्ञाने हेतुमाह—हृतेति॥२०॥ प्रसङ्गादाह—कृतमिति। अभ्यवपद्यता रक्षता। रावणद्वन्द्वे इहस्थामिति। मर्षयिष्यतीत्यत्र काकुरनुसन्धेया। तथा च न सहिष्यतीत्यर्थः॥ १९॥ २० ॥ मां तथाऽभ्यवपद्यता मन्मोचनार्थमागतेन। रावणद्वन्द्वे रावणयुद्धे ॥ २१-२२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रावणद्वन्द्वयुद्धे ॥ २१-२३ ॥ अहं यथा एवं रुदती रुदन्त्यस्मि । तथा निहतनाथानां राक्षसीनां गृहे गृहे भूयः भूरि रुदन्त्यः भविष्यन्ती त्यर्थः ॥ २४ ॥ अन्विष्येति । रक्षसां लङ्कामन्विष्य कुर्यात्, रिपुनाशनमिति शेषः ॥ २५ ॥ २६ ॥ दुष्प्रस्थानः दुर्मार्गः, दुराचार इति यावत् ॥ २७ ॥ अशुभानि अशुभसूचकानि । हतप्रभेत्यत्र लङ्केत्यनुकर्षः । लङ्का अचिरेण कालेन हतप्रभा भविष्यतीत्यत्र यादृशानि सूचकानि स्युः इह

विधमेच्च पुरीं लङ्कां शोषयेच्च महोदधिम् । रावणस्य च नीचस्य कीर्तिं नाम च नाशयेत् ॥ २३ ॥ ततो निहत नाथानां राक्षसीनां गृहे गृहे । यथाऽहमेवं रुदती तथा भूयो न संशयः ॥ २४ ॥ अन्विष्य रक्षसां लङ्कां कुर्याद् रामः सलक्ष्मणः । न हि ताभ्यां रिपुर्दृष्टो मुहूर्तमपि जीवति ॥ २५ ॥ चिताधूमाकुलपथा गृध्रमण्डलसङ्कुला । अचिरेण तु लङ्केयं श्मशानसदृशी भवेत् ॥ २६ ॥ अचिरेणैव कालेन प्राप्स्याम्येव मनोरथम् । दुष्प्रस्थानो ऽयमाख्याति सर्वेषां वो विपर्ययम् ॥ २७ ॥ यादृशानीह दृश्यन्ते लङ्कायामशुभानि वै । अचिरेण तु कालेन भवि ष्यति हतप्रभा ॥२८॥ नूनं लङ्का हते पापे रावणे राक्षसाधमे । शोषं यास्यति दुर्धर्षा प्रमदा विधवा यथा ॥२९॥ पुण्योत्सवसमुत्था च नष्टभर्त्री सराक्षसी । भविष्यति पुरी लङ्का नष्टभर्त्री यथाऽङ्गना ॥ ३० ॥ नूनं राक्षस कन्यानां रुदन्तीनां गृहे गृहे । श्रोष्यामि नचिरादेव दुःखार्तानामिह ध्वनिम् ॥ ३१ ॥

लङ्कायां तादृशान्यशुभानि दृश्यन्त इत्यन्वयः ॥ २८ ॥ नूनमिति । दुर्धर्षेति लङ्काविशेषणम् ॥ २९ ॥ पुण्योत्सवेभ्यस्समुत्था निकृत्तपुण्योत्सवे त्यर्थः । सराक्षसी राक्षसीजनमात्रयुक्तेत्यर्थः । इयं लङ्कापुरी । नष्टभर्त्री सराक्षती अर्थात् हतराक्षसा नष्टभर्त्री अङ्गना यथा अङ्गनेव पुण्योत्सव

यथाऽहमेवं रुदत्यस्मि तथा तासां गृहे गृहे रुदन्त्यो राक्षस्यो भूयो भूयिष्ठं भविष्यन्तीत्यर्थः ॥ २४ ॥ ननु ज्ञाने खल्विदं सम्भाव्येत, ज्ञानमेव दुर्लभम्, तत्राह- अन्विष्येति । अचिन्त्यसामर्थ्यत्वादेवानुग्रहाच्च लङ्कामप्यन्विष्य मां ज्ञात्वा रक्षसां कुर्यात्, विनाशनमिति शेषः । विनाशस्येषत्करत्वमाह नहीति ॥ २५॥ २६ ॥ अचिरेणेति । कुतः दुष्प्रस्थानः दुर्मार्गवर्तनं कर्तृ विपर्ययमाख्याति ॥ २७ ॥ यादृशानीति । यादृशानि दृश्यन्ते तैरेव हतप्रभा भविष्यतीति ज्ञायत इत्यर्थः॥ २८ ॥ शोषम्, ऐश्वर्यादेरिति शेषः ॥ २९ ॥ ३० ॥ ध्वनिं रोदनशब्दम् । दुःखार्तानामिवेति च पाठः ॥ ३१ ॥ ३२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

समुत्था भविष्यतीत्यन्वयः ॥ ३०–३२ ॥ यदीति । रामः रावणस्य निवेशने मां वर्तमानाम् जानीयाद्यदि तदा लङ्का निर्दग्धा भविष्यतीति पूर्वेण सम्बन्धः ॥ ३३ ॥ समयः द्वादशमासात्मकः सङ्केतः । तस्य कालः आगतः सन्निहितः, मासद्वयमात्रपरिशेषादिति भावः ॥ ३४ ॥ पाप कारिणः ये नैर्ऋताः अधर्माद्धेतोः अकार्यं न जानन्ति, तैर्महोत्पातस्संभविष्यति ॥ ३५ ॥ एतदेव विवृणोति–नैत इति ॥ ३६ ॥ ३७ ॥ यदीति ।

सान्धकारा हतद्योता हतराक्षसपुङ्गवा । भविष्यति पुरी लङ्का निर्दग्धा रामसायकैः ॥ ३२ ॥ यदि नाम स शूरो मां रामो रक्तान्तलोचनः । जानीयाद्वर्तमानां हि रावणस्य निवेशने ॥ ३३ ॥ अनेन तु नृशंसेन रावणेनाधमेन मे । समयो यस्तु निर्दिष्टस्तस्य कालोऽयमागतः ॥ ३४ ॥ अकार्यं ये न जानन्ति नैर्ऋताः पापकारिणः । अधर्मात्तु महोत्पातो भविष्यति हि साम्प्रतम् ॥ ३५ ॥ नैते धर्मं विजानन्ति राक्षसाः पिशिताशनाः । ध्रुवं मां प्रातराशार्थं राक्षसः कल्पयिष्यति ॥ ३६ ॥ साऽहं कथं करिष्यामि तं विना प्रियदर्शनम् । रामं रक्तान्तनयनमपश्यन्ती सुदुःखिता ॥३७॥ यदि कश्चित् प्रदाता मे विषस्याद्य भवेदिह । क्षिप्रं वैवस्वतं देवं पश्येयं पतिना विना ॥ ३८॥ नाजानाज्जीवतीं रामः स मां लक्ष्मणपूर्वजः । जानन्तौ तौ न कुर्यातां नोव्यौ हि मम मार्गणम् ॥ ३९ ॥ नूनं ममैव शोकेन स वीरो लक्ष्मणाग्रजः । देवलोकमितो यातस्त्यक्त्वा देहं महीतले ॥ ४० ॥ धन्या देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः । मम पश्यन्ति ये नाथं रामं राजीवलोचनम् ॥ ४१ ॥

पतिनेति नाभावः आर्षः॥३८॥ नाजानादिति । जीवतीं जीवन्तीम् । न न कुर्यातां कुर्यातामेव । तदाह वामनः–"संभाव्यनिषेधनिवर्तने द्वौ प्रतिषेधौ"

यदीति । सः रामः मां रावणस्य निवेशने वर्तमानां जानीयाद्यदि तर्हि लङ्का रामसायकैर्विदग्धा भविष्यतीति पूर्वेण सम्बन्धः ॥ ३३ ॥ तर्हि जितं त्वयेत्याशङ्क्य सत्यम्, किन्तु ततः प्रागेव मामयं मारयिष्यतीत्याह–अनेनेत्यादिश्लोकत्रयेण । समयः "मासान् द्वादश भामिनि" इत्युक्तसमयः ॥ ३४ ॥ ननु, बिभीषिकामात्रमेतत् कथमकार्यं करिष्यतीत्यत आह–अकार्यमिति । ये पापकारिणो नैर्ऋताः अधर्माद्धेतोरकार्यं न जानन्ति, तैर्महोत्पातः मद्वधरूपमहाननर्थः साम्प्रतं भविष्यति हि ॥ ३५ ॥ तदेव विवृणोति–नैत इति ॥ ३६–३८ ॥ तदेवं महावीरस्य मय्यनुरक्तस्य रामस्य ममानन्वेषणे कारणं मज्जीवनापरिज्ञानं वा स्वविपत्तिर्वा तात्त्विकवैराग्यं वा प्रवासदोषान्मयि प्रेमनाशो वा मामकगुणहीनता वा मद्भाग्यविपर्ययो वेति षट्कारणान्युत्प्रेक्षते–नाजानादित्यादिश्लोकषट्केन ॥ ३९–४१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इति ॥ ३९-४१ ॥ अथवेति । धर्मकामस्य तस्य कामानपेक्षिण इत्यर्थः । मया भार्यया कोऽर्थः । परमात्मनः उत्कृष्टस्वभावस्य ॥ ४२ ॥ दृश्यमान इति । सौहृदं नास्त्यपश्यतः अदृश्यमाने प्रीतिर्न भवति । तस्माददृश्यायां मयि रामस्य किं प्रीतिर्नासीदित्यर्थः । एवमाशङ्कितं प्रतिषेधति-नाशयन्तीति । कृतघ्नाः प्रथममुत्पन्नां प्रीतिं नाशयन्ति । न तु रामो नाशयिष्यति, मयि प्रीतिमिति शेषः ॥४३॥ किन्विति । न गुणाः दुष्कृतानि ॥४४॥

अथवा नहि तस्यार्थो धर्मकामस्य धीमतः । मया रामस्य राजर्षेर्भार्यया परमात्मनः ॥ ४२ ॥ दृश्यमाने भवेत् प्रीतिः सौहृदं नास्त्यपश्यतः । नाशयन्ति कृतघ्नास्तु न रामो नाशयिष्यति ॥ ४३ ॥ किन्नु मे न गुणाः केचित् किंवा भाग्यक्षयो मम । याऽहं सीदामि रामेण हीना मुख्येन भामिनी ॥ ४४ ॥ श्रेयो मे जीवितान्मर्तुं विहीनाया महात्मनः । रामादक्लिष्टचारित्राच्छूराच्छत्रुनिबर्हणात् ॥४५॥ अथवा न्यस्तशस्त्रौ तौ वने मूलफलाशिनौ । भ्रातरौ हि नरश्रेष्ठौ संवृत्तौ वनगोचरौ ॥ ४६ ॥ अथवा राक्षसेन्द्रेण रावणेन दुरात्मना । छद्मना सादितौ शूरौ भ्रातरौ रामलक्ष्मणौ ॥ ४७ ॥ साऽहमेवं गते काले मर्तुमिच्छामि सर्वथा । न च मे विहितो मृत्युरस्मिन् दुःखेऽपि वर्तति ॥४८॥ धन्याः खलु महात्मानो मुनयस्त्यक्तकिल्बिषाः । जितात्मानो महाभागा येषां न स्तः प्रियाप्रिये ॥४९

श्रेय इति । मर्तुमिति भावार्थे तुमुन्, मरणमित्यर्थः । महात्मनः रामाद्विहीनायाः महात्मना रामेण हीनायाः । तृतीयार्थे पञ्चमी ॥ ४५ ॥ अथवेति । न्यस्तशस्त्रौ संवृत्तौ किमिति संबन्धः ॥ ४६ ॥ सादितौ हतौ ॥ ४७ ॥ वर्तति वर्तमाने ॥ ४८ ॥ महात्मानः महाधैर्याः । त्यक्तकिल्बिषाः त्यक्तपापाः ।

अथवा नहीत्यादि सार्धश्लोकमेकं वाक्यम् । धर्मकामस्य न तु कामपरस्य । परमात्मनः आत्मारामस्येत्यर्थः ॥ ४२ ॥ अथ रामगुणाभिज्ञतया प्रेमनाशपक्षस्तत्रा सम्भावित इति स्वयमेवाह-दृश्यमान इति । केवाञ्चिद् दृश्यमाने, वस्तुनीति शेषः । सौहृदं यथा भवति तथा प्रीतिर्भवेत । अपश्यतः अदृश्यमाने सति प्रीतिर्न भवेत । कुतः ? कृतघ्नाः नाशयन्ति, प्रीतिमिति शेषः । रामस्तु न नाशयतीति सम्बन्धः । यद्वा सौहृदं स्नेहम् अपश्यतः पुंसः दृश्यमानेऽपि, सुहृदीति शेषः । प्रीतिर्न भवेत् किमुत अदृश्यमाने, कुतः ? कृतघ्नाः नाशयन्ति सौहृदमित्यनुकर्षः । कृतज्ञो रामस्तु न नाशयतीति सम्बन्धः ॥ ४३ ॥ ४४ ॥ अथास्यामवस्थायां स्वकर्तव्यमाह-श्रेय इति । मर्तुं श्रेयः, मरणमेव श्रेय इत्यर्थः ॥ ४५-४८ ॥ प्रियाप्रिये इष्टानिष्टे ॥ ४९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जितात्मानः जितान्तःकरणाः । महाभागाः महाभाग्याः ॥ ४९ ॥ प्रियान्न संभवेद्दुःखं किंतु सुखमेव भवेदित्यर्थः । प्रियात् अनुकूलवस्तुनः । अप्रियात् प्रतिकूलवस्तुनः । अधिकं भयम् अधिकं दुःखम् । ताभ्यां प्रियाप्रियाभ्याम् । नमस्तेषां त एव सर्वोत्तमा इत्यर्थः ॥ ५० ॥ साऽहमिति । साऽहं

प्रियान्न संभवेद्दुःखमप्रियादधिकं भयम् । ताभ्यां हि ये वियुज्यन्ते नमस्तेषां महात्मनाम् ॥ ५० ॥
साऽहं त्यक्ता प्रियेणेह रामेण विदितात्मना । प्राणांस्त्यक्ष्यामि पापस्य रावणस्य गता वशम् ॥ ५१ ॥
इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे षड्विंशः सर्गः ॥ २६ ॥

इत्युक्ताः सीतया घोरा राक्षस्यः क्रोधमूर्च्छिताः । काश्चिज्जगमुस्तदाख्यातुं रावणस्य तरस्विनः ॥ १ ॥
ततः सीतामुपागम्य राक्षस्यो घोरदर्शनाः । पुनः परुषमेकार्थमनर्थार्थमथाब्रुवन् ॥ २ ॥
अद्येदानीं तवानार्ये सीते पापविनिश्चये । राक्षस्यो भक्षयिष्यन्ति मांसमेतद्यथासुखम् ॥ ३ ॥
सीतां ताभिरनार्याभिर्दृष्ट्वा सन्तर्जितां तदा । राक्षसी त्रिजटा वृद्धा शयाना वाक्यमब्रवीत् ॥ ४ ॥

तद्विलक्षणा अहम्, केवलप्रियपरेत्यर्थः । प्रियेण त्यक्ता अप्रियं प्राप्ता, प्राणांस्त्यक्ष्यामीत्यर्थः ॥ ५१ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षड्विंशः सर्गः ॥ २६ ॥

इत्युक्ता इत्यादि । तत् मरणाध्यवसायम् ॥१॥ तत इत्यादि । एकार्थं पूर्वोक्तवचनैरेकाभिधेयम् । अनर्थार्थम् अनर्थफलकम् । एकाक्ष्यादयः पूर्वोक्तार्थमेव परुषवचनं पुनरब्रुवन्नित्यर्थः ॥ २ ॥ अद्य अस्मिन् दिने । इदानीम् अस्मिन् क्षणे । भक्षयिष्यन्तीत्यब्रुवन्निति पूर्वेण सम्बन्धः ॥ ३ ॥ सीता

प्रियादभिमताद्वस्तुनः दुःखं न सम्भवेत् किन्तु सुखं भवेत् । अप्रियादनभिमताद्वस्तुनः । अधिकं भयं भवेत् ताभ्यां प्रियाप्रियरूपविषयजन्यसुखभयाभ्यामित्यर्थः ॥ ५० ॥ ५१ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां षड्विंशः सर्गः ॥ २६ ॥

इत्युक्ता इति । तत मरणाध्यवसायम् ॥ १॥ एकार्थम् एकाभिधेयम्। अनर्थम् अनर्थफलकम् ॥२॥ अद्येदानीम्। अद्य अस्मिन् दिने । इदानीमस्मिन् क्षणे । अद्येत्यस्य वास्तवार्थस्तु-हे सीते ! पापनिश्चये अनार्ये अपराधे सति राक्षस्यस्तव मांसं भक्षयिष्यन्तीति काश्चन राक्षस्यः परुषमब्रुवन्निति पूर्वेण सम्बन्धः ॥ ३-५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मित्यादि । त्रिजटा विभीषणपुत्री । शयानेत्यनेन स्वप्नवृत्तान्तकथनत्वरोच्यते ॥४–७॥ निशीत्यनन्तरमितिकरणं द्रष्टव्यम् । काले उषःकाले यस्स्वप्नः तत्संश्रितम् ॥८॥९॥ आगतः, लङ्कामिति शेषः ॥ १० ॥ ११ ॥ राघवश्चेति । महागजमारूढ इति, शिबिकात इति शेषः । तथोक्तम् स्वप्नाध्याये–

आत्मानं खादतानार्या न सीतां भक्षयिष्यथ। जनकस्य सुतामिष्टां स्नुषां दशरथस्य च ॥ ५ ॥ स्वप्नो ह्यद्य मया दृष्टो दारुणो रोमहर्षणः। राक्षसानामभावाय भर्तुरस्या भवाय च ॥ ६ ॥ एवमुक्तास्त्रिजटया राक्षस्यः क्रोध मूर्च्छिताः। सर्वा एवाब्रुवन् भीतास्त्रिजटां तामिदं वचः। कथयस्व त्वया दृष्टः स्वप्नोऽयं कीदृशो निशि ॥ ७ ॥ तासां श्रुत्वा तु वचनं राक्षसीनां मुखाच्च्युतम्। उवाच वचनं काले त्रिजटा स्वप्नसंश्रितम् ॥ ८ ॥ गजदन्तमयीं दिव्यां शिबिकामन्तरिक्षगाम् ॥ ९ ॥ युक्तां हंससहस्रेण स्वयमास्थाय राघवः। शुक्लमाल्याम्बरधरो लक्ष्मणेन सहा गतः ॥ १० ॥ स्वप्ने चाद्य मया दृष्टा सीता शुक्लाम्बरावृता। सागरेण परिक्षिप्तं श्वेतं पर्वतमास्थिता। रामेण सङ्गता सीता भास्करेण प्रभा यथा ॥ ११ ॥ राघवश्च मया दृष्टश्चतुर्दन्तं महागजम्। आरूढः शैलसङ्काशं चचार सह लक्ष्मणः ॥ १२ ॥ ततस्तौ नरशार्दूलौ दीप्यमानौ स्वतेजसा। शुक्लमाल्याम्बरधरौ जानकीं पर्युपस्थितौ ॥ १३ ॥ ततस्तस्य नगस्याग्रे ह्याकाशस्थस्य दन्तिनः। भर्त्रा परिगृहीतस्य जानकी स्कन्धमाश्रिता ॥ १४ ॥

" आरोहणं गोवृषकुञ्जराणां प्रासादशैलाग्रवनस्पतीनाम्। विष्ठानुलेपो रुदितं मृतं च स्वप्नेष्वगम्यागमनं च धन्यम् ॥" इति। चचार, सीतां प्रतीति शेषः ॥१२॥१३॥ ततस्तस्य नगस्याग्र इति। अत्र द्वादशसहस्रं श्लोका गताः, त्रयोदशसहस्रस्यादिमोऽयं श्लोकः। गायत्र्याख्रयोदशमक्षरमत्र बोध्यम् ॥१४॥

स्वप्न इति। राक्षसानामभावाय विनाशाय। भवाय अभ्युदयाय ॥ ६ ॥ पूर्वं क्रोधमूर्च्छिताः पश्चात्त्रिजटावचनाद्भीता इत्यर्थः। काले प्रातःकाले। स्वप्नसंश्रितं प्रातःकालदृष्टस्वप्नदृष्टार्थविषयकम्, अनेन स्वप्नस्य शीघ्रफलदत्वं सूचितम् ॥ ७–१० ॥ सागरेण क्षीरसागरेण। परिक्षिप्तमावृतम्। सङ्गता, तत्रैव पर्वत इति शेषः। एतेन लङ्कायामेव रामस्य सीतादर्शनं सूचितम् ॥ ११–१३ ॥ तत इति। जानकीं पर्युपस्थितौ जानकीसमीपस्थितौ। तस्य इति गायत्र्याख्रयोदशाक्षरं ततस्तस्येत्यस्य श्लोकस्य चतुर्थाक्षरेण स्य इत्यनेन सङ्गृह्णाति। तस्य नगस्य पूर्वोक्तस्य श्वेतपर्वतस्येत्यर्थः। भर्त्रा परिगृहीतस्य रामेणाधिष्ठितस्य ॥ १४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भर्तुरिति । चन्द्रसूर्यौ पाणिना परिमार्जतीति । अत्र स्वप्नाध्यायवचनम्–"आदित्यमण्डलं वा तु चन्द्रमण्डलमेव वा । स्वप्ने गृह्णाति हस्ताभ्यां राज्यं संप्राप्नुयान्महत् ॥" इति ॥ १५–१७ ॥ अयमिह स्वप्नक्रमः–शिबिकास्थितो रामो दृष्टः, श्वेतपर्वतस्था सीता च । ततः शिबिकाया गजमारुह्य

भर्तुरङ्कात् समुत्पत्य ततः कमललोचना । चन्द्रसूर्यौ मया दृष्टा पाणिना परिमार्जती ॥ १५ ॥ ततस्ताभ्यां कुमाराभ्यामास्थितः स गजोत्तमः । सीतया च विशालाक्ष्या लङ्काया उपरि स्थितः ॥ १६ ॥ पाण्डुरर्षभयुक्तेन रथेनाष्टयुजा स्वयम् । इहोपयातः काकुत्स्थः सीतया सह भार्यया ॥ १७ ॥ लक्ष्मणेन सह भ्रात्रा सीतया सह वीर्यवान् ॥ १८ ॥ आरुह्य पुष्पकं दिव्यं विमानं सूर्यसन्निभम् । उत्तरां दिशमालोक्य जगाम पुरुषोत्तमः ॥ १९ ॥ एवं स्वप्ने मया दृष्टो रामो विष्णुपराक्रमः । लक्ष्मणेन सह भ्रात्रा सीतया सह भार्यया ❀ ॥ २० ॥

लक्ष्मणेन सह पर्वतमभ्येत्य ततस्सीतां गजस्कन्धेऽधिरोप्य लङ्काया उपरि स्थित्वा ताभ्यां सहाष्टर्षभयुक्तेन रथेनेहागत्य स्वं देशं प्रति ताभ्यां पुष्पकमधिरुह्य गत इति । अन्ये श्लोकाः प्रक्षिप्ताः । तेन ते न व्याख्याता इत्याहुः । लक्ष्मणेन सह भ्रात्रेति । एतत्पादस्यानन्तरम्–सीतया सह वीर्यवान् ।

भर्तुरङ्कादिति । पर्वताग्रे गजस्कन्धे भर्तुरङ्के स्थित्वा तस्मात्समुत्पत्य । कायमूर्ध्वमायम्येत्यर्थः ॥ १५ ॥ १६ ॥ पाण्डुरर्षभेत्यादि सार्धश्लोकत्रयमेकं वाक्यम् । तस्मिन् गजे लङ्कोपरिस्थिते रामः सीतालक्ष्मणाभ्यां सह पाण्डुरवृषभाष्टयुक्तेन रथेनेहागत्य पुष्पकारूढस्ताभ्यां सहोत्तरां दिशं प्रस्थितो दृष्ट इति सम्बन्धः । इह

❀ [साण्डं त्रिभुवनं सर्वं सर्वतः सचराचरम् । सर्वं ग्रस्तं मया दृष्टं रामेणाक्लिष्टकर्मणा ॥ १ ॥ क्षीरोदधिजले मध्ये श्वेतः शैलः समुच्छ्रितः । तस्य मूर्ध्नि ततः श्वेतश्चतुर्दन्तो महागजः ॥ २ ॥ तस्य पृष्ठे स्थितः श्रीमान्रामो राजीवलोचनः । ततः सीता समुत्पत्य भर्तुरङ्काश्रिता तदा । बाहुभ्यां सम्परिष्वज्य सम्पूर्णं चन्द्रमण्डलम् ॥ ३ ॥ ततोऽन्यत्र मया दृष्टो रामो राजीवलोचनः । आसीनः प्राङ्मुखः श्रीमानासने परमाद्भुते ॥ ४ ॥ अभिषिक्तस्तु काकुत्स्थः सर्वदेवैर्नमस्कृतः । सब्रह्मर्षिगणैस्सर्वैस्सर्वतीर्थजलेन च ॥ ५ ॥ शुक्लमाल्याम्बरधरा शुक्लमाल्यानुलेपना । साधु सा तत्र सुश्रोणी रराज जनकात्मजा ॥ ६ ॥ ततो देवास्सगन्धर्वास्सिद्धाश्च परमर्षयः । ब्रह्माणमग्रतः कृत्वा रामं तत्र ववन्दिरे ॥ ७ ॥ पुनरेव मया दृष्टो रामो रमयतां वरः । विष्णुरेव स्वयं भूत्वा तस्मिन्नास्ते वरासने ॥ ८ ॥ परं ब्रह्म परं तत्त्वं परं ज्ञानं परं तपः । परं बीजं परं क्षेत्रं परं कारणकारणम् ॥ ९ ॥ शङ्खचक्रगदः श्रीमान् पुण्डरीकायतेक्षणः । श्रीवत्सवक्षा नित्यश्रीरजेयः शाश्वतो ध्रुवः ॥ १० ॥ एवंभूतो महातेजा रामः कमललोचनः । सर्वलोकेश्वरः श्रीमान् ससर्ज रघुनन्दनः ॥ ११ ॥ ततोऽमरेन्द्राः पितरो मुनीन्द्रा गन्धर्वविद्याधरपन्नगेन्द्राः । कृताभिषेकं परिवार्य रामं प्रतुष्टुवुः प्राञ्जलयः प्रहृष्टाः ॥ १२ ॥ ततस्तु सर्वाप्सरसः प्रहृष्टा नृत्यन्ति गायन्ति समेत्य तत्र । वाद्यं प्रकुर्वन्ति समेत्य शङ्खा वंशाश्च वीणा मुरजाश्च भेर्यः ॥ १३ ॥ एते श्लोकाः प्रक्षिप्ताः ॥

स०–विष्णुः उपेन्द्ररूपी सन् ॥ ८ ॥ तत्स्वरूपं निरूपयति–**परं ब्रह्मेति** । कीदृशं ब्रह्म परं तत्त्वम् अत्यन्तानारोपितरूपम् । परं ज्ञानम् उत्तमज्ञानस्वरूपम् । परं तपः फलरूपम् । परं बीजम् अतिशयेन निमित्तकारणम् । परं क्षेत्रं मुख्याश्रयः । कारणकारणं प्रकृतिकालादिरूपकारणानामपि कारणम् ॥ ९ ॥ नित्यश्रीः अनपायलक्ष्मीवान् ॥ १० ॥ अत्र साण्डं त्रिभुवनमित्याद्येतदन्तं श्लोकजातं प्रक्षिप्तमिति कतकप्रभृतयः । अस्माभिस्तु गङ्गाजलमिश्ररथ्योदकवदुपादेयतया व्याख्यातम् ॥]

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

आरुह्य पुष्पकं दिव्यं विमानं सूर्यसन्निभम् । उत्तरां दिशमालोक्य जगाम पुरुषोत्तमः । एवं स्वप्ने मया दृष्टो रामो विष्णुपराक्रमः । लक्ष्मणेन सह भ्रात्रा सीतया सह भार्यया ॥ इति पाठक्रमः । विमाने पुष्पके स्थितः । साण्डं त्रिभुवनमित्यारभ्य रामः सत्यपराक्रम इत्यन्तो ग्रन्थः प्रक्षिप्तः प्रकृतासङ्गतश्च । विष्णुरेव स्वयं भूत्वेति प्रक्षिप्तवचनस्य विष्णुपराक्रम इत्यनेन विरोधात् ॥ १८–२१ ॥ रावणश्चेति । पिबन्निति । तैलसमुक्षित इत्यनेन तैलमित्युप

न हि रामो महातेजाः शक्यो जेतुं सुरासुरैः । राक्षसैर्वापि चान्यैर्वा स्वर्गः पापजनैरिव ॥ २१ ॥ रावणश्च मया दृष्टः क्षितौ तैलसमुक्षितः । रक्तवासाः पिबन् मत्तः करवीरकृतस्रजः ॥२२॥ विमानात् पुष्पकाद्य रावणः पतितो भुवि । कृष्यमाणः स्त्रिया दृष्टो मुण्डः कृष्णाम्बरः पुनः ॥ २३ ॥ रथेन खरयुक्तेन रक्तमाल्यानुलेपनः । पिबंस्तैलं हसन् नृत्यन् भ्रान्तचित्ताकुलेन्द्रियः । गर्दभेन ययौ शीघ्रं दक्षिणां दिशमास्थितः ॥२४॥ पुनरेव मया दृष्टो रावणो राक्षसेश्वरः । पतितोऽवाविछरा भूमौ गर्दभाद्भयमोहितः ॥ २५ ॥ सहसोत्थाय सम्भ्रान्तो भयार्तो मदविह्वलः । उन्मत्त इव दिग्वासा दुर्वाक्यं प्रलपन् बहु ॥ २६ ॥ दुर्गन्धं दुस्सहं घोरं तिमिरं नरकोपमम् । मलपङ्कं प्रविश्याशु मग्नस्तत्र स रावणः ॥ २७ ॥ कण्ठे बद्ध्वा दशग्रीवं प्रमदा रक्तवासिनी । काली कर्दमलिप्ताङ्गी दिशं याम्यां प्रकर्षति ॥ २८ ॥ एवं तत्र मया दृष्टः कुम्भकर्णो निशाचरः । रावणस्य सुताः सर्वे दृष्टास्तैलसमुक्षिताः ॥ २९ ॥ वरा हेण दशग्रीवः शिशुमारेण चेन्द्रजित् । उष्ट्रेण कुम्भकर्णश्च प्रयातो दक्षिणां दिशम् ॥ ३० ॥ एकस्तत्र मया दृष्टः श्वेतच्छत्रो विभीषणः ॥३१॥ शुक्लमाल्याम्बरधरः शुक्लगन्धानुलेपनः । शङ्खदुन्दुभिनिर्घोषैर्नृत्तगीतैरलंकृतः॥३२॥

स्थाप्यते । करवीरकृतस्रज इत्यकारान्तत्वमार्षम् । " हलन्ताद्वा " इत्यापो विधानात् स्रक्छब्दस्यान्तत्वेन वा निर्वाहः ॥ २२–३० ॥ एवं रावण शैलारोहणादीनां शुभावेदकत्वम्–" आरोहणं गोवृषकुञ्जराणाम् " इत्यादिशास्त्रादवगन्तव्यम् ॥ १७–२१ ॥ रावणश्चेति । करवीरकृतस्रज इत्येतद्व्यविशेषणम् ॥ २२–२६ ॥ मलानि पङ्कानि यस्मिन् तत् तिमिरम् ॥ २७–३२ ॥

स०–करवीरकृतस्रज इति रावणविशेषणम् । करवीरैः रक्तकरवीरपुष्पैः कृता स्रजा माला यस्य स तथा । " टापञ्चैव " इत्यायुक्तेः । विमानविशेषणत्वे तु पृथक्साक्षादपशकुनत्वाप्रतीत्यस्वारस्यम् । नच नागोजिभट्टेन टापञ्चेत्यादेः शन्देन्दुशेखरेऽनङ्गीकृतत्वेन कथमेतदिति वाच्यम्, बहुप्रयोगविप्लवापत्तेः साहसमात्रं तदित्यवधेयम् । रक्तमाल्यानुलेपन इत्युत्तरग्रन्थानुगुण्याच्च ॥ २२ ॥ स्त्रिया सह मुण्डस्तया कृष्यमाण इत्यन्वयः । सुवासिनीकर्षणस्य हर्षहेतुत्वात् । अत उभयत्र तथाविधता युक्ता । अपशकुनान्तरलाभाच्च । अथवा स्त्रिया नीलवासोदन्तादिमत्या ॥ २३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विनाशसूचकमुक्त्वा विभीषणस्य राज्यप्राप्तिसूचकमाह–एकस्तत्र मया दृष्टः श्वेतच्छत्र इत्यादिना ॥ ३१–३२ ॥ वैहायसं विमानम् ॥ ३३–३८ ॥ अपगच्छत अपसरत । नश्यध्वम् अदर्शनं प्रामुत । आत्मनेपदमार्षम् । सीतामाप सीतामचिरेणाप्स्यतीत्यर्थः । सर्वैः राक्षसैस्सार्धम् घातयेत्, व इति

आरुह्य शैलसङ्काशं मेघस्तनितनिःस्वनम् । चतुर्दन्तं गजं दिव्यमास्ते तत्र विभीषणः । चतुर्भिः सचिवैः सार्धं वैहायस मुपस्थितः ॥ ३३ ॥ समाजश्च मया दृष्टो गीतवादित्रनिःस्वनः । पिबतां रक्तमाल्यानां रक्षसां रक्तवाससाम् ॥ ३४ ॥ लङ्का चेयं पुरी रम्या सवाजिरथकुञ्जरा । सागरे पतिता दृष्टा भग्नगोपुरतोरणा ॥ ३५ ॥ लङ्का दृष्टा मया स्वप्ने रावणेनाभिरक्षिता । दग्धा रामस्य दूतेन वानरेण तरस्विना ॥ ३६ ॥ पीत्वा तैलं प्रनृत्ताश्च प्रहसन्त्यो महा स्वनाः । लङ्कायां भस्मरूक्षायां प्रविष्टा राक्षसस्त्रियः ॥ ३७ ॥ कुम्भकर्णादयश्चेमे सर्वे राक्षसपुङ्गवाः । रक्तं निव सनं गृह्य प्रविष्टा गोमयह्रदे ॥ ३८ ॥ अपगच्छत नश्यध्वं सीतामाप स राघवः । घातयेत् परमामर्षी सर्वैः सार्धं हि राक्षसैः ॥ ३९ ॥ प्रियां बहुमतां भार्यां वनवासमनुव्रताम् । भर्त्सितां तर्जितां वापि नानुमंस्यति राघवः ॥ ४० ॥ तदलं क्रूरवाक्यैर्वः सान्त्वमेवाभिधीयताम् । अभियाचाम वैदेहीमेतद्धि मम रोचते ॥ ४१ ॥ यस्यामेवं विधः स्वप्नो दुःखितायां प्रदृश्यते । सा दुःखैर्विविधैर्मुक्ता प्रियं प्राप्नोत्यनुत्तमम् ॥ ४२ ॥ भर्त्सितामपि याचध्वं राक्षस्यः किं विवक्षया । राघवाद्धि भयं घोरं राक्षसानामुपस्थितम् ॥ ४३ ॥ प्रणिपातप्रसन्ना हि मैथिली जनका त्मजा । अलमेषा परित्रातुं राक्षस्यो महतो भयात् ॥ ४४ ॥

सिद्धम् । अपगच्छत नश्यध्वमित्युक्तेः रावणमित्यध्याहारो वा ॥ ३९ ॥ नानुमंस्यति न सहिष्यत इत्यर्थः ॥ ४० ॥ अभियाचाम, अभयमिति शेषः ॥ ४१ ॥ ४२ ॥ किं विवक्षया अस्माभिस्तदा भर्त्सिता कथं प्रसन्ना भविष्यतीति वक्तुमिच्छया किम् ? शङ्का न कर्तव्येत्यर्थः ॥ ४३ ॥ कुत वैहायसं खेचरत्वम् ॥ ३३–३६ ॥ भस्मरूक्षायां भस्मना रूक्षायाम् ॥ ३७–३९ ॥ भर्त्सितां युष्मत्कृतभर्त्सनादिमतीम् । नानुमंस्यति नानुमंस्यते न क्षमिष्यते, अतस्तत्कर्त्रीर्वो घातयेदिति भावः ॥ ४० ॥ तदलमिति । अभियाचाम, अभयमिति शेषः ॥ ४१ ॥ ४२ ॥ भर्त्सितामिति । याचध्वम्, अभयमिति शेषः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इत्यत आह–प्रणिपातप्रसन्ना हीति ॥ ४४ ॥ स्वप्नदर्शनकथनेन सीतायाः शोभनं भावीत्यभिधाय शरीरलक्षणप्रदर्शनेनापि शुभं भावीत्याह–अपि चेति । लक्ष्णं दुःखप्राप्तिहेतुभूतं रेखोपरेखादिकम् ॥ ४५ ॥ तर्हि कुतस्तादृशदुःखानुभव इत्यत्राह–छायेति । छायावैगुण्यमात्रम् उपलक्षय इत्यनुषज्यते । वैहायसं विमानम् । उपस्थितां प्राप्ताम्, दिव्यभोगार्हामिति यावत् । अन्वयस्तु छायावैगुण्यमात्रं तूपलक्षये अतः अदुःखार्हां दिव्यभोगार्हां

अपि चास्या विशालाक्ष्या न किञ्चिदुपलक्षये । विरूपमपि चाङ्गेषु सुसूक्ष्ममपि लक्षणम् ॥ ४५ ॥ छायावैगुण्य मात्रं तु शङ्के दुःखमुपस्थितम् । अदुःखार्हामिमां देवीं वैहायसमुपस्थिताम् ॥ ४६ ॥ अर्थसिद्धिं तु वैदेह्याः पश्या म्यहमुपस्थिताम् । राक्षसेन्द्रविनाशं च विजयं राघवस्य च ॥४७॥ निमित्तभूतमेतत्तु श्रोतुमस्या महत् प्रियम् ॥४८॥ दृश्यते च स्फुरच्चक्षुः पद्मपत्रमिवायतम् । ईषच्च हृषितो वाऽस्या दक्षिणाया ह्यदक्षिणः ॥ ४९ ॥ अकस्मादेव वैदेह्या बाहुरेकः प्रकम्पते । करेणुहस्तप्रतिमः सव्यश्चोरुरनुत्तमः । वेपमानः सूचयति राघवं पुरतः स्थितम् ॥ ५० ॥

मिमां दुःखम् उपस्थितमिति शङ्क इति । अत्र छायावैगुण्यं नाम कान्तिवैकल्यम् । " छाया त्वनातपे कान्तौ " इत्यमरः । यद्वा छायाऽत्रानातपः तद्वैगुण्यं तस्य विषमत्वम् । सर्वलक्षणलक्षिताया अपि छायावैगुण्यमेतावद्दुःखकरमासीदिति भावः ॥ ४६ ॥ ४७ ॥ इदानीं रामवार्ताश्रवणसूचक माह–निमित्तभूतमिति ॥ ४८ ॥ चक्षुरिति । अदक्षिणमित्येतदत्राप्यनुषज्यते । हृषितो वा हृष्ट इव पुलकित इव । पद्मपत्रमित्यनेन रोगादिदृष्टहेत्वन्तर राहित्यमुक्तम् ॥ ४९ ॥ अकस्मात् दृष्टहेत्वन्तरं विना ॥ ५० ॥

अभययाचनकारणमाह–राघवादिति ॥ ४३ ॥ ४४ ॥ न केवलं स्वप्नदर्शनमेवास्याः शुभावेदकम् किन्तु प्रत्यक्षदर्शनमपि बह्वस्तीत्यासर्गसमाप्तेराह–अपिचेत्यादिना । अङ्गेषु विरूपं लक्षणं नोपलक्षय इति सम्बन्धः ॥ ४५ ॥ छायावैगुण्यं कान्तिवैकल्यम्, वैवर्ण्यमिति यावत् । तावन्मात्रमुपलक्षय इत्यनुकृष्यते, एतावतैव अदुःखार्हां दुःखानर्हाम् प्रत्युत वैहायसमुपस्थितां दिव्यभोगार्हाम् इमाम् इदं दुःखमुपस्थितं प्राप्तमिति शङ्के, मन्य इत्यर्थः । अर्थसिद्धिं प्रयोजनसिद्धिम् । कुत इत्यत आह–राक्षसेन्द्रेति । राक्षसेन्द्रविनाशराघवविजयरूपम् ॥ ४६ ॥ ४७ ॥ महत्प्रियं श्रोतुम् एतत्स्वप्नदर्शनम् अस्या निमित्तभूतमिति सम्बन्धः ॥ ४८ ॥ हृषितो वा हृषित इव ॥ ४९ ॥ ५० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

एवं देहनिमित्तमुक्त्वा शाकुनमप्याह–पक्षीति । पक्षी पिङ्गलिका । शाखानिलयः प्रहृष्टः । पुनः पुनश्चोत्तमसान्त्ववादी भूयो भूयो मधुरवादी । उत्तरोत्तरमुत्तमसान्त्वस्वरवादी वा । सुस्वागतां शोभनबन्ध्वागमनामिति यावत् । " बन्धुस्वस्त्वजनास्समाः " इत्यमरः । वाचं स्वरमुदीरयानः चोदयतीव रामागमनं कथयतीव । यद्वा पूर्वोक्तराघव एव कर्म । राघवमुपपादयतीवेत्यर्थः । आचार्यास्तु–पक्षावस्य स्त इति पक्षी गरुत्मान् । भूम्नि प्रशंसायां च मत्वर्थीयः । तदुक्तम्–"भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने । संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः" इति । तथाच पक्षौ विस्तार्य

पक्षी च शाखानिलयः प्रहृष्टः पुनः पुनश्चोत्तमसान्त्ववादी । सुस्वागतां वाचमुदीरयानः पुनः पुनश्चोदयतीव हृष्टः॥५१॥

इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

प्रदक्षिणं सञ्चरन् । शाखानिलयः कुसुमितपल्लवितशाखायां दृढतरं स्थितः । आर्द्रतरुभाग एव शाखात्वव्यपदेशः । प्रदक्षिणभ्रमणम् आर्द्रशाखावरोहणं दृढतरावस्थानं च शुभशंसीत्यर्थः । प्रहृष्टः तत्र फलभोजनादिना सन्तुष्टः । पुनःपुनश्चोत्तमसान्त्ववादी उत्तरोत्तरं सान्त्ववचनं कुर्वन्निव स्थितः । मा शुचः सद्यः समागमिष्यति ते भर्ता नायमवसरश्शोकस्य इत्येवं सान्त्वयन्निव स्थितः । तदुपरि सुस्वागतां वाचमुदीरयानः । एतावन्मात्रं न भवति तस्य सन्तापातिरेक इति कथयन्निव स्थितः । विरहक्लिष्टायास्सुस्वागतवचनं हि नाम प्रतियोगिनः सन्तापातिशयकथनमेव । उक्तं हि–"तपति तनुगात्रि ! मदनस्त्वामनिशं मां पुनर्दहत्येव । ग्रसति यथा शशाङ्कं न तथाहि कुमुद्वतीं दिवसः" इति । पुनः पुनश्चोदयतीव प्रियागमने निश्चिते मज्जनालंकरणादिकं किमर्थं न करोषीत्येवं सीतां चोदयतीवेत्युत्प्रेक्षा । हृष्टः, नायिकागमनकालिकहर्षः स्वस्यैवेत्येतद्वैलक्षण्यं हृषिततनूरुहैस्सूचयन्निव स्थितः ॥ इदं हि रामायणमुत्तमं काव्यम् । तथाहि–काव्यं तावत्त्रिविधम्, उत्तमं मध्यममधमं चेति । यत्र वाच्यातिशायिव्यङ्ग्यं तदुत्तमम् । स एव ध्वनिरित्युच्यते । यत्र वाच्यानातिशायिव्यङ्ग्यं तन्मध्यमं काव्यम् । तदेव गुणीभूतव्यङ्ग्यमित्युच्यते । यत्र व्यङ्ग्यमेव नास्ति तदधमम् । तदेव चित्रमित्युच्यते । व्यङ्ग्यं च पदगतं वाक्यगतं प्रबन्धगतं चेति त्रिविधं भवति । एतत्काण्डरूपप्रबन्धेन अनादिभगवत्सम्बन्धवतश्चेतनस्योज्जीवने प्रवृत्तस्याचार्यस्य प्रवृत्तिरभिव्यज्यते । उक्तश्चायमर्थः "ततो रावणनीतायाः" इति श्लोके । अत्र लङ्कापदेन शरीरं द्योतितम् । एकाक्षीप्रभृतय इन्द्रियाणि । रावणकुम्भकर्णावहङ्कारममकारौ । इन्द्रजित्प्रभृतयः कामक्रोधलोभमोहमदमात्सर्यदम्भादयः । तादृशलङ्कानिरुद्धसीतासदृशश्चेतनः । तस्य भगवज्ज्ञानोपदेष्टाचार्यतुल्यो

पक्षीति । पक्षी शाखानिलयं शाखास्थनीडं प्रविष्टः । उत्तमसान्त्ववादी उत्तमशान्तस्वरवादी । सुस्वागतां सुष्ठु शोभनमागतमित्येवंरूपां वाचमुदीरयानः उच्चरन्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मारुतिः । तादृशाचार्यलक्षणमनेन श्लोकेन सूच्यते—पक्षी । पक्षिशब्देन गमनसाधनत्वात् ज्ञानकर्मणी उच्येते । तदुक्तम्—"उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः । तथैव ज्ञानकर्मभ्यां नियता परमा गतिः॥" इति । ज्ञानकर्मणोरङ्गाङ्गिभावेनात्र समुच्चयो विवक्षितः। "ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेन " इति श्रुतेः । अनेनाचार्यशब्दनिर्वचनमुक्तम्, " आचिनोति हि शास्त्रार्थानाचारे स्थापयत्यपि । स्वयमाचरते यस्मात्तस्मादाचार्य उच्यते ॥" इति । शाखाशब्देन वेदशाखा उच्यन्ते । निलयशब्देन तदेकपरत्वम् त्यागे प्रत्यवायश्रवणात् । तदुक्तं शिक्षायाम्—" अधीतमपि यो वेदं विमुञ्चति नराधमः। भ्रूणहा स तु विज्ञेयो वियोनिमभिगच्छति॥"इति। किंच निलय इत्यनेन तदर्थविषयकश्रवणमननिदिध्यासनरूपतदनुष्ठानान्युच्यन्ते। अनेनाचार्यलक्षणमुक्तम् । तथाहुः—"आचार्यो वेदसंपन्नो विष्णुभक्तो विमत्सरः । मन्त्रज्ञो मन्त्रभक्तश्च सदा मन्त्राश्रयश्शुचिः । गुरुभक्तिसमायुक्तः पुराणज्ञो विशेषतः । एवं लक्षणसंपन्नो गुरुरित्यभिधीयते॥" इति । प्रहृष्टः सदा सन्तुष्टहृदयः । अनेन सर्वदा सेवनीयत्वमुक्तम् । तथोक्तम्—"आह्लादशीत नेत्राम्बुः पुलकीकृतगात्रवान् । सदा परगुणाविष्टो द्रष्टव्यस्सर्वदेहिभिः ॥" इति । पुनः पुनश्चोत्तमसान्त्ववादी । उत्तमः "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः" इत्युक्तः परमात्मा, तद्विषयं सान्त्वं शिष्येभ्यो वदतीत्युत्तमसान्त्ववादी । "त्वं मेऽहं मे कुतस्तत्तदपि कुत इदं वेदमूलप्रमाणादेतच्चानादि सिद्धादनुभवविभवात्तार्हि साक्षोश एव । क्वाक्षोशः कस्य गीतादिषु मम विदितः कोऽत्र साक्षी सुधीस्स्याद्धन्त त्वत्पक्षपाती स इति नृकलहे मृग्यमध्यस्थ वत्त्वम् ॥ " इत्युक्तरीत्या भगवति मनुष्याणां कलहे " यमो वैवस्वतो राजा यस्तवैष हृदि स्थितः । तेन चेदपि वादस्ते मा गङ्गां मा कुरून् गमः ॥" इति सान्त्ववादशील इत्यर्थः। पुनः पुनरित्यनेन कर्षकः कदाचिन्न फालितमित्येतावता यथा कृषिं न परित्यजति पुनः पुनस्तत्रैव प्रवर्तते तथा आचार्योऽपि कदाचित् स्ववचनाश्रवणेपि न निवर्तते इत्युक्तम्। अनेनाचार्यस्य भगवतोऽप्यतिशय उक्तः। स हि पार्थाय गीतामुपदिश्य पुनराश्वमेधिके तेन पूर्वोक्तमर्थं विस्मृत्य पुनः पृष्टे नाहं वक्ष्यामीत्युक्तवान् "नूनमश्रद्दधानोऽसि दुर्मेधाश्चासि पाण्डव" इत्यादिना । किंच सुस्वागतां वाचमुदीरयानः । सुष्ठु संप्रदायाविच्छेदो यथा तथाचार्यपरम्परया स्वस्मै आगतां वाचम् अष्टाक्षरादिमन्त्रराजरूपां निर्हेतुक्यैव दयया समुदीरयन् । " आचार्याणामसावसा वित्या भगवत्तः" इति गुरुपरम्पराया अनुसन्धेयत्वमनेन सूचितम् । पुनःपुनश्चोदयतीव । उक्तार्थस्यानुष्ठानाय चोदनां दर्शयति । अन्यथा ह्युपदेशोऽप्यनर्थक एव स्यात् । अत एवाहुर्निगमान्ताचार्याः—"स्खालित्ये शासितारम् " इति । हृष्टः, एतेन शिष्यशिक्षणं स्वप्रयोजनमाचार्यस्येत्युक्तम् ॥ ५१ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तविंशः सर्गः ॥ २७ ॥

पुनः पुनश्चोदयतीव, शोभनमागतं प्रत्युद्गच्छेति सीतां पुनः पुनः प्रेरयतीवेत्यर्थः ॥ ५१ ॥ इति श्रीमहे० श्रीरामा० सुन्दरकाण्डव्याख्यायां सप्तविंशः सर्गः ॥२७॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सा राक्षसेन्द्रस्येत्यादि ॥ १ ॥ २ ॥ सत्यमिति । यत्र येन किंचिज्जीवामि कुत्सितं जीवामि ॥ ३॥४॥ नन्वात्महनने महान् दोषः स्यादित्याशङ्क्य आह–नैवेति । दोषं दोषः । आर्षं नपुंसकम् । अत्र आत्महनने कथमदोष इत्याशङ्क्य रावणकृतान्मरणादात्मनैव मरणं श्रेय इत्याह वध्येति । अप्रियदर्शनंस्य अस्य रावणस्य । दुर्मरणत्वाविशेषेपि दुष्टराक्षसेन मरणमतिकष्टमिति भावः । तर्हि तदनुप्रवेशेनात्मा रक्ष्यताम् " सर्वत आत्मानं

सा राक्षसेन्द्रस्य वचो निशम्य तद्रावणस्याप्रियमप्रियार्ता । सीता वितत्रास यथा वनान्ते सिंहाभिपन्ना गजराज कन्या ॥ १ ॥ सा राक्षसीमध्यगता च भीरुर्वाग्भिर्भृशं रावणतर्जिता च । कान्तारमध्ये विजने विसृष्टा बालेव कन्या विललाप सीता ॥ २ ॥ सत्यं बतेदं प्रवदन्ति लोके नाकालमृत्युर्भवतीति सन्तः । यत्राहमेवं परिभर्त्स्यमाना जीवामि किंचित्क्षणमप्यपुण्या ॥ ३ ॥ सुखाद्विहीनं बहुदुःखपूर्णमिदं तु नूनं हृदयं स्थिरं मे । विशीर्यते यन्न सहस्रधाऽद्य वज्राहतं शृङ्गमिवाचलस्य ॥ ४ ॥ नैवास्ति दोषं मम नूनमत्र वध्याऽहमस्याप्रियदर्शनस्य । भावं न चास्याहमनुप्रदातुमलं द्विजो मन्त्रमिवाद्विजाय ॥ ५ ॥ नूनं ममाङ्गान्यचिरादनार्यः शस्त्रैः शितैश्छेत्स्यति राक्षसेन्द्रः । तस्मिन्ननागच्छति लोकनाथे गर्भस्थजन्तोरिव शल्यकृन्तः ॥ ६ ॥

गोपायेत्" इति श्रुतेरित्याशङ्क्याह–भावमिति । अस्य अस्मिन् रावणे भावं हृदयम् अनुप्रदातुं नालं न शक्ता । रामस्वत्वादस्य, न ह्यन्यस्य स्वमन्योऽन्यस्मै दातुमर्हतीति भावः । अनर्हश्चायं भावोऽन्यप्रदानस्येत्यनुमर्थं दृष्टान्तमुखेनाह द्विज इति । मन्त्रं वेदम् । अद्विजाय शूद्राय ॥ ५ ॥ नून

॥ १ ॥ विसृष्टा बाला कन्येव महादुर्भिक्षक्षोभवशात् बालकन्यायाः परित्यागः ॥ २ ॥ यत्र यतः ॥ ३॥४ ॥ आत्महनने दोषः स्यादित्यत आह–नैवेति । अत्र आत्महनने । दोषं दोषः नास्ति । कुतः ? वध्याऽहमिति । आत्महननाभावेपि मम रावणकर्तृकदुर्मरणस्य दुर्वारत्वात दोषाभावोक्तिरिति भावः । ननु दुर्मरणाभावाय रावणानुकूलत्वं प्राप्यतामत आह–भावमिति । भावं चित्तम् । मन्त्रं वेदम्। अद्विजाय शूद्राय ॥ ५ ॥ स्त्रीणां व्यभिचारान्मरणमेव वरम्, कुलाकीर्तिकरजनापवादादीनामभावादिति भावः । तथाप्यात्मघातदोषस्यातिदोषत्वात्साहसमयुक्तमित्याशङ्क्य सत्यम्, विचित्रवधाद्धिमेमीत्याशयेनाह–नूनमिति । लोकनाथे रामे अनाग

स०–तद्वचः प्रातराशाय कुरुतेत्यादिरूपं वचः । अप्रियार्ता उत्तरत्र किं भविष्यतीति भाव्यप्रियेणार्ता ॥ १ ॥ विसृष्टा मात्रादिभिर्नैर्घृण्यादिना शकुन्तलादिवत्यक्ता ॥ २ ॥ यत्र अस्यां दुर्दशायाम् । अपुण्या शीघ्रमरणप्रापकपुण्यरहिता ॥ ३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मिति । अनागच्छति, मासद्वयादर्वागिति शेषः । गर्भस्थजन्तोः निरुद्धनिर्गमस्य गर्भस्थजन्तोः । शल्यकृन्तः नापितः ॥ ६ ॥ चिराय दुःखिताया मम द्वौ मासौ वधस्यावधिभूतौ अधिगमिष्यतः । इदं दुःखं बत । कस्य दुःखमिव ? राजापराधात् बद्धस्य तथा निशान्ते वध्यस्य तस्करस्येव दुःखम् । यथेति पाठे इवशब्दो वाक्यालङ्कारे ॥ ७ ॥ हा रामेति । मूढो वात्यारूपो वातो यस्यास्सा मूढवाता, वात्याहतेत्यर्थः । "मूढस्तन्द्रितवात्ययोः" इति

दुःखं बतेदं मम दुःखिताया मासौ चिरायाधिगमिष्यतो द्वौ । बद्धस्य वध्यस्य तथा निशान्ते राजापराधादिव तस्करस्य ॥ ७ ॥ हा राम हा लक्ष्मण हा सुमित्रे हा राममातः सह मे जनन्या । एषा विपद्याम्यहमल्पभाग्या महार्णवे नौरिव मूढवाता॥८॥ तरस्विनौ धारयता मृगस्य सत्त्वेन रूपं मनुजेन्द्रपुत्रौ । नूनं विशस्तौ मम कारणात् तौ सिंहर्षभौ द्राविव वैद्युतेन ॥ ९ ॥ नूनं स कालो मृगरूपधारी मामल्पभाग्यां लुलुभे तदानीम् । यत्रार्यपुत्रं विससर्ज मूढा रामानुजं लक्ष्मणपूर्वजं च ॥ १० ॥ हा राम सत्यव्रत दीर्घबाहो हा पूर्णचन्द्रप्रतिमानवक्त्र । हा जीवलोकस्य हितः प्रियश्च वध्यां न मां वेत्सि हि राक्षसानाम् ॥ ११ ॥ अनन्यदेवत्वमियं क्षमा च भूमौ च शय्या नियमश्च धर्मे । पतिव्रतात्वं विफलं ममेदं कृतं कृतघ्नेष्विव मानुषाणाम् ॥ १२ ॥

विश्वः ॥८॥ तरस्विनाविति । मृगस्य रूपं धारयता सत्त्वेन जन्तुना । मम कारणात् मन्निमित्तम् । विशस्तौ हिंसितौ । द्वौ सिंहर्षभाविव द्वौ सिंहाविव द्वौ वृषभाविवेत्यर्थः । वैद्युतेन अशनिना ॥ ९ ॥ लुलुभे प्रलोभयामास । यत्र यस्मिन् काले । विससर्जेति मृजेर्लिट्युत्तमपुरुषैकवचनम् । "रामानुजं लक्ष्मण पूर्वजं च "परस्परस्य सदृशौ" इत्युक्तपरस्परसादृश्यात्, बाल्यात् प्रभृति सुस्निग्धतया च परस्परनिरूपकभूतौ ॥ १० ॥ ११ ॥ अनन्यदेवत्वमिति ।

च्छति सति, मासद्वयादर्वागिति शेषः । गर्भस्थजन्तोः, मृतस्येति शेषः । अङ्गानि शल्यकृन्तः नापित इव राक्षसेन्द्रः मम जीवन्त्या एवाङ्गानि छेत्स्यतीति सम्बन्धः ॥ ६ ॥ दुःखमिति । चिराय दुःखिताया मम इदमेव दुःखम्, यौ द्वौ मासाववधिभूतौ तावागमिष्यत . राजापराधाद्बद्धस्य । निशान्ते प्रातःकाले वध्यस्य तस्करस्य यथा यादृक् दुःखं तादृङ्ममागतमित्यर्थः ॥७॥ मूढवाता मूढो वात्यारूपो वातो यस्यास्सा तथा ॥८॥ तरस्विनाविति । मृगस्य मायामृगस्य रूपं धारयता सत्त्वेन जन्तुना । वैद्युतेन विद्युदग्निना ॥ ९ ॥ मृगरूपधारी कालः कर्ता । लुलुभे लोभयामास । यत्र यस्मिन् काले । विससर्ज व्यसृजम् ॥१०॥११॥ अनन्यदेवत्वं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अनन्यदेवत्वम् आश्रयणीया देवताऽन्याऽस्ति सा रक्षिष्यतीति बुद्धिर्मे नास्ति । " नारायणमुपागमत् " इत्यत्राप्यप्राधान्येन सह पत्न्येति ह्युक्तम् । नारायणमाराधयतो रामस्य परिचारिकाऽस्मीत्यर्थः । इयं क्षमा च । रावणपरुषाक्षराणि राक्षसीनां तर्जनभर्त्सनादीनि राममधुरालापश्रवणकुतूहलेन ह्यहं क्षान्तवती । भूमौ च शय्या ' तवाङ्के समुपाविशम् ' इत्येवंविधभोगः कदाचिदपि किन्न सेत्स्यतीत्याशया हि मया भूमौ शयनं क्रियते । नियमश्च

मोघो हि धर्मश्चरितो मयाऽयं तथैकपत्नीत्वमिदं निरर्थम् । या त्वां न पश्यामि कृशा विवर्णा हीना त्वया सङ्गमने निराशा ॥ १३ ॥ पितुर्निदेशं नियमेन कृत्वा वनान्निवृत्तश्चरितव्रतश्च । स्त्रीभिस्तु मन्ये विपुलेक्षणाभिस्त्वं रंस्यसे वीतभयः कृतार्थः ॥ १४ ॥ अहं तु राम त्वयि जातकामा चिरं विनाशाय निबद्धभावा । मोघं चरित्वाऽथ तपोव्रतं च त्यक्ष्यामि धिग् जीवितमल्पभाग्या ॥ १५॥ सा जीवितं क्षिप्रमहं त्यजेयं विषेण शस्त्रेण शितेन वापि । विषस्य दाता नहि मेऽस्ति कश्चिच्छस्त्रस्य वा वेश्मनि राक्षसस्य ॥ १६ ॥ इतीव देवी बहुधा विलप्य सर्वात्मना राममनुस्मरन्ती । प्रवेपमाना परिशुष्कवक्त्रा नगोत्तमं पुष्पितमाससाद ॥ १७ ॥

धर्मे रक्षकत्वधर्मोपि तस्मिन्नेवेति मनीषया हि मया स्थितम् । ' न त्वां कुर्मि दशग्रीव भस्म भस्माई तेजसा ' इत्युक्तिरपि तं दृष्ट्वैव । पतिव्रतात्वम् "एतद्व्रतं मम" इत्युक्तं व्रतं विना मम किञ्चिद्व्रतं नास्तीत्यर्थः । पत्युर्व्रतमेव व्रतं यस्यास्सा पतिव्रता तस्या भावः पतिव्रतात्वम् । विफलं ममेदम् अमोघमपि मोघमासीत् । करस्पर्शेति चेत्तत्राह कृतं कृतघ्नेष्विव मानुषाणाम् । "आत्मानं मानुषं मन्ये" इत्युक्तरीत्या मानुषत्वं रामस्याप्यास्ति । अतस्तादृतर मानुषाणां मध्ये कृतघ्नेषु कृतं कार्यमिव । अस्य किं मूलमिति चेत् ? ममेदं तस्मिन्न काचिन्न्यूनता ममैव दुष्कृतमत्र हेतुः ॥ १२ ॥ १३ ॥ पितु निर्देशम् आज्ञाम्, नियमेन अविच्छेदेन कृत्वा चरितव्रतः चरितवन्यवृत्तिव्रतः वनान्निवृत्तश्च सन् । स्त्रीभिस्तु मतोपि विलक्षणाभिः स्त्रीभिः त्वं रंस्यसे । वीतभयः गतवनवासभयः । कृतार्थः निष्पन्नसर्वपुरुषार्थः । मद्विनाशेन पुनर्बह्वीरूढ्वा रंस्यस इति भावः ॥ १४ ॥ अहं त्विति । त्वयि जातकामा अत एव त्वयि निबद्धभावा निबद्धहृदया । विनाशाय त्वयि निबद्धभावेति दुःखातिरेकोक्तिः । तपः अनशनम् । व्रतं नियमम् । अल्पभाग्या जन्मान्तर सुकृतरहिता । इदानीमनुष्ठितानां तपोव्रतादीनां जन्मान्तरफलदत्वेन मोघत्वोक्तिः । अत एवाल्पभाग्येत्युक्तम् ॥ १५ ॥ सा जीवितमिति । वेश्मनि पत्न्येकदेवतात्वम् । कृतमुपकृतम् ॥ १२-१७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

राक्षसस्य । एवं सम्यङ्निरणकारी क्रूरस्यास्य गृहे कथं लब्धत ज्ञात भावः ॥ १६ ॥ १७ ॥ शोकेति । वेण्युद्ग्रथनं वेणीबन्धनम् । यमस्य मूलं यमस्य समीपम् । अत्रेतिकरणं बोध्यम् । इति विचिन्त्य नगोत्तमं शिंशुपामाससाद । शिंशुपां तामुपागमदिति पूर्वमुक्तम् । तस्य सामीप्येन गमनमद्योच्यते । पुष्पितं शुभसूचनम् । यद्वा पुष्पितमाससाद अग्निप्रवेशं कुर्वन्तीवेत्यर्थः ॥ १८ ॥ उपस्थितेत्यर्धमेकं वाक्यम् । नगस्य शाखां गृहीत्वा उप

शोकाभितप्ता बहुधा विचिन्त्य सीताऽथ वेण्युद्ग्रथनं गृहीत्वा । उद्बध्य वेण्युद्ग्रथनेन शीघ्रमहं गमिष्यामि यमस्य मूलम् ॥ १८ ॥ उपस्थिता सा मृदुसर्वगात्रा शाखां गृहीत्वाऽथ नगस्य तस्य ॥ १९ ॥ तस्यास्तु रामं प्रविचिन्तयन्त्या रामानुजं स्वं च कुलं शुभाङ्ग्याः । शोकानिमित्तानि तथा बहूनि धैर्यार्जितानि प्रवराणि लोके । प्रादुर्निमित्तानि तदा बभूवुः पुरापि सिद्धान्युपलक्षितानि ॥ २० ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे अष्टाविंशः सर्गः ॥ २८ ॥

स्थिता ॥ १९ ॥ तस्यास्त्विति । स्वं च कुलं विचिन्तयन्त्या इत्यनेन दुर्मरणात् भीतत्वं व्यज्यते । शोकानिमित्तानि शुभसूचकानीत्यर्थः । धैर्यार्जितानि अर्जितधैर्याणि, धैर्यकराणीत्यर्थः । लोके प्रवराणि लोके प्रसिद्धानीत्यर्थः, प्रवरं हि प्रसिद्धं भवति । प्रादुर्बभूवुरित्यन्वयः । पुरापि सिद्धान्युपलक्षितानि पूर्वमपि फलव्याप्तत्वेन दृष्टानि । तान्युत्तरसर्गे विवरिष्यति ॥ २० ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टाविंशः सर्गः ॥ २८ ॥

शोकाभितप्तेत्यादि सार्धश्लोकमेकं वाक्यम् । शोकाभितप्ता सीता बहुधा विचिन्त्य वेण्युद्ग्रथनं वेणीं गृहीत्वा वेण्युद्ग्रथनेन उद्बध्य उद्बन्धनं कृत्वा यमस्य मूलं गमिष्यामीति नगस्य शाखां गृहीत्वा उपस्थिता अवस्थितेति सम्बन्धः ॥ १८ ॥ १९ ॥ तस्या इति सार्धश्लोकमेकं वाक्यम् । शोकानिमित्तानि शुभसूचकानीत्यर्थः । धैर्यार्जितानि धैर्यसम्पादकानीत्यर्थः । पुरापि सिद्धान्युपलक्षितानि पूर्वमपि लब्धसंवादत्वेन दृष्टानि ॥ २० ॥ इति श्रीमद्देशिकवरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायाम् अष्टाविंशः सर्गः ॥ २८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तथागतामित्यादि। तथागतां "रहस्यं च प्रकाशं च" इत्युक्तरीत्या सर्वं यथावत्साक्षात्कृतवतो मुनेरपि तथाशब्दप्रयोगादित्थमिति परिच्छिद्य वक्तुमशक्य दुःखाम्। तां धर्मिस्वरूपातिरिक्तयत्किंचिदतिशयरहिताम्। व्यथिताम्। "आशंसायां भूतवच्च" इति निष्ठा। तथा च पूर्वोक्तं सर्वं धर्मिस्वरूपमात्रम्। इतः परमेव व्यसनानि भविष्यन्तीति मन्यमानाम्। "समा द्वादश तत्राहं राघवस्य निवेशने। भुञ्जाना मानुषान् भोगान् सर्वकामसमृद्धिनी॥" इत्युक्तं

तथागतां तां व्यथितामनिन्दितां व्यपेतहर्षां परिदीनमानसाम्। शुभां निमित्तानि शुभानि भेजिरे नरं श्रिया जुष्टमिवोपजीविनः॥ १॥ तस्याः शुभं वाममरालपक्ष्मराजीवृतं कृष्णविशालशुक्लम्। प्रास्पन्दतैकं नयनं सुकेश्या मीनाहतं पद्ममिवाभिताम्रम्॥ २॥ भुजश्चारुश्चितपीनवृत्तः परार्ध्यकालागरुचन्दनार्हः। अनुत्तमेनाध्युषितः प्रियेण चिरेण वामः समवेपताशु॥ ३॥

भोगजातं सर्वमकिंचित्करमासीत्, दुःखमेव निरूपकमासीत्। अनिन्दितां रामविरहे यथा स्थातव्यं तथा स्थिताम्। एवमनवस्थाने निन्दितैव भवति। व्यपेतहर्षां हर्षः पूर्वमस्यामुषित्वा गत इति न ज्ञातामित्यर्थः। व्यपाभ्यामुपसर्गाभ्यां तथा प्रतीयते। परिदीनमानसां हर्षे समागतेष्याश्रयरहिताम्। परीत्यनेन तथाऽवगम्यते। शुभां गुणाधिकविषयविरहकृतविकृतित्वेन तदशाया एव नीराजना कर्तव्येत्येवं स्थिताम्। निमित्तानि शुभानि भेजिरे। निमित्तानि तद्विषये शुभानि सूचयित्वा स्वसत्तां लेभिरे। नरं श्रिया जुष्टमिवोपजीविनः। आर्थिनो हि लक्ष्मीकटाक्षवद्विषये किंचित्कृत्य स्वप्रयोजनं लभन्ते, इमानि तु साक्षाल्लक्ष्मीविषये किंचित्कृत्य निमित्तस्वामित्वं लेभिर इत्यर्थः॥ १॥ शुभनिमित्तान्येवाह—तस्या इत्यादिना। अरालं वक्रम्। कृष्ण विशालशुक्लं मध्ये कनीनिकायां कृष्णं सर्वतो विशालं शुभ्रं च। अभिताम्रम् अभितस्ताम्रम्, प्रान्तरक्तमित्यर्थः। "प्रान्तरक्ते च नेत्रे" इति पद्मिनी

तथेति। उपजीविनः सेवकाः त इव॥ १॥ अरालानां वक्राणां पक्ष्मणाम् अक्षिरोम्णाम् राज्या पङ्क्त्या वृतम्। "पक्ष्माक्षिलोम्नि किञ्जल्के" इत्यमरः। कृष्ण विशालशुक्लं मध्ये कृष्णं सर्वतो विशालं शुक्लं च। अभितस्ताम्रम् अभिताम्रम्, प्रान्तरक्तमित्यर्थः॥ २॥ ३॥

स०—जुष्टमिवोपसेविन इति। उपसेविनः योगविभागादाद्यन्तादिनिः। उपसेवितुं शीलमेषामित्यर्थे "युष्यजातौ" इति वा णिनिः॥ १॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लक्षणात् ॥ २ ॥ ३ ॥ गजेन्द्रेति । तयोः सुलक्षणवत्तया प्रसिद्धयोः । ऊरुः वाम इत्यनुषज्यते । सुजातः सुन्दरः ॥ ४ ॥ शुभमिति । शिखराग्रदत्त्याः वृत्ताग्रदन्तयुक्तायाः । " शिखरं निस्तुलं वृत्तम् " इत्युत्पलमाला । " शिखरं दाडिमफलबीजम् " इत्यन्ये नैघण्टुकाः । यद्वा शिखराकाराग्रदन्तायाः "अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च " इति दन्तस्य दत्रादेशः । वासः वस्त्रम् । परिस्रंसत पर्यस्रंसत । अडभाव आर्षः । ऊरुकम्पादिति भावः । स्थितायाः

गजेन्द्रहस्तप्रतिमश्च पीनस्तयोर्द्वयोः संहतयोः सुजातः । प्रस्पन्दमानः पुनरूरुरस्या रामं पुरस्तात् स्थितमाचचक्षे ॥ ४ ॥ शुभं पुनर्हेमसमानवर्णमीषद्रजोध्वस्तमिवामलाक्ष्याः । वासः स्थितायाः शिखराग्रदत्त्याः किंचित् परिस्रंसत चारुगात्र्याः ॥ ५ ॥ एतैर्निमित्तैरपरैश्च शुभ्रूः संबोधिता प्रागपि साधु सिद्धैः । वातातपक्लान्तमिव प्रनष्टं वर्षेण बीजं प्रतिसंजहर्ष ॥ ६ ॥ तस्याः पुनर्बिम्बफलाधरोष्ठं स्वक्षिभ्रु केशान्तमरालपक्ष्म । वक्त्रं बभासे सितशुक्लदंष्ट्रं राहोर्मुखाच्चन्द्र इव प्रमुक्तः ॥ ७ ॥

तिष्ठन्त्या इति वस्त्रस्रंसनानुगुणावस्थोक्तिः । यद्वा वाससस्स्रंसनं कान्तागमनसूचकमिति भावः । शिखरदन्तत्वे सामुद्रिकम्–" स्निग्धास्समानुरूपाः सुपङ्क्तयः शिखरिणः श्लक्ष्णाः । दन्ता भवन्ति यासां तासां पादे जगत्सर्वम् ॥" इति, "यासां शिखरिणो दन्ता दीर्घं जीवन्ति ताः स्त्रियः" इति च ॥ ५ ॥ अपरैः पूर्वोक्तशकुनैः । सम्बोधिता सद्यः कान्तागमवार्ता भविष्यतीति बोधिता । वातातपक्लान्तं सम्यग्वातातपसंशोषितम् । प्रनष्टं भूमावदर्शनं गतम् । यद्वा प्रनष्टं प्रकर्षेण कृशीभूतम् । बीजं वर्षेणेव प्रतिसंजहर्ष । बीजस्य प्रहर्षो नाम अङ्कुरादिभावेन स्थूलीभूय बहिर्निर्गमः ॥ ६ ॥ स्वक्षिभ्रु शोभनाक्षिभ्रूयुक्तम् । केशाः अन्ते यस्य तत् केशान्तम् । उपरिभागप्रकीर्णालकमित्यर्थः । सितशुक्लदंष्ट्रम् अत्यन्तशुक्लदन्तम् । एकार्थं शब्दद्वय प्रयोगोऽतिशयज्ञापनाय । यथा मुग्धमनोज्ञ इति । नीरन्ध्रत्वेन संसक्तशुक्लदंष्ट्रमिति वाऽर्थः । " षिभ् बन्धने " इत्यस्माद्धातोर्निष्ठा ॥ ७ ॥

द्वयोर्मध्ये ऊरुः वाम इत्यनुषज्यते ॥ ४ ॥ शिखराग्रदत्त्याः शिखराकाराग्रदन्तायाः । वासः परिस्रंसत पर्यस्रंसत ॥ ५ ॥ साधुसिद्धैः सम्यक् सम्बन्धिभिः । संवादिभिरिति पाठान्तरम् ॥ ६ ॥ सितशुक्लदंष्ट्रम् पङ्क्तिबद्धधवलदन्तमित्यर्थः ॥ ७ ॥

स०–संहतयोः मांसलत्वेन श्लिष्टयोः । तयोरूर्वोर्मध्ये ऊरुः प्रस्पन्दमानः रामं पुरःस्थितमाचचक्षे । शकुनप्रस्तावाद्राम इत्यनुक्तावप्येकवचनेनैक इति प्रतीयते । न च मानान्तरेण वाम एवेत्यवसेयम् ॥ ४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सेति । व्यपनीततन्द्री निरस्तजाड्या । हर्षविवृद्धसत्त्वा हर्षविकसितचित्ता । शुक्ले शुक्लपक्षे ॥ ८ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकोनत्रिंशः सर्गः ॥ २९ ॥ हनुमानपीत्यादि । विक्रान्तः पराक्रमशाली । सीतायास्त्रिजटायाश्च सर्वं सर्व

सा वीतशोका व्यपनीततन्द्री शान्तज्वरा हर्षविवृद्धसत्त्वा । अशोभतार्या वदनेन शुक्ले शीतांशुना रात्रि रिवोदितेन ॥ ८ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

हनुमानपि विश्रान्तः सर्वं शुश्राव तत्त्वतः । सीतायास्त्रिजटायाश्च राक्षसीनां च तर्जनम् ॥ १ ॥ अवेक्षमाणस्तां देवीं देवतामिव नन्दने । ततो बहुविधां चिन्तां चिन्तयामास वानरः ॥ २ ॥ यां कपीनां सहस्राणि सुबहून्ययुतानि च । दिक्षु सर्वासु मार्गन्ते सेयमासादिता मया ॥ ३ ॥ चारेण तु सुयुक्तेन शत्रोः शक्तिमवेक्षता । गूढेन चरता तावदवेक्षितमिदं मया ॥ ४ ॥ राक्षसानां विशेषश्च पुरी चेयमवेक्षिता । राक्षसाधिपतेरस्य प्रभावो रावणस्य च ॥ ५ ॥ युक्तं तस्याप्रमेयस्य सर्वसत्त्वदयावतः । समाश्वासयितुं भार्यां पतिदर्शनकांक्षिणीम् ॥ ६ ॥

वृत्तान्तम् । तर्जनं तर्जनवचनम् ॥ १ ॥ अवेक्षमाण इति । चिन्तां चिन्तयामास चिन्तां चकार ॥ २ ॥ यामिति, सर्ववानराभिलषितोऽर्थो मयैकेन लब्ध इति विस्मितवान् ॥ ३ ॥ इदं वक्ष्यमाणम् । तावत् कात्स्न्र्येन ॥ ४ ॥ ५ ॥ समाश्वासयितुं युक्तं न्याय्यम् ॥ ६ ॥

व्यपनीततन्द्री निरस्तजाड्या । हर्षविवृद्धसत्त्वा हर्षेण विकसितचित्ता सा सीता वदनेन कर्त्रा अशोभत । शुक्ले शुक्लपक्षे ॥ ८ ॥ इति श्रीमद्देश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायाम् एकोनत्रिंशः सर्गः ॥ २९ ॥ हनुमानिति । विश्रान्तः विगतव्यापारः । सीतायास्त्रिजटायाश्च सर्वं, वृत्तान्त मिति शेषः ॥ १ ॥ चिन्तां चिन्तयामास चिन्तां चकारेत्यर्थः ॥ २ ॥ ३ ॥ चारेणेति । इदं वक्ष्यमाणम् ॥ ४ ॥ राक्षसानां विशेषस्तारतम्यमैश्वर्यादिकृतम् । अस्य रावणस्य प्रभावश्चावेक्षितः ॥ ५ ॥ युक्तं न्याय्यम् ॥ ६ ॥

स०—यथा तस्येति । सर्वसत्त्वदयावतः, सर्वे अरिहिंसाविषये सत्त्ववान् बलवांश्चासौ दयावांश्च तस्य । सर्वबलवान् सर्वदयावांस्तस्येति वा, सर्वप्राणिषु दयावांस्तस्येति वा । समाश्वासयितुं मया, युक्तमिति शेषः ॥ १ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अहमिति । आश्वासयामि " वर्तमानसामीप्ये वर्तमानवद्वा " इति लट् ॥ ७ ॥ ८ ॥ दोषवत्त्वमुपपादयति–गते हीति ॥ ९ ॥ समाश्वासयितुं न्याय्यः, सीतासन्देशकथनेनेति शेषः ॥ १०–१२ ॥ सीताऽब्रवीद्वच इत्यत्रेतिकरणं द्रष्टव्यम् ॥ १३ ॥ १४ ॥ भर्त्तारं सुग्रीवम् । व्यर्थम् अनाश्वास्य गमने

अहमाश्वासयाम्येनां पूर्णचन्द्रनिभाननाम् । अदृष्टदुःखां दुःखार्तां दुःखस्यान्तमगच्छतीम् ॥ ७ ॥ यद्यप्यहमिमां देवीं शोकोपहतचेतनाम् । अनाश्वास्य गमिष्यामि दोषवद् गमनं भवेत् ॥ ८ ॥ गते हि मयि तत्रेयं राजपुत्री यशस्विनी । परित्राणमविन्दन्ती जानकी जीवितं त्यजेत् ॥ ९ ॥ मया च स महाबाहुः पूर्णचन्द्रनिभाननः । समाश्वासयितुं न्याय्यः सीतादर्शनलालसः ॥ १० ॥ निशाचरीणां प्रत्यक्षमनर्हं चापि भाषणम् । कथं नु खलु कर्तव्यमिदं कृच्छ्रगतो ह्यहम् ॥ ११ ॥ अनेन रात्रिशेषेण यदि नाश्वास्यते मया । सर्वथा नास्ति सन्देहः परित्यक्ष्यति जीवितम् ॥ १२ ॥ रामश्च यदि पृच्छेन्मां किं मां सीताऽब्रवीद्वचः । किमहं तं प्रतिब्रूयामसम्भाष्य सुमध्यमाम् ॥ १३ ॥ सीतासन्देशरहितं मामितस्त्वरया गतम् । निर्दहेदपि काकुत्स्थः क्रुद्धस्तीव्रेण चक्षुषा ॥ १४ ॥ यदि चोद्योजयिष्यामि भर्तारं रामकारणात् । व्यर्थमागमनं तस्य ससैन्यस्य भविष्यति ॥ १५ ॥

तदागमनपर्यन्तं देव्याः प्राणानवस्थानादिति भावः ॥ १५ ॥

आश्वासयामि आश्वासयिष्यामि ॥ ७ ॥ दोषवत् कार्यहानिदोषवत् ॥ ८ ॥ ९ ॥ समाश्वासयितुं न्याय्यः, सीतासन्देशकथनेनेति शेषः ॥ १० ॥ सीतासमाश्वासनं च कष्टमित्याह–निशाचरीणामिति । तासां प्रत्यक्षं सीतया अभिभाषणमयुक्तम् अयोग्यम्, अत इदं कार्यं कथं कर्तव्यमित्येवं कृच्छ्रगतोऽहमस्मि ॥ ११ ॥ कालविलम्बश्च आश्वासनस्यायुक्त इत्याह–अनेनेति ॥ १२ ॥ सीतामब्रवीदित्यत्रेतिकरणं द्रष्टव्यम् ॥ १३ ॥ १४ ॥ यदि चेति । भर्तारं सुग्रीवमुद्योजयिष्यामि उद्योगं

स०–आश्वासयामीति वर्तमानसामीप्यालृडर्थे लट् । अथवा क्रियाप्रबन्धे लडित्युक्तेर्धात्वर्थमात्रे लडुबन्योर्भेदेऽर्थे लृडर्थे भविष्यतीति लट उपपत्तेः । अन्तं पारम् । नाधिगच्छन्तीम् । यद्वा दुःखस्य कर्मणि षष्ठी । दुःखं नश्यन्तं बध्नन्तं क्षणे क्षणे दुःखं नूतनयन्तमिति यावत् । तं रावणं प्रकारं वा । अधिगच्छतीं प्राप्नुवन्तीम् । रामाश्वासनपरतया शेषेण चार्थापयतस्तीर्थस्योत्तरश्लोक इव इतरेषां तदुत्तरश्लोकः साधक इत्यु भयव्याकरणे समूले इति ज्ञेयम् । अदृष्टदुःखां दुःखस्य नश्यन्तमधिगच्छतीम् इति पाठः ॥ ७ ॥

॥८७॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

राक्षसीनाम् अन्तरम् अवकाशं विच्छेदं वा, राक्षस्यसन्निधानसमयमित्यर्थः ॥ १६ ॥ अहं त्विति । अतितनुः अतिसूक्ष्मतनुः । संस्कृतां प्रयोग सौष्ठवलक्षणसंस्कारयुक्ताम् ॥ १७ ॥ गीर्वाणभाषया व्यवहारे दोषमाह–यदीति ॥ १८ ॥ अथ मानुषभाषया व्यवहर्तव्यत्वं निश्चिनोति–अवश्यमिति ।

अन्तरं त्वहमासाद्य राक्षसीनामिह स्थितः । शनैराश्वासयिष्यामि सन्तापबहुलामिमाम् ॥ १६ ॥ अहं त्वति तनुश्चैव वानरश्च विशेषतः । वाचं चोदाहरिष्यामि मानुषीमिह संस्कृताम् ॥ १७ ॥ यदि वाचं प्रदास्यामि द्विजाति रिव संस्कृताम् । रावणं मन्यमाना मां सीता भीता भविष्यति । वानरस्य विशेषेण कथं स्यादभिभाषणम् ॥ १८ ॥ अवश्यमेव वक्तव्यं मानुषं वाक्यमर्थवत् । मया सान्त्वयितुं शक्या नान्यथेयमनिन्दिता ॥ १९ ॥ सेयमालोक्य मे रूपं जानकी भाषितं तथा । रक्षोभिस्त्रासिता पूर्वं भूयस्त्रासं गमिष्यति ॥ २० ॥ ततो जातपरित्रासा शब्दं कुर्यान्मनस्विनी । जानमाना विशालाक्षी रावणं कामरूपिणम् ॥ २१ ॥ सीतया च कृते शब्दे सहसा राक्षसी गणः । नानाप्रहरणो घोरः समेयादन्तकोपमः ॥ २२ ॥ ततो मां संपरिक्षिप्य सर्वतो विकृताननाः । वधे च ग्रहणे चैव कुर्युर्यत्नं यथाबलम् ॥ २३ ॥ गृह्य शाखाः प्रशाखाश्च स्कन्धांश्चोत्तमशाखिनाम् । दृष्ट्वा विपरिधावन्तं भवेयु र्भयशङ्किताः ॥ २४ ॥ मम रूपं च सम्प्रेक्ष्य वने विचरतो महत् । राक्षस्यो भयवित्रस्ता भवेयुर्विकृताननाः ॥ २५ ॥

अत्र वाक्यस्य मानुषत्वं कोसलदेशवर्तिमनुष्यसंबन्धित्वं विवक्षितम् । तादृग्वाक्यस्यैव देवीपरिचितत्वात् ॥ १९ ॥ एवं मानुषभाषया व्यवहर्तव्यत्वं निश्चित्य संप्रति तयापि भाषयाऽनेन वानररूपेण पुरः स्थित्वाऽभिभाषणे दोषोऽस्तीति विचारयति–सेयमिति ॥ २० ॥ जानमाना जानाना । मुमागम आर्षः ॥ २१–२३ ॥ प्रशाखाः उपशाखाः । विपरिधावन्तं, मामिति शेषः ॥ २४–२६ ॥

करिष्यामि । तस्य सुग्रीवस्यागमनं व्यर्थम्, तदागमनपर्यन्तं देव्याः प्राणानवस्थानादिति भावः ॥ १५ ॥ अन्तरमवकाशम् । तासामनवधानसमयमित्यर्थः ॥ १६ ॥ अतितनुः सूक्ष्मः । संस्कृतां गीर्वाणाम् ॥ १७ ॥ संस्कृतभाषया व्यवहारे दोषमाशङ्क्य मानुषभाषयैव व्यवहर्तव्यमिति निश्चिनोति–यदि वाचमित्यादिश्लोकद्वयेन ॥ १८ ॥ १९ ॥ मानुषभाषया संभाषणेऽपि दोषोऽस्तीति विचारयति–सेयमिति । रूपं वानररूपम्, भाषितं मनुष्यरूपेण भाषितं च ॥ २० ॥ जानमाना मन्वाना । शब्दम् आर्तरवं कुर्यात् ॥ २१–२३ ॥ प्रशाखा उपशाखाः ॥ २४–२६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

उद्विग्नकारिणः उद्वेगकारिणः ॥ २७ ॥ तैः परितः संरुद्धः अत एव रक्षसां बलं विधमन् प्रहरन् अहं महोदधेः परं पारं प्राप्तुं न शक्नुयामित्यन्वयः ॥ २८ ॥ अगृहीतार्था अविदितरामसन्देशार्था ॥ २९ ॥ ३० ॥ उद्देश इति । उद्देशे प्रदेशे । नष्टमार्गे अदृष्टमार्गे । उक्तविशेषणे उद्देशे वसति

ततः कुर्युः समाह्वानं राक्षस्यो रक्षसामपि । राक्षसेन्द्रनियुक्तानां राक्षसेन्द्रनिवेशने ॥ २६ ॥ ते शूलशक्तिनिस्त्रिंश विविधायुधपाणयः । आपतेयुर्विमर्देऽस्मिन् वेगेनोद्विग्नकारिणः ॥ २७ ॥ संरुद्धस्तैस्तु परितो विधमन् रक्षसां बलम् । शक्नुयां न तु संप्राप्तुं परं पारं महोदधेः ॥ २८ ॥ मां वा गृह्णीयुराप्लुत्य बहवः शीघ्रकारिणः । स्यादियं चागृहीतार्था मम च ग्रहणं भवेत् ॥ २९ ॥ हिंसाभिरुचयो हिंस्युरिमां वा जनकात्मजाम् । विपन्नं स्यात्ततः कार्यं रामसुग्रीवयोरिदम् ॥ ३० ॥ उद्देशे नष्टमार्गेऽस्मिन् राक्षसैः परिवारिते । सागरेण परिक्षिप्ते गुप्ते वसति जानकी ॥ ३१ ॥ विशस्ते वा गृहीते वा रक्षोभिर्मयि संयुगे । नान्यं पश्यामि रामस्य साहाय्यं कार्यसाधने ॥ ३२ ॥ विमृशंश्च न पश्यामि यो हते मयि वानरः । शतयोजनविस्तीर्णं लङ्घयेत महोदधिम् ॥ ३३ ॥ कामं हन्तुं समर्थोऽस्मि सहस्राण्यपि रक्षसाम् । नतु शक्ष्यामि संप्राप्तुं परं पारं महोदधेः ॥ ३४ ॥ असत्यानि च युद्धानि संशयो मे न रोचते । कश्च निस्संशयं कार्यं कुर्यात् प्राज्ञः ससंशयम् ॥ ३५ ॥

इत्यन्वयः ॥ ३१ ॥ विशस्ते वेति । सहाय एव साहाय्यः तम् । कार्यसाधने सीतादर्शननिवेदनलक्षणकार्यसाधने ॥ ३२ ॥ विमृशन्निति । यो लङ्घयेत तं न पश्यामीत्यन्वयः ॥ ३३ ॥ ३४ ॥ असत्यानि अनिश्चितजयापजयानि । क्लेशस्तु भूयानिति भावः । ततो नैतन्मम मतमित्याह संशय

उद्विग्नकारिणः उद्वेगकारिणः ॥२७॥२८॥ मामिति । मां वा गृह्णीयुः मम ग्रहणं भवेद्यदि इयं च सीता अगृहीतार्था स्यात् अविदितरामवृत्तान्ता स्यादिति सम्बन्धः ॥ २९ ॥ ३० ॥ उद्देशे प्रदेशे । नष्टमार्गे अदृष्टमार्गे ॥ ३१ ॥ कार्यसाधने सीतादर्शननिवेदनरूपकार्यकरणे ॥ ३२ ॥३३॥ पारं प्राप्तुं न शक्ष्यामि, युद्धश्रान्तत्वादिति भावः ॥ ३४ ॥ असत्यानीति । अनिश्चितजयापजयानीत्यर्थः । संशयः संशयितोऽर्थः । संशयरूपकार्यकारी मूढ इत्याशयेनाह क इति । कः प्राज्ञः ससंशयं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इति । संशयः संशयितार्थः । स च सङ्ग्रामः । अथापि तथाकरणे स एव कार्यहन्ता बुद्धिहीनो निन्दाभाजनं चेत्याशयेनाह–कश्चेति । प्राज्ञः कः ससंशयं कार्यं निस्संशयं निर्विचारम् कुर्यात् ? ॥ ३५ ॥ अनभिभाषणे रामसंदेशानिवेदने । एष दोषः पूर्वोक्तसीतासंत्रासाक्रोशतन्निमित्त राक्षसागमनादिः । सीताभिभाषणे वानररूपेण पुरः स्थित्वाऽभिभाषणे ॥३६॥ भूताश्चार्थाः निष्पन्नार्थाः । विक्लवम् अविवेकिनम् दूतमासाद्य देशकाल

प्राणत्यागश्च वैदेह्या भवेदनभिभाषणे । एष दोषो महान् हि स्यान्मम सीताभिभाषणे ॥ ३६ ॥ भूताश्चार्था विनश्यन्ति देशकालविरोधिताः । विक्लवं दूतमासाद्य तमः सूर्योदये यथा ॥३७॥ अर्थानर्थान्तरे बुद्धिर्निश्चिताऽपि न शोभते । घातयन्ति हि कार्याणि दूताः पण्डितमानिनः ॥३८॥ न विनश्येत् कथं कार्यं वैक्लव्यं न कथं भवेत् । लङ्घनं च समुद्रस्य कथं नु न वृथा भवेत् ॥ ३९ ॥ कथं नु खलु वाक्यं मे शृणुयान्नोद्विजेत वा । इति संचिन्त्य हनुमांश्चकार मतिमान् मतिम् ॥ ४० ॥

विरोधिताः सन्तः सूर्योदये तमो यथा विनश्यति तथा विनश्यन्तीति सम्बन्धः ॥ ३७ ॥ अत्र विक्लवं दूतमासाद्येत्यनुषज्यते । अर्थानर्थान्तरे कार्याकार्य विषये । निश्चितापि स्वामिना सचिवैः सह निश्चितापि बुद्धिः विक्लवं दूतमासाद्य न शोभते, अकिंचित्करा भवतीत्यर्थः । एतदेवोपपादयति घात यन्तीति ॥ ३८ ॥ प्रागुक्ता दूतदोषाः स्वस्मिन्यथा न स्युस्तथा कर्तव्यमित्याह–न विनश्येदिति । कार्यं स्वामिकार्यम् । कथं केन प्रकारेण न विन श्येत् । वैक्लव्यं बुद्धिहीनता मम कथं न भवेत् । समुद्रलङ्घनं कथं न वृथा भवेत्, तथा कर्तव्यमिति शेषः ॥३९॥ कथमिति । अत्र सीतेत्यध्याहार्यम् ।

कार्यं निस्संशयः निर्विकारस्सन् कुर्यात् ?॥ ३५ ॥ प्राणेति । एष दोषः पूर्वोक्तजयापजययोः संशयरूपदोषः । अनभिभाषणे रामसन्देशानिवेदने ॥३६॥ भूताश्चार्थाः निष्पन्ना अप्यर्थाः । विक्लवम् अविवेकिनम् दूतमासाद्य देशकालविरोधितास्सन्तः विनश्यन्ते नश्यन्ति, अयुक्तदेशायुक्तकालप्रयुक्तत्वादिति भावः॥३७॥ अर्थानर्थान्तरे कार्याकार्यविषये निश्चितापि स्वामिना सचिवैः सह निश्चितापि बुद्धिः । तत्र विक्लवं दूतमासाद्येत्यनुषज्यते, न शोभते अकिञ्चित्करा भवतीत्यर्थः । एतदेवोप पादयति हीति ॥ ३८ ॥ प्रागुक्ता दूतदोषाः स्वस्मिन् यथा न स्युः तथा कर्तव्यमित्याह -नेति । कार्यं स्वामिकार्यम् । वैक्लव्यं बुद्धिहीनता मम कथं न भवेत्, समुद्रस्य लङ्घनं कथं नु वृथा न भवेत्, तथा कर्तव्यमिति शेषः ॥ ३९ ॥ कथमिति । शृणुयात्, सीतेति शेषः । मतिं चकार सीतासम्भाषणोपायं निश्चितवानित्यर्थः ॥४०॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हनुमान् मे वाक्यं सीता कथं केन प्रकारेण शृणुयात्कथं नोद्विजेतेति विचार्य मतिमान् प्रशस्तमतिः। मतिं तत्कालोचितकर्तव्यविषयाम्। चकार निष्पादयामास ॥ ४० ॥ राममिति । स्वबन्धुं राममनुकीर्तयन् " लक्षणहेत्वोः– " इति हेत्वर्थे शतृप्रत्ययः । नैनामुद्वेजयिष्यामि एनां मद्रूपप्रदर्शनमन्तरेण रामस्य कीर्तनेनैवानुद्विग्नां करिष्यामीत्यर्थः । तद्बन्धुगतमानसां स चासौ बन्धुश्च तद्बन्धुः रामः तद्गतमानसाम् ॥ ४१–४३ ॥ इतीति । जगतिपतेः इति दीर्घाभाव आर्षः । जगादेति वक्ष्यमाणसर्गार्थसंग्रहः ॥४४॥ इति श्रीगोविन्द० श्रीरामा० शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रिंशः सर्गः ३०

राममक्लिष्टकर्माणं स्वबन्धुमनुकीर्तयन् । नैनामुद्वेजयिष्यामि तद्बन्धुगतमानसाम् ॥ ४१ ॥ इक्ष्वाकूणां वरिष्ठस्य रामस्य विदितात्मनः । शुभानि धर्मयुक्तानि वचनानि समर्पयन् ॥ ४२ ॥ श्रावयिष्यामि सर्वाणि मधुरां प्रब्रुवन् गिरम् । श्रद्धास्यति यथा हीयं तथा सर्वं समादधे॥४३॥ इति स बहुविधं महानुभावो जगतिपतेः प्रमदामवेक्षमाणः । मधुरमवितथं जगाद वाक्यं द्रुमविटपान्तरमास्थितो हनूमान् ॥४४॥ इत्यार्षे० श्रीमत्सुन्दरकाण्डे त्रिंशः सर्गः ॥३०

एवं बहुविधां चिन्तां चिन्तयित्वा महाकपिः । संश्रवे मधुरं वाक्यं वैदेह्या व्याजहार ह ॥ १ ॥

एवमित्यादि । चिन्तां चिन्तयित्वा चिन्तां कृत्वा, कर्तव्यमर्थं निश्चित्येत्यर्थः । संश्रवे सम्यक् श्रूयतेऽस्मिन्निति संश्रवः समीपम्, समीपे व्याजहार । यद्वा "पाठ्ये गेये च मधुरम्" इति संश्रवे श्रवणे मधुरं ज्ञानप्रसरणद्वारा इन्द्रियेभ्यो निस्सृत्य विषयान् गृहीत्वा तदनन्तरं हि रसो जायते लोके, अत्र न तथा यत्र शब्दसंसर्गो जायते तत्र रसो जायत इत्यतिशयोक्तिः । मधुरं ज्ञानमपि तद्द्वारा रसजनकं वाक्यं पूर्वापरनिरूपणं विना स्वयं रसजनकम् । वैदेह्याः वैदेही

तदेवाह–राममिति । स्वबन्धुं स्वस्या देव्याः बन्धुम् । अनुकीर्तयन् । हेतौ शतृप्रत्ययः । अनुकीर्तनाद्धेतोः । नैनामुद्वेजयिष्यामि मद्रूपदर्शनमन्तरेण रामसङ्कीर्तनेनैव अनुद्विग्नां करिष्यामीत्यर्थः । स चासौ बन्धुश्च तद्बन्धुः रामः तं गतं मानसं यस्यास्तां ताम् ॥ ४१–४३ ॥ जगतिपतेः । दीर्घाभाव आर्षः । जगाद मनसा ॥४४॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां त्रिंशः सर्गः ॥ ३० ॥ एवमिति । चिन्तां चिन्तयित्वा, कर्तव्यमर्थं

स०–सुबन्धुमनुकीर्तयन्निति पाठः । **सुबन्धुं** कदाप्यवियोगिबान्धवम् । तद्बन्धुः सः तद्रूपी बन्धुः रामः। तद्गतचेतनां तस्य रामस्य बन्धुरासः कोवाऽऽगच्छेदिति तद्गतमानसां वा॥ ४१ ॥ **जगतिपतेः** भूपतेः। "ङ्यापोः संज्ञाछन्दसोः" इति संज्ञात्वात् "जाहविर्षयकन्ययोः" इत्यादिवद्धस्वः । अजगतिपतेरिति वा छेदः । अजस्य चतुर्मुखस्य गतिः उदरतो निस्सरणं सद्गतिर्वा यया सा अजगतिः रमा तस्याः पतिस्तस्येति वा॥ ४४

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

निमित्तम् । कुलानुरोधेन देहे निस्स्पृहायाः देहमपि दत्त्वा रसावहत्वमुच्यते ॥ १ ॥ राजेत्यादि । वितरणविक्रमादिजनितत्वेन कीर्तियशसोर्भेदोऽव गन्तव्यः ॥ २–४ ॥ पार्थिवव्यञ्जनैः राजलक्षणैः ॥ ५–७ ॥ तस्य पितुर्वचनाद्वनं प्रव्राजितः गतः । स्वार्थे णिच् ॥८॥ मृगयां परिधावता मृगयामुद्दिश्य

राजा दशरथो नाम रथकुञ्जरवाजिमान् । पुण्यशीलो महाकीर्तिर्ऋजुरासीन्महायशाः॥२॥राजर्षीणां गुणश्रेष्ठस्तपसा चर्षिभिः समः । चक्रवर्तिकुले जातः पुरन्दरसमो बले॥३॥ अहिंसारतिरक्षुद्रो घृणी सत्यपराक्रमः । मुख्यश्चेक्ष्वाकु वंशस्य लक्ष्मीवाँल्लक्ष्मिवर्धनः ॥४॥ पार्थिवव्यञ्जनैर्युक्तः पृथुश्रीः पार्थिवर्षभः । पृथिव्यां चतुरन्तायां विश्रुतः सुखदः सुखी ॥ ५ ॥ तस्य पुत्रः प्रियो ज्येष्ठस्ताराधिपनिभाननः । रामो नाम विशेषज्ञः श्रेष्ठः सर्वधनुष्मताम् ॥ ६ ॥ रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता । रक्षिता जीवलोकस्य धर्मस्य च परन्तपः ॥ ७ ॥ तस्य सत्याभि सन्धस्य वृद्धस्य वचनात् पितुः । सभार्यः सह च भ्रात्रा वीरः प्रव्राजितो वनम् ॥ ८ ॥ तेन तत्र महारण्ये मृगयां परिधावता । राक्षसा निहताः शूरा बहवः कामरूपिणः ॥ ९ ॥ जनस्थानवधं श्रुत्वा हतौ च खरदूषणौ । ततस्त्व मर्षापहृता जानकी रावणेन तु । वञ्चयित्वा वने रामं मृगरूपेण मायया ॥ १० ॥ स मार्गमाणस्तां देवीं रामः सीतामनिन्दिताम् । आससाद वने मित्रं सुग्रीवं नाम वानरम् ॥ ११ ॥ ततः स वालिनं हत्वा रामः परपुरञ्जयः । प्रायच्छत् कपिराज्यं तत् सुग्रीवाय महाबलः॥ १२॥ सुग्रीवेणापि सन्दिष्टा हरयः कामरूपिणः । दिक्षु सर्वासु तां देवीं विचिन्वन्ति सहस्रशः॥ १३॥ अहं संपातिवचनाच्छतयोजनमायतम् । अस्या हेतोर्विशालाक्ष्याः सागरं वेगवान् प्लुतः १४

परिधावता । अनेन लीलया खरादिवधः सूच्यते ॥ ९ ॥ जनस्थानवधं जनस्थानरक्षोवधम् । अमर्षेणापहृता अमर्षापहृता । मृगरूपेण मृगसौन्दर्येण प्रशस्तमृगेण वा । " प्रशंसायां रूपप् " ॥ १०–१४ ॥

निश्चित्येत्यर्थः । संश्रवे संश्रवणे मधुरम् । वैदेह्याः वैदेहीनिमित्तम् । यद्वा सम्यक् श्रूयते अस्मिन्निति संश्रवः तस्मिन् समीपदेशे, यत्रोक्तं सीतैव शृणुयान्नान्येत्यर्थः ॥१–४॥ पार्थिवेति । पार्थिवव्यञ्जनैः पार्थिवलक्षणैः ॥५–७॥ तस्येति । सत्याभिसन्धस्य सत्यसङ्कल्पस्य ॥ ८ ॥ ९ ॥ मृगरूपेण प्रशस्तमृगरूपेण ॥ १०–१४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यथारूपां यादृशशरीराम् । यथावर्णां यादृशरूपाम् । यथालक्ष्मीं यादृशकान्तिम् । राघवस्य राघवात् ॥ १५ ॥ १६ ॥ तत इति । सुकेशी नीलसूक्ष्म केशी, वक्रिम्णः पूर्वमुक्तत्वात् ॥ १७ ॥ १८ ॥ सेति । पार्श्वम् आकाशं भूमिं चावेक्षमाणा । अधस्तादित्यनेन यथा भूमिं भित्त्वा कश्चिन्नरः राम नामानि कीर्तयेत्तथाऽन्यत्रापीत्यपिना संभावनोच्यते । शिंशुपावृक्षस्याधस्तात्तिर्यगूर्ध्वमिति वा । तमचिन्त्यबुद्धिं ददर्श । तद्वपुरवलोकनात्पूर्वं तस्य

यथारूपां यथावर्णां यथालक्ष्मीं च निश्चिताम् । अश्रौषं राघवस्याहं सेयमासादिता मया ॥ १५ ॥ विररामैव मुक्ताऽसौ वाचं वानरपुङ्गवः । जानकी चापि तच्छ्रुत्वा विस्मयं परमं गता ॥ १६ ॥ ततः सा वक्रकेशान्ता सुकेशी केशसंवृतम् । उन्नम्य वदनं भीरुः शिंशुपावृक्षमैक्षत ॥ १७ ॥ निशम्य सीता वचनं कपेश्च दिशश्च सर्वाः प्रदिशश्च वीक्ष्य । स्वयं प्रहर्षं परमं जगाम सर्वात्मना राममनुस्मरन्ती ॥ १८ ॥ सा तिर्यगूर्ध्वं च तथाप्यधस्तान्निरीक्षमाणा तमचिन्त्यबुद्धिम् । ददर्श पिङ्गाधिपतेरमात्यं वातात्मजं सूर्यमिवोदयस्थम् ॥ १९ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

हृदयमेवं परिच्छिनत्ति स्म । इह लङ्कायां प्रविश्यावरोधाराममध्यप्रवेशेनायं निपुणतरमतिरिति निश्चितवतीत्यर्थः । पिङ्गाधिपतेरमात्यं स्वरविशेषेणायं वानरः, तत्रापि न स्वतन्त्रः, किन्तु स्वसजातीयस्य राज्ञः कस्यचिदमात्योऽयम्, तद्राज्यकार्यमेतद्धस्तगतमिति निश्चितवती । वातात्मजं रामप्राणहेतुभूतमत्प्राणनहेतुत्वेन सर्वप्राणिप्राणनहेतुत्वेन वायुपुत्रोऽयमित्यवगतवती । सूर्यमिवोदयस्थं रामदिवाकरस्योदयमुच्चकमुदयगिरिस्थमरुणमिव स्थितम् । सूरः सूर्यः । "सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः" इत्यमरः । "सूरसूतोऽरुणोऽनूरुः"इत्युक्तेस्सूरस्य सम्बन्धी सूर्यः । दिगादित्याद्यत् । भवतापि सम्बन्धः विशेष एव । यद्वा सूर्यशब्देन तत्संबन्ध्यरुणो लक्ष्यते । " सूर्योऽरुणे च सूर्ये च " इति निघण्टुरस्तीत्याहुः । औचित्यादत्र सूर्योऽरुणः ॥ १९ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकत्रिंशः सर्गः ॥ ३१ ॥

॥९०॥

यथेति । यथारूपां यादृग्रूपाम् । यथावर्णां यादृशवर्णाम् । यथालक्ष्मीं यादृशलक्ष्मीकाम् । राघवस्य राघवात् । अश्रौषं विनिश्चितं नूनम् सेयमासादितेत्यर्थः ॥ १५-१९ ॥ इति श्रीमद्देश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायाम् एकत्रिंशः सर्गः ॥ ३१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ततः शाखान्तरे लीनमित्यादि श्लोकद्वयमेकान्वयम् । दृष्ट्वा पूर्वं सामान्यतो दृष्ट्वा भयाच्चलितमानसा सती विशेषतो ददर्श । वेष्टितार्जुनवस्त्रं वेष्टित धवलवस्त्रम् । तं पूर्वोक्तम् ॥ १--४ ॥ रुरोदेत्यर्द्धम् । मन्दं राक्षस्यः श्रुत्वा किमिदमिति विचारयिष्यन्तीति भयेनेति भावः ॥ ५ ॥ ६ ॥ सेति ।

ततः शाखान्तरे लीनं दृष्ट्वा चलितमानसा । वेष्टितार्जुनवस्त्रं तं विद्युत्सङ्घातपिङ्गलम् ॥ १ ॥ सा ददर्श कपिं तत्र प्रश्रितं प्रियवादिनम् । फुल्लाशोकोत्कराभासं तप्तचामीकरेक्षणम् ॥२॥ [साथ दृष्ट्वा हरिश्रेष्ठं विनीतवदवस्थितम् ।] मैथिली चिन्तयामास विस्मयं परमं गता । अहो भीममिदं रूपं वानरस्य दुरासदम् । दुर्निरीक्ष्यमिति ज्ञात्वा पुन रेव मुमोह सा ॥ ३ ॥ विललाप भृशं सीता करुणं भयमोहिता । रामरामेति दुःखार्ता लक्ष्मणेति च भामिनी ॥४॥ रुरोद बहुधा सीता मन्दं मन्दस्वरा सती ॥ ५ ॥ सा तं दृष्ट्वा हरिश्रेष्ठं विनीतवदुपस्थितम् । मैथिली चिन्तयामास स्वप्नोऽयमिति भामिनी ॥ ६ ॥ सा वीक्षमाणा पृथुभुग्रवक्त्रं शाखामृगेन्द्रस्य यथोक्तकारम् । ददर्श पिङ्गाधिपते रमात्यं वातात्मजं बुद्धिमतां वरिष्ठम् ॥ ७ ॥ सा तं समीक्ष्यैव भृशं विसंज्ञा गतासुकल्पेव बभूव सीता । चिरेण संज्ञां प्रतिलभ्य भूयो विचिन्तयामास विशालनेत्रा ॥ ८ ॥

वीक्षमाणा विचारयन्ती । ददर्श पुनरनुकूलोऽयं स्यादिति ददर्शेत्यर्थः । भुग्रवक्त्रं वक्त्रमुखम् । यथोक्तकारम् आज्ञाकरम् ॥ ७ ॥ सा तमिति । विसंज्ञा मूर्च्छिता । गतासुकल्पा मृतप्राया । इवशब्दो वाक्यालङ्कारे । चिरेण संज्ञां प्रतिलभ्य कालेनैव प्रबोधकेन प्रबुद्धवतीत्यर्थः । विकृतवानरवेषदर्शनेन

तत इति । चलितमानसा, अभूदिति शेषः । वेष्टितार्जुनवस्त्रं संवेष्टितधवलवस्त्रस्वरूपम् । यद्वा वेष्टितम् अर्जुनं धवलं वस्त्रं यस्य सः वेष्टितार्जुनवस्त्रः तम् ॥ १ ॥ ददर्श विशेषतो ददर्शेत्यर्थः ॥२-६॥ वीक्षमाणा इदं वाक्यं राक्षस्यः श्रुतवत्यः किमिति शङ्कया परितो वीक्षमाणेत्यर्थः । शाखामृगेन्द्रस्य सुग्रीवस्य यथोक्तकारम्

[स०-विनीतवत् स्वार्थे वतिः । विनीताः सन्त्यस्येति विनीतवान् । स चासाववस्थितश्च तं वा । अथवा विनीतं विनीतिः तद्वांश्चासाववस्थितश्च तम् । यद्वा विनीतं विशिष्टनीतं वदतीति स विनीतवद : विनीतवाग्मी । स चासौ वस्थितश्च तम् ॥] नि०-यथोक्तकारं कामाज्ञाकरम् । यद्वा यथोक्तवेष्टितार्जुनवस्त्राद्याकारम् । छान्दसो ह्रस्वः ॥ स०-यथोक्तकारं वेष्टितार्जुनवस्त्राकारं वा । उपसर्गाणां च धातुलीनार्थबोधकत्वेनाङ्किकलोपिकारशब्द एवाकारवाची ॥ ७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मूर्च्छिता पुनः कालेन बुद्धेत्यर्थः ॥ ८ ॥ स्वप्न इति । स्वप्ने स्वप्नस्थाने । स्वप्ने वानरदर्शनं बन्धुविनाशकरमिति भावः ॥ ९ ॥ एवं दर्शनस्य स्वप्नत्वं संभाव्य पुनर्यार्थार्थ्यमाह–स्वप्नोऽपीति । स्वप्नाभावे हेतुमाह नहि मेऽस्ति निद्रेति । निद्राभावे हेतुः शोकेनेत्यादिः । एवं प्रतिबन्धकेन निद्राभावमुक्त्वा सुखरूपहेत्वभावाच्च न निद्रेत्याह–सुखं हीति । इन्दुपूर्णप्रतिमाननेन पूर्णेन्दुप्रतिमाननेन ॥ १० ॥ रामेति । सदैव बुद्ध्या विचिन्त्य

स्वप्ने मयाऽयं विकृतोऽद्य दृष्टः शाखामृगः शास्त्रगणैर्निषिद्धः। स्वस्त्यस्तु रामाय सलक्ष्मणाय तथा पितुर्मे जनकस्य राज्ञः ॥ ९ ॥ स्वप्नोऽपि नायं नहि मेऽस्ति निद्रा शोकेन दुःखेन च पीडितायाः। सुखं हि मे नास्ति यतोऽस्मि हीना तेनेन्दुपूर्णप्रतिमाननेन ॥ १० ॥ रामेति रामेति सदैव बुद्ध्या विचिन्त्य वाचा ब्रुवती तमेव। तस्यानुरूपां च कथां तमर्थमेवं प्रपश्यामि तथा शृणोमि ॥ ११ ॥ अहं हि तस्याद्य मनोभवेन संपीडिता तद्गतसर्वभावा। विचिन्तयन्ती सततं तमेव तथैव पश्यामि तथा शृणोमि ॥ १२ ॥ मनोरथः स्यादिति चिन्तयामि तथापि बुद्ध्या च वितर्कयामि। किं कारणं तस्य हि नास्ति रूपं सुव्यक्तरूपश्च वदत्ययं माम् ॥ १३ ॥

तमेव राममेव वाचा ब्रुवती। तस्यानुरूपां विचिन्तितस्याभिवदनस्यानुरूपां कथां तथा शृणोमि। तमर्थं कथार्थमेवं प्रपश्यामि। एवम् उक्तप्रकारेण जानामीत्यन्वयः। तदर्थामिति पाठे अयमर्थः। तस्यानुरूपां रामकीर्तनस्यानुरूपाम्। तदर्थो स रामोऽर्थोऽभिधेयो यस्याः ताम् ॥११॥ उक्तमर्थं विवृणोति–अहं हीति ॥ १२ ॥ प्रथमम् इदं रामनामकथायितृदर्शनं मनोरथः अभिलाषमात्रमिति चिन्तयामि। तथापि तथा चिन्तायां सत्यामपि बुद्ध्या वितर्कयामि। मनोरथो न भवतीति विचारयामि। किं कारणमिति चेत् तस्य मनोरथस्य रूपं नास्ति। अयं वानरस्तु सुव्यक्तरूपश्च मां वदति च। तस्मान्मनोरथो न भवेदेवेत्यर्थः ॥ १३ ॥

आज्ञाकरम् ॥ ७–९ ॥ इन्दुपूर्णप्रतिमाननेन पूर्णेन्दुप्रतिमाननेन ॥ १० ॥ रामेति रामेति सदैव बुद्ध्या विचिन्त्य तमेव राममेव वाचा ब्रुवती तस्यानुरूपां चिन्तनस्य अभिवदनस्य च अनुरूपां कथां तथा शृणोमि तमर्थं कथार्थम् एवं प्रपश्यामि एतदुक्तप्रकारेणैव जानामीति योजना ॥ ११ ॥ १२ ॥ उक्तमर्थं विवृणोति–मनोरथः स्यादिति। बुद्ध्या चिन्तयामि तथा वितर्कयामि मनोरथो न भवतीति विचारयामि। किं कारणमिति चेत् तस्य मनोरथस्य रूपं रूप्यते प्राप्यतेऽनेनेति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अनेनोक्तं सत्यमस्त्विति देवताः प्रार्थयते—नम इति । हुताशनाय च अग्नये च ॥ १४ ॥ रामानु०—नमोऽस्त्विति । हुताशनाय चेति सम्यक् । अन्यथा वृत्तभङ्गः स्यात् ॥ १४ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्वात्रिंशः सर्गः ॥ ३२ ॥

नमोऽस्तु वाचस्पतये सवज्रिणे स्वयम्भुवे चैव हुताशनाय च । अनेन चोक्तं यदिदं ममाग्रतो वनौकसा तच्च तथाऽस्तु नान्यथा ॥१४॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे द्वात्रिंशः सर्गः ॥३२॥ सोऽवतीर्य द्रुमात्तस्माद्विद्रुमप्रतिमाननः । विनीतवेषः कृपणः प्रणिपत्योपसृत्य च ॥ १ ॥ तामब्रवीन्महातेजा हनूमान् मारुतात्मजः । शिरस्यञ्जलिमाधाय सीतां मधुरया गिरा ॥ २ ॥ कानु पद्मपलाशाक्षि क्लिष्टकौशेयवासिनि । द्रुमस्य शाखामालम्ब्य तिष्ठसि त्वमनिन्दिते ॥ ३ ॥ किमर्थं तव नेत्राभ्यां वारि स्रवति शोकजम् । पुण्डरीक पलाशाभ्यां विप्रकीर्णमिवोदकम् ॥ ४ ॥ सुराणामसुराणां वा नागगन्धर्वरक्षसाम् । यक्षाणां किन्नराणां वा का त्वं भवसि शोभने ॥ ५ ॥ का त्वं भवसि रुद्राणां मरुतां वा वरानने । वसूनां वा वरारोहे देवता प्रतिभासि मे ॥६॥

सोऽवतीर्येत्यादि । सः राक्षसीषु सुप्तासु लब्धावसर इत्यर्थः । कृपणः सीतादौस्थ्यदर्शनेन दीनः । जानन्नपि वैदेह्यैव वाचयितुमब्रवीत् ॥ १–३ ॥ किमर्थमिति । तव नेत्राभ्याम् आनन्दाश्रुयोगार्हाभ्याम् । किमर्थं कस्य कुलच्छेदाय । यद्वा किमर्थं किं चेतसि कृत्वा । पुण्डरीकेत्यादि । हन्तैतत्सौन्दर्यं प्रणयिना रामेण दृष्टमासीदिति भावः ॥ ४ ॥ सुराणामित्यादिषु निर्धारणे षष्ठी । का त्वं कस्य सम्बन्धिनीत्यर्थः ॥ ५–७ ॥ रामानु०—विप्रकीर्णमिवो

रूपं प्रापकं नास्ति हि । कुतः ? अयं वानरः सुव्यक्तरूपश्च मां वदति च, तस्मान्मनोरथो न भवत्येवेत्यर्थः ॥ १३ ॥ १४ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां द्वात्रिंशः सर्गः ॥ ३२॥ स इति । कृपणः दीनः, सीतादैन्यात् स्वयं कृपण इत्यर्थः । अत्र राक्षसीनां निद्रा जाड्यात्, त्रिजटास्वप्नश्रवणजन्यभयानन्तरमात्मत्राणाय सीतैकशरणत्वेनापेक्षणाच्च सीताहनुमतोरयमप्रत्यूहसल्लाप इत्यनुसन्धेयम् । अस्यार्थस्य अष्टपञ्चाश सर्गेऽङ्गदाग्रे हनुमतैव ' ततस्तास्सहितास्सर्वाः ' इत्यादिना वक्ष्यमाणत्वादिति ॥ १ ॥ २ ॥ अथ लिङ्गैरेव सीतेति निश्चित्यापि तयैव वाचयितुमजानन्निव पृच्छति—कान्विति । इयं त्वं काऽसि ॥ ३ ॥ ४ ॥ सुराणां यक्षाणां किन्नराणां का त्वं भवांसे, कस्य सम्बन्धिनी भवसीत्यर्थः ॥ ५-७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दकमित्यन्तः पर सुरणाणि[illegible]त श्लोकः । अन्यु[illegible]रि प्रमादा[illegible]लिखितः ॥ ९ ॥ का त्वमिति । हे कल्याणि ! त्वं का । अनिन्दितलोचने ! त्वं का भवसीति योजना ॥ ८ ॥ वसिष्ठं कोपयित्वेत्यत्रापि पतिता विबुधालयादित्यनुषज्यते । नासीत्यत्र काकुरनुसन्धेया ॥ ९ ॥ कोन्विति । अमुं लोकं गतम्, यमिति शेषः । परलोकं गतं यं पुत्रं पितरं भ्रातरं भर्तारं वा अनुशोचसि स क इत्यर्थः । गता त्वमित्यपि पाठः । अस्मात् स्वर्गादमुं मनुष्यलोकम् गता या त्वमनुशोचसि । तस्यास्ते

किन्नु चन्द्रमसा हीना पतिता विबुधालयात् । रोहिणी ज्योतिषां श्रेष्ठा श्रेष्ठसर्वगुणान्विता ॥ ७ ॥ का त्वं भवसि कल्याणि त्वमनिन्दितलोचने ॥ ८ ॥ कोपाद्वा यदि वा मोहाद्भर्तारमसितेक्षणे । वसिष्ठं कोपयित्वा त्वं नासि कल्याण्यरुन्धती ॥ ९ ॥ को नु पुत्रः पिता भ्राता भर्ता वा ते सुमध्यमे । अस्माल्लोकादमुं लोकं गतं त्वमनुशोचसि ॥ १० ॥ रोदनादतिनिःश्वासाद्धूनिसंस्पर्शनादपि । न त्वां देवीमहं मन्ये राज्ञः संज्ञावधारणात् ॥ ११ ॥ व्यञ्जनानि च ते यानि लक्षणानि च लक्षये । महिषी भूमिपालस्य राजकन्याऽसि मे मता ॥ १२ ॥ रावणेन जनस्थानाद् बलादपहृता यदि । सीता त्वमसि भद्रं ते तन्ममाचक्ष्व पृच्छतः ॥ १३ ॥ यथा हि तव वै दैन्यं रूपं चाप्यतिमानुषम् । तपसा चान्वितो वेषस्त्वं राममहिषी ध्रुवम् ॥ १४ ॥ सा तस्य वचनं श्रुत्वा रामकीर्तनहर्षिता । उवाच वाक्यं वैदेही हनुमन्तं द्रुमाश्रितम् ॥ १५ ॥

को वा पुत्रादिरिति योजना ॥ १० ॥ देवीं देवस्त्रियम् । संज्ञावधारणात् संज्ञायते अनयेति संज्ञा लक्षणम् । राजलक्षणनिश्चयादित्यर्थः ॥ ११ ॥ व्यञ्जनानि स्तनजघनादीनि । "व्यञ्जनं तेमने चिह्ने श्मश्रुण्यवयवेऽपि च" इति विश्वः । लक्षणानि शुभावर्तरेखादिसामुद्रिकलक्षणानि ॥ १२ ॥ १३ ॥ यथा यादृशम् ॥ १४ ॥ द्रुमाश्रितं द्रुममूलाश्रितम् । सोऽवतीर्येति द्रुमावतरणस्य पूर्वमुक्तत्वात् । यद्वा पूर्वमग्रादवतरणमुक्तमिति ज्ञेयम् ॥ १५ ॥

का त्वं भवसि कल्याणि त्वमनिन्दितलोचने । हे कल्याणि ! त्वं का ? अनिन्दितलोचने त्वं का भवसीति वाक्यभेदेन युष्मच्छब्दप्रयोगः तज्जिज्ञासानिशयद्योतनार्थः । वसिष्ठं कोपयित्वेत्यत्र पतिता विबुधालयादित्यनुषङ्गः ॥ ८ ॥ ९ ॥ को न्विति । अमुं लोकं परलोकं गतं त्वम् अनुशोचसि किम् ? यं कञ्चन बन्धुमिति शेषः ॥ १० ॥ ११ ॥ व्यञ्जनानि संस्थानविशेषविशिष्टतया उत्तमस्त्रीत्वव्यञ्जकानि स्तनजघनादीनि लक्षणानि भाग्यावेदनशुभरेखादीनि ॥ १२ ॥ १३ ॥ यथेति । यथा यादृशम् ॥ १४ ॥ द्रुमाश्रितं द्रुममूलाश्रितम् 'सोऽवतीर्य द्रुमात्' इति पूर्वोक्तत्वात् ॥ १५ ॥ १६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पृथिव्यामिति । शत्रुसैन्यप्रतापिनः शत्रुषु जीवत्सु न मे श्वशुरो जीवितवान् । स चेदिदानीं वर्तेत कथमहमेतादृशीमवस्थां प्राप्नुयामिति भावः ॥ १६ ॥ दुहितेति । सीता च नामेत्यत्र नामशब्दः प्रतिद्धौ ॥ १७ ॥ समा इति । अहम् एतादृशावस्था अहम् । तत्र मम श्वशुरगृहे । द्वादश समाः द्वादश संवत्सरान् । अत्यन्तसंयोगे द्वितीया । तेनाविच्छिन्नैकरूपभोगभोक्तृत्वमुच्यते । मानुषानित्यनेन नात्मनो मानुषत्वं स्वाभाविक

पृथिव्यां राजसिंहानां मुख्यस्य विदितात्मनः । स्नुषा दशरथस्याहं शत्रुसैन्यप्रतापिनः॥ १६॥ दुहिता जनकस्याहं वैदेहस्य महात्मनः। सीता च नाम नाम्नाऽहं भार्या रामस्य धीमतः॥ १७॥ समा द्वादश तत्राहं राघवस्य निवेशने। भुञ्जाना मानुषान् भोगान् सर्वकामसमृद्धिनी ॥ १८ ॥ तत्र त्रयोदशे वर्षे राज्येनेक्ष्वाकुनन्दनम् । अभिषेचयितुं राजा सोपाध्यायः प्रचक्रमे ॥ १९ ॥ तस्मिन् संभ्रियमाणे तु राघवस्याभिषेचने । कैकेयी नाम भर्तारं देवी वचनमब्रवीत् ॥ २० ॥ न पिबेयं न खादेयं प्रत्यहं मम भोजनम् । एष मे जीवितस्यान्तो रामो यद्यभिषिच्यते ॥ २१ ॥ यत्तदुक्तं त्वया वाक्यं प्रीत्या नृपतिसत्तम । तच्चेन्न वितथं कार्यं वनं गच्छतु राघवः ॥ २२ ॥

मिति सूच्यते । भोगान् भुञ्जाना अनुभवन्ती । काम्यन्त इति कामाः भोगोपकरणानि स्रक्चन्दनादीनि । तेषां समृद्धं समृद्धिः । भावे निष्ठा । तदस्या अस्तीति सर्वकामसमृद्धिनी । " अत इनिठनौ" इति इनिप्रत्ययः । अभवमिति शेषः ॥ १८ ॥ १९ ॥ तस्मिन्निति । संभ्रियमाणे संभारान् संपादयति सति । राघवस्याभिषेचने रामाभिषेकनिमित्तम् । देवी महिषी ॥ २० ॥ न पिबेयमिति । भुज्यत इति भोजनं खाद्यं पेयं च । रामो यद्यभिषिच्यते तदा मम संबन्धि यत् भोजनं तन्न पिबेयं न खादेयम् । एषः अयमभिषेकः जीवितस्यान्तश्च ॥ २१ ॥ यत्तदिति । तत्पूर्वोक्तं यद्वरदानरूपं सीता च नामेति नामशब्दः प्रसिद्धौ ॥ १७ ॥ समा द्वादशेत्यत्र न्यवसमिति शेषः ॥ १८–२० ॥ मम भोजनमित्यत्र प्रथमार्थे षष्ठी ॥ २१ ॥ वाक्यं त्वदुक्तं सर्वं

स०—अहं प्रत्यहं निरन्तरम् मम भोजनं भोज्यं यद्वर्तते तन्न पिबेयम् न खादेयम् । कुत एतदित्यत आह—एष इति । एष इति बुद्धया विवेकेनाभिषेकेऽन्वेति । अथवा एष मे जीवितस्यान्तः एतच्च मम भोजनं पालनम् । तत्किमित्युक्ते, यदि रामोऽभिषिच्यते तर्ह्येषः अभिषेकः मे जीवितस्यान्तः । यदि नाभिषिच्यते तर्हि एतत् मम भोजनं पालनमिति । यदि नाभिषिच्यत इति पदानामाकृत्याऽन्वयः । " भुज पालनाभ्यवहारयोः " इति धातुव्याख्यानात् ॥ २१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वाक्यं तन्न वितथं कार्यं चेत्तदा रामो वनं गच्छतु ॥ २२ ॥ स इति । देव्यास्संबन्धि स्वकृतं वरदानं स्मृत्वा कैकेय्याः वचनं श्रुत्वा मुमोह ॥ २३ ॥ ॥ २४ ॥ अभिषेकात्परं प्रियं पितुर्वचनं विवासयाचनारूपम्, पूर्वं मनसा आसाद्य अङ्गीकृत्य अथ वाचा प्रतिगृहीतवान्, मनःपूर्वकमङ्गीकृतवा

स राजा सत्यवाग् देव्या वरदानमनुस्मरन् । मुमोह वचनं श्रुत्वा कैकेय्याः क्रूरमप्रियम् ॥ २३ ॥ ततस्तु स्थविरो राजा सत्ये धर्मे व्यवस्थितः । ज्येष्ठं यशस्विनं पुत्रं रुदन् राज्यमयाचत ॥ २४ ॥ स पितुर्वचनं श्रीमानभिषेकात् परं प्रियम् । मनसा पूर्वमासाद्य वाचा प्रतिगृहीतवान् ॥ २५ ॥ दद्यान्न प्रतिगृह्णीयान्न ब्रूयात् किंचिदप्रियम् । अपि जीवितहेतोर्वा रामः सत्यपराक्रमः ॥ २६ ॥ स विहायोत्तरीयाणि महार्हाणि महायशाः । विसृज्य मनसा राज्यं जनन्यै मां समादिशत् ॥ २७ ॥ साऽहं तस्याग्रतस्तूर्णं प्रस्थिता वनचारिणी । न हि मे तेन हीनाया वासः स्वर्गेऽपि रोचते ॥ २८ ॥ प्रागेव तु महाभागः सौमित्रिर्मित्रनन्दनः । पूर्वजस्यानुयात्रार्थं द्रुमचीरैरलंकृतः ॥ २९ ॥ त वयं भर्तुरादेशं बहुमान्य दृढव्रताः । प्रविष्टाः स्म पुराऽदृष्टं वन गम्भीरदर्शनम् ॥ ३० ॥ वसतो दण्डकारण्ये तस्याहममितौजसः । रक्षसाऽपहृता भार्या रावणेन दुरात्मना ॥ ३१ ॥

नित्यर्थः ॥ २५ ॥ २६ ॥ उत्तरीयाणि वासांसि । जनन्यै कौसल्यायै । मां समादिशत्, तन्निकटे त्वया स्थातव्यमित्युक्तवानित्यर्थः ॥२७॥ साऽहमिति । अग्रतः प्रस्थाने हेतुमाह—न हीति ॥ २८ ॥ प्रागेवेति । प्रागेव यद्यपि रामानन्तरमेव लक्ष्मणेन द्रुमचीरादिस्वीकारः तथापि तस्य त्वरातिशयव्यञ्जनाय तथोक्तिः । महाभागः "अहं सर्वं करिष्यामि" इति प्रतिज्ञानुसारेण सर्वविधकैङ्कर्यकरणोचिताभिषेकविघ्नहेतुभाग्यसम्पन्नः । सौमित्रिः 'सृष्टस्त्वं वनवासाय' इत्युक्तवत्याः गर्भे सञ्जातः । मित्रनन्दनः स लक्ष्मणः सर्वविधकैङ्कर्यकर्तेत्यनुकूलैरभिनन्दनीयः । पूर्वजस्येत्यादि । रामकैङ्कर्यानुरूपत्वेन द्रुमचीरादीना मलङ्करणत्वमित्यर्थः ॥ २९ ॥ ते वयमिति । पुराऽदृष्टं पूर्वमदृष्टम् । अत्र गम्भीरशब्देन दुष्प्रवेशत्वम्, दर्शनशब्देन स्वरूपमप्युच्यते ॥ ३० ॥३१॥

करिष्यामीति शपथपूर्वकमुक्तमित्यर्थः ॥ २२–२६ ॥ स इति । उत्तरीयाणि वासांसीत्यर्थः ॥ २७–२९ ॥ ते वयमिति । पुरा अदृष्टमिति छेदः ॥ ३० ॥ ३१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

द्वौ मासौ द्विमासरूपः कालः । मे जीवितानुग्रहः जीवितानुग्राहकः, जीवितधारणानुकूलः कृतः । त्यक्ष्यामि, स्वयमेवेति भावः ॥ ३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

द्वौ मासौ तेन मे कालो जीवितानुग्रहः कृतः । ऊर्ध्वं द्वाभ्यां तु मासाभ्यां ततस्त्यक्ष्यामि जीवितम् ॥ ३२ ॥
इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

तस्यास्तद्वचनं श्रुत्वा हनुमान् हरियूथपः । दुःखादुःखाभिभूतायाः सान्त्वमुत्तरमब्रवीत् ॥ १ ॥
अहं रामस्य सन्देशाद्देवि दूतस्तवागतः । वैदेहि कुशली रामस्त्वां च कौशलमब्रवीत् ॥ २ ॥
यो ब्राह्ममस्त्रं वेदांश्च वेद वेदविदां वरः । स त्वां दाशरथी रामो देवि कौशलमब्रवीत् ॥ ३ ॥
लक्ष्मणश्च महातेजा भर्तुस्तेऽनुचरः प्रियः । कृतवाञ्छोकसन्तप्तः शिरसा तेऽभिवादनम् ॥ ४ ॥

तस्या इत्यादि । दुःखात् दुःखाभिभूतायाः उत्तरोत्तरं दुःखं प्राप्तायाः ॥ १ ॥ अहमिति । तव दूतः त्वां प्रति प्रेषितो दूतः ॥ २ ॥ य इति । वेद वेत्ति ।

जीवितानुग्रहः जीविताभ्यनुज्ञा । त्यक्ष्यामि जीवितं रावणेत्यादिके सर्तीति भावः ॥ ३२ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां त्रयस्त्रिंशः सर्गः ॥ ३३ ॥ तस्या इति । दुःखादुःखाभिभूतायाः सन्ततदुःखाभिभूताया इत्यर्थः ॥ १ ॥ तवागतः, समीपमिति शेषः ॥ २ ॥ ब्राह्ममस्त्रं यो वेद, अनेन सर्वास्त्रपारगत्वमुक्तम् । तदस्त्रस्वामिनः ब्रह्मणस्सर्वजगत्समष्टित्ववत तदस्त्रस्यापि सर्वास्त्रसमष्टित्वात । वेदांश्चेत्यनेन सर्वकर्ममार्ग पारगत्वम. वेदविदां वर इत्यनेन ज्ञानमार्गपारगत्वमुक्तम् ॥ ३ ॥ ४ ॥

स०—दुःखादुःखाभिभूतायाः दुःखेनातन्तीति दुःखातस्तेषामिव यद्दुःखं तेनाभिभूतायाः । यद्वा दुःखात् सान्त्वमुत्तरमब्रवीदित्यन्वयः । दुश्च खं च तयोस्समाहारः द्वन्द्वैकवद्भावो वा उत्तरपदलोपिसमा सान्तं वा । तस्मात् सीता एवं क्लिश्यतीति दुःखात्, स्वागमनप्रयोजनं जातमिति खात् सुखात् । " दुर्दुःखमिति संप्रोक्तं खं सुखं चोच्यते बुधैः " इति वचनाद्दुःखशब्द उभयवाची ॥ १ ॥ यो ब्राह्ममस्त्रं वेदांश्च वेदेत्यन्वयः । यद्वा वेदवेदेति द्विरभिधानेन उभयोरपि मुख्यतामभिप्रैति । यद्वा वेदान् व्याख्येयानृगादीन् । वेदवेदान् भारतादीन् व्याख्यानरूपान्विदन्ति ते तथा, तेषु वर इति । " इतिहासपुराणः पञ्चमो वेदानां वेदः " इत्युक्तेः ॥ २ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वेदविदां वेदार्थज्ञानवताम् ॥ ३ ॥ ४ ॥ सेति । प्रीतिसंहृष्टसर्वाङ्गी प्रीत्या पुलकितसर्वाङ्गी ॥ ५ ॥ दुःखबाहुल्येपि रामदर्शनप्रत्याशया कृच्छ्रेण जीवन्त्याः देव्याः जीवनफलस्य लब्धत्वात्तत्संवादिनीं गाथां स्तौति–कल्याणीति । कल्याणी सत्यार्था । मा प्रतिभाति मां प्रतिभाति । वर्ष शतादपीत्यन्ते इतिकरणं बोद्धव्यम् ॥ ६ ॥ तया सीतया तस्मिन् हनुमति विषये अद्भुता प्रीतिरुत्पादिता । परस्परेणेत्यादिकं वक्ष्यमाणस्य

सा तयोः कुशलं देवी निशम्य नरसिंहयोः । प्रीतिसंहृष्टसर्वाङ्गी हनुमन्तमथाब्रवीत् ॥ ५ ॥ कल्याणी बत गाथेयं लौकिकी प्रतिभाति मा । एति जीवन्तमानन्दो नरं वर्षशतादपि ॥ ६ ॥ तया समागते तस्मिन् प्रीतिरुत्पादिताऽद्भुता । परस्परेण चालापं विश्वस्तौ तौ प्रचक्रतुः ॥ ७ ॥ तस्यास्तद्वचनं श्रुत्वा हनुमान् हरियूथपः । सीतायाः शोकदीनायाः समीपमुपचक्रमे ॥ ८ ॥ यथा यथा समीपं स हनुमानुपसर्पति । तथा तथा रावणं सा तं सीता परिशङ्कते ॥ ९ ॥ अहो धिग् दुष्कृतमिदं कथितं हि यदस्य मे । रूपान्तरमुपागम्य स एवायं हि रावणः ॥ १० ॥

सर्गस्य संग्रहः ॥ ७ ॥ तस्या इति । उपचक्रमे, गन्तुमिति शेषः । प्रापेति वाऽर्थः ॥ ८ ॥ यथा यथेति । रावणं परिशङ्कते–समकुशलकथनेन सञ्जात रावणमायास्मरणा पुनः शङ्कितवतीत्यर्थः ॥ ९ ॥ मे मया अस्य पुरतः यत्कथितं तत् दुष्कृतम् अनुचितं कृतम् । इदम् अनालोच्य कथनं धिक् ।

प्रीतिसंहृष्टसर्वाङ्गी पुलकितसर्वगात्री ॥५॥ जीवितहारिदुःखबाहुल्येपि रामदर्शनप्रत्याशया कृच्छ्रेण जीवन्त्या देव्या जीवनफलस्य लब्धत्वात्तत्संवादिनीं गाथां स्तौति–कल्याणीति । जीवन्तं नरं वर्षशतादपि वर्षशतमध्ये वा आनन्द एतीति इयं लौकिकी गाथा जनवार्ता मा मां प्रति कल्याणी सत्यार्था प्रतिभाति । बतेति हर्षे ॥ ६ ॥ समागते तस्मिन् हनुमति तया कल्याणी बतेत्यादि वदन्त्या देव्या अद्भुता प्रीतिरुत्पादितेति सम्बन्धः ॥ ७ ॥ तस्या इति । समीपमुपचक्रमे, गन्तुमिति शेषः ॥ ८ ॥ ९ ॥ रामकुशलकथनेन सञ्जातविश्वासापि रावणमायाबाहुल्यं स्मृत्वा पुनरविश्वसन्त्याह–अहो इति । मे अस्य पुरतः यत्कथितं कथनं तदुष्कृतम् अनुचितं कृतम् इदमनालोच्य कथनं धिक् । अहो इति खेदे । खेदे हेतुमाह रूपान्तरमिति । यः पूर्वं मायया मामुपाहरत्, स एवायं

स०–जीवन्तं नरम् आनन्दः वर्षशतादेतीति लौकिकी लोकसिद्धा गाथा या सेयं मा मां प्रति कल्याणी कल्याणसूचिका प्रतिभाति । बत हर्षः विस्मयो वा । "जीवन्नरो भद्रशतानि पश्यति" इत्युक्तेः । अस्य स्वविषये सीतयोदाहृतत्वाज्जीवन्तीं स्त्रियमिति वक्तव्यम् । तथापि नरं जीवन्तमित्युक्तिः सर्वा अपि योषितः पुरुषे परतन्त्राः, तत्राप्यहं सदा तन्मात्रायत्तमङ्गलेति सूचयितुमिति मन्तव्यम् ॥ १ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अहो इति खेदे । खेदहेतुमाह—रूपान्तरमिति । वर्तत इति शेषः ॥ १० ॥ यद्यपि पूर्वं शिंशुपाशाखावलम्बनमुक्तं तथापि शिंशुपाशाखा अशोकसंवलितेति क्वचिच्छिंशुपेत्युच्यते क्वचिदशोक इति । अतो न कश्चिद्दोषः ॥ ११ ॥ भयविस्रस्ता भयहेतुना विस्रस्ता ॥ १२ ॥ १३ ॥ मायावी

तामशोकस्य शाखां सा विमुक्ता शोककर्शिता । तस्यामेवानवद्याङ्गी धरण्यां समुपाविशत् ॥ ११ ॥ हनुमानपि दुःखार्तां तां दृष्ट्वा भयमोहिताम् । अवन्दत महाबाहुस्ततस्तां जनकात्मजाम् । सा चैनं भयविस्रस्ता भूयो नैवाभ्युदैक्षत ॥ १२ ॥ तं दृष्ट्वा वन्दमानं तु सीता शशिनिभानना । अब्रवीद्दीर्घमुच्छ्वस्य वानरं मधुरस्वरा ॥ १३ ॥ मायां प्रविष्टो मायावी यदि त्वं रावणः स्वयम् । उत्पादयसि मे भूयः सन्तापं तन्न शोभनम् ॥ १४ ॥ त्यक्त्वा परित्यज्य रूपं यः परिव्राजकरूपधृत् । जनस्थाने मया दृष्टस्त्वं स एवासि रावणः ॥ १५ ॥ उपवासकृशां दीनां कामरूप निशाचर । सन्तापयसि मां भूयः सन्ततां तन्न शोभनम् ॥ १६ ॥ अथवा नैतदेवं हि यन्मया परिशङ्कितम् । मनसो हि मम प्रीतिरुत्पन्ना तव दर्शनात् ॥ १७ ॥ यदि रामस्य दूतस्त्वमागतो भद्रमस्तु ते । पृच्छामि त्वां हरिश्रेष्ठ प्रिया रामकथा हि मे । गुणान् रामस्य कथय प्रियस्य मम वानर ॥ १८ ॥ चित्तं हरसि मे सौम्य नदीकूलं यथा रयः ॥ १९ ॥

स्वत एव मायावान् । "अस्मायामेधास्रजो विनिः" इति विनिप्रत्ययः । इदानीं मायां प्रविष्टः आश्रितः । स्वयं रावणस्त्वम् मम सन्तापमुत्पादयसीति यदि उत्पादयसीति यत् तत्सन्तापोत्पादनं ते न शोभनम् । तवाप्यभीष्टविरहसन्तापो भविष्यतीत्यर्थः ॥ १४–१६ ॥ हनुमन्तं रावणमाशङ्क्य तज्जनितमनःप्रसादमालोच्य तां शङ्कां निराचष्टे—अथवेति । मया यत् परिशङ्कितम् एतन्नैवं हि नैवमेव । कुत इत्यत आह मनस इति ॥ १७–१९ ॥

रावणः रूपान्तरमुपागम्य, वर्तत इति शेषः ॥ १० ॥ तामिति । अशोकस्य अशोकवनस्थशिंशुपावृक्षस्येत्यर्थः ॥ ११ ॥ तां धरण्युपविष्टाम् । अवन्दत नमस्कृतवान् । एनं दृष्ट्वा भयसन्त्रस्ता भूयः पुनरेनं नापश्यत् ॥ १२–१६ ॥ एवं रावणदौरात्म्याद्धनुमन्तं रावणमाशङ्क्य तद्दर्शनजनितमनःप्रसादमालोच्य तां शङ्कां

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इह रामदूतागमनमत्यन्तासम्भावितमिति मत्वा पुनर्बहुधा शङ्कते—अहो इत्यादिना ॥ २० ॥ स्वप्नेऽपीति । स्वप्नेऽपि यद्यहं वीरम् । राक्षसीमध्यवासकृतं दुःखं स्वप्नदृष्टोऽपि निवर्तयितुं क्षम इति वीर्यातिशयोक्तिः । राघवं सहलक्ष्मणम् । विश्लेषदशायामुभयोर्दर्शनात् स्वप्नदर्शनेऽप्युभयोर्दर्शनं भवेत् । यद्वा तदानीमुभयोर्विश्लेषात्तौ किं परस्परं संयुक्तौ न वेति शङ्कते । पश्येयं नावसीदेयम् एवमुभयोस्स्वप्ने दर्शनेपि महत् दुःखं निवर्तेत, कथंचिद

अहो स्वप्नस्य सुखता याऽहमेव चिराहृता । प्रेषितं नाम पश्यामि राघवेण वनौकसम् ॥ २० ॥ स्वप्नेऽपि यद्यहं वीरं राघवं सहलक्ष्मणम् । पश्येयं नावसीदेयं स्वप्नोऽपि मम मत्सरी ॥ २१ ॥ नाहं स्वप्नमिमं मन्ये स्वप्ने दृष्ट्वा हि वानरम् । न शक्योऽभ्युदयः प्राप्तुं प्राप्तश्चाभ्युदयो मम ॥ २२ ॥ किन्नु स्याच्चित्तमोहोऽयं भवेद्भातगतिस्त्वयम् । उन्मादजो विकारो वा स्यादियं मृगतृष्णिका ॥ २३ ॥ अथवा नायमुन्मादो मोहोऽप्युन्मादलक्षणः । संबुद्ध्ये चाहमात्मानमिमं चापि वनौकसम् ॥ २४ ॥

जीवितं धारयेयम् । स्वप्नोपि मम मत्सरी । मद्दशां विज्ञाय राम इव स्वप्नोपि मयि मात्सर्यं करोति ॥ २१ ॥ २२ ॥ एवं यथार्थस्वप्नपक्षौ निरस्य पुनश्चतुरो विभ्रमपक्षानुत्प्रेक्षते—किन्नु स्यादिति । चित्तमोहः रामक्षेमवार्ताश्रवणकुतूहलकन्दलितनिरन्तरचिन्तासन्ततिपरिणतिविशेषरूपः कोपि मनसो विभ्रम इत्यर्थः । असत्यश्चित्तसङ्कल्पो वा । वातगतिः उपवासादिप्रयुक्तधातुक्षोभजो वातविकाररूपो भ्रमः । तदध्यारोपो वा यथा त्वरूपस्य वायोः पांसुपुञ्जरूपविशेषोऽध्यारोपः । उन्मादजो विकारो वा । उन्मादो नाम विरहिणां कश्चिदवस्थाविशेषः, तज्जो विकारो भ्रमः । मृगतृष्णिका अन्यस्यान्यरूपेणावभासः । चित्तमोहोन्मादावप्रकृतिस्थप्रतिभासविशेषौ । वातगतिमृगतृष्णिके तु प्रकृतिस्थस्य ॥२३॥ अनन्तरोक्तचतुष्टयं निराकरोति—अथवेत्यादिना ।

निराचष्टे—अथवेति । मया यत्परिशङ्कितम् एतन्नैवं हि नैवमेव । कुतः ? मनस इति ॥१७-१२॥ इह रामदूतागमनमत्यन्तासम्भावितमिति मत्वा पुनर्बहुधा शङ्कते—अहो इत्यादिना ॥ २०-२२ ॥ एवं यथार्थस्वप्नपक्षौ निरस्य पुनश्चतुरो विभ्रमपक्षानुत्प्रेक्षते--किं न्वित्यादि । चित्तमोहः निरन्तररामध्यानजनिततत्प्रेषितदूतदर्शनसम्भाषणादिविषयो भ्रमः । वातगतिः उपवासादिप्रयुक्तधातुक्षोभजातविकाररूपो भ्रम इत्यर्थः । उन्मादजो विकारः, उन्मादो नाम विरहिणां कश्चिदवस्थाविशेषः। मृगतृष्णिका सर्वशरीरिसाधारणो देशकालविशेषजन्यश्चाक्षुषो भ्रम इत्यर्थः ॥ २३ ॥ बाधाराहित्येन भ्रमचतुष्टयपक्षं निराचष्टे—अथवेति । अयं वानरतद्भाषणादि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अथवा अयं वानरतद्भाषणादिप्रतिभासः उन्मादो न । मोहोप्युन्मादलक्षणः उन्मादस्य लक्षणमिव लक्षणं यस्य स तथोक्तः । अतः उन्मादनिराकरणेनैव सोपि निराकृत इत्यर्थः । अनयोर्निराकरणमितरपक्षद्वयनिराकरणस्योपलक्षणं कुत इत्यत आह–संबुध्य इति । अहम् आत्मानमिमं वनौकसं

इत्येवं बहुधा सीता संप्रधार्य बलाबलम् । रक्षसां कामरूपत्वान्मेने तं राक्षसाधिपम् ॥ २५ ॥ एतां बुद्धिं तदा कृत्वा सीता सा तनुमध्यमा । न प्रतिव्याजहाराथ वानरं जनकात्मजा ॥२६॥ सीतायाश्चिन्तितं बुद्ध्वा हनुमान् मारुतात्मजः । श्रोत्रानुकूलैर्वचनैस्तदा तां सम्प्रहर्षयत् ॥ २७ ॥ आदित्य इव तेजस्वी लोककान्तः शशी यथा । राजा सर्वस्य लोकस्य देवो वैश्रवणो यथा । विक्रमेणोपपन्नश्च यथा विष्णुर्महायशाः ॥२८॥ सत्यवादी मधुरवाग् देवो वाचस्पतिर्यथा । रूपवान् सुभगः श्रीमान् कन्दर्प इव मूर्तिमान् ॥ २९ ॥ स्थानक्रोधः प्रहर्ता च श्रेष्ठो लोके महारथः ॥ ३० ॥ बाहुच्छायामवष्टब्धो यस्य लोको महात्मनः ॥ ३१॥

चापि संबुध्ये सम्यक् जानामि ॥ २४ ॥ इत्येवमिति । बलाबलं मोहत्वादीनामबलत्वं रावणत्वस्य बलवत्त्वं च ॥ २५ ॥ २६ ॥ सीताया इति । संप्रहर्षयत् संप्राहर्षयत् ॥ २७ ॥ आदित्य इत्यादि । राजेति कुबेरस्य सर्वलोकराजत्वमुक्तम्–" राजाधिराजाय प्रसह्यसाहिने नमो वयं वैश्रवणाय कुर्महे " इति । सत्यमधुरवाक्त्वं बृहस्पतेर्वाचस्पतित्वादेव । रूपवान् सौन्दर्यवान् । सुभगः रमणीयः । श्रीमान् कान्तिमान् ॥ २८ ॥ २९॥ स्थाने क्रोधस्थाने क्रोधः यस्यासौ स्थानक्रोधः । प्रहर्ता क्रोधविषये प्रहर्ता । आदित्य इवेत्यादिना उक्तैर्विशेषणैर्विशिष्टो राम इति योज्यम् ॥३०॥ बाहुच्छाया

प्रतिभासः उन्मादो न भवति । मोहोऽप्युन्मादलक्षणः उन्मादस्य लक्षणमिव लक्षणं यस्य मोहस्य स तथोक्तः, अत उन्मादनिराकरणेनैव मोहोऽपि निराकृतः । उन्माद मोहयोर्निराकरणेन चित्तमोहमृगतृष्णिकयोर्निराकरणं कृतमिति द्रष्टव्यम् । सर्वेऽपि पक्षाः उन्मादप्राया एव, भ्रमत्वाविशेषादिति भावः । कुतः ? अत आह सम्बुद्ध्य इति । यतः अहमात्मानम् इमं वनौकसं चापि सम्बुद्धये सम्यक् जानामि, निर्बाधं जानामीत्यर्थः ॥ २४ ॥ बलाबलम् बलं रक्षसां कामरूपधारणं बलम्, अबलं रामदूतस्यापि वानरस्यात्रागमनासामर्थ्यमबलं सम्प्रधार्येत्यर्थः ॥ २५--२९ ॥ स्थानक्रोधः स्थाने क्रोधनीये विषये क्रोधो यस्य सः ॥ ३० ॥ यस्य बाहुच्छायामव

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अपकृष्याश्रमपदान्मृगरूपेण राघवम् । शून्ये येनापनीताऽसि तस्य द्रक्ष्यसि यत्फलम् ॥ ३२ ॥ नचिराद्रावणं सङ्ख्ये यो वधिष्यति वीर्यवान् । रोषप्रमुक्तैरिषुभिर्ज्वलद्भिरिव पावकैः ॥ ३३ ॥ तेनाहं प्रेषितो दूतस्त्वत्स काशमिहागतः । त्वद्वियोगेन दुःखार्तः स त्वां कौशलमब्रवीत् ॥ ३४ ॥ लक्ष्मणश्च महातेजाः सुमित्रा नन्दवर्धनः । अभिवाद्य महाबाहुः स त्वां कौशलमब्रवीत् ॥ ३५ ॥ रामस्य च सखा देवि सुग्रीवो नाम वानरः । राजा वानरमुख्यानां स त्वां कौशलमब्रवीत् ॥ ३६ ॥ नित्यं स्मरति रामस्त्वां ससुग्रीवः सलक्ष्मणः । दिष्ट्या जीवसि वैदेहि राक्षसीवशमागता ॥ ३७ ॥ नचिराद्रक्ष्यसे रामं लक्ष्मणं च महाबलम् । मध्ये वानरकोटीनां सुग्रीवं चामितौजसम् ॥ ३८ ॥ अहं सुग्रीवसचिवो हनुमान्नाम वानरः । प्रविष्टो नगरीं लङ्कां लङ्घयित्वा महोदधिम् ॥ ३९ ॥ कृत्वा मूर्ध्नि पदन्यासं रावणस्य दुरात्मनः । त्वां द्रष्टुमुपयातोऽहं समाश्रित्य पराक्रमम् ॥ ४० ॥ नाहमस्मि तथा देवि यथा मामवगच्छसि । विशङ्का त्यज्यतामेषा श्रद्धत्स्व वदतो मम ॥ ४१ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

मित्यादि । लोकः महात्मनो यस्य बाहुच्छायाम् अवष्टब्धः आश्रितः । तं मृगरूपेण प्रशस्तमृगेण हेतुना आश्रमपदादपकृष्य शून्ये येनाप नीतासि तस्य रावणस्य यत्फलं मरणरूपं तत् द्रक्ष्यसीति योजना । यद्वा बाहुच्छायामवष्टब्धो यस्य लोको महात्मनः असावादित्य इव तेजस्वीत्येवं योजना ॥ ३१–४० ॥ नाहमिति । वञ्चनार्थं परिगृहीतोष इति मां यथाऽवगच्छति तथा नास्मीत्यर्थः ॥ ४१ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुस्त्रिंशः ॥ ३४ ॥

॥९६॥

अवष्टब्धः आश्रितो लोकः तं रावणं मृगरूपेण आश्रमादपकृष्य शून्ये येन रावणेनापनीतासि तस्य यत्फलं मरणरूपं तत् द्रक्ष्यसीति योजना ॥ ३१–४० ॥ नाहमस्मि तथेति नाहं मायावी, वानरोऽस्मीत्यर्थः ॥ ४१ ॥ इति श्रीगोविन्दराजविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां चतुस्त्रिंशः सर्गः ॥ ३४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तान्तित्यादि ॥ १ ॥ २ ॥ तनि०—गुरुकुलवासायोग्यानां वानराणां वसिष्ठशिष्याणां च ईदृशसमागमः कथं जातः ? शास्त्रवश्यानामेव गुरुकुलवासयोग्यत्वात् ॥ २ ॥ यानीति । लिङ्गानि चिह्नानि ॥ ३ ॥ कीदृशमिति । संस्थानम् अवयवसंनिवेशः । रूपम् आकारः वर्णः कान्तिर्वा ॥ ४ ॥ ५ ॥ बतेत्या मन्त्रणे । जानन्ती त्वं दिष्ट्या मां परिपृच्छसीति संबन्धः । लक्षितानि त्वया दृष्टानि । मे मतः ॥ ६ ॥ ७ ॥ रामः सर्वाङ्गसुन्दरः । कमलपत्राक्षः कान्ति

तां तु रामकथां श्रुत्वा वैदेही वानरर्षभात् । उवाच वचनं सान्त्वमिदं मधुरया गिरा ॥ १ ॥ कथं ते राघवेण संसर्गः कथं जानासि लक्ष्मणम् । वानराणां नराणां च कथमासीत् समागमः ॥ २ ॥ यानि रामस्य लिङ्गानि लक्ष्मणस्य च वानर । तानि भूयः समाचक्ष्व न मां शोकः समाविशेत् ॥ ३ ॥ कीदृशं तस्य संस्थानं रूपं रामस्य कीदृशम् । कथमूरू कथं बाहू लक्ष्मणस्य च शंस मे ॥ ४ ॥ एवमुक्तस्तु वैदेह्या हनुमान् मारुतात्मजः । ततो रामं यथातत्त्वमाख्यातुमुपचक्रमे ॥ ५ ॥ जानन्ती बत दिष्ट्या मां वैदेहि परिपृच्छसि । भर्तुः कमलपत्राक्षि संस्थानं लक्ष्मणस्य च ॥ ६ ॥ यानि रामस्य चिह्नानि लक्ष्मणस्य च यानि वै । लक्षितानि विशालाक्षि वदतः शृणु तानि मे ॥ ७ ॥ रामः कमलपत्राक्षः सर्वसत्त्वमनोहरः । रूपदाक्षिण्यसम्पन्नः प्रसूतो जनकात्मजे ॥ ८ ॥

प्रवाहे आवर्त इव अत्यन्तमाकर्षकनयनशोभः । तादृशनयनसौन्दर्यसीमाभूमिमाह—सर्वसत्त्वमनोहरः । तिर्यग्जातितया विटपाद्विटपं प्लवतो ममापि चित्तापहारकः, अविशेषज्ञस्यापि मनोहर इत्यर्थः । रूपदाक्षिण्यसम्पन्नः रूपमित्येतद्विग्रहगुणानामुपलक्षणम् । दाक्षिण्यमित्यात्मगुणानामुपलक्षणम् । देहगुणैरात्मगुणैश्चान्यून इत्यर्थः । संपन्नः प्रसूतः, इदं सर्वानागन्तुकं किन्तु औत्पत्तिकमित्यर्थः । अत्युत्कटं वदसि किमेवंविधोऽपरोऽप्यस्ति न वेत्यपेक्षाया माह—जनकात्मज इति । भवती च तादृशीत्यर्थः ॥ ८ ॥ तनि०—रामः सर्वाङ्गसुन्दर इत्यर्थः । कमलपत्राक्षः सौन्दर्यप्रवाहमज्जनावावर्तवदाकर्षकनयनशोभावान् ।

तां त्विति अदित्य इवेत्यादिकाम् ॥ १ ॥ २ ॥ यानि लिङ्गानि चिह्नानि ॥ ३ ॥ संस्थानम् अवयवसन्निवेशः । रूपम् आकारः ॥ ४ ॥ ५ ॥ जानन्तीति । बतेत्यामन्त्रणे । मां रामदूत इति जानन्ती सती दिष्ट्या भद्रकारेण परिपृच्छसीति योजना ॥ ६ ॥ लक्षितानि त्वया दृष्टानि । मे मतः ॥ ७ ॥ रूपदाक्षिण्यसम्पन्नः रूपमित्येतद्विग्रहगुणानामुपलक्षणम् । प्रसूत इत्यनेन गुणानामुत्पत्तिसिद्धित्वमवगम्यते ॥ ८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नयनशोभाया अनधिः क इत्यपेक्षायामाह सर्वसत्त्वमनोहर इति । तिर्यग्जातीयत्वेन शाखाचङ्क्रमणरतस्य वानरत्वजस्यापि मनोहरत्वेन सर्वजनमनोहरः । रूपदाक्षिण्यसंपन्नः प्रसूतः स्वाभाविकानवधिकदिव्यदेहगुणगणः । जनकात्मजे त्वमेव तत्सदृशीति वक्तुं शक्या नान्येत्यर्थः । यद्वा रमयतीति रमन्ते योगिन इति च रामः । रामत्वमेवाह कमलपत्राक्ष इति । अथवा रामस्सौन्दर्यप्रवाहभूतः । कमलपत्राक्षः प्रवाहे आवर्तायमानश्रीनयनः । तेन हृदयाकर्षकत्वं व्यञ्जितम् । तच्च सकलजन्तुसाधारणमित्याह सर्वसत्त्वमनोहर इति । तत्र वानरजातीयमचित्ताकर्षणमेव प्रमाणमिति ध्वन्यते । स्वरूपविग्रहगुणैः सकलजन्तुमनोहरत्वं जन्मसिद्धमित्याह रूपदाक्षिण्यसम्पन्नः प्रसूत इति । तर्हि एवंविधः पुमान् विद्यते किमिति चेत् ? नेत्याह जनकात्मजे इति । तुल्यशीलेत्यादिना भवत्येव प्रसिद्धा न पुमान् कश्चिदिति भावः ॥८॥

तेजसाऽऽदित्यसङ्काशः क्षमया पृथिवीसमः । बृहस्पतिसमो बुद्ध्या यशसा वासवोपमः ॥९॥ रक्षिता जीवलोकस्य स्वजनस्याभिरक्षिता । रक्षिता स्वस्य वृत्तस्य धर्मस्य च परन्तपः ॥ १० ॥ रामो भामिनि लोकस्य चातुर्वर्ण्यस्य रक्षिता । मर्यादानां च लोकस्य कर्ता कारयिता च सः ॥ ११ ॥ अर्चिष्मानर्चितोऽत्यर्थं ब्रह्मचर्यव्रते स्थितः । साधूनामुपकारज्ञः प्रचारज्ञश्च कर्मणाम् ॥ १२ ॥ राजविद्याविनीतश्च ब्राह्मणानामुपासिता । श्रुतवान् शील सम्पन्नो विनीतश्च परन्तपः ॥ १३ ॥ यजुर्वेदविनीतश्च वेदविद्भिः सुपूजितः । धनुर्वेदे च वेदेषु वेदाङ्गेषु च निष्ठितः ॥ १४ ॥ विपुलांसो महाबाहुः कम्बुग्रीवः शुभाननः । गूढजत्रुः सुताम्राक्षो रामो देवि जनैः श्रुतः ॥ १५ ॥

सङ्ग्रहेणोक्तान् गुणान्विवृणोति–तेजसेत्यादिना ॥ ९–११ ॥ ब्रह्मचर्यव्रते स्थितः गृहस्थस्यास्य ब्रह्मचर्यं नाम ऋतोरन्यत्र स्त्रीसङ्गमत्यागः । तदाह मनुः–"षोडशर्तुर्निशाः स्त्रीणां तासामिन् युग्मासु संविशेत् । ब्रह्मचार्येव पर्वाण्याश्चतस्रश्च विवर्जयेत् ॥" प्रचारज्ञः प्रयोगज्ञः । ऐहिकामुष्मिकानां कर्मणां प्रचारं गतिं हेतुफलभावव्यवस्थां तत्त्वतो जानातीत्यर्थ इत्यप्याहुः ॥ १२ ॥ राजविद्याविनीतश्च । चतस्रो राजविद्याः–" आन्वीक्षकी त्रयी वार्ता दण्ड नीतिश्च शाश्वती । एता विद्याश्चतस्रस्तु लोकसंस्थितिहेतवः॥" इत्युक्ताः, तासु विनीतः शिक्षितः । श्रुतवान् अवधृतवान् । शीलसम्पन्नः सदाचारसम्पन्नः । पूर्वं यज्ञादिकर्मानुष्ठातृत्वमुक्तमिति न पुनरुक्तिः ॥१३॥ वेदेषु यजुर्व्यतिरिक्तवेदेषु । अनेन स्वस्य यजुर्वेदत्वं सूचितम् ॥१४॥ एवमात्मगुणानभिधाय

सङ्ग्रहेणोक्तान् गुणान् विवृणोति–तेजसेत्यादिना ॥ ९–११ ॥ अर्चिष्मानिति । अर्चितः, सद्भिरिति शेषः । ब्रह्मचर्यव्रते स्थितः, तत्र प्रसिद्ध इत्यर्थः । प्रचारज्ञः प्रयोगज्ञः ॥१२॥१३॥ यजुर्वेदविनीतः तस्मिन् रत इत्यर्थः ॥ १४ ॥ पूर्वमात्मगुणानभिधाय इदानीं विग्रहगुणानाह–विपुलांस इत्यादिना ॥ १५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विग्रहगुणनाशास्ते–विपुलांस इत्यादिना । गूढजत्रुः अस्पष्टभुजसन्ध्यस्थिः ॥ १५ ॥ समः अन्यूनातिरिक्तदेहप्रमाणः ॥ १६ ॥ त्रिस्थिर इति । त्रिषु स्थानेषु स्थिरः । तथोक्तं सामुद्रिके–"उरश्च मणिबन्धश्च मुष्टिश्च नृपतेः स्थिराः" इति । त्रिप्रलम्बः त्रिषु प्रलम्बः । "दीर्घभूबाहुमुष्कस्तु चिरजीवी धनी नरः" इति वचनात् । अन्यत्र तु "त्रयश्च यस्य विद्यन्ते प्रलम्बा मेढ्रबाहवः" इति । त्रिसमः त्रिषु समः । "केशाग्रं वृषणं जानु समा यस्य स भूपतिः" इति वचनात् । त्रिषु चोन्नतः । तदाह वराहमिहिरः–"उन्नतकुक्षिः क्षितिपः परिमण्डलोन्नतनाभयः क्षितिपाः । हृदयं न वेपनं पृथु समोन्नतं

दुन्दुभिस्वननिर्घोषः स्निग्धवर्णः प्रतापवान् । समः समविभक्ताङ्गो वर्णे श्यामं समाश्रितः ॥ १६ ॥
त्रिस्थिरस्त्रिप्रलम्बश्च त्रिसमस्त्रिषु चोन्नतः । त्रिताम्रस्त्रिषु च स्निग्धो गम्भीरस्त्रिषु नित्यशः ॥ १७ ॥
त्रिवलीवांस्त्र्यवनतश्चतुर्व्यङ्गस्त्रिशीर्षवान् । चतुष्कलश्चतुर्लेखश्चतुष्किष्कुश्चतुःसमः ॥ १८ ॥

मांसलं च नृपतीनाम्॥" इति । त्रिताम्रः त्रिषु ताम्रः । "श्लिष्टाङ्गुली रुचिरताम्रनखौ सुपार्ष्णी पादौ करावपि सुरक्तनखात्मरेखौ" इति वचनात् । "नेत्रान्त नखपाण्यङ्घ्रितलैस्ताम्रैस्त्रिभिस्सुखी" इति च । त्रिषु स्निग्धः । "स्निग्धा भवन्ति वै येषां पादरेखाः शिरोरुहाः । तथा लिङ्गमणिस्तेषां महाभाग्यं विनिर्दिशेत्॥" इति सामुद्रिकवचनात् । त्रिषु गम्भीरः । अत्र वररुचिः–"स्वरः सत्त्वं च नाभिश्च गम्भीरः शस्यते बुधैः" इति । ब्राह्मे तु–"स्वरे गतौ च नाभौ च गम्भीरास्त्रिषु शस्यते" इति । नित्यश इति सर्वत्र विशेषणीयम् । तेन रोगाद्युपाधिकृतरागादिनिवृत्तिः ॥१७॥ त्रिवलीवान् उदरे वलित्रयवान्, कण्ठे वलित्रयवान् वा । अत्र गर्गः–"स्थिरा त्रिरेखा सुभगोपपन्ना स्निग्धा सुमांसोपचिता सुवृत्ता । न चातिदीर्घा चतुरङ्गुला च ग्रीवा सुदीर्घा भवतीह धन्या॥"

समः अन्यूनातिरिक्तदेहप्रमाणः ॥ १६ ॥ त्रिस्थिरः त्रिषु स्थानेषु स्थिरः । तदुक्तम्–" उरश्च मणिबन्धश्च मुष्टिश्च नृपतेः स्थिराः " इति । त्रिप्रलम्बः । तदुक्तम्–" प्रलम्बा यस्य स धनी त्रयो भूमुष्कबाहवः " इति । मुष्कः वृषणः । त्रिसमः त्रिषु समः । तदुक्तम्–" केशाग्रं वृषणं जानु समं यस्य स भूपतिः " इति । त्रिषु चोन्नतः । तदुक्तम्–"नाभ्यन्तःकुक्षिवक्षोभिरुन्नतः क्षितिपो भवेत् " इति । त्रिताम्रः । तदुक्तम्–" नेत्रान्तनखपाण्यङ्घ्रितलैस्ताम्रैस्त्रिभिस्सुखी" इति । त्रिषु स्निग्धः तदुक्तम्–" स्निग्धा भवन्ति वै येषां पादरेखाः शिरोरुहाः । तथा लिङ्गमणिस्तेषां महाभाग्यं विनिर्दिशेत" इति । त्रिषु गम्भीरः "स्वरे सत्त्वे च नाभौ च गम्भीरास्त्रिषु शस्यते " इति ॥ १७ ॥ त्रिवलीवान् उदरे कण्ठे वलित्रयवान् । " स्थिरा त्रिरेखा सुभगोपपन्ना स्निग्धा सुमांसोपचिता सुवृत्ता । न चातिदीर्घा चतुरङ्गुला च ग्रीवा च दीर्घा भवतीह धन्या " इति । त्र्यवनतः त्रीणि अवनतानि निम्नानि यस्य सः । तदुक्तम्–" पीनोपचितैर्निम्नैः क्षितिपतयश्चूचुकैः स्तनैः सुखिनः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इति । व्यवनतः त्रीण्यवनतानि निम्नानि यस्यासौ व्यवनतः । तानि स्तनचूचुकपादरेखाः । अत्र मिहिरः–" पीनोपचितैर्निम्नैः क्षितिपतयश्चूचुकैः स्तनैः सुस्थिनः । स्निग्धा निम्ना रेखा धनिनां तद्वच्यत्ययेन निस्स्वानाम् ॥" इति । चत्वारि व्यङ्गानि ह्रस्वानि यस्यासौ चतुर्व्यङ्गः । अत्र वररुचिः–"ग्रीवा प्रजननं पृष्ठं ह्रस्वं जङ्घा च पूज्यते" इति । यद्वा चत्वारो व्यङ्गाः विकलाः यस्य सः चतुर्व्यङ्गः । ते च शिराविकलः पादः, रोमान्तरविकलो रोमकूपः, दैर्घ्य विकलो मेढ्रः, मांसविकलो बस्तिः । अत्र नारदः–"पादैः प्रस्वेदरहितैः शिराहीनैश्च पार्थिवः । एकरोमा भवेद्राजा द्विरोमा पण्डितो भवेत् । त्रिरोमा चतुरोमा च भवेद्भाग्यविवर्जितः । समपादोपविष्टस्य गुल्फं स्पृशति मेहनम् । यस्येश्वरं तं जानीयात्सुस्थिनं चैव मानवम् । निर्मांसः संहतो बस्तिर्येषां ते सुखभागिनः ॥" इति । त्रिशीर्षवान् त्रिभिर्लक्षणैर्युक्तं शीर्ष तदस्यास्तीति त्रिशीर्षवान् । तानि लक्षणान्यावर्ताः । "आवर्तत्रयरुचिरं यस्य शिरः स क्षितिभृतां नेता " इति कथनात् । यद्वा त्रिप्रकारं सद्वृत्तं छत्राकारं विशालं च शीर्षमस्यास्तीति त्रिशीर्षवान् । अत्र नारदः–" समवृत्ताशिराश्चैव छत्राकारशिरास्तथा । एकछत्रां महीं भुङ्क्ते दीर्घमायुश्च विन्दति ॥" इति । चतस्रः कलाः वेदाः यस्य चतुष्कलः । अत्र शरीरलक्षणप्रकरणे कलाशब्दस्तत्सूचकरेखापरः । अत्र नन्दी–" मूलेऽङ्गुष्ठस्य वेदानां चतस्रस्तिस्र एव वा । एका द्वे वा यथायोगं रेखा ज्ञेया द्विजन्मनाम् ॥" इति । चतुर्लेखः ललाटे पादयोः पाण्योश्चतस्रो लेखा रेखा यस्य स चतुर्लेखः । " ललाटे यस्य दृश्यन्ते चतुस्त्रिद्व्येकरेखिकाः । शतद्वयं शतं षष्टिस्तस्यायुर्विंशतिस्तथा ॥" इति कात्यायनः । " यस्य पादतले वज्रध्वजशङ्खाङ्कुशोपमाः । रेखास्सम्यक् प्रकाशन्ते मनुजेन्द्रं तमादिशेत् ॥ " इति नारदः । " पाणौ चतस्रो रेखाश्च यस्य तिष्ठन्त्यभङ्गुराः " इति ब्रह्मा । चत्वारः किष्कवः यस्य स चतुष्किष्कुः । चतुर्विंशत्यङ्गुलात्मको हस्तः किष्कुः, षण्णवत्यङ्गुलोत्सेध इत्यर्थः । " षण्णवत्यङ्गुलोत्सेधो यः पुमान् स दिवौकसः " इति ब्राह्मपुराणवचनम् । चतुःसमः चत्वारः समा यस्य सः चतुःसमः, ते च बाहुजानूरु

स्निग्धा निम्ना रेखा धनिनां तद्व्यत्ययेन निस्स्वानाम् ॥" इति । चतुर्व्यङ्गः चत्वारि व्यङ्गानि ह्रस्वानि यस्य सः । "ग्रीवा प्रजननं पृष्ठं ह्रस्वं जङ्घा च पूज्यते" इति । त्रिशीर्षवान् व्यावर्तयुक्तशीर्षवानित्यर्थः । " आवर्तत्रयरुचिरं यस्य शिरः क्षितिभृतां भवेन्नाथः " इति । चतुष्कलः चतस्रः कलाश्चत्वारो वेदा यस्य सः । अत्र कलाशब्देन तत्प्राप्तिसूचका अङ्गुष्ठमूलगताश्चतस्रो रेखा उच्यन्ते । तदुक्तम्–" मूलेऽङ्गुष्ठस्य वेदानां चतस्रस्तिस्र एव वा । एका द्वे वा यथायोगं रेखा ज्ञेया द्विजन्मनाम् ॥" इति । चतुर्लेखः ललाटे पादयोः पाण्योश्चतस्रो रेखा यस्य सः । "ललाटे यस्य दृश्यन्ते चतुस्त्रिद्व्येकरेखिकाः । शतद्वयं शतं षष्टिस्तस्यायुर्विंशतिस्तथा ॥" इति । " यस्य पादतले वज्रध्वजशङ्खाङ्कुशोपमाः । रेखाः सम्यक् प्रजायन्ते मनुजेन्द्रं तमादिशेत । " इति । "पाण्योश्चतस्रो रेखाश्च यस्य तिष्ठन्त्यभङ्गुराः" इति च । चतुष्किष्कुः चत्वारः किष्कवः प्रमाणं यस्य स तथोक्तः । किष्कुः चतुर्विंशत्यङ्गुलात्मको हस्तः " षण्णवत्यङ्गुलोत्सेधो यः पुमान् स दिवौकसः " इति । चतुस्समः । तदुक्तम्–" बाहुजानूरुजङ्घाश्च चत्वार्यथ समानि च । " इति ॥ १८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गण्डाः । तदुक्तं ब्रह्माण्डे–" बाहुजानूरुगण्डाश्च चत्वार्यथ समानि च " इति ॥ १८ ॥ चतुर्दशसमद्वन्द्वः चतुर्दशसङ्ख्यानि समानि द्वन्द्वानि यस्य सः । तथात्र सामुद्रिकम्–" भ्रुवौ नासापुटे नेत्रे कर्णावोष्ठौ च चूचुकौ । कूर्परौ मणिबन्धौ च जानुनी वृषणौ कटी । करौ पादौ स्फिजौ यस्य समौ ज्ञेयः स भूपतिः ॥" इति । चत्वारो दंष्ट्राकारा दन्ता यस्य स चतुर्दंष्ट्रः । तदाह मिहिरः–" स्निग्धा घनाश्च दशनाः सुतीक्ष्णदंष्ट्राः समाश्च

चतुर्दशसमद्वन्द्वश्चतुर्दंष्ट्रश्चतुर्गतिः । महोष्ठहनुनासश्च पञ्चस्निग्धोऽष्टवंशवान् ॥ १९ ॥

शुभाः " इति । चतुर्गतिः चतुर्णां सिंहशार्दूलगजवृषभाणां गतिरिव गतिर्यस्य सः । "गजसिंहगती वीरौ शार्दूलवृषभोपमौ " इति बालकाण्डोक्तेः । महोष्ठहनुनासश्च । ओष्ठस्य महत्त्वं बन्धुजीवबिम्बफलारुणमांसलत्वम्, हनोस्तु परिपूर्णमांसलत्वम्, नासिकाया दीर्घतुङ्गत्वम् । तथाच संहिता–" बन्धुजीवकुसुमोपमोऽधरो मांसलो रुचिरबिम्बरूपधृत् । पूर्णमांसलहनुस्तु भूमिपस्तुङ्गतुण्डरुचिराकृतिस्तथा ॥" इति । तुण्डशब्देन नासिकोच्यते । पञ्चस्निग्धः । पञ्च स्निग्धाः अवयवाः यस्य सः, ते च वाक्यवक्त्रनखलोमत्वचः केशनेत्रदन्तत्वक्पादतलानि वा । अत्र वररुचिः–" चक्षुःस्नेहेन सौभाग्यं दन्तस्नेहेन भोजनम् । त्वचः स्नेहेन शयनं पादस्नेहेन वाहनम् ॥" इति । " स्निग्धनीलमृदुकुञ्चितास्तथा मूर्धजाः सुखकराः समं शिरः " इति मिहिरः । पूर्वं त्रिषु स्निग्ध इत्युक्तेः अत्र पञ्चस्निग्ध इतीदं मतभेदमाश्रित्योक्तम् । अष्टवंशवान् अष्टौ वंशाः आयतावयवा यस्य सः, आयताष्टावयव इत्यर्थः । अत्र सामुद्रिकम्–"पृष्ठवंशः शरीरं च हस्तपादाङ्गुली करौ । नासिका चक्षुषी कर्णौ प्रजनो यस्य चायताः ॥" इति । प्रजनस्यायतत्वमार्जवम् ॥१९॥

चतुर्दशसमद्वन्द्वः समपरिमाणचतुर्दशाङ्गद्वन्द्वयुक्त इत्यर्थः । तदुक्तम्–"भ्रुवौ नासापुटे नेत्रे कर्णावोष्ठौ च चूचुके । कूर्परौ मणिबन्धौ च जानुनी वृषणौ कटी । करौ पादौ स्फिजौ यस्य समौ ज्ञेयः स भूपतिः ॥ " इति । " कर्णाक्षिभ्रूगण्डनासादन्तोष्ठस्कन्धजत्रुणी । पादौ करौ स्तनावूरू स्फिजौ द्वन्द्वौ चतुर्दश ॥ " इति । " समाश्च यस्य विद्यन्ते क्रमेणोपचितास्तथा " इति । चतुर्दंष्ट्रः दन्तपङ्क्तिद्वये प्रतिपार्श्वं चतस्रश्चतस्रो दंष्ट्रा दन्तविशेषा यस्य स तथोक्तः । यद्वा दन्तपङ्क्तिद्वयेऽपि मध्यदन्तचतुष्कमभितो द्वौ द्वौ दन्तविशेषा दंष्ट्रा अभिधीयन्ते । चतुर्गतिः चतुर्णां सिंहशार्दूलगजवृषभाणां गतिर्यस्य सः । महोष्ठहनुनासश्च ओष्ठस्य महत्त्वं बन्धुजपाकुसुमबिम्बफलारुणमांसलत्वम्, हनोस्तु परिपूर्णमांसलोन्नतत्वम्, नासिकायाः दीर्घोन्नतरुचिरपुटत्वम । तदुक्तम्–" बन्धुजीवकुसुमोपमाधरो मांसलो रुचिर बिम्बरूपधृत् । पूर्णमांसलहनुस्तु भूमिपस्तुङ्गतुण्डरुचिराकृतिस्तथा " इति । तुण्डमिति नासिकोच्यते । पञ्चस्निग्धः " वाग्वक्त्रनखलोमानि त्वचश्च" इति । अष्टवंशवान् अष्टौ वंशा आयता अस्य सन्तीत्यष्टवंशवान् । " बाहू च नलकौ चोरू जङ्घे चेत्यष्टवंशकाः " इति । नलका अङ्गुलिः ॥ १९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दशपद्मः दश पद्माकारावयवाः यस्य सः दशपद्मः । "मुखनेत्रास्यजिह्वोष्ठतालुस्तननखाः करौ । पादौ च दश पद्मानि पद्माकाराणि यस्य च ॥" इति । दशबृहत् दश बृहदवयवा यस्य सः । ते च–" उरः शिरो ललाटं च ग्रीवा बाहूंसनाभयः । पार्श्वपृष्ठस्वराश्चेति विशालास्ते शुभप्रदाः ॥ " इति सामुद्रिकम् । ब्राह्मे तु–" शिरोललाटे श्रवणे ग्रीवा वक्षश्च हत्तथा । उदरं पाणिपादौ च पृष्ठं दश बृहन्ति च ॥ " इति । त्रिभिर्व्याप्तः । " त्रिभिर्व्याप्तिश्च यस्य

दशपद्मो दशबृहत् त्रिभिर्व्याप्तो द्विशुक्लवान् । षडुन्नतो नवतनुस्त्रिभिर्व्याप्नोति राघवः ॥ २० ॥
सत्यधर्मपरः श्रीमान् संग्रहानुग्रहे रतः । देशकालविभागज्ञः सर्वलोकप्रियंवदः ॥ २१ ॥

स्यात्तेजसा यशसा श्रिया " इति ब्राह्मोक्तरीत्या त्रिभिर्व्याप्तः । द्विशुक्लवान् द्वे दन्तनेत्रे शुक्ले यस्य सः द्विशुक्लवान् । षडुन्नतः षट् उन्नता अवयवा यस्य सः । ते च–" कक्षः कुक्षिश्च वक्षश्च घ्राणं स्कन्धो ललाटिका । सर्वभूतेषु निर्दिष्टा उन्नताङ्गाः शुभप्रदाः ॥" इति वररुचिः । अत्र मतभेदेनोक्तेर्न पुनरुक्तिः । मतभेदश्रवणं च रामस्य सकलशास्त्रोक्तमहापुरुषलक्षणपरिपूर्णत्वद्योतनाय । नवतनुः नव तनवः सूक्ष्मा यस्य । तानि च केशश्मश्रुनखलोमत्वगङ्गुलिपर्वशेफोबुद्धिदर्शनानि । " सूक्ष्माण्यङ्गुलिपर्वाणि केशलोमनखत्वचः । शेफश्च येषां सूक्ष्माणि ते नरा दीर्घजीविनः ॥ " इति वररुचिः । त्रिभिर्व्याप्नोति त्रिभिः पूर्वाह्णमध्याह्नापराह्णैः कालैः धर्मार्थकामान् व्याप्नोति अनुतिष्ठतीति । तदुक्तं ब्राह्मे–" धर्मार्थकामाः कालेषु त्रिषु यस्य स्वनिष्ठिताः " इति ॥ २० ॥ संग्रहानुग्रह इति । संग्रह अर्जनम् । अनुग्रहः फलदानम् ॥ २१ ॥

दशपद्मः दश पद्माकारा अवयवा यस्य सः । तथोक्तम्–" मुखनेत्रास्यजिह्वोष्ठतालुस्तननखाः करौ । पादौ च दश पद्मानि पद्माकाराणि यस्य च ॥ " इति । दशबृहत् " शिरोललाटे श्रवणे ग्रीवा वक्षश्च हत्तथा । उदरं पाणिपादौ च पृष्ठं दश बृहन्ति च " इति । त्रिभिर्व्याप्तः " त्रिभिर्व्याप्तश्च यश्च स्यात्तेजसा यशसा श्रिया " इति । द्विशुक्लवान द्वौ शुक्लौ शुद्धौ मातृपितृवंशौ यस्य सः । " द्वौ शुक्लौ तु शुभौ शुद्धौ वंशौ मातुः पितुस्तथा " इति । षडुन्नतः " कक्षः कुक्षिश्च वक्षश्च घ्राणस्कन्धौ ललाटिका । सर्वभूतेषु निर्दिष्टा उन्नताङ्गाः शुभप्रदाः " इति । नवतनुः नवसु स्थानेषु सूक्ष्मः । " सूक्ष्माण्यङ्गुलिपर्वाणि केशरोमनखत्वचः । शेफश्च येषां सूक्ष्माणि ते नरा दीर्घजीविनः ॥ अस्फुटिताग्रं सूक्ष्मं श्मश्रु शुभं मृदु च सन्ततं स्निग्धम् । सूक्ष्मदृक् सूक्ष्मबुद्धिश्च यो नरः स सुखी भवेत् । " इति । त्रिभिर्व्याप्नोतीति । त्रिभिः पूर्वाह्णमध्याह्नापराह्णकालैः धर्मार्थकामानवाप्नोति अनुतिष्ठतीति त्रिभिर्व्याप्नोति । ब्राह्मे–"धर्मार्थकामाः कालेषु त्रिषु यस्य स्वनिष्ठिताः" इति । ननु त्रिसमस्त्रिषु चोन्नतः त्रिषु स्निग्धः त्रिभिर्व्याप्त इत्युक्तं प्राक् । इह तु चतुस्समः षडुन्नतः पञ्चस्निग्धः त्रिभिर्व्याप्नोतीत्युच्यते,सत्यम्, मतभेदमाश्रित्यात्र त्वाददोषः । अन्येषामप्येवंविधानां सकलशास्त्रोक्तमहापुरुषलक्षणानाम् एकः सकलगुणारामो राम एव लक्ष्यमिति सूचनाय ॥ २० ॥ सङ्ग्रहानुग्रह इति । संग्रहः

॥९९॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भ्राता च तस्येति । द्वैमात्रः सपत्नीपुत्रः ॥ २२ ॥रामानु०–भ्राता च तस्येति । द्वैमात्रः द्वयोर्मात्रोरपत्यं पुमान् द्वैमात्रः । " मातुरुत्सङ्ख्यासंभद्रपूर्वायाः " इति अण् प्रत्ययः । उकाराभाव आर्षः । सुमित्रापत्यस्य लक्ष्मणस्य द्वैमातुरत्वं जन्मप्रभृति रामवत् कौसल्यया संवर्धितत्वात् ॥ २२ ॥ २३ ॥ मृगपतिं सुग्रीवम् । पूर्वजेन वालिना ।

भ्राता च तस्य द्वैमात्रः सौमित्रिरपराजितः । अनुरागेण रूपेण गुणैश्चैव तथाविधः ॥ २२ ॥ तावुभौ नरशार्दूलौ त्वद्दर्शनसमुत्सुकौ । विचिन्वन्तौ महीं कृत्स्नामस्माभिरभिसङ्गतौ ॥ २३ ॥ त्वामेव मार्गमाणौ तौ विचरन्तौ वसुन्धराम् । ददर्शतुर्मृगपतिं पूर्वजेनावरोपितम् ॥ २४ ॥ ऋश्यमूकस्य पृष्ठे तु बहुपादपसङ्कुले । भ्रातुर्भयार्त मासीनं सुग्रीवं प्रियदर्शनम् ॥ २५ ॥ वयं तु हरिराजं तं सुग्रीवं सत्यसङ्गरम् । परिचर्यास्महे राज्यात् पूर्वजेनाव रोपितम् ॥ २६ ॥ ततस्तौ चीरवसनौ धनुःप्रवरपाणिनौ । ऋश्यमूकस्य शैलस्य रम्यं देशमुपागतौ ॥ २७ ॥ स तौ दृष्ट्वा नरव्याघ्रौ धन्विनौ वानरर्षभः । अवप्लुतो गिरेस्तस्य शिखरं भयमोहितः ॥ २८ ॥ ततः स शिखरे तस्मिन् वानरेन्द्रो व्यवस्थितः । तयोः समीपं मामेव प्रेषयामास सत्वरम् ॥२९॥ तावहं पुरुषव्याघ्रौ सुग्रीववचनात् प्रभू । रूपलक्षणसम्पन्नौ कृताञ्जलिरुपस्थितः ॥३०॥ तौ परिज्ञाततत्त्वार्थौ मया प्रीतिसमन्वितौ । पृष्ठमारोप्य तं देशं प्रापितौ पुरुषर्षभौ ॥ ३१ ॥ निवेदितौ च तत्त्वेन सुग्रीवाय महात्मने । तयोरन्योन्यसंलापाद्दृढं प्रीतिरजायत ॥३२॥

अवरोपितम्, राज्यादिति शेषः ॥ २४–२६ ॥ रामानु०–वयन्तिवाति । परिचर्य परिचर्यां कृत्वा । आस्महे तिष्ठाम इत्यर्थः ॥ २६ ॥ तत इति । पाणिनाविति

आर्जनम्, अनुग्रहः फलदानम् ॥ २१ ॥ द्वैमात्रः द्वयोर्मात्रोरपत्यं पुमान् द्वैमात्रः ॥ २२ ॥ अस्माभिः सुग्रीवमन्त्रिभिरित्यर्थः ॥ २३ ॥ मृगपतिं सुग्रीवम् । अवरोपितम् राजासनादिति शेषः ॥ २४ ॥ २५ ॥ वयमिति । परिचर्यास्महे परिचर्यां कृत्वा आस्महे, तिष्ठाम इत्यर्थः ॥ २६ ॥ पाणिनाविन्यत्र इन्नन्तत्वमार्षम् ॥ २७–४० ॥

स०–धनुःप्रवरपाणिनौ पणो व्यवहार एव पाणः । धनुःप्रवराभ्यां पाणोऽनयोरस्तीति तथा । धनुःप्रवरपाणिनां नौ नायकाविति वार्थ इति वा । " नेता नश्च समाख्यातः " इति नानार्थपदमञ्जर्याम् । नान्तो बाऽयं शब्दः ॥ २७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नान्तत्वमार्षम् ॥ २७–३५ ॥ स श्रुत्वेति । अतार्थं निष्प्रभ इति । आत्मज्ञानस्यापि दुःखहेतुभ्रवणादिति भावः । यद्वा रामापेक्षया अत्यन्त निष्प्रभः । रामः सीताविरहेण निष्प्रभोऽभूत्, सुग्रीवस्तु तयोस्ताहित्यादर्शनाद्रामक्लेशदर्शनाच्चात्यर्थं निष्प्रभोऽभूत् ॥ ३६ ॥ ३७ ॥ तानीत्यादि ।

ततस्तौ प्रीतिसम्पन्नौ हरीश्वरनरेश्वरौ । परस्परकृताश्वासौ कथया पूर्ववृत्तया ॥३३॥ ततः स सान्त्वयामास सुग्रीवं लक्ष्मणाग्रजः । स्त्रीहेतोर्वालिना भ्रात्रा निरस्तमुरुतेजसा ॥ ३४ ॥ ततस्त्वन्नाशनं शोकं रामस्याक्लिष्टकर्मणः । लक्ष्मणो वानरेन्द्राय सुग्रीवाय न्यवेदयत॥३५॥ स श्रुत्वा वानरेन्द्रस्तु लक्ष्मणेनेरितं वचः। तदाऽऽसीन्निष्प्रभोऽत्यर्थं ग्रहग्रस्त इवांशुमान् ॥ ३६ ॥ ततस्त्वद्वात्रशोभीनि रक्षसा ह्रियमाणया । यान्याभरणजालानि पातितानि महीतले ॥ ३७ ॥ तानि सर्वाणि रामाय आनीय हरियूथपाः । संहृष्टा दर्शयामासुर्गतिं तु न विदुस्तव ॥ ३८ ॥ तानि रामाय दत्तानि मयैवोपहृतानि च । स्वनवन्त्यवकीर्णानि तस्मिन् विगतचेतसि ॥ ३९ ॥ तान्यङ्के दर्शनीयानि कृत्वा बहु विधं तव । तेन देवप्रकाशेन देवेन परिदेवितम् ॥ ४० ॥ पश्यतस्तानि रुदतस्ताम्यतश्च पुनः पुनः । प्रादीपयन् दाशरथेस्तानि शोकहुताशनम् ॥४१॥ शयितं च चिरं तेन दुःखार्तेन महात्मना । मयापि विविधैर्वाक्यैः कृच्छ्रादुत्थापितः पुनः ॥४२॥ तानि दृष्ट्वा महाबाहुर्दर्शयित्वा मुहुर्मुहुः । राघवः सहसौमित्रिः सुग्रीवे संन्यवेदयत् ॥४३॥

आनीय हरियूथपा इति । पूर्वं सुग्रीवेणानयनमुक्तं तद्धरियूथपद्वारेत्यत्रोच्यते । गतिं रावणस्थानम् ॥ ३८ ॥ तानीति । दत्तानि, सुग्रीवेणेति शेषः । मयैवोपहृतानि, पूर्वं पतनकाल इति शेषः, इदानीं हरियूथपैरानीतत्वोक्तेः । स्वनवन्ति आकाशात्पतनकाले ॥ ३९–४१ ॥ शयितं मूर्च्छितम् ॥ ४२ ॥ सुग्रीवे संन्यवेदयत् सुग्रीवहस्ते न्यस्तवानित्यर्थः ॥ ४३ ॥

पश्यत इति । तान्याभरणानि शोकहुताशनं प्रादीपयन्निति सम्बन्धः ॥ ४१–४३ ॥

स०–त्वन्नाशजं त्वदनुपलम्भजम् । " नाशो निश्चनानुपलम्भयोः " इति विश्वः ॥ ३९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अग्निपर्वतो नाम मेरुशिखरवर्ती कश्चिद्गिरिः। उक्तं च भारते—" अत्र माल्यवतः शृङ्गे दृश्यते हव्यवाट् सदा। नाम्ना संवर्तको नाम कालाग्नि भरतर्षभ॥" इति ॥ ४४–५१ ॥ ननु "वानराणां नराणां च कथमासीत्समागमः" इति वामदक्षिणहस्तवैषम्यमप्यविज्ञानानां शाखायाश्शाखामाप्लुत्य

स तवादर्शनादार्यें राघवः परितप्यते। महता ज्वलता नित्यमग्निनेवाग्निपर्वतः ॥ ४४ ॥ त्वत्कृते तम निद्रा च शोकश्चिन्ता च राघवम्। तापयन्ति महात्मानमग्न्यगारमिवाग्नयः ॥ ४५ ॥ तवादर्शनशोकेन राघवः प्रविचाल्यते। महता भूमिकम्पेन महानिव शिलोच्चयः ॥ ४६ ॥ काननानि सुरम्याणि नदीः प्रस्रवणानि च। चरन्न रतिमाप्नोति त्वामपश्यन्नृपात्मजे ॥ ४७ ॥ स त्वां मनुजशार्दूलः क्षिप्रं प्राप्स्यति राघवः। समित्रबान्धवं हत्वा रावणं जनकात्मजे ॥ ४८ ॥ सहितौ रामसुग्रीवावुभावकुरुतां तदा। समयं वालिनं हन्तुं तव चान्वेषणं तथा ॥ ४९ ॥ ततस्ताभ्यां कुमाराभ्यां वीराभ्यां स हरीश्वरः। किष्किन्धां समुपागम्य वाली युद्धे निपातितः ॥ ५० ॥ ततो निहत्य तरसा रामो वालिनमाहवे। सर्वर्क्षहरिसङ्घानां सुग्रीवमकरोत् पतिम् ॥ ५१ ॥ रामसुग्रीवयोरैक्यं देव्येवं समजायत। हनुमन्तं च मां विद्धि तयोर्दूतमिहागतम् ॥ ५२ ॥ स्वराज्यं प्राप्य सुग्रीवः समानीय हरीश्वरान्। त्वदर्थं प्रेषयामास दिशो दश महाबलान् ॥ ५३ ॥ आदिष्टा वानरेन्द्रेण सुग्रीवेण महौजसा। अद्रिराज प्रतीकाशाः सर्वतः प्रस्थिता महीम् ॥ ५४ ॥

जीवतां तिरश्चां वसिष्ठशिष्यतया निरतिशयाचारसम्पन्नयोश्चक्रवर्तिपुत्रयोश्च कथं समागमो जात इति पृष्टम्, तस्य किमुत्तरमुक्तमित्यत्राह—रामसुग्रीवयो रिति। रामसुग्रीवयोरैक्यमेवं समजायत। एवमिति प्रत्यक्षनिर्देशः, स्वानुजे विद्यमानेऽपि यथाऽहं सुग्रीवदूतोऽन्तःपुरकार्यसमाधानायागतः तथा

स तवेति। अग्निपर्वतः अग्न्याख्यपर्वतः ॥ ४४–५४ ॥

स०—ताभ्यां रामलक्ष्मणाभ्याम्। छिन्न्यायेनेयमुक्तिः। हरीश्वरः वाली ॥ ९० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तयोरैक्यं मैत्री जातेत्यर्थः । यद्वा एवं समजायत अहमप्येवं दृष्टवान्, न योग्यतामवगच्छामीत्यर्थः ॥५२–५४॥ सुग्रीववचनातुराः सुग्रीवाज्ञाभीताः । सुग्रीववचनानुगा इति च पाठः ॥ ५५ ॥ अङ्गद इति । त्रिभागबलसंवृतः तृतीयांशेन बलेन सैन्येन संवृत इत्यर्थः । वृत्तिविषये पूरणार्थत्वं संख्या

ततस्ते मार्गमाणा वै सुग्रीववचनातुराः । चरन्ति वसुधां कृत्स्नां वयमन्ये च वानराः ॥५५॥ अङ्गदो नाम लक्ष्मीवान् वालिसूनुर्महाबलः । प्रस्थितः कपिशार्दूलस्त्रिभागबलसंवृतः ॥५६॥ तेषां नो विप्रनष्टानां विन्ध्ये पर्वतसत्तमे । भृशं शोकपरीतानामहोरात्रगणा गताः ॥ ५७ ॥ ते वयं कार्यनैराश्यात् कालस्यातिक्रमेण च । भयाच्च कपिराजस्य प्राणांस्त्यक्तुं व्यवस्थिताः ॥ ५८॥ विचित्य वनदुर्गाणि गिरिप्रस्रवणानि च । अनासाद्य पदं देव्याः प्राणांस्त्यक्तुं समुद्यताः ॥५९॥ दृष्ट्वा प्रायोपविष्टांश्च सर्वान् वानरपुङ्गवान् । भृशं शोकार्णवे मग्नः पर्यदेवयदङ्गदः ॥ ६० ॥ तव नाशं च वैदेहि वालिनश्च वधं तथा । प्रायोपवेशमस्माकं मरणं च जटायुषः ॥६१॥ तेषां नः स्वामिसन्देशान्निराशानां मुमूर्षताम् । कार्यहेतोरिवायातः शकुनिर्वीर्यवान् महान् ॥६२॥ गृध्रराजस्य सोदर्यः सम्पातिर्नाम गृध्रराट् । श्रुत्वा भ्रातृवधं कोपादिदं वचनमब्रवीत् ॥६३॥ यवीयान् केन म भ्राता हतः क्व च निपातितः । एतदाख्यातुमिच्छामि भवद्भिर्वानरोत्तमाः ॥ ६४ ॥ अङ्गदोऽकथयत्तस्य जनस्थाने महद्वधम् । रक्षसा भीमरूपेण त्वामुद्दिश्य यथातथम् ॥ ६५ ॥ जटायुषो वधं श्रुत्वा दुःखितः सोऽरुणात्मजः । त्वां शशंस वरारोहे वसन्तीं रावणालये ॥ ६६ ॥

शब्दस्येष्यते ॥ ५६ ॥ तेषामिति । विप्रनष्टानां बिले अदर्शनं गतानाम् ॥ ५७ ॥ ते वयमिति । कालस्य सुग्रीवकल्पितमासस्य । कपिराजस्य सुग्री वात् ॥ ५८ ॥ ५९ ॥ दृष्ट्वेत्यादिश्लोकद्वयमेकं वाक्यम् । परिदेवनकर्माह—तवेति ॥ ६० ॥ ६१ ॥ तेषामिति । स्वामिसन्देशात् मासादूर्ध्वमनागतानां

तन इति । सुग्रीववचनातुराः सुग्रीवाज्ञाभीता इत्यर्थः ॥ ५५ ॥ ५६ ॥ विप्रनष्टानां बिलनिर्गमनमार्गाद्विभ्रष्टानामित्यर्थः ॥ ५७ ॥ कालस्य सुग्रीवकल्पितमासरूप कालस्य । कपिराजस्य कपिराजात् ॥ ५८ ॥ ५९ ॥ दृष्ट्वेत्यादिसार्धमेकं वाक्यम् । अत्र द्वितीयान्तान् दृष्ट्वा पर्यदेवयदिति सम्बन्धः ॥ ६० ॥ ६१ ॥ स्वामिसन्देशात्

स०-महद्वधं महतो जटायुषो वधः महद्वधः तम् । परोपकारे प्राणत्यागान्महत्त्वम् ॥ ६५॥ त्वामाह सवरारोहे इति । वरारोहाभ्यां सहिता सवरारोहा तस्यास्सम्बुद्धिः । अतो न स इत्यस्याधिक्यम् ॥६६॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भयमित्येवंरूपात् । तेषां कार्यहेतोः ॥ ६२–६७ ॥ हृष्टाः उत्साहवन्तः । तुष्टा आनन्दवन्तः ॥ ६८ ॥ वेलोपान्तं वेला सिन्धुपूरः तस्योपान्तम् । "वेला

तस्य तद्वचनं श्रुत्वा सम्पातेः प्रीतिवर्धनम् । अङ्गदप्रमुखास्तूर्णं ततः संप्रस्थिता वयम्॥६७॥विन्ध्यादुत्थाय संप्राप्ताः सागरस्यान्तमुत्तरम् । त्वद्दर्शनकृतोत्साहा हृष्टास्तुष्टाः प्लवङ्गमाः ॥ ६८ ॥ अङ्गदप्रमुखाः सर्वे वेलोपान्तमुपस्थिताः । चिन्तां जग्मुः पुनर्भीतास्त्वद्दर्शनसमुत्सुकाः ॥ ६९ ॥ तथाऽहं हरिसैन्यस्य सागरं प्रेक्ष्य सीदतः । व्यवधूय भयं तीव्रं योजनानां शतं प्लुतः ॥ ७० ॥ लङ्का चापि मया रात्रौ प्रविष्टा राक्षसाकुला । रावणश्च मया दृष्टस्त्वं च शोकपरिप्लुता ॥ ७१ ॥ एतत्ते सर्वमाख्यातं यथावृत्तमनिन्दिते । अभिभाषस्व मां देवि दूतो दाशरथेरहम् ॥ ७२ ॥ तं मां रामकृतोद्योगं त्वन्निमित्तमिहागतम् । सुग्रीवसचिवं देवि बुध्यस्व पवनात्मजम् ॥ ७३ ॥ कुशली तव काकुत्स्थः सर्वशस्त्रभृतां वरः । गुरोराराधने युक्तो लक्ष्मणश्च सुलक्षणः ॥ ७४ ॥ तस्य वीर्यवतो देवि भर्तुस्तव हिते रतः । अहमेकस्तु संप्राप्तः सुग्रीववचनादिह ॥ ७५ ॥ मयेयमसहायेन चरता कामरूपिणा । दक्षिणा दिगनुक्रान्ता त्वन्मार्गविचयैषिणा ॥ ७६ ॥ दिष्ट्याऽहं हरिसैन्यानां त्वन्नाशमनुशोचताम् । अपनेष्यामि सन्तापं तवाभिगमशंसनात् ॥ ७७ ॥ दिष्ट्या हि मम न व्यर्थं देवि सागरलङ्घनम् । प्राप्स्याम्यहमिदं दिष्ट्या त्वद्दर्शनकृतं यशः ॥ ७८ ॥ राघवश्च महावीर्यः क्षिप्रं त्वामभिपत्स्यते । समित्रबान्धवं हत्वा रावणं राक्षसाधिपम् ॥ ७९॥

ऽम्बुधेस्तीरवृद्धचोः कालमर्यादयोरपि" इति दर्पणः ॥६९–७२॥ रामकृतोद्योगं रामकृतोत्साहम् ॥७३॥ गुरोः ज्येष्ठस्य आराधने शुश्रूषणे रतः लक्ष्मणश्च कुशली ॥ ७४ ॥ ७५ ॥ मयेयमिति । विचयैषिणा अन्वेषणेच्छुना ॥ ७६ ॥ दिष्ट्येति । तवाभिगमशंसनात् त्वत्समीपप्राप्तिकथनात् ॥ ७७–७९ ॥

मासादूर्ध्वमनागतानां वध एवेति सुग्रीववचनात् । मुमूर्षतां सताम् ॥ ६२–७६ ॥ दिष्ट्याऽहमिति । तवाभिगमशंसनात् तव समीपप्राप्तिशंसनात् । तवाधिगमशंसनादिति पाठे तव दर्शनशंसनात् ॥ ७७–७९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

'बुद्धयस्व पवनात्मजम्' इति पवनात्मजत्वमुक्तम्, तत्कथं वानरस्येत्यपेक्षायामाह–माल्यवानिति। गच्छति अगच्छत् ॥ ८० ॥ सः गोकर्णं गतः। देवर्षिभिः तत्रत्यैः दिष्टः नियुक्तः। शम्बसादनं तीर्थोपद्रवकारिणमसुरं शम्बसादनाख्यम्। उद्धरत् उदहरत्। देवर्षिप्रार्थनया अवधीदित्यर्थः ॥ ८१ ॥

माल्यवान्नाम वैदेहि गिरीणामुत्तमो गिरिः। ततो गच्छति गोकर्णं पर्वतं केसरी हरिः ॥ ८० ॥ स च देवर्षिभिर्दिष्टः पिता मम महाकपिः। तीर्थे नदीपतेः पुण्ये शम्बसादनमुद्धरत् ॥ ८१ ॥ तस्याहं हरिणः क्षेत्रे जातो वातेन मैथिलि। हनुमानिति विख्यातो लोके स्वेनैव कर्मणा॥८२॥ विश्वासार्थं तु वैदेहि भर्तुरुक्ता मया गुणाः। अचिराद् राघवो देवि त्वामितो नयिताऽनघे ॥ ८३ ॥ एवं विश्वासिता सीता हेतुभिः शोककर्शिता। उपपन्नैरभिज्ञानैर्दूतं तमवगच्छति ॥ ८४ ॥ अतुलं च गता हर्षं प्रहर्षेण च जानकी। नेत्राभ्यां वक्त्रपक्ष्मभ्यां मुमोचानन्दजं जलम् ॥८५॥ चारु तद्वदनं तस्यास्ताम्रशुक्लायतेक्षणम्। अशोभत विशालाक्ष्या राहुमुक्त इवोडुराट्॥८६॥ हनुमन्तं कपिं व्यक्तं मन्यते नान्यथेति सा। अथोवाच हनूमांस्तामुत्तरं प्रियदर्शनाम् ॥ ८७ ॥ एतत्ते सर्वमाख्यातं समाश्वसिहि मैथिलि। किं करोमि कथं वा ते रोचते प्रतियाम्यहम् ॥ ८८ ॥ हतेऽसुरे संयति शम्बसादने कपिप्रवीरेण महर्षिचोदनात्। ततोऽस्मि वायुप्रभवो हि मैथिलि प्रभावतस्तत्प्रतिमश्च वानरः ॥ ८९ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

हरिणः हरेः केसरिणः क्षेत्रे पत्न्याम् अञ्जनायां जातः पितुर्देशान्तरगमनकाले जातः। अनेनान्यक्षेत्रे कथमन्येनोत्पादनमिति शङ्का पराकृता ॥ ८२ ॥ नयिता नेता ॥ ८३ ॥ अवगच्छति अवागच्छत् ॥ ८४–८८ ॥ रामानु०–हनुमन्तमिति। मन्यते अमन्यत ॥ ८७ ॥ देवीनियुक्तार्थकरणे स्वस्य शक्तिरस्तीति

'बुद्धयस्व पवनात्मजम्' इति पवनात्मजत्वं तव प्रतिपादितम्, वानरस्य तव पवनात्मजत्वं कथमित्याकाङ्क्षायामाह–माल्यवानित्यादिना। गच्छति अगच्छत् ॥ ८० ॥ दिष्टः आदिष्टः नियुक्तः। शम्बसादन इति कश्चनासुरः। उद्धरत उदहत्, अवधीदित्यर्थः ॥ ८१ ॥ हरिणः हरेः। नकारान्तत्वमार्षम्, केसरिण इत्यर्थः ॥ ८२ ॥ नयिता नेता ॥ ८३ ॥ अवगच्छति अवागच्छत ॥ ८४–८६ ॥ मन्यते अमन्यत ॥ ८७ ॥ ८८ ॥ देवीनियुक्तार्थकरणे स्वस्य शक्तिरस्तीति

स०–ततः मत्पितुस्तद्वननार्थं गमनानन्तरम्। वायुप्रभवोऽस्मि तदवकाशे वायुना जातोऽस्मि ॥ ८९ ॥

॥१०२॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

द्योतयितुं स्वमाहात्म्यमाह–हत इति । ततः असुरवधोपकारात्॥८९॥ इति श्रीगो० श्रीरामा० शृङ्गार० सुन्दरकाण्डव्याख्याने पञ्चत्रिंशः सर्गः॥३५॥ भूय इत्यादि ॥ १ ॥ इत्थं सन्देशकथनादिना देवीं विश्वास्याभिज्ञानाङ्गुलीयकदानेन दृढं विश्वासयति–वानरोऽहमित्यादिना ॥ २ ॥ ३ ॥ गृहीत्वेति । गृहीत्वा देशान्तरादागतं बन्धुं दृष्ट्वेव स्वयं गृहीतवती । प्रेक्षमाणा । वर्तमानार्थेन शानचा दत्तदृष्टिं न विचालितवतीत्युच्यते । सा पूर्वं रावणत्वेन शङ्कित वती । भर्तुः करविभूषणं पाणिग्रहणकाले हस्तस्पृष्टमाभरणम् । करविभूषणमित्यनेन भोगातिशयात् प्रणयकोपे प्रवृत्ते परस्परमालोकनभाषणादि

भूय एव महातेजा हनुमान् मारुतात्मजः । अब्रवीत् प्रश्रितं वाक्यं सीताप्रत्ययकारणात् ॥ १ ॥
वानरोऽहं महाभागे दूतो रामस्य धीमतः । रामनामाङ्कितं चेदं पश्य देव्यङ्गुलीयकम् ॥ २ ॥
प्रत्ययार्थं तवानीतं तेन दत्तं महात्मना । समाश्वसिहि भद्रं ते क्षीणदुःखफला ह्यसि ॥ ३ ॥
गृहीत्वा प्रेक्षमाणा सा भर्तुः करविभूषणम् । भर्तारमिव सम्प्राप्ता जानकी मुदिताऽभवत् ॥ ४ ॥
चारु तद्वदनं तस्यास्ताम्रशुक्लायतेक्षणम् । अशोभत विशालाक्ष्या राहुमुक्त इवोडुराट् ॥ ५ ॥

विरहदशायां काङ्क्षिते भाषणे मानातिशयेन मौने कृते रामोऽङ्गुलीयकं भूमौ च्यावयति स्म । तदा व्याजेन च्युतमङ्गुलीयकमिति सीतयाऽभिहिते प्रणयकोपशैथिल्यात् परस्परसंश्लेषो भूयोऽप्यभूत् । एवं घटकभूतं करविभूषणं भर्तारमिव संप्राप्ता अङ्गुलीयकदर्शनात्तस्य कान्तस्य करं स्मृतवती, तत्स्मृत्या बाहुं तत्स्मरणेन तद्ग्रिहम् । एवं भावनाप्रकर्षेण तं पुरःस्थितमिव मत्वा तमालिङ्गितवती । जननीबुद्ध्या मुनिस्सम्प्राप्तेवेत्याह, जननी कृतभोगस्यावर्ण्यत्वात् । जानकी शोकहर्षाभ्यां क्लेष्वमनर्हे कुले जाता । मुदिताऽभवत् इयमिदानीं मुदिता उदर्के किं भविष्यतीति न जान

ज्ञापयितुं स्वमाहात्म्यमाह–हतेऽसुर इति ॥८९॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां पञ्चत्रिंशः सर्गः ॥ ३५ ॥ अथ दृढतरविश्वासाय रामाङ्गुलीयकं दातुमाह–भूय इति । प्रत्ययः विश्वासः ॥ १ ॥ सन्देशकथनादिना देवीं विश्वास्य अभिज्ञानाङ्गुलीयकप्रदानेनापि दृढं विश्वासयति–वानरोऽहमित्यादिना ॥ २–५ ॥

स०–क्षीणदुःखफला दुःखं तमआदिस्थं फलं येषां ते दुःखफलाः राक्षसाः । क्षीणाः दुःखफला यया निमित्तेन सा तथा । दुःखरूपं यत् फलं तत्क्षीणं यस्यां सा वा । एष्यन्निश्चयेनेदं वचनम् ॥ १ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इत्याहर्षिः ॥४ ॥ ५॥ प्रियं कृत्वा संमानं कृत्वा ॥ ६ ॥ विक्रान्त इत्यादिपदत्रयेण तद्व्युत्क्रमेण ज्ञानशक्तिबलान्युच्यन्ते । इदं राक्षसपदमिति प्रज्ञोक्ता । त्वयैकेनेति सामर्थ्यम् । प्रधर्षितामिति विक्रमः ॥ ७ ॥ ८ ॥ प्राकृतं क्षुद्रम् । संभ्रमः व्यग्रता ॥ ९ ॥ अर्हस इति । यद्यपीति निपातसमुदायो यस्मा

ततः सा ह्रीमती बाला भर्तृसन्देशहर्षिता । परितुष्टा प्रियं कृत्वा प्रशशंस महाकपिम् ॥६॥ विक्रान्तस्त्वं समर्थस्त्वं प्राज्ञस्त्वं वानरोत्तम । येनेदं राक्षसपदं त्वयैकेन प्रधर्षितम् ॥ ७ ॥ शतयोजनविस्तीर्णः सागरो मकरालयः । विक्रमश्लाघनीयेन क्रमता गोष्पदीकृतः ॥ ८ ॥ नहि त्वां प्राकृतं मन्ये वानरं वानरर्षभ । यस्य ते नास्ति संत्रासो रावणान्नापि सम्भ्रमः ॥ ९ ॥ अर्हसे च कपिश्रेष्ठ मया समभिभाषितुम् । यद्यपि प्रेषितस्तेन रामेण विदितात्मना ॥ १० ॥ प्रेषयिष्यति दुर्धर्षो रामो न ह्यपरीक्षितम् । पराक्रममविज्ञाय मत्सकाशं विशेषतः ॥ ११ ॥ दिष्ट्या च कुशली रामो धर्मात्मा सत्यसङ्गरः । लक्ष्मणश्च महातेजाः सुमित्रानन्दवर्धनः ॥ १२ ॥ कुशली यदि काकुत्स्थः किन्नु सागरमेखलाम् । महीं दहति कोपेन युगान्ताग्निरिवोत्थितः ॥ १३ ॥

दित्यर्थे । अव्ययानामनेकार्थत्वात् ॥ १०–१२ ॥ अथ प्रणयरोषेण दूतसन्निधौ रामं गर्हते–कुशलीति । काकुत्स्थः परपरिभवासहकुले जातः । अनेन परपरिभव एव परिहरणीयः न स्वीय इति नियमोऽस्ति किम् । किंनु सागरमेखलां महीं दहति । अत्र काकुत्स्थः दहति किंनु न दहतीत्यर्थः । सागरमेखलामिति विशेषणेन द्रवद्रव्यस्यैकेन कठिनद्रव्यस्य चैकेन बाणेन भवितव्यं किम् । सागरं सलिलमेव तैलं कृत्वा महीं दग्धुं समर्थो न किमित्यर्थः । यद्वा स्वपत्नीं वा सुरक्षितपरिधानां करोतीति भावः । अनादिकृतमर्यादा मही कथं दग्धुं शक्येत्यत्राह युगान्तेति । महीमर्यादा

तत इति । प्रियं कृत्वा आदरं कृत्वेत्यर्थः ॥ ६ ॥ विक्रान्तः शूरः । समर्थः देशकालोचितकृत्यचतुरः । प्राज्ञः सर्वशास्त्रतत्त्वज्ञः । पदं स्थानम् ॥ ७ ॥ ८ ॥ सन्त्रासः, समुद्रादिति शेषः ॥ ९ ॥ यद्यपीत्यवधारणे । मया समभिभाषितुम् अर्हसे यद्यपि, अर्हस्येवेत्यर्थः । कुतः ? विदितात्मना रामेण प्रेषित इति सम्बन्धः । यद्वा अप्यवधारणे । यदि यस्मात् विदितात्मना रामेण प्रेषितः तस्मात् मया समभिभाषितुमर्हस्येवेति सम्बन्धः ॥ १०–१४ ॥

स०–ह्रीमती पत्यौ यद्वृत्यौचित्यं कपिरपि ममापश्यदिति लज्जावती । **प्रियं कृत्वा** रावणादिविकल्पं विधूय प्रेमास्पदमेव कृत्वा मत्वा वा ॥ ६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तन्नयनरागपर्यन्तेवेति भावः। किं न सागरमेखलामित्यपि पाठः । काकुत्स्थः कुशली यदि तदा महीं किं न दहति । शक्तश्चेद्दहत्येव, न दहति अतो न शक्त इत्यर्थः ॥ १३ ॥ पक्षान्तरमाह—अथवेति ॥ १४ ॥ कच्चिदिति । न व्यथितः न कृशः । उत्तराणि कार्याणि मत्प्राप्तिसाधकानि

अथवा शक्तिमन्तौ तौ सुराणामपि निग्रहे। ममैव तु न दुःखानामस्ति मन्ये विपर्ययः॥ १४ ॥ कच्चिन्न व्यथितो रामः कच्चिन्न परितप्यते। उत्तराणि च कार्याणि कुरुते पुरुषोत्तमः ॥ १५ ॥ कच्चिन्न दीनः सम्भ्रान्तः कार्येषु च न मुह्यति। कच्चित् पुरुषकार्याणि कुरुते नृपतेः सुतः ॥ १६ ॥ द्विविधं त्रिविधोपायमुपायमपि सेवते। विजिगीषुः सुहृत् कच्चिन्मित्रेषु च परन्तपः ॥ १७ ॥ कच्चिन्मित्राणि लभते मित्रैश्चाप्यभिगम्यते । कच्चित् कल्याणमित्रश्च मित्रैश्चापि पुरस्कृतः ॥१८॥ कच्चिदाशास्ति देवानां प्रसादं पार्थिवात्मजः। कच्चित् पुरुषकारं च दैवं च प्रतिपद्यते ॥ १९ ॥ कच्चिन्न विगतस्नेहः प्रसादान्मयि राघवः। कच्चिन्मां व्यसनादस्मान्मोक्षयिष्यति वानर ॥ २० ॥

कच्चित्कुरुते ? ॥ १५ ॥ न दीनः कच्चित् सम्भ्रान्तः सन् कार्येषु न मुह्यति कच्चिदित्यन्वयः । पुरुषकार्याणि पुरुषेण कर्तव्यानि ॥ १६ ॥ तान्येवाह—द्विविधमिति । परन्तपो रामः मित्रेषु विषये सुहृत्सन् द्विविधं सामदानरूपमुपायमपि सेवते कच्चित् । चकारेणामित्रास्समुच्चीयन्ते । अमित्रेषु विषये विजिगीषुस्सन् त्रिविधोपायं दानभेददण्डान् सेवते प्रयुङ्क्ते कच्चित् ?। सुहृत्सु कदाचिदपि भेददण्डौ न कार्यौ, शत्रुषु न सामेति भावः । योजनान्तरे विजिगीषुसुहृत्पदयोः प्रयोजनं मृग्यम् ॥ १७ ॥ अभिगम्यते लभ्यते । मित्रस्य कंचिदुपकारं कृत्वा स्वयमुपकारं मित्रादपेक्षते कच्चिदित्यर्थः । कल्याणमित्रः पुरस्कृतमित्र इत्यर्थः ॥ १८ ॥ आशास्ति आशास्ते । पुरुषकारं स्वबलम् । एकैकस्यानर्थहेतुत्वादिति भावः ॥ १९ ॥ २० ॥

कच्चिदिति । उत्तराणि च कार्याणि पुरुषकारान् ॥ १५ ॥ दीनो न सम्भ्रान्त इत्यनुषङ्गः ॥ १६ ॥ द्विविधमिति । सुहृत परंतपो रामः विजिगीषुः सन त्रिविधोपायं सामदानभेदरूपमुपायम् । उपायमपि दण्डोपायमपि । मित्रेषु चकारादमित्रेषु च द्विविधं यथा भवति तथा सेवते कच्चित ? । मित्रेषु सामदाने, अमित्रेषु भेददण्डौ चेत्येवं विभज्य प्रयुङ्क्ते कच्चित ? ॥ १७ ॥ मित्राणि लभते स्वयत्नेन मित्रैश्च स्वयत्नतोऽभिगम्यते । कल्याणमित्रः सौमित्रः मित्रैः पुरस्कृतः बहुमतः कच्चित ? ॥१८॥ आशास्ति आशास्ते, प्रार्थयत इत्यर्थः ॥ १९ ॥ २० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सुखानामिति । अनूचित इति दीर्घ आर्षः । उत्तरम् उत्कृष्टम् ॥२१॥ रामानु०–सुखानामिति। अनुचित एवानौचितः । "प्रज्ञादिभ्यश्च" इति स्वार्थे अणूप्रत्ययः । उत्तरं दुःखम उत्कृष्टं दुःखम् ॥२१॥ २२ ॥ मन्निमित्तेन मया हेतुना । अन्यमनाः कार्यान्तरासक्तः ॥ २३ ॥ कच्चिदक्षौहिणीमिति । ध्वजिनीं सेनाम् ॥ २४–२७ ॥

सुखानामुचितो नित्यमसुखानामनूचितः । दुःखमुत्तरमासाद्य कच्चिद्रामो न सीदति ॥ २१ ॥ कौसल्यायास्तथा कच्चित् सुमित्रायास्तथैव च । अभीक्ष्णं श्रूयते कच्चित् कुशलं भरतस्य च ॥ २२ ॥ मन्निमित्तेन मानार्हः कच्चिच्छोकेन राघवः । कच्चिन्नान्यमना रामः कच्चिन्मां तारयिष्यति ॥ २३ ॥ कच्चिदक्षौहिणीं भीमां भरतो भ्रातृवत्सलः । ध्वजिनीं मन्त्रिभिर्गुप्तां प्रेषयिष्यति मत्कृते ॥ २४ ॥ वानराधिपतिः श्रीमान् सुग्रीवः कच्चिदेष्यति । मत्कृते हरिभिर्वीरैर्वृतो दन्तनखायुधैः ॥ २५ ॥ कच्चिच्च लक्ष्मणः शूरः सुमित्रानन्दवर्धनः । अस्त्रविच्छरजालेन राक्षसान् विधमिष्यति॥२६॥रौद्रेण कच्चिदस्त्रेण ज्वलता निहतं रणे। द्रक्ष्याम्यल्पेन कालेन रावणं ससुहृज्जनम्॥२७॥ कच्चिन्न तप्तेमसमानवर्णं तस्याननं पद्मसमानगन्धि । मया विना शुष्यति शोकदीनं जलक्षये पद्ममिवातपेन ॥ २८ ॥ धर्मापदेशात्त्यजतश्च राज्यं मां चाप्यरण्यं नयतः पदातिम् । नासीद्व्यथा यस्य न भीर्न शोकः कच्चिच्च धैर्यं हृदये करोति ॥ २९ ॥

हेमशब्देन तद्वर्ण उच्यते । अभेदेन हेमवत्स्पृहणीयामित्यर्थः । मया विनेति जलक्षयस्थानम् । शोकदीनमित्यातपस्थानम् ॥ २८ ॥ धर्मापदेशाद्धर्मोदेशार्थम्, धर्ममुद्दिश्येत्यर्थः । यद्वा धर्मव्याजाद्धेतोः । राज्यत्यागाद्व्यथा नासीत् । अरण्यसञ्चाराद्भीर्नासीत् । मत्पादसञ्चाराच्छोको नासीत् । सः

सुखानामिति । अनुचित एव अनौचितः । उत्तरं दुःखम् उत्कृष्टं दुःखम् ॥ २१ ॥ २२ ॥ शोकेन राघव इति । परितप्यत इति शेषः ॥ २३–२७ ॥ हेमसमानवर्णं हेमवर्णवत् स्पृहणीयवर्णमित्यर्थः ॥ २८ ॥ धर्मापदेशात् धर्मोद्देशेन, धर्ममुद्दिश्येति यावत् । राज्यत्यागात् व्यथा मनश्चलनम्, अरण्यसञ्चाराद्भीतिः, सीतापाद सञ्चाराच्छोकः यस्य नास्ति सः हृदये धैर्यं करोति कच्चिदिति सम्बन्धः ॥ २९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तादृशधैर्ययुक्तो रामो मद्विश्लेषेऽपि हृदये धैर्यं करोति कश्चित् ? ॥ २९ ॥ धैर्याकरणे हेतुमाह--न चास्येति । प्रवृत्तिं मदानयनवार्ताम् । प्रणयरोषपक्षे किमेष पितृवचनपरिपालनाय वनं प्राप्तः ? न, किन्तु ममैव हिंसायै इति भावः । रामस्यैव दोषः न ममेति सीतयोक्ते वयमेव किं सम्यक् स्थितवन्तः रामविश्लेषानन्तरक्षणे न तनुस्त्यक्ता हीत्येवं हनुमदाशयं ज्ञात्वाऽऽह--न चास्येति । रामस्य मात्रादयः अन्यो बन्धुश्च स्नेहाद्विशिष्टा न भवन्ति । लोके

न चास्य माता न पिता च नान्यः स्नेहाद्विशिष्टोऽस्ति मया समो वा । तावत्त्वहं दूत जिजीविषेयं यावत् प्रवृत्तिं शृणुयां प्रियस्य ॥३०॥ इतीव देवी वचनं महार्थं तं वानरेन्द्रं मधुरार्थमुक्त्वा । श्रोतुं पुनस्तस्य वचोऽभिरामं रामार्थयुक्तं विरराम रामा ॥३१॥ सीताया वचनं श्रुत्वा मारुतिर्भीमविक्रमः । शिरस्यञ्जलिमाधाय वाक्यमुत्तरमब्रवीत्॥३२

कस्यचिन्माता पिता भ्रातेत्येवं स्नेहो विसृत्वरो भवति । नचैवं रामस्य मात्रादिषु संभावितः । सर्वोऽपि मय्येकमार्गः कृतः । यावत्प्रियस्य प्रवृत्तिं शृणुयां शृणोमि तावज्जिजीविषेयं जीवेयम् । इच्छाया इष्यमाणप्रधानत्वादिष्यमाणं जीवनमिहाभिधीयते । रामः ' न मांसं राघवो भुङ्क्ते' इत्युक्तरीत्या भोजनम् ' अनिद्रः सततं रामः' इति निद्रां च हित्वा समुद्रं बद्ध्वा समागच्छन् तापार्तैं प्रपां गते तस्यां भिन्नपानीयपात्रायां सत्यामिव मयि नष्टायां न जीवेत् । अतस्तदागमनपर्यन्तं मया जीवितव्यं परतन्त्रशरीरत्वात् । तदागमनानन्तरमपि यदि जीविष्यामि तदेत्थं वदेदिति भावः । एतावत्पर्यन्तं वानरेति संबोध्य संप्रति दूतेत्याह, रामविषयप्रणयरोषस्य दूतपर्यन्तं व्यापनात् । तेन प्रहितः खलु भवानपीति भावः । प्रणयरोषाभावपक्षेपि--न चास्येति । अस्य माता चास्मिन् स्नेहात् मत्तः न विशिष्टा मया न समा च । यथाऽहमस्मिन् स्निग्धा तथा नान्य इत्यर्थः । एतदेवोत्तरार्धेन समर्थयति तावदिति ॥ ३० ॥ इतीव पूर्वं कतिपयानर्थान् विविच्योक्तवान्, संप्रति प्रणयधारासूक्ष्ममृषीणामपदं हि, तत इतीवेत्याह । देवी वल्लभाया व्यवहारो बहिष्ठानां न प्रतिभाति हि । वचनं महार्थं न केवलं बहिष्ठानाम् देशिकानामस्माकमपीत्यर्थः, महार्थमित्युक्तेः । तं वानरेन्द्रम् सुग्रीवस्य शेषत्वेऽभिषिक्तत्वेऽपि पारतन्त्र्ये हनुमानभिषिक्त इत्यर्थः । मधुरार्थं माधुर्येण मध्ये हनुमान्न वक्तुमारभतेति भावः । उक्त्वा स तदीयाश्च यथाऽभिवर्धन्ते

इदानीं धैर्याकरणे किं कारणमित्याशङ्क्य मद्वियोग एव कारणमित्याशयेनाह--न चास्येति । अस्य रामस्य अस्मिन् समये माता च स्नेहान्मत्तो विशिष्टा मया न समा च यथा अहमस्मि तथा पिता च न भवतीत्यर्थः । अत एव प्रवृत्तिं मदानयनोद्योगवार्ताम् ॥ ३० ॥ रामार्थयुक्तं राम एवाभिधेयः तद्युक्तम् ॥ ३१ ॥ ३२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तथोक्त्वा । श्रोतुं पुनस्तस्य वचोऽभिरामं स्ववचनानुरूपोत्तरं श्रोतुम् । रामार्थयुक्तं रामप्रयोजनयुक्तम्, रामरूपाभिधेययुक्तं वा । विरराम स्वयं चिर भाषणात् स्वामिन्यां भाषमाणायां मध्ये भृत्येनोक्त्ययोगाच्च तूष्णींभूतस्यावकाशप्रदानमकरोत् । रामा पारम्पर्य्यं विना साक्षाद्वचःसौन्दर्यदर्शनं रामेण न लब्धं हीति मुनिः खिद्यति॥३१॥३२॥ न त्वामिति । रामः "न जीवेयं क्षणमपि विना तामसितेक्षणाम्" इत्यध्यवसायी कथं नागच्छेत् । कमललोचने

न त्वामिहस्थां जानीते रामः कमललोचने। तेन त्वां नानयत्याशु शचीमिव पुरन्दरः ॥ ३३ ॥ श्रुत्वैव तु वचो मह्यं क्षिप्रमेष्यति राघवः । चमूं प्रकर्षन् महतीं हर्यृक्षगणसङ्कुलाम् ॥ ३४ ॥ विष्टम्भयित्वा बाणौघैरक्षोभ्यं वरुणालयम् । करिष्यति पुरीं लङ्कां काकुत्स्थः शान्तराक्षसाम् ॥३५॥ तत्र यद्यन्तरा मृत्युर्यदि देवाः सहासुराः । स्थास्यन्ति पथि रामस्य स तानपि वधिष्यति ॥ ३६ ॥ तवादर्शनजेनार्ये शोकेन स परिप्लुतः । न शर्म लभते रामः सिंहार्दित इव द्विपः ॥ ३७ ॥ मलयेन च विन्ध्येन मेरुणा मन्दरेण च । दर्दुरेण च ते देवि शपे मूलफलेन च ॥ ३८ ॥ यथा सुनयनं वल्गु बिम्बोष्ठं चारुकुण्डलम् । मुखं द्रक्ष्यसि रामस्य पूर्णचन्द्रमिवोदितम् ॥ ३९ ॥

त्वन्नयनसौन्दर्यं दर्पणतलेऽपि किन्न दृष्टवती भवती । एतत्सौन्दर्यवतीं कथं त्वां विना स तिष्ठेत् । तेन अनेन हेतुना । आशु त्वां नानयति । शचीं पुरन्दर इव । अनुह्लादहस्तगतां शचीमिन्द्रः कञ्चित्कालमविज्ञाय ज्ञानानन्तरं यथा आनीतवान् तथेति भावः ॥ ३३ ॥ मह्यं मम । व्यत्ययेन षष्ठ्यर्थे चतुर्थी ॥ ३४ ॥ समुद्रं कथमतिक्रमिष्यतीत्यत्राह–विष्टम्भयित्वेति । विष्टम्भयित्वा स्तब्धं कृत्वेत्यर्थः ॥ ३५ ॥ तत्रेति । स्थास्यन्ति, प्रतिबन्धकतयेति शेषः ॥ ३६ ॥ ३७॥ गिरीणां स्वजीवनस्थानत्वात्तैः शपति–मलयेनेति । दर्दुरो नाम मलयपरिसरवर्ती चन्दनप्रभवः कश्चित्पर्वतः ॥३८॥ यथेति । तथा

न त्वामिति । शचीं पुरन्दर इवेति । अनुह्लादनीतां शचीं पुरन्दरः कञ्चित्कालमविज्ञाय ततो ज्ञात्वा यथा आनीतवान् तद्वदित्यर्थः ॥ ३३ ॥ मह्यं मम ॥ ३४ ॥ विष्टम्भयित्वा अपविध्येत्यर्थः ॥ ३५ ॥ तत्र त्वदानयनरूपकार्ये । मृत्युर्यदि अन्तरा पथि रामस्य स्थास्यति, देवा यदि स्थास्यन्ति, विघ्नकारित्वेनेति शेषः । तानपि वधिष्यतीति योजना ॥ ३६ ॥ ३७ ॥ स्वोक्तार्थे देवीविश्वासार्थं स्वोपजीवनिवासफलमूलादिना शपथं करोति–दर्दुरेणेति । दर्दुरेण पर्वतेन यथा रामस्य मुखं द्रक्ष्यसि अस्मिन्नर्थे दर्दुरादिना शपे विश्वासयामीति श्लोकत्रयस्य सम्बन्धः ॥ ३८ ॥ ३९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शप इति पूर्वेणान्वयः ॥ ३९ ॥ क्षिप्रमिति । नाकपृष्ठो नाम इन्द्रस्यासाधारणस्वर्गस्थानविशेषः ॥ ४० ॥ न मांसमिति । "दृङ्मनःसङ्गसङ्कल्पजागराः कृशताऽरतिः । ह्रीत्यागोन्मादमूर्च्छान्ता इत्यनङ्गदशा दश ॥" इति दशावस्थास्वरतिरनेनोच्यते । मांसाद्यभोजनम् अरत्या ततः पूर्वं तद्भोजनोक्तेः । वन्यं वने भवं कन्दमूलादिकम् । सुविहितं वानप्रस्थयोग्यत्वेन विहितम् । भक्तम् अन्नम् । पञ्चमं प्रातःसङ्गवमध्याह्नापराह्णसायंरूपेषु कालेषु पञ्चमकालिकं

क्षिप्रं द्रक्ष्यसि वैदेहि रामं प्रस्रवणे गिरौ । शतक्रतुमिवासीनं नाकपृष्ठस्य मूर्धनि ॥ ४० ॥ न मांसं राघवो भुङ्क्ते न चापि मधु सेवते । वन्यं सुविहितं नित्यं भक्तमश्नाति पञ्चमम् ॥ ४१ ॥ नैव दंशान्न मशकान् न कीटान्न सरीसृपान् । राघवोऽपनयेद्वात्रात् त्वद्गतेनान्तरात्मना ॥ ४२ ॥ त्यं ध्यानपरो रामो नित्यं शोकपरायणः । नान्यच्चिन्तयते किञ्चित् स तु कामवशं गतः ॥ ४३ ॥ अनिद्रः सततं रामः सुप्तोऽपि च नरोत्तमः । सीतेति मधुरां वाणीं व्याहरन् प्रतिबुद्ध्यते ॥ ४४ ॥ दृष्ट्वा फलं वा पुष्पं वा यद्वाऽन्यत् सुमनोहरम् । बहुशो हा प्रियेत्येवं श्वसंस्त्वामभिभाषते ॥ ४५ ॥

शरीरधारणमात्रोपयुक्तं भुङ्क्त इत्यर्थः ॥ ४१ ॥ अथ मनःसङ्गावस्थामाह—नैवेति । दंशास्तु वनमाक्षिकाः तान् । मशकांश्चेत्यनेन दंशमशकापरिज्ञानमुक्तम् । कीटसरीसृपोक्त्या उपरिशरीरं चरतामनिवृत्तिरुच्यते । तत्र हेतुः त्वद्गतेनान्तरात्मना । परकायप्रविष्टस्य कथं त्यक्तशरीरविकृतिज्ञानम् ? तत्र स्थितः खलु तत्रत्यपीडां ज्ञास्यतीति भावः ॥४२॥४३॥ तथाऽस्य जागरावस्थामाह—अनिद्र इति । अनिद्रः सततं रामः निद्रया सर्वदा कालक्षेपार्होऽपि सन्तमनिद्रोऽभूत् । सुप्तोऽपि चेत्यनेन परगतार्थानुसन्धानाभाव उच्यते । नरोत्तमः अभिमतविश्लेषे तथाऽवस्थानमेव हि पुरुषोत्तमस्य लक्षणमिति

नागराजस्य ऐरावतस्य । नाकपृष्ठस्येति पाठे सर्वोपरीत्यर्थः ॥४०॥ वन्यं मूलफलादिकम् । सुविहितं परिग्राह्यत्वेन आरण्यकशास्त्रचोदितम । भक्तम् अन्नम् । पञ्चमं पञ्चानामन्नानां पूरणम् । वानप्रस्था हि मूलफलादिकं पञ्चधा कृत्वा देवपितृतिथिभूतेभ्यस्तद्भागान् दत्त्वा पञ्चमं स्वयं भुञ्जते । पञ्चमकालसिद्धं पञ्चममिति वा । प्रातस्सङ्गवमध्याह्नापराह्णसायाह्नेषु पंचसु कालेषु चतुरो भोजनकालानतीत्य पञ्चमे काले भुङ्क्त इत्यर्थः । यद्वा "षोडशारण्यवासिनः" इत्युक्तवानप्रस्थभोज्यस्य पञ्चमांशं भुङ्क्ते । अनेन रामस्यात्यल्पाहारतोक्ता ॥ ४१-४३ ॥ अनिद्र एव कथञ्चित्सुप्तोऽपीति सम्बन्धः ॥ ४४-४६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भावः । सीतेति अप्राकृतसौन्दर्याद्यनुसंधानेन वासनावशाद्विलपति । मधुरां वाणीम् वासनावशाद्विलपत्यपि शब्दस्वभावाद्रसना जलस्यन्दिनी भवतीत्यर्थः । प्रतिबुद्धचते क्लेशहीनदशाविगमात्पुनरपि बाधकोद्दीपनसन्दर्शनेन बाधार्हः स्थित इत्यर्थः ॥ ४४–४६ ॥ सा रामेति । रामसङ्कीर्तनवीतशोकाकश्चिच्छोकः सीतायाः रामविहरेण कश्चिच्छोकः । तत्राद्यो हनुमदुक्त्या निवृत्तः, द्वितीयस्तु वर्तत इत्याह रामस्य शोकेन समानशोका । तद्विरहकृत

स देवि नित्यं परितप्यमानस्त्वामेव सीतेत्यभिभाषमाणः । दृढव्रतो राजसुतो महात्मा तवैव लाभाय कृतप्रयत्नः ॥ ४६ ॥ सा रामसङ्कीर्तनवीतशोका रामस्य शोकेन समानशोका । शरन्मुखे साम्बुदशेषचन्द्रा निशेव वैदेहसुता बभूव ॥ ४७ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

सीता तद्वचनं श्रुत्वा पूर्णचन्द्रनिभानना । हनूमन्तमुवाचेदं धर्मार्थसहितं वचः ॥ १ ॥
अमृतं विषसंसृष्टं त्वया वानर भाषितम् । यच्च नान्यमना रामो यच्च शोकपरायणः ॥ २ ॥
ऐश्वर्ये वा सुविस्तीर्णे व्यसने वा सुदारुणे । रज्ज्वेव पुरुषं बद्ध्वा कृतान्तः परिकर्षति ॥ ३ ॥

त्वेन तत्तुल्यशोका । अधिकशोकस्तु निवृत्त इति भावः । यद्वा रामसङ्कीर्तनेन वीतशोकापि 'नैव दंशान्न मशकान्' इत्यादिश्रवणेन रामतुल्यशोका प्रकाशाप्रकाशशरन्मुखनिशेवाभूदित्यर्थः ॥ ४७ ॥ इति श्रीगोविन्दराज० श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षट्त्रिंशः सर्गः ॥३६॥ सीतेत्यादि ॥ १ ॥ अमृतमिति । यच्च नान्यमना इत्यमृतत्वे हेतुः । यच्च शोकपरायण इति विषसंसृष्टत्वे ॥ २ ॥ रामवियोगो न स्वबुद्धिकृत

सा रामेति । रामसङ्कीर्तनवीतशोका 'अनिद्रः सततं रामः' इति रामसङ्कीर्तनेन वीतशोका । 'न मांसं राघवो भुङ्क्ते' इत्युक्तशोकेन हेतुना समानशोका सा साम्बुदशेषः चन्द्रो यस्यास्सा साम्बुदशेषचन्द्रा प्रकाशाप्रकाशयुक्ता निशेव बभूवेत्यर्थः ॥ ४७ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां षट्त्रिंशः सर्गः ॥ ३६ ॥ ॥ १ ॥ यच्च अनन्यमना इति वाक्यमाख्यायते तदमृतं, यच्च शोकपरायण इति वाक्यमाख्यायते तद्विषम् ॥ २ ॥ कृतान्तः दैवम् ॥ ३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इत्याह–ऐश्वर्य इति। कृतान्तः दैवम् ॥ ३ ॥ विधिः दैवम्। असंहार्यः अनिवार्यः ॥ ४–७ ॥ दशमो मासः दशममासान्तः ॥ ८ ॥ निर्यातनं प्रत्य

विधिर्नूनमसंहार्यः प्राणिनां प्लवगोत्तम। सौमित्रिं मां च रामं च व्यसनैः पश्य मोहितान् ॥ ४ ॥ शोकस्यास्य कदा पारं राघवोऽधिगमिष्यति। प्लवमानः परिश्रान्तो हतनौः सागरे यथा ॥ ५ ॥ राक्षसानां वधं कृत्वा सूदयित्वा च रावणम्। लङ्कामुन्मूलितां कृत्वा कदा द्रक्ष्यति मां पतिः ॥ ६ ॥ स वाच्यः सुन्त्वरस्वेति यावदेव न पूर्यते। अयं संवत्सरः कालस्तावद्धि मम जीवितम् ॥ ७ ॥ वर्तते दशमो मासो द्वौ तु शेषौ प्लवङ्गम। रावणेन नृशंसेन समयो यः कृतो मम ॥ ८ ॥ विभीषणेन च भ्रात्रा मम निर्यातनं प्रति। अनुनीतः प्रयत्नेन न च तत् कुरुते मतिम् ॥ ९ ॥ मम प्रतिप्रदानं हि रावणस्य न रोचते। रावणं मार्गते सङ्ख्ये मृत्युः कालवशं गतम् ॥ १० ॥ ज्येष्ठा कन्याऽनला नाम विभीषणसुता कपे। तया ममेदमाख्यातं मात्रा प्रहितया स्वयम् ॥ ११ ॥ [अविन्ध्यो नाम मेधावी विद्वान् राक्षसपुङ्गवः। द्युतिमाञ्छीलवान् वृद्धो रावणस्य सुसंमतः ॥ रामक्षयमनुप्राप्तं रक्षसां प्रत्य चोदयत्। न च तस्य स दुष्टात्मा शृणोति वचनं हितम् ॥] असंशयं हरिश्रेष्ठ क्षिप्रं मां प्राप्स्यते पतिः। अन्तरात्मा हि मे शुद्धस्तस्मिंश्च बहवो गुणाः ॥ १२ ॥ उत्साहः पौरुषं सत्त्वमानृशंस्यं कृतज्ञता। विक्रमश्च प्रभावश्च सन्ति वानर राघवे ॥ १३ ॥ चतुर्दश सहस्राणि राक्षसानां जघान यः। जनस्थाने विना भ्रात्रा शत्रुः कस्तस्य नोद्विजेत् ॥ १४ ॥

र्पणम् ॥ ९–१२ ॥ उत्साह इति। लोकोत्तरेषु कार्येषु स्थेयान् प्रयत्न उत्साहः। पौरुषं तादृक्कार्यकरणम्। सत्त्वं बलम्। आनृशंस्यम् अक्रूरत्वम्। कृतज्ञता उपकारज्ञत्वम्। विक्रमः शौर्यम्। प्रभावः शक्तिः ॥ १३ ॥ १४ ॥

असंहार्यः अनिवार्यः ॥ ४-८ ॥ निर्यातनं प्रत्यर्पणम्। तत निर्यातनं प्रति ॥ ९-११ ॥ पतिः प्राप्स्यते। कुतः ? अन्तरात्मेति ॥ १२ ॥ गुणानेवाह–उत्साह इति। लोकोत्तरेषु कार्येषु स्थेयान् प्रयत्नः उत्साहः। पौरुषं तादृक्कार्यकरणम्। सत्त्वं बलम्। आनृशंस्यम् अक्रौर्यम्। विक्रमः शौर्यम्। प्रभावः शक्तिः ॥ १३ ॥ तस्य

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न स इति । तुलयितुं चालयितुम् ॥ १५-२२ ॥ त्वद्दर्शनेति । नाकराजस्य मूर्धनि नाकपृष्ठसंज्ञस्य मूर्धनि । नगराजस्येति पाठे मेरोरित्यर्थः॥२३॥

न स शक्यस्तुलयितुं व्यसनैः पुरुषर्षभः । अहं तस्य प्रभावज्ञा शक्रस्येव पुलोमजा ॥ १५ ॥ शरजालांशुमाञ्छूरः कपेरामदिवाकरः । शत्रुरक्षोमयं तोयमुपशोषं नयिष्यति ॥ १६ ॥ इति संजल्पमानां तां रामार्थे शोककर्शिताम् । अश्रुसम्पूर्णनयनामुवाच वचनं कपिः ॥१७॥ कृत्वैव तु वचो मह्यं क्षिप्रमेष्यति राघवः । चमूं प्रकर्षन् महतीं हर्यृक्ष गणसङ्कुलाम् ॥१८॥ अथवा मोचयिष्यामि त्वामद्यैव वरानने । अस्माद्दुःखादुपारोह मम पृष्ठमनिन्दिते ॥ १९ ॥ त्वां तु पृष्ठगतां कृत्वा सन्तारिष्यामि सागरम् । शक्तिरस्ति हि मे वोढुं लङ्कामपि सरावणाम् ॥ २० ॥ अहं प्रस्रवण स्थाय राघवायाद्य मैथिलि । प्रापयिष्यामि शक्राय हव्यं हुतमिवानलः ॥ २१ ॥ द्रक्ष्यस्यद्यैव वैदेहि राघवं सह लक्ष्मणम् । व्यवसायसमायुक्तं विष्णुं दैत्यवधे यथा ॥ २२ ॥ त्वद्दर्शनकृतोत्साहमाश्रमस्थं महाबलम् । पुरन्दर मिवासीनं नाकराजस्य मूर्धनि ॥ २३ ॥ पृष्ठमारोह मे देवि मा विकांक्षस्व शोभने । योगमन्विच्छ रामेण शशाङ्केनेव रोहिणी ॥ २४ ॥ कथयन्तीव चन्द्रेण सूर्येण च महार्चिषा । मत्पृष्ठमधिरुह्य त्वं तराकाशमहार्णवौ ॥ २५ ॥ न हि मे संप्रयातस्य त्वामितो नयतोऽङ्गने । अनुगन्तुं गतिं शक्ताः सर्वे लङ्कानिवासिनः ॥ २६ ॥

मा विकाङ्क्षस्व मोपेक्षिष्ठाः ॥ २४ ॥ कथयन्तीवेति । चन्द्रेण कथयन्तीव चन्द्रेण भाषमाणेव तरेत्यन्वयः ॥ २५-२७ ॥

तस्मात् ॥ १४ ॥ तुलयितुं चलयितुम् ॥ १५-१९ ॥ समुद्रलङ्घनपूर्वकं देवीप्रापणे स्वस्य महती शक्तिरस्तीति देवीं विश्वासयति-त्वां हीति ॥ २०-२३ ॥ मा विकाङ्क्षस्व मोपेक्षिष्ठा इत्यर्थः ॥ २४ ॥ मत्पृष्ठमधिरुह्य महार्चिषा चन्द्रेण सूर्येण च कथयन्तीव सम्भाषमाणेव आकाशमहार्णवौ तरेति सम्बन्धः । तथा अत्युन्नत

स०-त्वत्पृष्ठारोहणे किं फलमित्यत आह-**कथयन्तीति** । त्वं मत्पृष्ठारोहिणीति रोहिणी अतिसुखात्मकत्वाच्छशी रामः । यद्वा शशी रामः "नक्षत्राणामहं शशी" इति श्रीभगवद्वुक्तेः । कथयन्तीव सङ्गमिष्यसि रामेण सङ्गन्तव्यमित्यालापनसमय एव सङ्गमिष्यसि । अनेनातित्वरा द्योत्यते ॥ २५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मैथिली त्विति। हर्षविस्मितसर्वाङ्गी हर्षेण पुलकितसर्वाङ्गी ॥ २८–३१ ॥ न मे जानाति सत्त्वं वा प्रभावं वाऽसितेक्षणा । तस्मात्पश्यतु वैदेही

यथैवाहमिह प्राप्तस्तथैवाहमसंशयः । यास्यामि पश्य वैदेहि त्वामुद्यम्य विहायसम् ॥२७॥ मैथिली तु हरिश्रेष्ठात् श्रुत्वा वचनमद्भुतम् । हर्षविस्मितसर्वाङ्गी हनुमन्तमथाब्रवीत् ॥ २८ ॥ हनुमन् दूरमध्वानं कथं मां वोढुमिच्छसि । तदेव खलु ते मन्ये कपित्वं हरियूथप ॥२९॥ कथं वाऽल्पशरीरस्त्वं मामितो नेतुमिच्छसि । सकाशं मानवेन्द्रस्य भर्तुर्मे प्लवगर्षभ ॥३०॥ सीताया वचनं श्रुत्वा हनुमान् मारुतात्मजः। चिन्तयामास लक्ष्मीवान् नवं परिभवं कृतम् ॥३१॥ न मे जानाति सत्त्वं वा प्रभावं वाऽसितेक्षणा । तस्मात् पश्यतु वैदेही यद्रूपं मम कामतः ॥ ३२ ॥ इति सञ्चिन्त्य हनुमांस्तदा प्लवगसत्तमः । दर्शयामास वैदेह्याः स्वरूपमरिमर्दनः ॥ ३३ ॥ स तस्मात् पादपाद्धीमा नाप्लुत्य प्लवगर्षभः । ततो वर्धितुमारेभे सीताप्रत्ययकारणात् ॥ ३४ ॥ मेरुमन्दरसङ्काशो बभौ दीप्तानलप्रभः । अग्रतो व्यवतस्थे च सीताया वानरोत्तमः ॥ ३५ ॥ हरिः पर्वतसङ्काशस्ताम्रवक्त्रो महाबलः । वज्रदंष्ट्रनखो भीमो वैदेहीमिदमब्रवीत् ॥ ३६ ॥ सपर्वतवनोद्देशां साट्टप्राकारतोरणाम् । लङ्कामिमां सनाथां वा नयितुं शक्तिरस्ति मे ॥ ३७ ॥ तदवस्थाप्यतां बुद्धिरलं देवि विकांक्षया । विशोकं कुरु वैदेहि राघवं सहलक्ष्मणम् ॥ ३८ ॥

यद्रूपं मम कामतः ॥ इति पाठः । अन्यथापाठे वक्ष्यमाणेन विरोधस्स्यात् ॥३२॥ स्वरूपं स्वस्य शरीरम् ॥ ३३ ॥ एतदेवाह–स तस्मादिति । अयं श्लोको वर्धनार्थं वृक्षादवरोहणं दर्शयति स्म। अनेन सोऽवतीर्य द्रुमादिति पूर्वं द्रुमाग्रात्सीतासमीपस्थशाखायामवतरणमुक्तम्, अत्र भूमाविति बोध्यम् ॥ ३४ ॥ मेरुमन्दरेति । अग्रतो व्यवतस्थे, सम्भाषणाय वृक्षमूलगतो बभूवेत्यर्थः ॥ ३५–३७ ॥ अवस्थाप्यतां निश्चलीक्रियताम् । विकांक्षया

पथा त्वां गृहीत्वा गच्छामीति भावः ॥ २५–२७ ॥ मैथिलीति । हर्षविस्मितसर्वाङ्गी हर्षेण पुलकितसर्वाङ्गीत्यर्थः ॥ २८–३३ ॥ पादपात् पादपमूलात् आप्लुत्य शरीरवर्धनवेगकृतशाखाभङ्गध्वनिना राक्षस्यो ज्ञास्यन्तीति मत्वा अन्यत्रापसृतवानित्यर्थः ॥ ३४ ॥ अग्रतो योग्यप्रदेशे व्यवतस्थे ॥ ३५–३७ ॥ विकाङ्क्षया

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

उपेक्षया ॥ ३८-४१ ॥ संप्रधार्या विचारणीया ॥ ४२ ॥ स्वप्रापणे प्रधानं दोषं हृदि कृत्वा आपाततो दोषमाह-अयुक्तमिति ॥ ४३ ॥ उपर्युपरि

तं दृष्ट्वा भीमसङ्काशमुवाच जनकात्मजा । पद्मपत्रविशालाक्षी मारुतस्यौरसं सुतम् ॥ ३९ ॥ तव सत्त्वं बलं चैव विजानामि महाकपे। वायोरिव गतिं चापि तेजश्चाग्नेरिवाद्भुतम् ॥४०॥ प्राकृतोऽन्यः कथं चेमां भूमिमागन्तुमर्हति। उदधेरप्रमेयस्य पारं वानरपुङ्गव ॥ ४१ ॥ जानामि गमने शक्तिं नयने चापि ते मम। अवश्यं संप्रधार्याशु कार्य सिद्धिर्महात्मनः॥ ४२ ॥ अयुक्तं तु कपिश्रेष्ठ मम गन्तुं त्वयाऽनघ। वायुवेगसवेगस्य वेगो मां मोहयेत्तव ॥ ४३ ॥ अहमाकाशमापन्ना ह्युपर्युपरि सागरम्। प्रपतेयं हि ते पृष्ठाद्भयाद् वेगेन गच्छतः ॥ ४४ ॥ पतिता सागरे चाहं तिमिनक्रझषाकुले। भवेयमाशु विवशा यादसामन्नमुत्तमम्॥ ४५ ॥ न च शक्ष्ये त्वया सार्धं गन्तुं शत्रुविनाशन। कलत्रवति सन्देहस्त्वय्यपि स्यादसंशयः॥४६॥ ह्रियमाणां तु मां दृष्ट्वा राक्षसा भीमविक्रमाः। अनुगच्छेयुरादिष्टा रावणेन दुरात्मना ॥ ४७ ॥ तैस्त्वं परिवृतः शूरैः शूलमुद्गरपाणिभिः। भवेस्त्व संशयं प्राप्तो मया वीर कलत्रवान् ॥ ४८ ॥ सायुधा बहवो व्योम्नि राक्षसास्त्वं निरायुधः। कथं शक्ष्यसि संयातुं मां चैव परिरक्षितुम् ॥ ४९ ॥

सागरांमिति। "उपर्यध्यधसस्सामीप्ये" इति द्विर्वचनम्। "धिगुपर्यादिषु त्रिषु" इति द्वितीया ॥ ४४ ॥ यादसां जलजन्तूनाम् ॥ ४५ ॥ कलत्रवति रक्ष्यवति त्वयि सन्देहः स्यात्, मयि रक्ष्यायां त्वयि विपत्सन्देहः स्यादित्यर्थः ॥ ४६ ॥ एतदेव प्रपञ्चयति-ह्रियमाणामित्यादिना ॥ ४७ ॥ त्वं तैः परिवृतो भवेः। कलत्रवान् रक्ष्यवान् त्वं संशयं प्राप्तश्च भवेरिति योजना ॥ ४८ ॥ सायुधा इति। संयातुं सम्यग्योद्धुम् ॥ ४९ ॥

उपेक्षया. अश्रद्धयेत्यर्थः ॥ ३८-४१ ॥ अहमिति। सागरं सागरोल्लङ्घनमुद्दिश्येत्यर्थः। उपर्युपरि वेगेन गच्छतस्ते पृष्ठात् आकाशमापन्नाऽहं भयात् प्रपतेयमिति सम्बन्धः ॥ ४४ ॥ ४५ ॥ कलत्रवति रक्ष्यद्रव्यवति त्वय्यपि सन्देहः प्राणसन्देहः ॥ ४६ ॥ ४७ ॥ तैः परिवृतो भवेः संशयं प्राप्तो भवेरिति वाक्यभेदेन युक्तश्छन्दस्यतीतैर्वचिः। कलत्रवान् रक्ष्यभार्यवानित्यर्थः ॥ ४८ ॥ ४९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पूर्वश्लोकोक्तं समर्थयति-युद्धयमानस्येत्यादिना ॥ ५० ॥ अथेति । साम्पराये युद्धे ॥ ५१ ॥ अथवेति । विमुखस्य युद्धपरवशस्येत्यर्थः ॥ ५२–५५ ॥

युद्धयमानस्य रक्षोभिस्तव तैः क्रूरकर्मभिः । प्रपतेयं हि ते पृष्ठाद् भयार्ता कपिसत्तम ॥ ५० ॥ अथ रक्षांसि भीमानि महान्ति बलवन्ति च। कथंचित् साम्पराये त्वां जयेयुः कपिसत्तम ॥ ५१ ॥ अथवा युद्धयमानस्य पतेयं विमुखस्य ते । पतितां च गृहीत्वा मां नयेयुः पापराक्षसाः ॥ ५२ ॥ मां वा हरेयुस्त्वद्धस्ताद् विशसेयुरथापि वा । अव्यवस्थौ हि दृश्येते युद्धे जयपराजयौ ॥ ५३ ॥ अहं वापि विपद्येयं रक्षोभिरभितर्जिता । त्वत्प्रयत्नो हरिश्रेष्ठ भवेन्निष्फल एव तु ॥ ५४ ॥ कामं त्वमसि पर्याप्तो निहन्तुं सर्वराक्षसान् । राघवस्य यशो हीयेत्त्वया शस्तैस्तु राक्षसैः॥५५॥ अथवाऽऽदाय रक्षांसि न्यसेयुः संवृते हि माम् । यत्र ते नाभिजानीयुर्हरयो नापि राघवौ । आरम्भस्तु मदर्थोऽयं ततस्तव निरर्थकः ॥ ५६ ॥ त्वया हि सह रामस्य महानागमने गुणः ॥ ५७ ॥ मयि जीवितमायत्तं राघवस्य महात्मनः । भ्रातृणां च महाबाहो तव राजकुलस्य च ॥५८॥ तौ निराशौ मदर्थे तु शोकसन्तापकर्शितौ । सह सर्वर्क्षहरिभिस्त्यक्ष्यतः प्राणसंग्रहम् ॥ ५९ ॥ भर्तृभक्तिं पुरस्कृत्य रामादन्यस्य वानर । न स्पृशामि शरीरं तु पुंसो वानरपुङ्गव ॥ ६० ॥

संवृते गूढप्रदेशे ॥ ५६ ॥ ५७॥ रामानु०–अतो मदवस्थानं रामाय विज्ञाप्य तेन सहागमने मच्छ्रेयस्स्यादित्याह–त्वया हीति ॥ ५७ ॥ मयीति। तव राजकुलस्य सुग्रीवराज तथापि साहसकरणं न कर्तव्यमित्याशयेनाह–युध्यमानस्येत्यादिश्लोकद्वयेन ॥ ५० ॥ ५१ ॥ तत्र पतनपक्षे अनर्थमाह–अथवेति । ते पृष्ठादिति शेषः ॥ ५२ ॥ परा जयपक्षे अत्यनर्थमाह–मां वेति । पराजयं सम्भावयति अव्यवस्थौ हीति ॥ ५३ ॥ अथ मा भूतां पतनपराजयौ, रक्षस्तर्जनैरेव मे मरणं स्यादित्याह–अहं वेति ॥ ५४ ॥ इदानीं हनुमतः सर्वशक्तिमङ्गीकृत्य युक्त्यन्तरमाह–काममिति । शस्तैः निहतैः ॥५५॥ पराजयपक्षे दोषान्तरमाह–अथवेति । संवृते गूढप्रदेशे । आरम्भः समुद्रलङ्घनादिप्रयत्नः ॥५६॥ किमत्र हितमत आह–त्वयेति ॥५७॥ मम नाशाद्दर्शनयोर्न केवलं त्वदारम्भवैफल्यम्, दुरन्तो महाननर्थः स्यादित्याशयेनाह–मयीत्यादिना । राघवस्य जीवितं मयि आयत्तं मज्जीविताधीनं जीवितमित्यर्थः । राजकुलस्य सुग्रीवकुलस्य ॥ ५८ ॥ प्राणसंग्रहं प्राणसर्वस्वम् ॥ ५९ ॥ ननु रावणाङ्गसंस्पर्शः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कुलस्य॥५८-६०॥अनीशा स्वयं किंचित्कर्तुमसमर्था। विनाथा विगतस्वामिका। विवशा विचेष्टा ॥६१॥६२॥ श्रुता इति। प्रथमाहंशब्दा गुणप्रसिद्धौ। द्वितीयो निस्सम्मत्वप्रसिद्धौ ॥६३-६५॥ हर्षितां हर्षमासादिताम्, उत्तरोत्तरहर्षवतीमित्यर्थः। अनया भक्तिकया उपायान्तरं स्वरूपविरुद्धं भगवत्प्राप्तौ

यदहं गात्रसंस्पर्शं रावणस्य बलाद्गता। अनीशा किं करिष्यामि विनाथा विवशा सती ॥६१॥ यदि रामो दशग्रीवमिह हत्वा सबान्धवम्। मामितो गृह्य गच्छेत तत्तस्य सदृशं भवेत् ॥ ६२ ॥ श्रुता हि दृष्टाश्च मया पराक्रमा महात्मनस्तस्य रणावमर्दिनः। न देवगन्धर्वभुजङ्गराक्षसा भवन्ति रामेण समा हि संयुगे ॥६३॥ समीक्ष्य तं संयति चित्रकार्मुकं महाबलं वासवतुल्यविक्रमम्। सलक्ष्मणं को विषहेत राघवं हुताशनं दीप्तमिवानिलेरितम् ॥ ६४ ॥ सलक्ष्मणं राघवमाजिमर्दनं दिशागजं मत्तमिव व्यवस्थितम्। सहेत को वानरमुख्य संयुगे युगान्तसूर्यप्रतिमं शरार्चिषम् ॥ ६५ ॥ स मे हरिश्रेष्ठ सलक्ष्मणं पतिं सयूथपं क्षिप्रमिहोपपादय। चिराय रामं प्रति शोककर्शितां कुरुष्व मां वानरमुख्य हर्षिताम् ॥६६॥ इत्यार्षे श्रीरामायणे वाल्मीकीये॰ श्रीमत्सुन्दरकाण्डे सप्तत्रिंशः सर्गः॥३७॥

स एवोपाय इति दर्शितः ॥ ६६ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तत्रिंशः सर्गः ॥ ३७॥

कथं स्यादित्यत आह-भर्तुर्भक्तिमिति। यस्मात्कारणात्। भर्तुर्भक्तिं पुरस्कृत्य भर्तुर्भक्त्या लक्ष्मणःप्रस्थापितः तस्मात् रावणस्य गात्रसंस्पर्शं बलाद्गतेति सम्बन्धः।हा सीते लक्ष्मणेति मारीचवाक्यं श्रुत्वा रामानर्थशङ्कया भर्तृभक्त्या लक्ष्मणप्रस्थापनात् प्राप्तोऽयमनर्थो न कामकृत इति भावः। अनीशा स्वयं किञ्चित्कर्तुमशक्नुवती। विवशा विचेष्टा। विनाथा विगतस्वामिका, असन्निहितनाथेत्यर्थः ॥ ६० ॥ ६१ ॥ अथ सिद्धान्तमाविष्करोति-यदीति। राक्षसवधरावणवधपूर्वकं मत्प्रापणं रामस्य सदृशम् अन्यमुखेन मत्प्रापणमनुचितमिति भावः ॥ ६२ ॥ नचाशक्तिचिन्ता रामे कार्येत्याह-श्रुताहीति ॥६३-६५॥ हरिश्रेष्ठ ! स त्वं मे पतिमिहोपपादय, इहानयेत्यर्थः। चिराय चिरकालं शोककर्शितां मां हर्षितां कुरु ॥ ६६ ॥ इति श्रीमहेश्वरतीर्थ॰ श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां सप्तत्रिंशः सर्गः ॥ ३७ ॥

स०-रणावमर्दिनः रणे वैरेवमर्दी। रणे स्वनन्ति रक्षयन्ति आगच्छन्ति स्वानिति वा रणावाः, तान्मर्दयतीति वा ॥ ६३ ॥ वासवतुल्यविक्रमं वासवोऽपि तुल्यविक्रमः योग्यतानुसारिपराक्रमो येन स तथा। इतरोऽर्थः स्फुटः ॥ ६४ ॥ सयूथपं ससुग्रीवम्। कपिश्रेष्ठ वानरवीरेति प्रलापकालत्वाद्विरुक्तिः। चिरा रामं प्रति शोककर्शितां नरवीरेण रामेण हर्षितां कुरुष्वेत्यर्थः ॥ ६६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ततः स इत्यादि । तच्छ्रुत्वा तेन वाक्येन हर्षितः वाक्यमुवाच ॥ १ ॥ युक्तरूपं युक्ततरमित्यर्थः । "प्रशंसायां रूपप्" । प्राशस्त्यं चात्र प्रकृत्यर्थवोधि ष्टत्वम् । स्त्रीस्वभावस्य भीरुत्वादेः । साध्वीनां पतिव्रतानाम् । विनयस्य वृत्तस्य ॥ २ ॥ विस्तीर्णं मामधिष्ठाय शतयोजनमायतं सागरं व्यतिवर्तितुं

ततः स कपिशार्दूलस्तेन वाक्येन हर्षितः । सीतामुवाच तच्छ्रुत्वा वाक्यं वाक्यविशारदः ॥ १ ॥ युक्तरूपं त्वया देवि भाषितं शुभदर्शने । सदृशं स्त्रीस्वभावस्य साध्वीनां विनयस्य च ॥ २ ॥ स्त्रीत्वं न तु समर्थं हि सागरं व्यतिवर्तितुम् । मामधिष्ठाय विस्तीर्णं शतयोजनमायतम् ॥ ३ ॥ द्वितीयं कारणं यच्च ब्रवीषि विनयान्विते । रामादन्यस्य नार्हामि संस्पर्शमिति जानकि ॥४॥ एतत्ते देवि सदृशं पत्न्यास्तस्य महात्मनः । का ह्यन्या त्वामृते देवि ब्रूयाद्वचनमीदृशम् ॥ ५ ॥ श्रोष्यते चैव काकुत्स्थः सर्वं निरवशेषतः । चेष्टितं यत्त्वया देवि भाषितं मम चाग्रतः ॥ ६ ॥ कारणैर्बहुभिर्देवि रामप्रियचिकीर्षया । स्नेहप्रस्कन्नमनसा मयैतत् समुदीरितम् ॥ ७ ॥ लङ्घाया दुष्प्रवेशत्वाद्दुस्तरत्वान्महोदधेः । सामर्थ्यादात्मनश्चैव मयैतत् समुदीरितम् ॥ ८ ॥

तर्तुं स्त्रीत्वं न समर्थं हि । स्त्री न समर्थेत्यर्थः । यद्वा सागरस्य शतयोजनम् आयतं विस्तीर्णं च मामधिष्ठायापि स्त्रीत्वं व्यतिवर्तितुम् अपगन्तुं न समर्थं हि । सागरस्य शतयोजनं यावत्तावदायतं तथा विस्तीर्णं च मामधितिष्ठन्त्या अपि तव स्त्रीत्वं भीरुत्वं नापगच्छतीत्यर्थः ॥ ३–५ ॥ श्रोष्यत इति । त्वया चेष्टितम् उद्बन्धनादिकम् । भाषितं रावणं तृणीकृत्य फणितम्, मम प्रत्युत्तरत्वेन कथितं च ॥ ६ ॥ बहुभिः कारणैः बहुभिरुपायैः । स्नेहप्रस्कन्नमनसा स्नेहशिथिलमनसा ॥७॥ लङ्घाया इति । दुष्प्रवेशलङ्घाप्रवेशे दुस्तरसागरतरणे च मम शक्तिरस्तीति ज्ञापयितुमेवमुक्तमित्यर्थः ॥८॥

॥ १ ॥ युक्तरूपं युक्ततमम् । प्रशंसायां रूपप्प्रत्ययः । स्त्रीस्वभावस्य भीरुत्वादेः । साध्वीनां त्वादृशीनां पतिव्रतानां विनयस्य वृत्तस्य सदृशम् ॥ २ ॥ संक्षेपेणोक्तमर्थं श्लोकद्वयेन विवृणोति–स्त्रीत्वमित्यादिना । विस्तीर्णमपि मामधिष्ठाय शतयोजनमायतं सागरं व्यतिवर्तितुं तर्तुं स्त्रीत्वं न समर्थं हि स्त्री न समर्थेत्यर्थः । यद्वा स्त्रीत्वमित्यत्र स्त्री इति छेदः । समर्थमिति लिङ्गव्यत्यय आर्षः । स्त्रीभूता त्वं सागरं व्यतिवर्तितुं न समर्था हीत्यर्थः । स्त्रीणां भीरुस्वभावत्वात्तत्तु भूषणमेवेति भावः । सागरस्य निवर्तितुमिति पाठे सागरस्य यादृक्छतयोजनं तावदायतं विस्तीर्णमपि मामधिष्ठाय निवर्तितुमुपगन्तुं स्त्री त्वं न समर्थेति योजना ॥ ३–५ ॥ श्रोष्यते चेति । चेष्टितम् उद्बन्धनादिकं ममाग्रतः भाषितं रावणं तृणीकृत्य कथितं च ॥ ६ ॥ कारणैः त्वद्दुःखहेतून् द्रष्टेत्यर्थः ॥ ७ ॥ ८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रघुबन्धुना रघुवंश्येन । " सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनास्समाः " इत्यमरः । रघुवंश्यानां बन्धुना तत्कीर्तिसम्पादकेनेत्यर्थः । समानेतुं सङ्गमयितुम् । इच्छामि ऐच्छम् ॥ ९ ॥ १० ॥ एवमिति । बाष्पप्रग्रथिताक्षरं बाष्पेण विग्रिताक्षरम् । एकान्तवृत्तान्तस्मरणात् बाष्पः ॥ ११ ॥ इद मित्यादिश्लोकद्वयमेकान्वयम् । चित्रकूटस्य पादे चित्रकूटपर्यन्तपर्वते । मन्दाकिन्या अदूरे सिद्धैराश्रिते प्राज्यमूलफलोदके तस्मिन्देशे तापसाश्रम

इच्छामि त्वां समानेतुमद्यैव रघुबन्धुना । गुरुस्नेहेन भक्त्या च नान्यथैतदुदाहृतम् ॥ ९ ॥ यदि नोत्सहसे यातुं मया सार्धमनिन्दिते । अभिज्ञानं प्रयच्छ त्वं जानीयाद्राघवो हि तत् ॥ १० ॥ एवमुक्ता हनुमता सीता सुरसुतोपमा । उवाच वचनं मन्दं बाष्पप्रग्रथिताक्षरम् ॥ ११ ॥ इदं श्रेष्ठमभिज्ञानं ब्रूयास्त्वं तु मम प्रियम् । शैलस्य चित्रकूटस्य पादे पूर्वोत्तरे पुरा ॥ १२ ॥ तापसाश्रमवासिन्याः प्राज्यमूलफलोदके । तस्मिन् सिद्धाश्रमे देशे मन्दाकिन्या ह्यदूरतः ॥ १३ ॥ तस्योपवनषण्डेषु नानापुष्पसुगन्धिषु । विहृत्य सलिलक्लिन्ना तवाङ्के समुपाविशम् ॥ १४ ॥ ततो मांससमायुक्तो वायसः पर्यतुण्डयत् । तमहं लोष्टमुद्यम्य वारयामि स्म वायसम् ॥ १५ ॥ दारयन् स च मां काकस्तत्रैव परिलीयते । न चाप्युपारमन्मांसाद्भक्षार्थी बलिभोजनः ॥ १६ ॥

वासिन्याः तापसाश्रमे वसन्त्याः मम इदं वक्ष्यमाणं श्रेष्ठमभिज्ञानं प्रियं प्रति त्वं ब्रूया इति योजना ॥ १२ ॥ १३ ॥ रामाय सीतया वक्तव्यं वचनं हनुमन्तं प्रत्युच्यते—तस्येत्यादि ॥१४॥ तत इति । मांससमायुक्तः मांसप्रतिलुब्धः । "आयुक्तकुशलाभ्यां च" इत्यत्र आयुक्तशब्दस्य तात्पर्यपरतया व्याख्यानात् । लोष्टं मृत्पिण्डम् । पर्यतुण्डयत्पर्यखण्डयत्, स्तनान्तर इति शेषः । " तुडि तोडने " इत्ययं धातुश्चौरादिकः ॥ १५ ॥ दारयन्निति । रघुबन्धुना रघुसगोत्रेण रामेण त्वां समानेतुं सङ्गमयितुमिच्छामीत्युदाहृतम् । एतत् गुरुस्नेहेन अन्यथा नेति सम्बन्धः ॥ ९–११ ॥ इदमित्यादि श्लोकद्वयमेकं वाक्यम् । चित्रकूटस्य पादे चित्रकूटस्य समीपपर्वते पूर्वोत्तरे ईशान्यकोणे मन्दाकिन्या ह्यदूरतः सिद्धाश्रमे प्राज्यं बहु बहुमूलफलोदके तस्मिन् देशे वृत्तं तापसा श्रमवासिन्या मम इदं वक्ष्यमाणं श्रेष्ठमभिज्ञानं प्रियं प्रति त्वं ब्रूया इति योजना ॥ १२ ॥ १३ ॥ तवाङ्के समुपाविशमिति । ननु हनुमन्तमुद्दिश्याभिज्ञानं वक्तुमुपक्रान्ता देवी रामं सम्बोध्य किमर्थं कथयतीति चेत् ? सत्यम्, मह्यमभिज्ञानं वक्तुमुपक्रान्ता त्वामेवाभिमुखीकृत्य एवमुत्तरं प्रादादिति हनुमता रामाय वाचयितुमिति न दोषः ॥ १४ ॥ तत इति । पर्यतुण्डयत पर्यखण्डयत, स्तनान्तर इति शेषः ॥ १५ ॥ १६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

परिलीयते अन्तर्हितो भवति स्म। बलिभोजनः काकः ॥ १६ ॥ उत्कर्षन्त्यां च रशनां काकोत्सारणार्थमिति शेषः ॥१७॥ भक्षगृध्रेन भक्षलोलुपेन। दारिता विदारिता । त्वामुपागता पुनरुत्सङ्गमाविशमित्येताभ्यां काकोत्सारणार्थमङ्कादुत्थानमनुधावनं च कृतं देव्येत्यवगम्यते । रामाङ्के

उत्कर्षन्त्यां च रशनां क्रुद्धायां मयि पक्षिणि। स्रस्यमाने च वसने ततो दृष्टा त्वया ह्यहम् ॥ १७ ॥ त्वयाऽपहसिता चाहं क्रुद्धा संलज्जिता तदा । भक्षगृध्रेन काकेन दारिता त्वामुपागता ॥ १८ ॥ आसीनस्य च ते श्रान्ता पुनरुत्सङ्गमाविशम्। क्रुद्धचन्ती च प्रहृष्टेन त्वयाऽहं परिसान्त्विता ॥ १९ ॥ बाष्पपूर्णमुखी मन्दं चक्षुषी परिमार्जती। लक्षिताऽहं त्वया नाथ वायसेन प्रकोपिता ॥ २० ॥ परिश्रमात् प्रसुप्ता च राघवाङ्केऽप्यहं चिरम्। पर्यायेण प्रसुप्तश्च ममाङ्के भरताग्रजः। स तत्र पुनरेवाथ वायसः समुपागमत्॥२१॥ ततः सुप्तप्रबुद्धां मां रामस्याङ्कात् समुत्थिताम्। वायसः सहसाऽऽगम्य विददार स्तनान्तरे ॥२२॥ पुनः पुनरथोत्पत्य विददार स मां भृशम् । ततः समुक्षितो रामो मुक्तैः शोणितबिन्दुभिः ॥२३॥ वायसेन ततस्तेन बलवत्क्लिश्यमानया। स मया बोधितः श्रीमान् सुखसुप्तः परन्तपः ॥ २४ ॥

केवलं स्थिताऽस्मि। तदा काको मां किंचिददारयत् । तं दृष्ट्वा तत्पलायनार्थं स्वयमायासं कुर्वन्तीं तदशक्त्या रुदन्तीं मां रामः परिहासपूर्वकं सान्त्वितवानित्यर्थः। अनेन स्वरक्षणे स्वयं प्रवृत्तश्चेदीश्वर उपेक्षते, स्वयमप्रवृत्तौ स रक्षतीति द्योतितम् ॥ १८–२३ ॥ वायसेनेति। सः निखिल लोकविदितनिरतिशयसौन्दर्यप्रसिद्धः । मया बोधितः मयैवाहं हता, स्वापकालिकश्रीविशेषाननुभवात् । लोके कश्चित्सञ्चारदशायां सुन्दर इव भाति शयने दुर्लक्षणादिभिर्दोषा दृश्यन्ते न तथाऽयम् । श्रीमान् स्वापकालिकश्रीरुच्यते । सुखसुप्तः तत्त्वानुगुणैव हि सुप्तिरपि। परन्तपः शयनमेव सकलशत्रुनिवर्तनक्षममित्यर्थः। सुप्तः श्रीमान्। लोके स्थानगमनशयनादिदशायां रूपवानिव लक्ष्यते कश्चित् । संशयने प्रकाशितप्रच्छन्नदोषतया

उत्कर्षन्त्यामिति । पक्षिणा वसने स्रस्यमाने सति रशनामुत्कर्षन्त्याम् आकृष्यमाणायां मयि क्रुद्धायां सत्यां ततः तदा त्वया अहं दृष्टाऽस्मीति सम्बन्धः ॥ १७ ॥ भक्षगृध्रेन भक्षलोलुपेन । दारिता विदारिता। त्वामुपागता पुनरुत्सङ्गमाविशमित्येताभ्यां काकोत्सारणार्थम् अङ्कादुत्थानमनुधावनं च देव्या कृतमित्यवगम्यते ॥ १८–२१ ॥ त्वयि स्वपिति मयि जाग्रत्यामित्यर्थः । सुप्तप्रबुद्धां राघवाङ्के सुप्त्वा ततः प्रबुद्धामत एव राघवाङ्कादुत्थितां वायसः पुनरागम्य स्तनान्तरे

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जुगुप्सितो भवति । अयं तु शयनावस्थायामेव नीराजना कर्तव्या दृष्टिदोषपरिहारायेत्येवं स्थितः ॥ २४ ॥ वितुन्नां दारिताम् ॥ २५ ॥ पञ्चवक्त्रेण व्यात्तमुखेन । " पचि विस्तारे " इत्यस्मात्पचाद्यच् । कार्यातिशयद्योतनार्थं वा पञ्चसङ्ख्याकवक्त्रत्वोक्तिः । नागनासोरु नागहस्तोरु । कुपितपञ्च

स मां दृष्ट्वा महाबाहुर्वितुन्नां स्तनयोस्तदा। आशीविष इव क्रुद्धः श्वसन् वाक्यमभाषत ॥ २५ ॥ केन ते नागनासोरु विक्षतं वै स्तनान्तरम् । कः क्रीडति सरोषेण पञ्चवक्त्रेण भोगिना ॥ २६ ॥ वीक्षमाणस्ततस्तं वै वायसं समुदैक्षत। नखैः सरुधिरैस्तीक्ष्णैर्मामेवाभिमुखं स्थितम् ॥ २७ ॥ पुत्रः किल स शक्रस्य वायसः पततां वरः । धरान्तरगतः शीघ्रं पवनस्य गतौ समः ॥२८॥ ततस्तस्मिन् महाबाहुः कोपसंवर्तितेक्षणः । वायसे कृतवान् क्रूरां मतिं मतिमतां वरः ॥ २९ ॥ स दर्भं संस्तराद् गृह्य ब्राह्मेणास्त्रेण योजयत् । स दीप्त इव कालाग्निर्जज्वालाभिमुखो द्विजम् ॥३०॥ स तं प्रदीप्तं चिक्षेप दर्भं तं वायसं प्रति। ततस्तं वायसं दर्भः सोऽम्बरेऽनुजगाम ह ॥३१॥ अनुसृतस्तदा काको जगाम विविधां गतिम् । लोककाम इमं लोकं सर्वं वै विचचार ह ॥ ३२ ॥ स पित्रा च परित्यक्तः सुरैश्च समहर्षिभिः । त्रीँल्लोकान् संपरिक्रम्य तमेव शरणं गतः ॥ ३३ ॥

चक्रक्रीडासमं तव स्तनविदारणमिति भावः॥ २६ ॥ २७॥ ननु वायसमात्रे किमर्थमस्त्रं मुक्तमित्याशङ्क्याह–पुत्रः किलेति। इदं रक्षणानन्तरं तेनैवोक्त मिति ज्ञेयम् । किलेति प्रसिद्धौ । इन्द्रपुत्रत्वेन प्रसिद्धो जयन्त एव वायसरूपेणागत इत्याहुः । वायसरूपोऽन्यः पुत्र इत्यप्याहुः ॥ २८ ॥ २९ ॥ स दर्भमिति । संस्तरात् आस्तरणात् । गृह्य गृहीत्वा । अस्त्रेण अस्त्रमन्त्रेण । योजयत् अयोजयत्, अभिमन्त्रितवानित्यर्थः । द्विजं काकम् ॥३०॥३१॥ अनुसृतः अनुसृतः । विविधां गतिं विविधं स्थानम् । लोककामः लोकयितुकामः रक्षकापेक्षीत्यर्थः ॥ ३२ ॥ भगवद्व्यतिरिक्ता बान्धवाभासा न रक्षका इत्याह–स पित्रेति । सः पुरुषकारभूतायामपि कृतापराधः सः आर्द्रापराधः । पित्रा च परित्यक्तः अस्त्रक्षतिभीततया प्रथमं पितरं रक्षकं विददार व्यलिखत ॥ २२–२६ ॥ वीक्षमाण इतस्ततः, भान्तदेशमित्यर्थः ॥ २७ ॥ धरान्तरगतः भूमिं प्राप्तः ॥२८॥ कोपेन संवर्तिते विवर्तिते ईक्षणे येन सः ॥२९॥ दर्भं संस्तरात् गृह्य गृहीत्वा योजयत अयोजयत । द्विजं काकम् ॥ ३० ॥ ३१ ॥ अनुसृतः अनुसृतः । लोककामः रक्षकजनाकाङ्क्षी ॥ ३२ ॥ पित्रा परित्यक्तः,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गतः तेन त्रैलोक्याधिपतिना च त्यक्तः। "इन्द्रो महेन्द्रस्सुरनायको वा" इति तस्यासमर्थत्वोक्तेः। परित्यक्तः त्यागोऽपि नापाततः बुद्धिपूर्वं त्यक्तः। "त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्" इति न्यायात्। यद्वा परित्यक्तः भार्यापुत्रादिभिस्सह त्यक्तः। चकारेण माता समुच्चीयते। न केवलं हितपरेण पित्रा, प्रियपरया मात्रा च परित्यक्तः, "सीता नारीजनस्यास्य योगक्षेमं विधास्यति" इति स्वरक्षकभूतायामपि सापराधत्वादिति भावः। पित्रपेक्षया मातुर्वात्सल्यातिशयात्तामेव प्रथमं गच्छति स्म ततः पितरम्। पित्रा त्यागवचनान्मात्रा त्यागः सिद्ध एवेति चकारेण सूचितम्।

स तं निपतितं भूमौ शरण्यः शरणागतम्। वधार्हमपि काकुत्स्थः कृपया पर्यपालयत् ॥ ३४ ॥

पितृभ्यां त्यागेऽपि बान्धवा न त्यजन्ति। किं पितरौ सर्वथा त्यक्ष्यत इति तैरपि त्यक्त इत्याह सुरैश्च। "कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे" इति रामनयने रक्ते तेऽपि बिभ्यति हि। एवं पूर्वसजातीयैस्त्यक्तत्वेऽपि परिगृहीतपक्षिरूपसजातीयैः किं त्यक्त इत्यपेक्षायां तथेत्याह चकारेण। "पक्षिणोऽपि प्रयाचन्ते सर्वभूतानुकम्पिनम्" इति पक्षिणामपि शरण्यत्वात्, स्वनायकगरुडस्वामित्वाच्च पक्षिभिरपि परित्यक्तः। समहर्षिभिः पित्रादिबन्धूनामरक्षकत्वेऽपि आनृशंस्यप्रधाना महर्षयो रक्षिष्यन्तीति गतः, तैरपि प्रकामं दूरदर्शिभिः परित्यक्तः। आनृशंस्यविषयव्यवस्थाऽस्तीति तैस्त्यक्त इत्यर्थः। एतदङ्गीकारे वयमपि संसर्गदोषेण नश्येम। अस्माभिस्त्यागेऽनन्यगतिकत्वाद्राम एनं स्वीकरिष्यतीति तैस्त्यक्तः। महर्षिभिः "यो विष्णुं सततं द्वेष्टि तं विद्यादन्त्यरेतसम्" इति विष्णुद्वेषेण चण्डालत्वात् "चण्डालः पक्षिणां काकः" इत्युक्तेश्च चण्डालो नास्मद्गाटमागच्छेदिति त्यक्तः। एवं रक्षकान्तरादर्शनान्नष्टगजो घटमप्यन्वेषत इति न्यायेन स्वैरविवृतद्वारान्सर्वान् गृहान् गत इत्याह त्रीन् लोकान् संपरिक्रम्य। परिक्रम्य एतदेव नवकृत्वो गतः। संपरिक्रम्य गृहस्थैरविज्ञाततया कवाटमूलेषु लीनश्चेत्यर्थः। अपि कदाचित् कृपेषामुत्पद्येतेति मत्वा पुनः पुनर्गत इत्यर्थः। अमुं निष्कास्य कवाटबन्धनं सर्वैः कृतमित्यर्थः। ततः किं कृतमित्यत्राह तमेव शरणं गतः। रक्षकत्वेन प्राप्तापेक्षया हिंसकत्वेन स्थितस्य मुखमेव शीतलमित्यवस्थितः। अतस्तमेव शरणं गतः। "यदि वा रावणस्स्वयम्" इत्येवं स्थितो हि रामः। तमेव सर्वलोकशरण्यमेव। तमेव 'दोषो यद्यपि न त्यजेयम्' इति स्थितम्। शरणं गतः निवासं गतः। न तूपायतया गतः। "निवासवृक्षः साधूनाम्" इत्युक्तेः ॥३३॥ स तमिति। सः रक्षणैकस्वभावः। तं प्रातिकूल्यैकनिरतम्। भूमौ निपतितं

स्वर्गेऽपीति शेषः। पित्रेत्युपलक्षणं ब्रह्मान्तानाम् ॥ ३३ ॥ पर्यपालयत, प्राणरक्षणेनेति शेषः ॥ ३४ ॥ ३५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

देवजनितया भूमिमस्पृशन्तापि भूमौ पतितम्। भूमौ दुष्पुत्रं पितरि शिक्षमाणे स यथा मातुः पादयोः पतति तथाऽपतत्। शरण्यः सर्वावस्थास्वपि शरण वरणार्हः। शरणागतम् अनन्यगतिकतया स्वमुपागतम्। वधार्हमपि रामसिद्धान्तेनापि वधार्हम्। काकुत्स्थः कृपया पर्यपालयत् कुलोचितस्वभावेन रक्षि तवान्। कृपया अस्मदाद्यारब्धं कार्यं प्रबलकर्मणा न समाप्यते तथा तेनारब्धमपि कृपया न पूर्यत इति भावः॥ ३४॥ न शर्मेत्यादि। परिद्यूनं

न शर्म लब्ध्वा लोकेषु तमेव शरणं गतः॥ ३५॥ परिद्यूनं विषण्णं च स तमायान्तमब्रवीत्। मोघं कर्तुं न शक्यं तु ब्राह्ममस्त्रं तदुच्यताम्॥३६॥ हिनस्तु दक्षिणाक्षि त्वच्छर इत्यथ सोऽब्रवीत्। ततस्तस्याक्षि काकस्य हिनस्ति स्म स दक्षिणम्। दत्त्वा स दक्षिणं नेत्रं प्राणेभ्यः परिरक्षितः॥ ३७॥ स रामाय नमस्कृत्वा राज्ञे दशरथाय च। विसृष्टस्तेन वीरेण प्रतिपेदे स्वमालयम्॥३८॥ मत्कृते काकमात्रे तु ब्रह्मास्त्रं समुदीरितम्। कस्माद्यो मां हरत्त्वत्तः क्षमसे तं महीपते॥ ३९॥ स कुरुष्व महोत्साहः कृपां मयि नरर्षभ। त्वया नाथवती नाथ ह्यनाथा इव दृश्यते॥ ४०॥ आनृशंस्यं परो धर्मस्त्वत्त एव मया श्रुतः॥ ४१॥

परिद्यूनम्। तदुच्यतामित्यनन्तरम् हिनस्तु दक्षिणाक्षि त्वच्छर इत्यथ सोऽब्रवीदित्यर्थमनुसन्धेयम्॥ ३५–३७॥ रामानु०—तदुच्यतामिति प्रश्नानन्तरं हिनस्ति स्म स दक्षिणमिति वचनादस्यलक्ष्यत्वेन दक्षिणाक्षिप्रदानपरं प्रतिवचनं काकेन कृतमित्यवगम्यते॥ ३७॥ दशरथाय स्वलोकस्थतया पूर्वमेव मित्रभूताय॥ ३८॥ समुदीरितं समुक्तम्। हरत् अहरत्॥ ३९॥ सः परदुःखं दृष्ट्वा न सहामहे इत्युक्तवान्। त्वं महोत्साहः एतदनुष्ठानपर्यन्तं कुर्वन् मयि अत्यन्त दुःखितायां कृपां परदुःखासहिष्णुत्वं प्रकाशयितुमर्हसि। नरोत्तम! एवं न करोषि चेत्तव नरोत्तमत्वस्य हानिरेव स्यात्। तस्मादेतद्वचनमनुष्ठान पर्यन्तं कृत्वा मां जीवयित्वा तव नरोत्तमत्वं परिपालयेति भावः। अनाथा इव अनाथेव। आर्षो गुणाभावः। आनृशंस्यं परो धर्मः। नावारोपणानन्तरं

परिद्यूनं परिताप्तम्। मोघमिति। उच्यतामिति प्रश्नानन्तरं हिनस्ति स्म स दक्षिणमिति वचनादस्यलक्ष्यत्वेन दक्षिणाक्षि काकेन दत्तमित्यवगम्यते॥ ३६–३८॥

एवं हनुमते रामैकसंवेद्यमभिज्ञानमभिधाय दुःखावेशाद्रामममेव बुद्धिस्थं सम्बोध्य सोपालम्भं प्रार्थयते—मत्कृतेत्यादिसार्धचतुष्टयेन। यः त्वत्तो मामहरत् तं रावणं कस्मात् क्षमसे, उपेक्षस इत्यर्थः॥ ३९॥ स त्वम्। आनृशंस्यम् अक्रौर्यम्॥ ४०॥ ४१॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वेतनाभ्यर्थनवत्तंश्लेषदशायां तवात्यन्ताभिमतो धर्मः क इति मया पृष्टे परदुःखं चेत्तदसहिष्णुत्वमेव परमो धर्म इति मनोभिमतं तथैव मत्स्वभाव इति त्वया रहस्योद्घेदनं कृतम्। त्वत्त एव न तु दूतमुखेन। मया श्रुतः इदं श्रवणमात्रपर्यवसायि जातम्, न त्वनुष्ठानपर्यवसायीति रामं पृच्छेति भावः। एवं पृच्छन्त्या सीतायाः प्रत्युत्तरं दिशतो रामस्य च कोऽभिप्राय इति चेदुच्यते। एतस्य संश्लेषस्य विच्छेदो भवति चेत् किं करिष्यामीति

जानामि त्वां महावीर्यं महोत्साहं महाबलम्। अपारपारमक्षोभ्यं गाम्भीर्यात् सागरोपमम्। भर्तारं समुद्राया वरण्या वासवोपमम् ॥ ४२ ॥ एवमस्त्रविदां श्रेष्ठः सत्यवान् बलवानपि। किमर्थमस्त्रं रक्षस्सु न योजयति राघवः ॥ ४३ ॥ न नागा नापि गन्धर्वा नासुरा न मरुद्गणाः। रामस्य समरे वेगं शक्ताः प्रतिसमाधितुम् ॥ ४४ ॥ तस्य वीर्यवतः कश्चिद् यद्यस्ति मयि संभ्रमः। किमर्थं न शरैस्तीक्ष्णैः क्षयं नयति राक्षसान् ॥ ४५ ॥ भ्रातुरादेश मादाय लक्ष्मणो वा परन्तपः। कस्य हेतोर्न मां वीरः परित्राति महाबलः ॥ ४६ ॥ यदि तौ पुरुषव्याघ्रौ वाय्वग्नि समतेजसौ। सुराणामपि दुर्धर्षौ किमर्थं मामुपेक्षतः ॥४७॥ ममैव दुष्कृतं किंचिन्महदस्ति न संशयः। समर्थावपि तौ यन्मां नावेक्षेते परन्तपौ ॥ ४८ ॥

कातरतया पृष्टवती। सोऽपि मद्विरहक्लेशेन ताम्यन्तीं त्वां न कदाचिदपि पश्येयमित्युक्तवान्। अयमर्थोऽप्यरण्यकाण्डे "अप्यहं जीवितं जह्याम्" इति श्लोकप्रकृष्टिकादौ दर्शितः ॥ ४० ॥ ४१ ॥ जानामीति। अपारपारं दुरधिगमपारम्, असीममित्यर्थः। दुरधिगमगुणसीमामित्यर्थो वा ॥ ४२ ॥

रामा०--जानामीति। अपारपारम् "पार कर्मसमाप्तौ" इति धातोर्निष्पन्नत्वादत्र पारशब्देन कर्मसमाप्तिरुच्यते। अपाराः पाराः कर्मसमाप्तयो यस्य स तथोक्तः। निरवधिकापदान इत्यर्थः ॥४२॥

॥ ४३ ॥ प्रतिसमाधितुं प्रतिबद्धुम् ॥ ४४ ॥ संभ्रमः भाववृत्तिः ॥ ४५ ॥ ४६ ॥ उपेक्षतः उपेक्षेते। यदि तौ, सङ्गतावितिं शेषः ॥ ४७॥ समर्थौ विरोधि वर्गधुन्मूल्य मद्रक्षणानुगुणशक्तिमन्तौ। परन्तपौ इतः पूर्वं प्रतिपक्षनिर्दहनं कुर्वन्तौ। एवम्भूतावपि तौ मां प्राणपर्यन्तं रक्षणप्रवृत्त्यर्हदशां प्राप्तां मां नावेक्षेते इति यत् न कटाक्षयत इति यत् अस्य निमित्तं तथोर्वा मयि वा किंचिद्भवितुमर्हति। तत्र तद्विषये तादृशनिमित्तप्रसक्तिर्नास्ति सामर्थ्यं

अपारपारं दूरपारम्, अप्राप्यगुणसीमान्तम् ॥ ४२–४४ ॥ सम्भ्रमः त्वरा ॥ ४५ ॥ ४६ ॥ यदि तावितिं। सङ्गतावितिं शेषः। उपेक्षतः उपेक्षेते ॥ ४७ ॥ किंचित्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

परन्तपत्वादिदर्शनात्। परिशेषान्ममैव पापम् अस्य निमित्तं भवितुमर्हति। यद्वा ममैव "द्विषन्तः पापकृत्याम्" इत्युक्तरीत्या अन्यतो नागतमित्यर्थः। किंचित् न हि वयं सर्वज्ञाः अस्माभिरज्ञातं किंचिद्भवितुमर्हति। महत् प्रारब्धफलतयाऽनुभवं विना दुष्परिहरम्। अस्ति न संशयः। कार्ये सति कारणे किमस्ति सन्देहः। यद्वा किंचिदनिर्वचनीयम् महदुष्कृतमस्तीत्यनेन "किं त्वाऽमन्यत वैदेहः" इत्यादिनोक्तो भगवदपचारः। उक्तं हि

वैदेह्या वचनं श्रुत्वा करुणं साश्रुभाषितम्। अथाब्रवीन्महातेजा हनूमान् मारुतात्मजः ॥ ४९ ॥ त्वच्छोक विमुखो रामो देवि सत्येन मे शपे। रामे दुःखाभिपन्ने च लक्ष्मणः परितप्यते ॥ ५० ॥ कथंचिद्भवती दृष्टा न कालः परिशोचितुम् ॥ ५१ ॥ इमं मुहूर्तं दुःखानां द्रक्ष्यस्यन्तमनिन्दिते। तावुभौ पुरुषव्याघ्रौ राजपुत्रौ महाबलौ ॥ ५२ ॥ त्वद्दर्शनकृतोत्साहौ लङ्कां भस्मीकरिष्यतः ॥५३॥ हत्वा च समरे क्रूरं रावणं सहबान्धवम्। राघवस्त्वां विशालाक्षि नेष्यति स्वां पुरीं प्रति। ब्रूहि यद्राघवो वाच्यो लक्ष्मणश्च महाबलः ॥ ५४ ॥ सुग्रीवो वापि तेजस्वी हरयोऽपि समागताः। इत्युक्तवति तस्मिंश्च सीता सुरसुतोपमा। उवाच शोकसन्तप्ता हनुमन्तं प्लवङ्गमम् ॥५५॥ कौसल्या लोकभर्तारं सुषुवे यं मनस्विनी। तं ममार्थे सुखं पृच्छ शिरसा चाभिवादय ॥ ५६ ॥

"कीदृशं तु मया पापं पुरा देहान्तरे कृतम्" इति। देहान्तरे बालशरीरे ॥ ४८ ॥ वैदेह्या इति। साश्रु यथा तथा भाषितमुक्तम् ॥ ४९ ॥ त्वच्छोकेति। त्वच्छोकाविमुखः त्वच्छोकेन विमुखः विषयान्तरपराङ्मुखः। प्रत्युत त्वय्येव दत्तचित्त इत्यर्थः ॥ ५० ॥ ५१ ॥ इमं मुहूर्तम् अस्मिन् मुहूर्ते। सप्तम्यर्थे द्वितीया ॥ ५२–५५ ॥ मनस्विनी लोकभर्तारं सुषुवे। लोके स्त्रियः इहलोकपरलोकयोः स्वरक्षणार्थं पुत्रान् सुवते नैवं मे श्वश्रूः। मनस्विनी विपुलमनस्का। सर्वलोकरक्षकः पुत्रो मे भवेदिति व्रतमनुष्ठाय लोकोपकाराय पुत्रं सूतवती। एवंभूतः कौसल्यासङ्कल्पः कथं मोघस्स्यात्। अहमत्र लोके न किमन्तर्भूता। तं ममार्थे सुखं पृच्छ अस्मद्रक्षणं न मया प्रार्थ्यं तच्चिन्ता तस्यैव, अस्मत्त्वरा तु विलम्बासहिष्णुतया, तस्मात् किमपि ॥ ४८ ॥ ४९ ॥ त्वच्छोकविमुखः त्वद्विश्लेषशोकेन स्वशरीररक्षणे पराङ्मुखः त्वद्देशगमनायेत्यर्थः ॥ ५० ॥ इमं मुहूर्तम् अस्मिन् मुहूर्ते ॥ ५१–५६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तत्सत्ता चेन्मद्रक्षणस्य न कापि हानिः । अतस्तत्सत्तैवास्माभिराशास्यते । तेन तस्य सुखमस्ति किमिति मया पृष्टमिति वद । एवंच लोकवदस्माभिश्च तस्मात्किंचिदपेक्षितं चेत् लोकैर्यत्कार्यं तत् कार्यं मयापि कार्यमित्याह शिरसा चाभिवादय । अहं तं शिरसा प्रणतवत्यस्मीति तमभिवादय । प्रणिपातं कुर्वित्यर्थः । कथं नायिका नायकं शिरसा प्रणमेदिति चेत् आचारप्रधानजनककुलनन्दिन्यैवमनुष्ठितमिति किमत्र प्रमाणं प्रष्टव्यम् ?। प्रणयरोषेणैवमाहेति चेन्न । हनुमद्वचनेन तस्य शान्तत्वात् । ननु ममार्थे मत्कार्यसिद्ध्यर्थं तं प्रणमेत्यर्थः किं न स्यादिति चेत्, ममार्थ इत्यस्योभयत्रान्वयात् । पूर्वं

स्रजश्च सर्वरत्नानि प्रिया याश्च वराङ्गनाः । ऐश्वर्यं च विशालायां पृथिव्यामपि दुर्लभम् ॥५७॥ पितरं मातरं चैव संमान्याभिप्रसाद्य च । अनुप्रव्रजितो रामं सुमित्रा येन सुप्रजाः ॥ ५८ ॥ आनुकूल्येन धर्मात्मा त्यक्त्वा सुख मनुत्तमम् । अनुगच्छति काकुत्स्थं भ्रातरं पालयन् वने ॥ ५९ ॥ सिंहस्कन्धो महाबाहुर्मनस्वी प्रियदर्शनः । पितृवद्वर्तते रामे मातृवन्मां समाचरन् ॥ ६० ॥ ह्रियमाणां तदा वीरो न तु मां वेद लक्ष्मणः ॥ ६१ ॥

मत्र मया पृष्टमिति पृच्छेत्यर्थस्यावश्यकत्वादत्रापि मया प्रणतमिति प्रणमेत्यस्य स्वरसत्वात् ॥ ५६ ॥ तनि०—लोके स्त्रियः स्वजीवनदशायां पोषकं परत्रोत्तारकं च पुत्रमभिलषन्ति । कौसल्या तु विपुलमनस्कतया सर्वलोकरक्षकं पुत्रं प्रार्थ्य व्रताचरणेन लब्धवती । तत्प्रार्थना विफला किम् । अहं लोकशब्दान्तर्भूता न भवामि किम् । जलसमीपस्थितस्य सस्यस्य शुष्कतावत् सर्वावस्थास्वप्यनुसृतायां मम रक्षणे तत्प्रार्थना संकुचिता किम् । तं ममार्थे सुखं पृच्छ मम रक्षणं न प्रार्थनीयम्, तस्य मनसि तिष्ठत्येव, किन्तु त्वया तस्य सुखजननेन भाव्यम् । तस्यावस्थाने अस्मद्रक्षणं भविष्यतीति तदेवाशास्यते । शिरसा चाभिवादय अग्निसाक्षिकं गृहीतपाणिना च रक्षणं कार्यं तन्न क्रियते, इतरसाधारण्येन वा रक्षणं क्रियताम् । तैर्यत्क्रियते तन्मयाप्यभिवादनं क्रियते इत्यस्मदर्थमभिवादनं कुरु ॥ ५६ ॥ स्रजश्चेति, सन्तीति शेषः । स्रगादयः सन्ति पृथिव्यां दुर्लभमैश्वर्यमप्यस्ति । तथा पितरं मातरं चैव संमान्य सुमित्रा येन सुप्रजाः सः राममनु प्रव्रजितः ॥ ५७ ॥ ५८ ॥ आनुकूल्येन भक्त्येत्यर्थः ॥ ५९ ॥ समाचरन् परिचरन् ॥ ६० ॥ ६१ ॥

पृथिव्यामपि दुर्लभमित्यत्र त्यक्त्वेत्याकृष्य योज्यम् । अनुप्रव्रजितो राममित्यत्र स इति शेषः ॥ ५७–५९ ॥ समाचरन् परिचरन् ॥ ६०–६२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वृद्धोपसेवीत्यादि । यस्यां धुरि यस्मिन्कार्यनिर्वाह इत्यर्थः ॥ ६२ ॥ ६३ ॥ यमिति । आर्यं श्वशुरं दशरथं नानुस्मरेत्, पितृवत्सम्यग्रक्षकत्वा दिति भावः ॥ ६४ ॥ रामः यथा दुःखक्षयकरो भवेत्तथा वक्तव्यमित्यर्थः । कार्यनिर्योगे कार्यसङ्कटने । प्रमाणं व्यवस्थापकः ॥ ६५ ॥

वृद्धोपसेवी लक्ष्मीवान् शक्तो न बहु भाषिता । राजपुत्रः प्रियः श्रेष्ठः सदृशः श्वशुरस्य मे ॥ ६२ ॥ मम प्रियतरो नित्यं भ्राता रामस्य लक्ष्मणः । नियुक्तो धुरि यस्यां तु तामुद्वहति वीर्यवान् ॥ ६३ ॥ यं दृष्ट्वा राघवो नैव वृत्तमार्यमनुस्मरेत् । स ममार्थाय कुशलं वक्तव्यो वचनान्मम । मृदुर्नित्यं शुचिर्दक्षः प्रियो रामस्य लक्ष्मणः ॥ ६४ ॥ यथा हि वानरश्रेष्ठ दुःखक्षयकरो भवेत् । त्वमस्मिन् कार्यनिर्योगे प्रमाणं हरिसत्तम ॥ ६५ ॥ राघव स्त्वत्समारम्भान्मायै यत्नपरो भवेत् ॥ ६६ ॥ इदं ब्रूयाश्च मे नाथं शूरं रामं पुनः पुनः । जीवितं धारयिष्यामि मासं दशरथात्मज ॥ ६७ ॥ ऊर्ध्वं मासान्न जीवेयं सत्येनाहं ब्रवीमि ते । रावणेनोपरुद्धां मां निकृत्या पापकर्मणा ॥ ६८ ॥ त्रातुमर्हसि वीर त्वं पातालादिव कौशिकीम् । ततो वस्त्रगतं मुक्ता दिव्यं चूडामणिं शुभम् । प्रदेयो राघवायेति सीता हनुमते ददौ ॥ ६९ ॥

त्वत्समारम्भात्त्वदुःखाहात् ॥६६॥ इदमित्यादि । ऊर्ध्वं मासात्, रावणकृतमासद्वयावधिं न सहिष्य इति भावः । निकृत्या वञ्चनेन॥६७॥६८॥ पातालादिव कौशिकीम् । अत्रेतिकरणं द्रष्टव्यम् । इदं च ब्रूया इति पूर्वेणान्वयः । कौशिकः इन्द्रः तत्सम्बन्धिनी श्रीः कौशिकी तामिव । एवं ब्रह्मपुराणे श्रूयते— पुरा वृत्रवधे ब्रह्महत्याभिभूतं निश्श्रीकमिन्द्रं भगवान्नारायणो देवैस्सह वैष्णवेनाश्वमेधेन निष्कल्मषं कृत्वा त्रैलोक्यराज्येऽभिषिच्य पुरातनीं पौरन्दरीं श्रियमुपाहरत् । ततोऽशरीरवाक्याद्वाक्षतीर्थवर्तिनीं तामुपश्रुत्य स देवदेवो देवाश्च तत्र जग्मुः । ततस्तान् दृष्ट्वा सा श्रीः पातालं प्रविवेश । तत्र प्रवेष्टु

यस्यां धुरि यं लक्ष्मणं नियुञ्जैव स्वयं तां धुरं राम उद्वहति ॥६३॥ राघवः यं दृष्ट्वा वृत्तमतीतम् आर्यं दशरथं नानुस्मरेत् पितृवत्सम्यग्रक्षकत्वात् पितरं न स्मरतीति भावः ॥ ६४ ॥ यथेति । दुःखक्षयकरो भवेल्लक्ष्मणः तथा कर्तव्यमिति शेषः । त्वमेव कार्यनिर्योगे कार्यसङ्कटने प्रमाणं व्यवस्थापकः यतः अतो राघवः मयि यत्नपरो भवेदिति सम्बन्धः ॥६५-६७॥ ऊर्ध्वं मासान्न जीवेयमिति । रावणदत्तमासद्वयावधिमपि न सहिष्य इति भावः । निकृत्या तिरस्कारेण॥६८॥ पातालादिव

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मशङ्कवन्तो देवाः पुनरप्यशरीरं वाक्यं युष्मासु सर्वलक्षणसम्पन्नस्तां प्रतिनेतुमर्हतीत्युपश्रुत्य तमेव पुरुषोत्तमं प्रार्थयामासुः । स तत्र प्रविश्य पातालात् तां समुद्धत्य तैरमह शकाय प्रादादिति । महाभारते तु—उतथ्यस्य भार्यां यमुनायां स्नान्तीं वरुणो हृत्वा पातालमनयत् । तामुतथ्यो नारदेन याचित्वा तामलब्ध्वा कुपितः पातालह्रदशोषेण तामवापेति श्रूयते । सा कौशिकीति केचित्कथयन्ति ॥ ६९ ॥ प्रतिगृह्येति । मणिरत्नं मणिश्रेष्ठम् ।

प्रतिगृह्य ततो वीरो मणिरत्नमनुत्तमम् । अङ्गुल्या योजयामास न ह्यस्य प्राभवद्भुजः ॥७०॥ मणिरत्नं कपिवरः प्रतिगृह्याभिवाद्य च । सीतां प्रदक्षिणं कृत्वा प्रणतः पार्श्वतः स्थितः ॥ ७१ ॥ हर्षेण महता युक्तः सीतादर्शनजेन सः । हृदयेन मनो रामं शरीरेण तु विष्ठितः ॥७२॥ मणिवरमुपगृह्य तं महार्हं जनकनृपात्मजया धृतं प्रभावात् । गिरिरिव पवनावधूतमुक्तः सुखितमनाः प्रतिसंक्रमं प्रपेदे ॥७३॥ इत्यार्षे० श्रीमत्सुन्दरकाण्डे अष्टात्रिंशः सर्गः॥३८॥

अङ्गुल्या योजयामास, चूडामणेरधिष्ठानस्य पृष्ठे या केशसरणिः तत्राङ्गुलिं प्रावेशयदित्यर्थः । एवं तनीयसी किमङ्गुलिरित्यत्राह—न हीति । अस्य हनुमतः भुजः न प्राभवन्न स्थूलोऽभवत् । न तदानीं स महाकायः भुजश्च न स्थूलः तेनाङ्गुलिस्तनीयसीत्यर्थः । एतेन देव्यै प्रदर्शितं महद्रूपं विहाय पुरप्रवेशकालिकं सूक्ष्मरूपमङ्गीकृतवानित्यवगम्यते ॥ ७० ॥ मणिरत्नमिति । प्रणतः नम्रगात्रः ॥ ७१ ॥ ७२ ॥ मणिवरमिति । पवनावधूतमुक्तः महावातकम्पितः तेन सहितश्चेत्यर्थः । प्रतिसंक्रमं प्रतिप्रयाणं प्रपेदे प्राप्तुमुद्युक्तः । अस्मिन्सर्गे सार्धत्रिसप्ततिश्लोकाः ॥ ७३ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे सुन्दराख्ये काव्याख्याने सुन्दरकाण्डव्याख्याने अष्टात्रिंशः सर्गः ॥ ३८ ॥

कौशिकीति । कौशिकीं देवेन्द्रस्य श्रियम् । पुरा किल वृत्रवधाद्ब्रह्महत्याभिभूतस्येन्द्रस्य लक्ष्मीं पातालप्रविष्टां देवप्रार्थितो भगवानादिनारायणः पातालाद्बहिरानीय पुनरिन्द्राय श्रियं प्रायच्छदिति पौराणिकी कथाऽत्रानुसन्धेया ॥ ६९ ॥ मणिरत्नं मणिश्रेष्ठम् । अङ्गुल्या योजयामास अङ्गुल्या दधार । चूडामणेरधिष्ठानस्य हेम पुष्पस्य केशसरणेर्वा यो रन्ध्रः तत्र अङ्गुलीं प्रावेशयदित्यर्थः । ननु तदानीं हनूमतोऽसूक्ष्मरूपत्वात्तन्मणिविवरे सूक्ष्मरूपभूतासञ्जनमेव समञ्जसमत आह—नहीति । अस्य हनुमतो भुजः सूक्ष्मोऽपि न प्राभवत्र मांति स्म, तत्र न प्राविशदित्यर्थः । न प्राभवद्भुज इति प्रतिषेधस्य प्रसक्तिपूर्वकत्वात् प्रसक्तेः सूक्ष्मरूप एव सम्भवात् भुजप्रतिषेधेन देव्यै प्रदर्शितमात्रं रूपं विहाय सूक्ष्मरूपेण स्थितवानित्यवगम्यते ॥ ७०–७२ ॥ मणिवरमिति । पवनावधूतमुक्तः महावातकम्पितः । प्रतिसंक्रमं प्रतिप्रयाणम् । प्रपेदे प्रारभत ॥७३॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायामष्टात्रिंशः सर्गः ॥ ३८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मणिमित्यादि । अभिज्ञातं सम्यक् ज्ञातम् ॥ १ ॥ त्रयाणामिति "अधीगर्थदयेशां कर्मणि" इति षष्ठी । विवाहकाले शिरोमणिदातृत्वात्पित्रोः ग्रहीतृत्वाच्च मम स्मरणमिति भावः । पाणिग्रहणोत्सवे मम श्वशुराभ्यां प्रथमं शिरोभूषणतया एष दत्तः । अतः श्रीरस्यान् युगपत् स्मरिष्यतीत्यर्थ इत्याह काश्चित् । तदनुचितम् । " मणिरत्नमिदं दत्तं वैदेह्याः श्वशुरेण मे । वधूकाले तथा बद्धमधिकं मूर्ध्नि शोभते " इत्युपरि वक्ष्यमाणत्वाद्विवाह

मणिं दत्त्वा ततः सीता हनुमन्तमथाब्रवीत् । अभिज्ञानमभिज्ञातमेतद्रामस्य तत्त्वतः ॥ १ ॥ मणिं तु दृष्ट्वा रामो वै त्रयाणां संस्मरिष्यति । वीरो जनन्या मम च राज्ञो दशरथस्य च ॥ २ ॥ स भूयस्त्वं समुत्साहे चोदितो हरिसत्तम । अस्मिन् कार्यसमारम्भे प्रचिन्तय यदुत्तरम् ॥ ३ ॥ त्वमस्मिन् कार्यनिर्योगे प्रमाणं हरिसत्तम । हनुमन् यत्नमास्थाय दुःखक्षयकरो भव । तस्य चिन्तयतो यत्नो दुःखक्षयकरो भवेत् ॥ ४ ॥ स तथेति प्रतिज्ञाय मारुतिर्भीमविक्रमः । शिरसाऽऽवन्द्य वैदेहीं गमनायोपचक्रमे ॥५॥ ज्ञात्वा संप्रस्थितं देवी वानरं मारुतात्मजम् । बाष्पगद्गदया वाचा मैथिली वाक्यमब्रवीत् ॥ ६ ॥ कुशलं हनुमन् ब्रूयाः सहितौ रामलक्ष्मणौ ॥ ७ ॥ सुग्रीवं च सहामात्यं वृद्धान् सर्वांश्च वानरान् । ब्रूयास्त्वं वानरश्रेष्ठ कुशलं धर्मसंहितम् ॥ ८ ॥ यथा स च महाबाहुर्मां तारयति राघवः । अस्माद्दुःखाम्बुसंरोधात्त्वं समाधातुमर्हसि ॥ ९ ॥

काले रामजनन्या अनागमनाच्च ॥ २ ॥ ३ ॥ त्वमिति । कार्यनिर्योगे कार्यसङ्कटने । प्रमाणं व्यवस्थापकः । चिन्तयतस्तस्य, तवेति शेषः ॥ ४ ॥ स तथेति । आवन्द्येति पदच्छेदः ॥ ५ ॥ ६ ॥ कुशलमिति । ब्रूया इति । धर्मसंहितं धर्मसहितम् । धर्मपुरस्सरम् कुशलं ब्रूया इत्यर्थः ॥ ७ ॥ ८ ॥ दुःखाम्बुसंरोधात् । अम्बूनि संरुध्यन्ते अनेनेत्यम्बुसंरोधः जलधिः । समाधातुं राममनुकूलयितुम् ॥ ९ ॥

मणिं दत्त्वा रामस्यैतदभिज्ञातमभिज्ञानमित्यब्रवीदिति सम्बन्धः ॥ १ ॥ त्रयाणां संस्मरिष्यति । त्रयाणामिति कर्मणि षष्ठी । पाणिग्रहणकाले मम जननी इमं मणिं दशरथसन्निधौ जनकहस्तादादाय शिरोभूषणतया मह्यं दत्तवती अतो मम जननीं दशरथं जनकं मां च स्मरिष्यतीत्यर्थः ॥ २ ॥ ३ ॥ कार्यनिर्योगे कार्यसङ्कटने । प्रमाणं व्यवस्थापकः ॥ ४–८ ॥ दुःखाम्बुसंरोधात् अम्बुसंरोधो जलधिः । दुःखसागरादित्यर्थः । समाधातुं वक्तुमित्यर्थः ॥ ९–११ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जीवन्तीं सम्भावयति जीवन्तीं करोतीत्यर्थः। तत्तथा अव्ययमेतत् । वचनस्य प्रयोजनमाह–वाचेति । वाचा धर्मं वाचिकधर्मम् ॥ १० ॥ तमेव धर्ममुपपादयति द्वाभ्याम्–नित्यमित्यादि ॥ ११–१५ ॥ पर्जन्यम् इन्द्रम् । " पर्जन्यो रसदब्देन्द्रौ " इत्यमरः ॥ १६ ॥ स हीति । त्वन्निमित्त इति ।

जीवन्तीं मां यथा रामः सम्भावयति कीर्तिमान् । तत्तथा हनुमन् वाच्यं वाचा धर्ममवाप्नुहि ॥ १० ॥ नित्यमुत्साह युक्ताश्च वाचः श्रुत्वा त्वयेरिताः । वर्धिष्यते दाशरथेः पौरुषं मदवाप्तये ॥ ११ ॥ मत्सन्देशयुता वाचस्त्वत्तः श्रुत्वैव राघवः । पराक्रमविधिं वीरो विधिवत् संविधास्यति ॥ १२ ॥ सीताया वचनं श्रुत्वा हनुमान् मारुतात्मजः । शिरस्यञ्जलिमाधाय वाक्यमुत्तरमब्रवीत् ॥ १३ ॥ क्षिप्रमेष्यति काकुत्स्थो हर्यृक्षप्रवरैर्वृतः । यस्ते युधि विजित्यारीन् शोकं व्यपनयिष्यति ॥ १४ ॥ नहि पश्यामि मर्त्येषु नासुरेषु सुरेषु वा । यस्तस्य क्षिपतो बाणान् स्थातुमुत्सहतेऽग्रतः ॥ १५ ॥ अप्यर्कमपि पर्जन्यमपि वैवस्वतं यमम्। स हि सोढुं रणे शक्तस्तव हेतोर्विशेषतः ॥ १६ ॥ स हि सागरपर्यन्तां महीं शासितुमीहते । त्वन्निमित्तो हि रामस्य जयो जनकनन्दिनि ॥ १७ ॥ तस्य तद्वचनं श्रुत्वा सम्यक् सत्यं सुभाषितम् । जानकी बहुमेनेऽथ वचनं चेदमब्रवीत् ॥ १८ ॥ ततस्तं प्रस्थितं सीता वीक्षमाणा पुनः पुनः। भर्तृस्नेहान्वितं वाक्यं सौहार्दादनुमानयत् ॥ १९ ॥ यदि वा मन्यसे वीर वसैकाहमरिन्दम। कस्मिंश्चित् संवृते देशे विश्रान्तः श्वो गमिष्यसि ॥ २० ॥

जयः, भविष्यतीति शेषः ॥ १७ ॥ सम्यक् सोपपत्तिकम् । सत्यं परमार्थम् । सुभाषितं श्रुतिमधुरम् ॥ १८ ॥ वचनं चेदमब्रवीदित्युक्तं विवृणोति–ततस्तामिति । भर्तृस्नेहान्वितम् आत्मनि यो भर्तुः स्नेहस्तेनान्वितम् । स्वविषयभर्तृस्नेहप्रकाशकमिति यावत् । अनुमानयदन्वमानयत् । वक्ष्यमाणोक्तिरूपं संमानवचनमब्रवीदित्यर्थः ॥ १९–२२ ॥

उक्तार्थमेवादरेण पुनराह–मत्सन्देशयुता इति ॥ १२–१८ ॥ तत इति । भर्तुः स्नेहान्वितम् आत्मनि यो भर्तुः स्नेहः तेनान्वितम्, रामस्य स्वविषये स्नेहप्रकाशकमिति यावत् । वाक्यं पूर्वोक्तं हनुमतो वचनम् । अनुमानयत सम्मानयन्ती इति पूर्वेण सम्बन्धः ॥ १९ ॥ यदीति । एकाहं वस, तेन किम् ? कस्मिंश्चिदिति ॥ २० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मम चेदल्पभाग्यायाः सान्निध्यात्तव वानर। अस्य शोकस्य महतो मुहूर्तं मोक्षणं भवेत् ॥ २१ ॥ गते हि हरिशार्दूल पुनरागमनाय तु। प्राणानामपि सन्देहो मम स्यान्नात्र संशयः ॥ २२ ॥ तवादर्शनजः शोको भूयो मां परितापयेत्। दुःखाद्दुःखपरामृष्टां दीपयन्निव वानर ॥ २३ ॥ अयं च वीर सन्देहस्तिष्ठतीव ममाग्रतः। सुमहांस्त्वत्सहायेषु हर्यृक्षेषु हरीश्वर ॥ २४ ॥ कथं नु खलु दुष्पारं तरिष्यन्ति महोदधिम्। तानि हर्यृक्षसैन्यानि तौ वा नरवरात्मजौ ॥ २५ ॥ त्रयाणामेव भूतानां सागरस्यास्य लङ्घने। शक्तिः स्याद्वैनतेयस्य तव वा मारुतस्य वा ॥२६॥ तदस्मिन् कार्यनिर्योगे वीरैवं दुरतिक्रमे। किं पश्यसि समाधानं त्वं हि कार्यविदां वरः ॥२७॥ काममस्य त्वमेवैकः कार्यस्य परिसाधने। पर्याप्तः परवीरघ्न यशस्यस्ते फलोदयः ॥२८॥ बलैः समग्रैर्यदि मां रावणं जित्य संयुगे। विजयी स्वपुरीं यायात् तत्तु मे स्याद्यशस्करम् ॥ २९ ॥ शरैस्तु सङ्कुलां कृत्वा लङ्कां परबलार्दनः। मां येद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत् ॥ ३० ॥

तवेति। दुःखाद्दुःखपरामृष्टां पूर्वदुःखादधिकेन दुःखेन स्पृष्टाम्। दीपयन्निव वर्धयन्निवेत्यर्थः ॥ २३ ॥ अयमिति। अयं वक्ष्यमाणः, तिष्ठतीव मूर्तीभूत इत्यर्थः ॥ २४–२६ ॥ समाधानं परिहारम् ॥ २७ ॥ अहमेव साधयिष्यामीत्याशङ्क्याह–काममिति। हे परवीरघ्न! त्वम् अस्य कार्यस्य सर्वं राक्षसवधपूर्वकमत्प्रापणरूपस्य परिसाधने कामं पर्याप्तः शक्तः। एवं चेत्फलोदयः शक्तिसमृद्धिः। ते यशस्यः तव यशस्करः। न तु ममेति भावः ॥२८॥ तर्हि तव किं यशस्यमित्याकाङ्क्षायामाह–बलैरिति। जित्य जित्वा। मां, गृहीत्वेति शेषः। यायात्, राम इति च शेषः ॥२९॥ एतन्न केवलं मम,

मम चेदिति श्वो गमिष्यसि चेदित्यर्थः ॥ २१–२२ ॥ तवेति। दुःखाद्दुःखपरामृष्टाम् अतिदुःखं प्राप्तामित्यर्थः। दुःखं दुःखपरामृष्टामिति पाठे–दुःखं मां दीपयत् ज्वलयदिव परितापयेदिति सम्बन्धः ॥ २३ ॥ सन्देहः वक्ष्यमाणः। तिष्ठतीव ममाग्रतः, मूर्तीभूत इति शेषः हर्यृक्षेषु विषये ॥ २४ ॥ सन्देहमेवाह–कथं न्वित्यादि ॥ २५ ॥ २६ ॥ कार्यनिर्योगे कार्यसङ्कटने। समाधानम् उपाय इत्यर्थः ॥ २७ ॥ माऽस्तु रामादीनामत्रागमनम् अहमेव सर्वं साधयिष्यामीत्यत आह–काममिति। अस्य कार्यस्य रावणादिवधपूर्वकमन्मोक्षणस्य कामं पर्याप्तः शक्तः, एवं चेत्फलोदयः शक्तिसमृद्धिः ते तवैव यशस्करः न तु ममेति भावः॥ २८॥ तर्हि तव किं यशस्करमत आह–बलैरिति। माम्, गृहीत्वेति शेषः। यायात, राम इति शेषः ॥ २९ ॥ एतद्रामस्यापि यशस्करमित्याह–शरैरिति ॥ ३० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रामस्यापीत्याह–शौरिरिति ॥ ३० ॥ तदिति । तस्य अनुरूपं विक्रान्तं यथा भवेत्तथा उपपादय कुरु ॥ ३१ ॥ अर्थोपहितम् अर्थयुक्तम् । सहितम् परस्परसङ्गतम् । हेतुसंहितं युक्तियुक्तम् । शेषं पूर्वमनुक्तम् उत्तरं वाक्यमब्रवीत् ॥ ३२–३४ ॥ तस्येति । मनःसङ्कल्पसंपाताः मनोव्यापारतुल्यगमनाः ।

तद्यथा तस्य विक्रान्तमनुरूपं महात्मनः । भवेदाहवशूरस्य तथा त्वमुपपादय ॥३१॥ तदर्थोपहितं वाक्यं सहितं हेतुसंहितम् । निशम्य हनुमान् शेषं वाक्यमुत्तरमब्रवीत् ॥ ३२ ॥ देवि हर्यृक्षसैन्यानामीश्वरः प्लवतां वरः । सुग्रीवः सत्त्वसम्पन्नस्तवार्थे कृतनिश्चयः ॥ ३३ ॥ स वानरसहस्राणां कोटीभिरभिसंवृतः । क्षिप्रमेष्यति वैदेहि राक्षसानां निबर्हणः ॥ ३४ ॥ तस्य विक्रमसम्पन्नास्सत्त्ववन्तो महाबलाः । मनस्सङ्कल्पसंपाता निदेशे हरयः स्थिताः ॥३५॥ येषां नोपरि नाधस्तान्न तिर्यक् सज्जते गतिः । न च कर्मसु सीदन्ति महत्स्वमिततेजसः ॥ ३६ ॥ असकृत् तैर्महोत्साहैः ससागरधराधरा । प्रदक्षिणीकृता भूमिर्वायुमार्गानुसारिभिः ॥ ३७ ॥ मद्विशिष्टाश्च तुल्याश्च सन्ति तत्र वनौकसः । मत्तः प्रत्यवरः कश्चिन्नास्ति सुग्रीवसन्निधौ ॥ ३८ ॥ अहं तावदिह प्राप्तः किं पुनस्ते महाबलाः । नहि प्रकृष्टाः प्रेष्यन्ते प्रेष्यन्ते हीतरे जनाः ॥३९॥ तदलं परितापेन देवि शोको व्यपैतु ते । एकोत्पातेन ते लङ्कामेष्यन्ति हरियूथपाः ॥४०॥ मम पृष्ठगतौ तौ च चन्द्रसूर्याविवोदितौ । त्वत्सकाशं महासत्त्वौ नृसिंहावागमिष्यतः ॥४१॥ तौ हि वीरौ नरवरौ सहितौ रामलक्ष्मणौ । आगम्य नगरीं लङ्कां सायकैर्विधमिष्यतः ॥ ४२ ॥

न सज्जते न विलम्बते ॥३५–३७॥ प्रत्यवरः हीनः । पूर्वं चतुर्णामेवात्र गतिरिति विचारप्रकारमात्रमुक्तम् । अत्र तु परमार्थः । यद्यपि बले हनुमानधिकः तथापि वेगे सुग्रीवसन्निहिता नीलादयः सर्वे तुल्या एवेति नानृतोक्तिः ॥ ३८ ॥ ३९ ॥ तदलमिति । एकोत्पातेन एकयत्नेन ॥४०॥ ४१ ॥ तौ हीति ।

विक्रान्तं विक्रमः ॥ ३१ ॥ अर्थोपहितम् अर्थयुक्तम् । सहितं परस्परं सङ्गतम् । हेतुसंहितं युक्तियुक्तम् । शेषं प्रागनुक्तम् ॥३२–३४॥ तस्येति । मनःसङ्कल्पसंपाताः मनोवेगसदृशवेगवन्त इत्यर्थः ॥ ३५–३९ ॥ एकोत्पातेन एकप्लुतेन ॥ ४०–४३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विधमिष्यतः दहिष्यतः ॥ ४२ ॥ ४३ ॥ तदिति । कालकांक्षिणी भव दिवसगणनायां तत्परा भवेत्यर्थः । नचिरात् अचिरात् ॥ ४४--४६ ॥ एवमिति । पुनरब्रवीदिति दाढर्याय पुनरुक्तिः ॥४७-४९॥ शैलाम्बुदेति । द्रक्ष्यसीति शेषः ॥ ५० ॥ ५१ ॥ मा रुदः रोदनं मा कुरु ॥५२॥५३॥ नास्मिन्निति ।

सगणं रावणं हत्वा राघवो रघुनन्दनः । त्वामादाय वरारोहे स्वपुरं प्रतियास्यति ॥ ४३ ॥ तदाश्वसिहि भद्रं ते भव त्वं कालकांक्षिणी । नचिराद्द्रक्ष्यसे रामं प्रज्वलन्तमिवानलम् ॥४४॥ निहते राक्षसेन्द्रेऽस्मिन् सपुत्रामात्यबान्धवे । त्वं समेष्यसि रामेण शशाङ्केनेव रोहिणी ॥४५॥ क्षिप्रं त्वं देवि शोकस्य पारं यास्यसि मैथिलि । रावणं चैव रामेण निहतं द्रक्ष्यसेऽचिरात् ॥४६॥ एवमाश्वास्य वैदेहीं हनुमान् मारुतात्मजः । गमनाय मतिं कृत्वा वैदेहीं पुनरब्रवीत् ॥४७॥ तमरिघ्नं कृतात्मानं क्षिप्रं द्रक्ष्यसि राघवम् । लक्ष्मणं च धनुष्पाणिं लङ्काद्वारमुपस्थितम्*॥४८॥ नखदंष्ट्रायुधान् वीरान् सिंहशार्दूलविक्रमान् । वानरान् वारणेन्द्राभान् क्षिप्रं द्रक्ष्यसि सङ्गतान् ॥४९॥ शैलाम्बुदनिकाशानां लङ्कामलयसानुषु । नर्दतां कपिमुख्यानामार्ये यूथान्यनेकशः ॥ ५० ॥ स तु मर्मणि घोरेण ताडितो मन्मथेषुणा । न शर्म लभते रामः सिंहार्दित इव द्विपः ॥ ५१ ॥ मा रुदो देवि शोकेन मा भूत् ते मनसोऽप्रियम् । शचीव पत्या शक्रेण भर्त्रा नाथवती ह्यसि॥५२॥ रामाद् विशिष्टः कोऽन्योऽस्ति कश्चित् सौमित्रिणा समः । अग्निमारुतकल्पौ तौ भ्रातरौ तव संश्रयौ ॥५३॥ नास्मिंश्चिरं वत्स्यसि देवि देशे रक्षोगणैरध्युषितेऽतिरौद्रे । न ते चिरादागमनं प्रियस्य क्षमस्व मत्सङ्गमकालमात्रम् ॥५४॥ इत्यार्षे श्रीरामायणे वाल्मी० श्रीमत्सुन्दरकाण्डे एकोनचत्वारिंशः सर्गः ॥३९॥

मत्सङ्गमकालमात्रं मम रामेण सङ्गमकालमात्रम् ॥५४॥ इति श्रीगोविन्द० श्रीरामा० शृङ्गारतिल० सुन्दरकाण्डव्याख्याने एकोनचत्वारिंशः सर्गः ॥३९॥

कालकाङ्क्षिणी भव दिवसगणनायां तत्परा भव ॥ ४४-४९ ॥ यूथान्यनेकश इत्यत्र द्रक्ष्यसीत्यनुषङ्गः ॥ ५०--५३ ॥ मत्सङ्गमकालमात्रं मम रामेण सङ्गमकालमात्रमित्यर्थः ॥ ५४ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायाम् एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

सुग्रीवसहितं शूरं वानरैः परिवारितम् । इत्यधिकं कुत्रचित् दृश्यते ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रुत्वेत्यादि ॥ १ ॥ त्वामिति । अर्धसञ्जातसस्या अर्धोत्पन्नसस्या ॥ २ ॥ ३ ॥ अभिज्ञानं चेति । काकस्यैकाक्षिशातनीं क्षिप्ताम् इषीकाम् इषीकतृण रूपमभिज्ञानं पूर्वोक्तं दद्याः । अन्यच्च वक्ष्यामीति भावः । तदेवाह—मन इति । तिलके पूर्वतिलके प्रनष्टे सति । गण्डपार्श्वे गण्डस्थले गण्डशैलपार्श्वे वा ।

श्रुत्वा तु वचनं तस्य वायुसूनोर्महात्मनः । उवाचात्महितं वाक्यं सीता सुरसुतोपमा ॥ १ ॥ त्वां दृष्ट्वा प्रियवक्तारं संप्रहृष्यामि वानर । अर्धसञ्जातसस्येव वृष्टिं प्राप्य वसुन्धरा ॥ २ ॥ यथा तं पुरुषव्याघ्र गात्रैः शोकाभिकर्शितैः । संस्पृशेयं सकामाऽहं तथा कुरु दयां मयि ॥३॥ अभिज्ञानं च रामस्य दद्या हरिगणोत्तम । क्षिप्तामिषीकां काकस्य कोपादेकाक्षिशातनीम् ॥ ४ ॥ मनःशिलायास्तिलको गण्डपार्श्वे निवेशितः । त्वया प्रनष्टे तिलके तं किल स्मर्तुमर्हसि ॥ ५ ॥ स वीर्यवान् कथं सीतां हृतां समनुमन्यसे । वसन्तीं रक्षसां मध्ये महेन्द्रवरुणोपमः ॥ ६ ॥ एष चूडामणिर्दिव्यो मया सुपरिरक्षितः । एतं दृष्ट्वा प्रहृष्यामि व्यसने त्वामिवानघ ॥ ७ ॥ एष निर्यातितः श्रीमान् मया ते वारिसम्भवः । अतः परं न शक्ष्यामि जीवितुं शोकलालसा ॥ ८ ॥ असह्यानि च दुःखानि वाचश्च हृदयच्छिदः । राक्षसीनां सुघोराणां त्वत्कृते मर्षयाम्यहम् ॥९॥ धारयिष्यामि मासं तु जीवितं शत्रुसूदन । मासादूर्ध्वं न जीविष्ये त्वया हीना नृपात्मज ॥ १० ॥

मनःशिलायास्तिलकः मनःशिलाकृततिलकः । तत् मनःशिलातिलकनिर्माणं स्मर्तुमर्हसि । इदमप्यभिज्ञानं दद्या इति योजना ॥ ४–६ ॥ एष इति । प्रहृष्यामीति । अस्य चूडामणेस्त्वया बहुशो लालितत्वेन त्वत्स्मारकत्वादिति भावः ॥ ७ ॥ वारिसम्भवः, रत्नं हि रत्नाकरे उत्पद्यते । अतः परं आत्महितम् आत्मदुःखोद्धारप्रयोजनम् ॥ १ ॥ अर्धसञ्जातानि अर्धवयःप्राप्तानि । ततः परं जलाभावादन्नशेषाणि सस्यानि यस्यास्सा । यथा दैवात्सम्पन्नवृष्ट्या सम्पन्नसस्या भवति तथा अहमपि प्राप्तजीवितनाशा अमृतोपमात्त्वद्दर्शनाद् धृतजीविते ति भावः ॥ २ ॥ ३ ॥ अभिज्ञानान्तरं दास्यामीत्याह—अभिज्ञानमित्यादि । एकाक्षिशातनीं क्षिप्तामिषीकाम् इषीकामनु ॥ ४ ॥ तिलके प्रनष्टे मनश्शिलायास्तिलकः त्वया गण्डपार्श्वे निवेशितः किल, तं स्मर्तुमर्हसीत्यभिज्ञानं च रामस्य रामाय दत्तं भवतीति योजना ॥ ५–८ ॥ असह्यानीति । त्वत्कृते त्वत्प्राप्त्याशया ॥ ९ ॥ १० ॥

स०—मासादूर्ध्वमित्युक्तिस्तु कालेऽधिके सत्यपि तीव्रागमनाभिप्रायेण वा दिनेषु सत्स्वपि आत्मघाताभिप्रायेण वेति ज्ञातव्यम् ॥ १० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

घोरो राक्षसराजोऽयं दृष्टिश्च न सुखा मयि। त्वां च श्रुत्वा विषज्जन्तं न जीवेयमहं क्षणम् ॥ ११ ॥ वैदेह्या वचनं श्रुत्वा करुणं साश्रुभाषितम्। तथाऽब्रवीन्महातेजा हनुमान् मारुतात्मजः ॥ १२ ॥ त्वच्छोकविमुखो रामो देवि सत्येन ते शपे। राघवे दुःखाभिभूते तु लक्ष्मणः परितप्यते ॥ १३ ॥ कथंचिद् भवती दृष्टा न कालः परिशोचितुम्। इमं मुहूर्तं दुःखानामन्तं द्रक्ष्यसि भामिनि ॥ १४ ॥ तावुभौ पुरुषव्याघ्रौ राजपुत्रावरिन्दमौ। त्वद्दर्शनकृतोत्साहौ लङ्कां भस्मीकरिष्यतः ॥ १५ ॥ हत्वा तु समरे क्रूरं रावणं सहबान्धवम्। राघवौ त्वां विशालाक्षि स्वां पुरीं प्रापयिष्यतः ॥ १६ ॥ यत्तु रामो विजानीयादभिज्ञानमनिन्दिते। प्रीतिसञ्जननं तस्य भूयस्त्वं दातुमर्हसि ॥ १७ ॥ साऽब्रवीद्वृत्तमेवेति मयाऽभिज्ञानमुत्तमम्। एतदेव हि रामस्य दृष्ट्वा मत्केशभूषणम्। श्रद्धेयं हनुमन् वाक्यं तव वीर भविष्यति ॥ १८ ॥ स तं मणिवरं गृह्य श्रीमान् प्लवगसत्तमः। प्रणम्य शिरसा देवीं गमनायोपचक्रमे ॥ १९ ॥ तमुत्पातकृतोत्साहमवेक्ष्य हरिपुङ्गवम्। वर्धमानं महावेगमुवाच जनकात्मजा ॥ २० ॥ अश्रुपूर्णमुखी दीना बाष्पगद्गदया गिरा ॥ २१ ॥ हनुमन् सिंहसङ्काशौ भ्रातरौ रामलक्ष्मणौ। सुग्रीवं च सहामात्यं सर्वान् ब्रूया ह्यनामयम् ॥ २२ ॥ यथा च स महाबाहुर्मां तारयति राघवः। अस्माद्दुःखाम्बुसंरोधात् त्वं समाधातुमर्हसि ॥ २३ ॥ इमं च तीव्रं मम शोकवेगं रक्षोभिरेभिः परिभर्त्सनं च। ब्रूयास्तु रामस्य गतः समीपं शिवश्च तेऽध्वाऽस्तु हरिप्रवीर ॥२४॥

मासात्पराम् ॥ ८–१० ॥ विसज्जन्तं विलम्बमानम् ॥ ११–१२ ॥ कथंचिदिति । इमं मुहूर्तम् अस्मिन्मुहूर्ते ॥ १४–२३ ॥ इमं चेति । शिवश्च तेऽध्वाऽस्तु हरिप्रवीरेति । शिवः अव्याहत इत्यर्थः ॥ २४ ॥

विषज्जन्तमिति पाठे क्लिश्यन्तम् ॥ ११–१३ ॥ इमं मुहूर्तम् अस्मिन्मुहूर्ते ॥ १४–१९ ॥ उत्पातकृतोत्साहम् उत्पाते उत्पतने कृतोत्साहम् ॥ २०–२४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स इति । अल्पावशेषम् अल्पावशिष्टम् । प्रसमीक्ष्य विचार्य ॥२९॥ इति श्रीगो० श्रीरामा० शृङ्गार० सुन्दरकाण्डव्याख्याने चत्वारिंशः सर्गः ॥४०॥
स चेत्यादि ॥ १ ॥ अल्पेति । "अभिगम्य तु वैदेहीं निलयं रावणस्य च" इत्युक्तकार्यद्वये सीतादर्शनरूपं कार्यं जातम् । इदं कार्यं रावणनिलयपरिज्ञान
रूपम । अल्पशेषम् अल्पावशिष्टम् । सान्तःपुरलङ्कायाः सम्यक् परिज्ञातत्वेऽपि राक्षसबलाबलरावणहृदयाद्यपरिज्ञानात्कार्यस्याल्पशेषत्वोक्तिः । इह

स राजपुत्र्या प्रतिवेदितार्थः कपिः कृतार्थः परिहृष्टचेताः । अल्पावशेषं प्रसमीक्ष्य कार्यं दिशं ह्युदीचीं मनसा जगाम ॥ २९ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥
स च वाग्मिः प्रशस्ताभिर्गमिष्यन् पूजितस्तया । तस्मादेशादपक्रम्य चिन्तयामास वानरः ॥ १ ॥ अल्पशेषमिदं कार्यं दृष्टेयमसितेक्षणा । त्रीनुपायानतिक्रम्य चतुर्थ इह दृश्यते ॥ २ ॥ न साम रक्षस्सु गुणाय कल्पते न दान मर्थोपचितेषु युज्यते । न भेदसाध्या बलदर्पिता जनाः पराक्रमस्त्वेव ममेह रोचते ॥ ३ ॥ न चास्य कार्यस्य परा क्रमादृते विनिश्चयः कश्चिदिहोपपद्यते । हतप्रवीरा हि रणे हि राक्षसाः कथंचिदीयुर्यदिहाद्य मार्दवम् ॥ ४ ॥

राक्षसबलाबलरावणहृदयपरिज्ञानरूपकार्ये । त्रीनुपायानतिक्रम्य सामदानभेदानतिक्रम्य । चतुर्थो दृश्यते साधनतया दण्ड एव दृश्यत इत्यर्थः ॥२॥
उपपत्तिपूर्वकमेतदेव विवृणोति–न सामेति । "अनित्यो विजयो यस्माद्दृश्यते युद्ध्यमानयोः । पराजयश्च संग्रामे तस्माद्युद्धं विसर्जयेत् ॥" इति युद्धस्य
अव्यवस्थितफलकत्वेऽपि 'सर्वं बलवतः पथ्यम्' इति न्यायेन सर्वातिशायिबलपराक्रमस्य मम पराजयप्रसङ्ग एव नास्तीत्यभिप्रायेणाह पराक्रम

अल्पावशेषम् अल्पावशिष्टम् । प्रसमीक्ष्य विचार्य ॥ २९ ॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्वदीपिकारव्यायां सुन्दरकाण्डव्याख्यायां चत्वारिंशः सर्गः ॥४०॥
॥ १ ॥ चिन्तासंकल्पाह–अल्पशेषमित्यादिना कपीश्वरालयमित्यन्तेन । द्वयमिह कार्यम् देवीदर्शनं परबलादिपरिज्ञानं चेति । तत्र देवीदर्शनस्य महतः प्रधान
कृत्यस्य निष्पन्नत्वादितरस्य त्वानुषङ्गिकत्वादल्पशेषमित्याभिप्रायः । तत्र निष्पन्नं सन्दर्शयति दृष्टेयमिति । इतरनिष्पत्तौ उपायं निर्धारयति त्रीनिति । इह राक्ष स
बलरावणहृदयपरिज्ञानरूपे कार्ये त्रीनुपायान् सामदानभेदानतिक्रम्य चतुर्थो दृश्यते साधनतया दण्डो दृश्यते ॥ २॥ उपपत्तिपूर्वकम् एतदेव विवृणोति–न सामेति ।
ऋजुषु सामप्रयोगः फलाय कल्पते, न शठेष्वित्याशयेनाह रक्षस्विति । जयापजयावव्यवस्थितावित्याशङ्क्य 'सर्वं बलवतः पथ्यम्' इतिवत्सर्वातिशायि
बलपराक्रमस्य मम पराजयप्रसङ्ग एव नास्तीत्यभिप्रायेणाह पराक्रम इति ॥ ३ ॥ उक्तं सामाद्युपायमुपसंहरति–न चेति । विनिश्चयः उपायः । तथापि पराक्रमे किं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इति। मम तु इह रक्षोविषये पराक्रम एव रोचत इति संबन्धः ॥ ३ ॥ ४ ॥ " अभिगम्य तु वैदेहीं निलयं रावणस्य च " इत्यनुज्ञातस्यातिरिक्तकार्य करणे दोषमाशङ्क्य परिहरति–कार्य इति। कार्ये विहिते कर्तव्ये, बहूनि कार्याणि ॥ ५ ॥ न हीति। अल्पस्यापि कर्मणः एको हेतुस्साधको न किमुत महतः कर्मण इति भावः। बहुधा बहुभिर्हेतुभिः ॥६॥ पूर्वोक्तसमर्थनायाह–इहैवेति। अहमिहैव। परात्मसंमर्दविशेषतत्त्ववित् परात्मनोर्युद्धतारतम्यतत्त्व

कार्ये कर्मणि निर्दिष्टे यो बहून्यपि साधयेत्। पूर्वकार्याविरोधेन स कार्यं कर्तुमर्हति ॥ ५ ॥ न ह्येकः साधको हेतुः स्वल्पस्यापीह कर्मणः। यो ह्यर्थं बहुधा वेद स समर्थोऽर्थसाधने ॥ ६ ॥ इहैव तावत् कृतनिश्चयो ह्यहं यदि व्रजेयं प्लवगेश्वरालयम्। परात्मसंमर्दविशेषतत्त्ववित् ततः कृतं स्यान्मम भर्तृशासनम् ॥ ७ ॥ कथं नु खल्वद्य भवेत् सुखागतं प्रसह्य युद्धं मम राक्षसैः सह। तथैव खल्वात्मबलं च सारवत् संमानयेन्मां च रणे दशाननः ॥८॥

वित् कृतनिश्चयः कृतबलाबलनिश्चयः सन् यदि प्लवगेश्वरालयं व्रजेयं ततः भर्तृशासनं सीतादर्शनरावणनिलयसम्यक्परिज्ञानविषयं शासनम्। तावत् साकल्येन कृतं स्यात्। अन्यथा राक्षसबलाबलं कीदृशमिति भर्त्रा पृष्टे निरुत्तरः स्यामिति भावः ॥ ७ ॥ कथं न्विति। युद्धं कथं सुखागतं सुखेन प्राप्तं भवेत्तथा कर्तव्यमित्यर्थः। युद्धस्य फलमाह–तथैवेत्यादिना सार्द्धश्लोकेन। तथैव खलु युद्धकरणे खलु। सः दशाननः। रणे आत्मबलं स्वपक्षबलं

कारणमत आह हतेति। हताः प्रवीराः मुख्याः येषां ते हतप्रवीराः। यतः कतिपयवधे शेषा मार्दवमीयुः अतः पराक्रम एव रोचत इत्यर्थः ॥ ४ ॥ " अधिगम्य तु वैदेहीं निलयं रावणस्य च " इत्यनुज्ञातव्यतिरिक्तकार्यकरणे दोषमाशङ्क्य परिहरति–कार्य इति। कार्ये कर्तव्ये कर्मणि, बहूनि कार्याणि ॥ ५ ॥ स्वल्पस्यापि कर्मणः एको हेतुः न साधको भवति, किमुत महतः कर्मण इति भावः। अर्थं कार्यं बहुधा बहूपायसाध्यं यो वेद ॥ ६ ॥ ननु स्वामिना निर्दिष्टसीतादर्शनं कृत मेव, अन्यत्तु सुग्रीवसन्निधौ भविष्यतीत्यत आह–इहैवेति। परात्मसम्मर्दविशेषतत्त्वविदहं परस्य आत्मनश्च सम्मर्दं युद्धतारतम्यं तस्य तत्त्ववित् कृतनिश्चयः कृत बलाबलनिश्चयस्सन् यदि प्लवगेश्वरालयं व्रजेयं ततो मम भर्तृशासनं सीतादर्शनरावणनिलयसम्यक्परिज्ञानविषयं शासनं तावत् साकल्येन कृतं स्यात्, अन्यथा राक्षसबलाबलं कीदृशमिति भर्त्रा पृष्टो निरुत्तरस्स्यामिति भावः ॥७॥ युद्धं सुखागतं सुखेन प्राप्तं भवेत् तथा, कर्तव्यमिति शेषः। युद्धस्य फलमाह–तथैवेत्यादिना

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मां च । सारवत् मानयेत्परिच्छिन्द्यात् ॥ ८ ॥ बलप्रयायिना सेनान्या सह वर्तत इति सबलप्रयायी तम् । तस्य हृदि स्थितं मतं सीताविषयाध्यव सायं बलं च मत्वा सुखेन इतः अस्मात् स्थानात् पुनः व्रजे व्रजिष्यामि ॥ ९ ॥ इदमिति । नेत्रमन×कान्तम्, वर्तत इति शेषः ॥ १० ॥ ११ ॥ तत

ततः समासाद्य रणे दशाननं समन्त्रिवर्गं सबलप्रयायिनम् । हृदि स्थितं तस्य मतं बलं च वै सुखेन मत्वाऽहमितः पुनर्व्रजे ॥ ९ ॥ इदमस्य नृशंसस्य नन्दनोपममुत्तमम् । वनं नेत्रमन×कान्तं नानाद्रुमलतायुतम् ॥ १० ॥ इदं विध्वंसयिष्यामि शुष्कं वनमिवानलः । अस्मिन् भग्ने ततः कोपं करिष्यति दशाननः ॥ ११ ॥ ततो महत् साश्व महारथद्विपं बलं समादेक्ष्यति राक्षसाधिपः । त्रिशूलकालायसपट्टसायुधं ततो महद्युद्धमिदं भविष्यति ॥ १२ ॥ अहं तु तैः संयति चण्डविक्रमैः समेत्य रक्षोभिरसह्यविक्रमः । निहत्य तद्रावणचोदितं बलं सुखं गमिष्यामि कपीश्वरालयम् ॥ १३ ॥ ततो मारुतवत् क्रुद्धो मारुतिर्भीमविक्रमः । ऊरुवेगेन महता द्रुमान् क्षेप्तुमथारभत् ॥ १४ ॥ ततस्तु हनुमान् वीरो बभञ्ज प्रमदावनम् । मत्तद्विजसमाघुष्टं नानाद्रुमलतायुतम् ॥ १५ ॥ तद्वनं मथितैर्वृक्षै र्भिन्नैश्च सलिलाशयैः । चूर्णितैः पर्वताग्रैश्च बभूवाप्रियदर्शनम् ॥ १६ ॥ नानाशकुन्तविरुतैः प्रभिन्नैः सलिलाशयैः । ताम्रैः किसलयैः क्लान्तैः क्लान्तद्रुमलतायुतम् । न बभौ तद्वनं तत्र दावानलहतं यथा ॥ १७ ॥

इति । समादेक्ष्यति नियोजयिष्यति । इदम् अव्यवहितोत्तरकालिकम् । कपीश्वरालयमित्यनन्तरमितिकरणं द्रष्टव्यम् । इति चिन्तयामासेत्यन्वयः ॥१२॥ ॥१३॥ ततः तेन चिन्तितेन हेतुना॥१४॥ प्रमदावनम् अन्तःपुरवनम् । "प्रमदावनमन्तःपुरोचितम्" इत्यमरः ॥१५॥ पर्वताग्रैः क्रीडापर्वताग्रैः ॥१६॥१७

रामानु०—नानाशकुन्तविरुतैः प्रभिन्नैस्सलिलाशयैरित्यतः परम् ताम्रैः किसलयैः क्लान्तैः क्लान्तद्रुमलतायुतम् । न बभौ तद्वनं तत्र दावानलहतं यथा इति पाठक्रमः ॥ १७ ॥

सारवत् । तत्रैव खलु युद्धकरणे खलु, दशाननः आत्मबलं स्वपक्षबलं मां च सारवत् सम्मानयेत् सम्यक् परिच्छिन्द्यात् ॥ ८ ॥ सबलप्रयायिनं ससैन्यम्, हृदि स्थितं मतं हृदतनिश्चयम् ॥ ९–१२ ॥ कपीश्वरालयमित्यत्र इतिशब्दो द्रष्टव्यः । तस्य चिन्तयामासेति पूर्वेण सम्बन्धः ॥ १३–१९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

व्याकुलावरणाः आवरणादुपघ्नाद्व्याकुलाः । विह्वलाः स्त्रिय इव॥१८॥ व्यालमृगैः श्वापदादिहिंस्रमृगैः । निर्धुतैः पीडितैः । गृहैः केवलगृहैः ॥१९॥सेति । शोच्यत इति शोकः । प्रतानं विततिः । अशोकम् अशोच्यम् लताप्रतानं यस्यास्सा अशोकलताप्रताना । दशास्यप्रमदावनस्य भोगवर्धनेन रावण वनितारक्षकस्य । प्रमदावनस्य अन्तःपुरोद्यानस्य । सा वनस्थली तृणगुल्मलतादिविशिष्टप्रदेशः । कपेर्बलाद्धि विह्वला लुलिता शोकलताप्रताना च

व्याकुलावरणा रेजुर्विह्वला इव ता लताः ॥ १८ ॥ लतागृहैश्चित्रगृहैश्च नाशितैर्महोरगैर्व्यालमृगैश्च निर्धुतैः । शिला गृहैरुन्मथितैस्तथा गृहैः प्रनष्टरूपं तदभून्महद्वनम् ॥ १९ ॥ सा विह्वलाऽशोकलताप्रताना वनस्थली शोकलता प्रताना । जाता दशास्यप्रमदावनस्य कपेर्बलाद्धि प्रमदावनस्य ॥ २० ॥ स तस्य कृत्वाऽर्थपतेर्महाकपिर्महद्व्यलीकं मनसो महात्मनः । युयुत्सुरेको बहुभिर्महाबलैः श्रिया ज्वलंस्तोरणमास्थितः कपिः ॥२१॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

जाता । यद्वा शोकलताश्शोकरताः । रलयोरभेदः । अप्प्रतानाः अप्सु प्रतानाः कमलकल्हारादयोऽस्यां सा शोकलताप्प्रताना । म्लानजलजेति यावत् । दशास्यप्रमदावनस्य रावणप्रमदावनस्य । "ङ्यापोस्संज्ञाच्छन्दसोर्बहुलम्" इति बहुलवचनाद्ध्रस्वाभावः । दशास्यप्रमदावनस्य वनस्थलीत्यत्र शिला पुत्रकस्य शरीरमितिवदुपचारात् षष्ठी । प्रमदावनस्य सीतारूपप्रमदापालकस्य । वनस्थली कपेर्बलाद्विह्वला शोकलताप्रताना च जाता । अशोकलते त्युपलक्षणम् ॥ २० ॥ स इति । अर्थपतेः राज्ञो रावणस्य । मनसः व्यलीकम् अप्रियम् पीडनं वा । " अलीकं त्वप्रियाकार्यवैलक्ष्यानृतपीडने " इति निघण्टुः । युयुत्सुः योद्धुमिच्छुः । तोरणम् उद्यानबहिर्द्वारम् । "तोरणोऽस्त्री बहिर्द्वारम्" इत्यमरः ॥ २१ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायण भूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकचत्वारिंशः सर्गः ॥ ४१ ॥

सा विह्वलेति । प्रमदावनस्य अन्तःपुरविहारवनस्येत्यर्थः । " स्यादेतदेव प्रमदावनमन्तःपुरोचितम् " इत्यमरः । " ङ्यापोः संज्ञाच्छन्दसोर्बहुलम् " इति बहुल ग्रहणादनियतो ह्रस्वः । अत एव दशास्यप्रमदावनस्य दशास्यप्रमदानां स्त्रीणां भोगसंवर्द्धनद्वारा अवनस्य रक्षकस्य । अशोकलताप्रताना अशोकलतासमूहा वनस्थली तृणगुल्मलताजलाशयादिभिः पूर्णभूमिः कपेर्बलात् शोकलताप्रताना, शोच्यत इति शोकः शोच्यलताप्रताना जातेति योजना ॥ २० ॥ स इति । अर्थ पतेः राज्ञो रावणस्य । व्यलीकम् अप्रियम् ॥ २१ ॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायाम् एकचत्वारिंशः सर्गः ॥ ४१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ततः पक्षीत्यादि ॥ १–४ ॥ ततस्तमित्यादि । उतशब्दो वार्थे । "उताप्यर्थविकल्पयोः" इत्यमरः । संवादो वा कथं कृत इति पप्रच्छुरिति पूर्वेण सम्बन्धः । कः किन्नामकः । कस्य कस्य सम्बन्धी पुरुषः । कुतः कस्मादेशादागतः । किन्निमित्तं किं प्रयोजनमुद्दिश्य । संवादं किं कृतवान् किमुद्दिश्य

ततः पक्षिनिनादेन वृक्षभङ्गस्वनेन च । बभूवुस्त्रासंसंभ्रान्ताः सर्वे लङ्कानिवासिनः ॥ १ ॥ विद्रुताश्च भयत्रस्ता विनेदुर्मृगपक्षिणः । रक्षसां च निमित्तानि क्रूराणि प्रतिपेदिरे ॥ २ ॥ ततो गतायां निद्रायां राक्षस्यो विकृताननाः । तद्वनं ददृशुर्भग्नं तं च वीरं महाकपिम् ॥ ३ ॥ स ता दृष्ट्वा महाबाहुर्महासत्त्वो महाबलः । चकार सुमहद्रूपं राक्षसीनां भयावहम् ॥ ४ ॥ ततस्तं गिरिसङ्काशमतिकायं महाबलम् । राक्षस्यो वानरं दृष्ट्वा पप्रच्छुर्जनकात्मजाम् ॥ ५ ॥ कोऽयं कस्य कुतो वाऽयं किंनिमित्तमिहागतः । कथं त्वया सहानेन संवादः कृत इत्युत ॥ ६ ॥ आचक्ष्व नो विशालाक्षि मा भूत्ते सुभगे भयम् । संवादमसितापाङ्गे त्वया किं कृतवानयम् ॥ ७ ॥ अथाब्रवीत्तदा साध्वी सीता सर्वाङ्गसुन्दरी । रक्षसां भीमरूपाणां विज्ञाने मम का गतिः ॥ ८ ॥ यूयमेवाभिजानीत योऽयं यद्वा करिष्यति । अहिरेव ह्यहेः पादान् विजानाति न संशयः ॥ ९ ॥

कृतवान् । सर्वस्यापि पप्रच्छुरिति पूर्वेणान्वयः ॥ ५–७ ॥ अथाब्रवीदित्यादि । अयं यः यादृशः । यद्वा कार्यं करिष्यति तद्यूयमेवाभिजानीतेति ॥ १ ॥ प्रतिपेदिरे प्राप्तानि ॥ २ ॥ गतायां निद्रायाम्, वनभङ्गध्वनिनेत्यर्थः ॥ ३–५ ॥ कोयमिति । उतशब्दो वार्थे । संवादो वा कथं कृत इति पप्रच्छुरिति पूर्वेण सम्बन्धः ॥ ६ ॥ आचक्ष्वेति । त्वया संवादं किं कृतवान् किमुद्दिश्य संवादं कृतवान् । पप्रच्छुरिति पूर्वेण सम्बन्धः ॥ ७ ॥ का गतिः क उपायः ॥ ८ ॥ योऽयं यद्वा

ति०—त्वयाऽनेन कथं संवादः कृत इति च पप्रच्छुः । यद्यपि ता निद्रिताः वनभङ्गध्वनिना जागरिता इति संवादज्ञानस्यैवाभावात् कथं प्रश्नो निरवसरः । तथापि निद्रामध्ये किञ्चिज्जागरेणैतत्संवादश्रवणेपि देवमायया पुनर्निद्रेति तत्प्रश्नोपपत्तिरित्याहुः । सीतायास्तदर्शनेऽपि निर्भयप्रसन्नमुखतयाऽवस्थानदर्शनादयं कश्चिदेतत्परिचित एतद्वृत्तान्तज्ञानार्थमेव प्रायेणागत इति सम्भाव्यानया संवादकरणं च सम्भाव्य तत्प्रश्न निर्वाह इति कतकः ॥ ६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

संबन्धः । नैनं जानामीति। "विवाहकाले रतिसंप्रयोगे प्राणात्यये सर्वधनापहारे । (विप्रस्य) मित्रस्य चार्थेष्वनृतं वदेयुः पञ्चानृतान्याहुरपातकानि ॥"

अहमप्यस्य भीताऽस्मि नैनं जानामि कोन्वयम्। वेद्मि राक्षसमेवैनं कामरूपिणमागतम् ॥ १० ॥ वैदेह्या वचनं श्रुत्वा राक्षस्यो विद्रुता दिशः । स्थिताः काश्चिद्गताः काश्चिद्रावणाय निवेदितुम् ॥ ११ ॥ रावणस्य समीपे तु राक्षस्यो विकृताननाः । विरूपं वानरं भीममाख्यातुमुपचक्रमुः ॥ १२ ॥ अशोकवनिकामध्ये राजन् भीमवपुः कपिः । सीतया कृतसंवादस्तिष्ठत्यमितविक्रमः ॥ १३ ॥ न च तं जानकी सीता हार्यं हरिणलोचना । अस्माभिर्बहुधा पृष्टा निवेदयितुमिच्छति ॥ १४ ॥ वासवस्य भवेद्दूतो दूतो वैश्रवणस्य वा । प्रेषितो वाऽपि रामेण सीतान्वेषण कांक्षया ॥ १५ ॥ तेन त्वद्भुतरूपेण यत्तत्तव मनोहरम् । नानामृगगणाकीर्णं प्रमृष्टं प्रमदावनम् ॥ १६ ॥ न तत्र कश्चिदुद्देशो यस्तेन न विनाशितः । यत्र सा जानकी सीता स तेन न विनाशितः ॥ १७ ॥ जानकीरक्षणार्थं वा श्रमाद्वा नोपलभ्यते । अथवा कः श्रमस्तस्य सैव तेनाभिरक्षिता ॥ १८ ॥ चारुपल्लवपुष्पाढ्यं यं सीता स्वय मास्थिता । प्रवृद्धः शिंशुपावृक्षः स च तेनाभिरक्षितः ॥ १९ ॥ तस्योग्ररूपस्योग्र त्वं दण्डमाज्ञातुमर्हसि । सीता संभाषिता येन तद्वनं च विनाशितम् ॥ २० ॥

इति स्मरणादसत्योक्तिः ॥८–१०॥ वैदेह्या इति । दिशः दिक्षु, वनस्य पार्श्वेष्वित्यर्थः । विद्रुताः विलीनाः । निवेदितुं निवेदयितुम् ॥ ११–१५॥ प्रमृष्टं भग्नमित्यर्थः ॥ १६–१९ ॥ तस्येति । हे उग्र ! त्वम् आज्ञातुम् आज्ञापयितुम् ॥ २० ॥ २१ ॥

करिष्यति तद्भयमेव जानीतेति सम्बन्धः ॥ ९ ॥ अस्य अस्मात् भीताऽस्मि ॥१०॥ वैदेह्या वचनम् अज्ञानप्रतिपादकम्, अनेनात्मत्राणादौ मृषावादो न दोषायेति ध्वनितम् । काश्चिद्विद्रुताः काश्चिद्दृढं स्थिता एव काश्चिद्रावणाय निवेदितुं गताः॥११–१३॥न निवेदयितुमिच्छति प्रायेणेयं तं जानातीति तासामाशयः॥१४–१६॥ उद्देशः प्रदेशः ॥ १७–१९ ॥ आज्ञातुम् आज्ञापयितुम् ॥ २० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

संवर्तिततेक्षणः परिवर्तिततेक्षणः ॥ २२ ॥ २३ ॥ नाम प्रसिद्धौ । किंकर इति प्रसिद्धानित्यर्थः ॥ २४ ॥ किंकराणां सङ्ख्यां निर्दिशति–तेषामिति ॥२५॥ निर्ययुरिति । सर्व इति विशेष्यम् । कूटो नाम अयस्कारकूटसदृश आयुधविशेषः । मुद्गरः द्रुघणः ॥ २६ ॥ अवस्थितं युद्धाय सन्नद्धमित्यर्थः ॥ २७ ॥

मनःपरिगृहीतां तां तव रक्षोगणेश्वर । कः सीतामभिभाषेत यो न स्यात्त्यक्तजीवितः ॥ २१ ॥ राक्षसीनां वचः श्रुत्वा रावणो राक्षसेश्वरः । हुताग्निरिव जज्वाल कोपसंवर्तितेक्षणः ॥ २२ ॥ तस्य क्रुद्धस्य नेत्राभ्यां प्रापतन्नास्रबिन्दवः । दीप्ताभ्यामिव दीपाभ्यां सार्चिषः स्नेहबिन्दवः ॥२३॥ आत्मनः सदृशाञ्छूरान् किङ्करान्नाम राक्षसान् । व्यादिदेश महातेजा निग्रहार्थं हनूमतः ॥२४॥ तेषामशीतिसाहस्रं किङ्कराणां तरस्विनाम् ॥ २५ ॥ निर्ययुर्भवनात् तस्मात् कूटमुद्गरपाणयः । महोदरा महादंष्ट्रा घोररूपा महाबलाः । युद्धाभिमनसः सर्वे हनुमद्ग्रहणोन्मुखाः ॥ २६ ॥ ते कपीन्द्रं समासाद्य तोरणस्थमवस्थितम् । अभिपेतुर्महावेगाः पतङ्गा इव पावकम् ॥ २७ ॥ ते गदाभिर्विचित्राभिः परिघैः काञ्चनाङ्गदैः । आजघ्नुर्वानरश्रेष्ठं शरैश्चादित्यसन्निभैः ॥ २८ ॥ मुद्गरैः पट्टिशैः शूलैः प्रास तोमरशक्तिभिः । परिवार्य हनूमन्तं सहसा तस्थुरग्रतः ॥ २९ ॥ हनुमानपि तेजस्वी श्रीमान् पर्वतसन्निभः । क्षितावाविध्य लांगूलं ननाद च महास्वनम् ॥ ३० ॥ स भूत्वा सुमहाकायो हनुमान् मारुतात्मजः । धृष्टमास्फोटयामास लङ्कां शब्देन पूरयन् ॥ ३१ ॥

परिघैः परिघपातनैः । काञ्चनाङ्गदैः काञ्चनपटैः ॥ २८ ॥ मुद्गरैरिति । पट्टिशो नाम लोहदण्डः तीक्ष्णधारः क्षुरोपम आयुधविशेषः । अत्रेत्थंभूतलक्षणे तृतीया । प्रासः कुन्तः । तोमरः आयुधविशेषः ॥ २९ ॥ श्रीमानिति तात्कालिकहर्षकृतकान्तिरुच्यते ॥ ३० ॥ धृष्टमिति क्रियाविशेषणम् ॥ ३१ ॥

सीतया सह सम्भाषणस्य अपराधत्वं साधयन्ति–मनःपरिगृहीतामिति । राजपरिग्रहसम्भाषणं पुंसोऽपराध इति भावः ॥ २१–२४ ॥ व्यादिष्टाः किङ्कराः कियन्त इत्यत आह–तेषामिति । निर्ययुरित्यायुत्तरशेषः ॥ २५॥२६॥ अवस्थितं युद्धाय सन्नद्धम् ॥ २७ ॥ काञ्चनाङ्गदैः काञ्चनभूषणैः ॥ २८–३१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तस्येत्यादि । सानुनादिना सप्रतिध्वनिना । यद्वा अनुनादिनः पर्वतगुहादयः तत्सहितेन । यद्वा सानुषु प्रतिध्वनिं कुर्वता । उच्चैश्चेदमघोषयदिति । स हनुमान् इदं वक्ष्यमाणं वचनमुच्चैरघोषयत्॥३२॥घोषणवचनमाह—जयतीत्यादि । अभिपालितः वालिवधेन ॥३३॥आक्लिष्टकर्मण इत्यनेन स्वदास्यं न

तस्यास्फोटितशब्देन महता सानुनादिना । पेतुर्विहङ्गा गगनादुच्चैश्चेदमघोषयत् ॥ ३२ ॥ जयत्यतिबलो रामो लक्ष्मणश्च महाबलः । राजा जयति सुग्रीवो राघवेणाभिपालितः ॥ ३३ ॥ दासोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः । हनुमान् शत्रुसैन्यानां निहन्ता मारुतात्मजः ॥३४॥ न रावणसहस्रं मे युद्धे प्रतिबलं भवेत् । शिलाभिस्तु प्रहरतः पादपैश्च सहस्रशः ॥ ३५ ॥ अर्दयित्वा पुरीं लङ्कामभिवाद्य च मैथिलीम् । समृद्धार्थो गमिष्यामि मिषतां सर्वरक्षसाम् ॥३६॥ तस्य सन्नादशब्देन तेऽभवन् भयशङ्किताः । ददृशुश्च हनूमन्तं सन्ध्यामेघमिवोन्नतम् ॥ ३७ ॥ स्वामिसन्देशनिश्शङ्कास्ततस्ते राक्षसाः कपिम् । चित्रैः प्रहरणैर्भीमैरभिपेतुस्ततस्ततः ॥ ३८ ॥ स तैः परिवृतः शूरैः सर्वतः स महाबलः । आससादायसं भीमं परिघं तोरणाश्रितम् । स तं परिघमादाय जघान रजनीचरान् ॥ ३९ ॥ स पन्नगमिवादाय स्फुरन्तं विनतासुतः । विचचाराम्बरे वीरः परिगृह्य च मारुतिः ॥ ४० ॥

कर्मकृतम्, किन्तु स्वरूपप्रयुक्तमित्युच्यते॥३४॥प्रतिबलं समानबलम् । प्रहरतः, राक्षसानिति शेषः । प्रहारमात्रेण वा हनुमद्विशेषणम्॥३५॥अर्दयित्वेति । मिषतां पश्यताम् । अनादरे षष्ठी ॥ ३६ ॥ सन्ध्यामेघमिवेति रक्तवर्णत्वात् ॥३७॥ ततस्तत इति । अनेनास्य समीपं सहसा गन्तुमशक्ता इत्यवगम्यते ॥ ३८ ॥ ३९ ॥ स पन्नगमिति सपरिवत्वमात्रे दृष्टान्तः । परिगृह्य, परिघमिति शेषः । स्फुरन्तं पन्नगमादाय विनतासुत इव स वीरो मारुतिः परिघं

तस्येति । आस्फोटितशब्देन क्ष्वेलाशब्देन । सानुनादिना सप्रतिध्वनिना । इन्नन्तो बहुव्रीहिः ॥ ३२ ॥ स्वयं जयार्थं स्वामिनं स्तौति—जयतीति ॥ ३३–३५ ॥ अर्दयित्वेति । मिषतां पश्यताम् । अनादरे षष्ठी ॥ ३६ ॥ तस्येति । सन्नादशब्देन सन्नादजनितशब्देन, आस्फोटितस्वनजनितप्रतिध्वनिनेत्यर्थः ॥ ३७ ॥ प्रहरणैः अभिपेतुः आयुधैः प्राहरन्नित्यर्थः ॥ ३८ ॥ ३९ ॥ परिगृह्येत्यत्र परिघः कर्म ॥ ४० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

परिगृह्याम्बरे विचचारेति सम्बन्धः ॥ ४० ॥ ४१ ॥ तस्मात् भयान्मुक्ताः दूरस्थाः इत्यर्थः ॥ ४२ ॥ ४३ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्विचत्वारिंशः सर्गः ॥ ४२ ॥ ततः स किङ्करानित्यादि ॥ १ ॥ वनमित्यादि । ध्वंसन

[सूदयामास वज्रेण दैत्यानिव सहस्रदृक् ।]स हत्वा राक्षसान् वीरान् किङ्करान् मारुतात्मजः । युद्धकांक्षी पुनर्वीरस्तोरणं समुपाश्रितः ॥ ४१ ॥ ततस्तस्माद्भयान्मुक्ताः कतिचित्तत्र राक्षसाः । निहतान् किङ्करान् सर्वान् रावणाय न्यवेदयन् ॥४२॥ स राक्षसानां निहतं महद्बलं निशम्य राजा परिवृत्तलोचनः । समादिदेशाप्रतिमं पराक्रमे प्रहस्त पुत्रं समरे सुदुर्जयम् ॥ ४३ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये० श्रीमत्सुन्दरकाण्डे द्विचत्वारिंशः सर्गः ॥४२॥ ततः स किङ्करान् हत्वा हनुमान् स्थानमास्थितः ॥ १ ॥ वनं भग्नं मया चैत्यप्रासादो न विनाशितः । तस्मात् प्रासादमप्येव भीमं विध्वंसयाम्यहम् । इति सञ्चिन्त्य मनसा हनुमान् दर्शयन् बलम् ॥ २ ॥ चैत्यप्रासादमाप्लुत्य मेरुशृङ्गमिवोन्नतम् । आरुरोह हरिश्रेष्ठो हनुमान् मारुतात्मजः ॥ ३ ॥ आरुह्य गिरिसङ्काशं प्रासादं हरियूथपः । बभौ स सुमहातेजाः प्रतिसूर्य इवोदितः ॥४॥ संप्रधृष्य च दुर्धर्षं चैत्यप्रासादमुत्तमम् । हनुमान् प्रज्वलन् लक्ष्म्या पारियात्रोपमोऽभवत् ॥ ५ ॥ स भूत्वा सुमहाकायः प्रभावान्मारुतात्मजः । घृष्टमास्फोटयामास लङ्कां शब्देन पूरयन् ॥ ६ ॥ तस्यास्फोटितशब्देन महता श्रोत्रघातिना । पेतुर्विहङ्गमास्तत्र चैत्यपालाश्च मोहिताः ॥ ७॥

फलमाहदर्शयन् बलमिति । बलदर्शनार्थमित्यर्थः ॥ २॥ ध्वंसनप्रकारमाह–चैत्येति । चैत्यं देवायतनम्, तद्रूपः प्रासादः चैत्यप्रासादः तम् । आप्लुत्य तोरणाल्लङ्घयित्वा । हरिश्रेष्ठो हनुमान् मारुतात्मज इत्यस्योत्तरश्लोकेनान्वयः । हरियूथपत्वेप्यहरिर्भविष्यतीति तद्व्यावृत्त्यर्थं हरिश्रेष्ठ इत्युक्तम् । प्रतिसूर्यः द्वितीयसूर्य इत्यर्थः । अनेन सूर्योदयस्सूचितः ॥ ३ ॥ ४ ॥ संप्रधृष्येति । संप्रधृष्य आक्रम्य । पारियात्रो नाम कुलपर्वतः ॥ ५–११ ॥

॥ ४१–४३ ॥ इति श्रीमद्देश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां द्विचत्वारिंशः सर्गः ॥ ४२ ॥ अथ रावणसन्दिष्टसेनान्तरागमनात्पूर्वं तूष्णीं स्थित्वा न किञ्चित् प्रयोजनमिति विचार्य प्रासादभङ्गादि चिकीर्षति–तत इति । ध्यानमास्थित इति पाठः । ध्यानं विचारः ॥ १ ॥ चैत्यप्रासादः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चैत्यस्थान् चत्यपालान् ॥१२-१६॥ प्रासादस्थात । पवनात्मजः भ्रामयामासत्यन्वयः । शतधारं धारा कोटिः । वज्रवत् स्थितमित्यर्थः, यद्वा शतधा अरमिति च्छेदः । अरं शीघ्रम् ॥ १७ ॥ रामानु०-प्रासादस्थेति । महान्तस्य महाग्रस्य, अत्युन्नतशिखरस्थेत्यर्थः । महार्हस्येति वा पाठः ॥ १७ ॥ तत्रेति । अग्निः सम

अस्त्रविज्जयतां रामो लक्ष्मणश्च महाबलः । राजा जयति सुग्रीवो राघवेणाभिपालितः ॥ ८ ॥ दासोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः । हनुमान् शत्रुसैन्यानां निहन्ता मारुतात्मजः ॥ ९ ॥ न रावणसहस्रं मे युद्धे प्रतिबलं भवेत् । शिलाभिस्तु प्रहरतः पादपैश्च सहस्रशः ॥ १० ॥ अर्दयित्वा पुरीं लङ्कामभिवाद्य च मैथिलीम् । समृद्धार्थो गमिष्यामि मिषतां सर्वरक्षसाम् ॥ ११ ॥ एवमुक्त्वा विमानस्थश्चैत्यस्थान् हरियूथपः । ननाद भीमनिर्ह्रादो रक्षसां जनयन् भयम् ॥ १२ ॥ तेन शब्देन महता चैत्यपालाः शतं ययुः । गृहीत्वा विविधानस्त्रान् प्रासान् खड्गान् परश्वधान् । विसृजन्तो महाकाया मारुतिं पर्यवारयन् ॥ १३ ॥ ते गदाभिर्विचित्राभिः परिघैः काञ्चनाङ्गदैः । आजघ्नुर्वानरश्रेष्ठं बाणैश्चादित्यसन्निभैः ॥ १४ ॥ आवर्त इव गङ्गायास्तोयस्य विपुलो महान् । परिक्षिप्य हरिश्रेष्ठं स बभौ रक्षसां गणः ॥ १५ ॥ ततो वातात्मजः क्रुद्धो भीमरूपं समास्थितः ॥ १६ ॥ प्रासादस्य महान्तस्य स्तम्भं हेमपरिष्कृतम् । उत्पाटयित्वा वेगेन हनुमान् पवनात्मजः । ततस्तं भ्रामयामास शतधारं महाबलः ॥ १७ ॥ तत्र चाग्निः समभवत् प्रासादश्चाप्यदह्यत ॥ १८ ॥ दह्यमानं ततो दृष्ट्वा प्रासादं हरियूथपः । स राक्षसशतं हत्वा वज्रेणेन्द्र इवासुरान् । अन्तरिक्षे स्थितः श्रीमानिदं वचनमब्रवीत् ॥ १९ ॥

भवत्, भ्रामितस्तम्भैः स्तम्भान्तरसङ्घट्टनादिति भावः ॥ १८ ॥ १९ ॥

रक्षःकुलदेवताप्रासादः ॥ २-१५ ॥ वातात्मजः पवनात्मजः । भीमरूपं समास्थितः आस्थितवान् ॥ १६ ॥ महान्तस्य महाग्रस्य, अत्युन्नतशिखरस्येत्यर्थः । महार्हस्य इति च पाठः ॥ १७ ॥ तत्र भ्रामितस्तम्भैः स्तम्भान्तरसङ्घट्टनेन अग्निरभूदित्यर्थः ॥ १८ ॥ १९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

राक्षसानामुत्साहभङ्गं कारयितुमाह–मादृशानामित्यादि ॥२०–२२॥ ओघबलाः ओघाख्यसङ्ख्याकबलाः ॥ २३–२५ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रिचत्वारिंशः सर्गः ॥४३॥ संदिष्ट इत्यादि ॥१॥ विवृत्तनयनः मण्डलीकृतनयनः ॥२॥

मादृशानां सहस्राणि विसृष्टानि महात्मनाम् । बलिनां वानरेन्द्राणां सुग्रीववशवर्तिनाम् ॥ २० ॥ अटन्ति वसुधां कृत्स्नां वयमन्ये च वानराः ॥ २१ ॥ दशनागबलाः केचित् केचिद्दशगुणोत्तराः । केचिन्नागसहस्रस्य बभूवुस्तुल्यविक्रमाः ॥ २२ ॥ सन्ति चौघबलाः केचित् केचिद्वायुबलोपमाः । अप्रमेयबलाश्चान्ये तत्रासन् हरियूथपाः ॥२३॥ ईदृग्विधैस्तु हरिभिर्वृतो दन्तनखायुधैः । शतैः शतसहस्रैश्च कोटीभिरयुतैरपि । आगमिष्यति सुग्रीवः सर्वेषां वो निषूदनः ॥ २४ ॥ नेयमस्ति पुरी लङ्का न यूयं न च रावणः । यस्मादिक्ष्वाकुनाथेन बद्धं वैरं महात्मना ॥ २५ ॥

इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

सन्दिष्टो राक्षसेन्द्रेण प्रहस्तस्य सुतो बली । जम्बुमाली महादंष्ट्रो निर्जगाम धनुर्धरः ॥ १ ॥
रक्तमाल्याम्बरधरः स्रग्वी रुचिरकुण्डलः । महान् विवृत्तनयनश्चण्डः समरदुर्जयः ॥ २ ॥
धनुः शक्रधनुःप्रख्यं महद्दृढसायकम् । विस्फारयानो वेगेन वज्राशनिसमस्वनम् ॥ ३ ॥
तस्य विस्फारघोषेण धनुषो महता दिशः । प्रदिशश्च नभश्चैव सहसा समपूर्यत ॥ ४ ॥

रुचिरसायकं रुचिरसायकार्हम् । विस्फारयानः विस्फारयमाणः, ज्याकर्षणं कुर्वन्नित्यर्थः । वज्राशनिसमस्वनमिति विस्फारणक्रियाविशेषणम् ॥ ३ ॥ तस्येति । नभस्समपूर्यत, दिशः प्रदिशश्च समपूर्यन्तेति विपरिणामेनानुषङ्गः ॥ ४ ॥ ५ ॥

राक्षसहृदयानि विदारयितुमाह–मादृशानामित्यादि ॥ २०–२२ ॥ सन्ति चेति । ओघबलाः ओघसङ्ख्यासङ्ख्यातगजबलाः ॥ २३–२५ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां त्रिचत्वारिंशः सर्गः ॥४३॥१ ॥ २ ॥ धनुरिति । विस्फारयानः विस्फारयमाणः ॥३॥ समपूर्यत

स०–स्रग्वी सुवर्णमालः । " प्रहस्तपुत्रस्त्विह जम्बुमाली प्राप्यर्क्षनिं प्राप्य सुवर्णमाली ॥ इति संग्रहरामायणोक्तेः ॥ २ ॥ नभः आकाशम् । दिशः प्रदिशश्च यदात्मिकास्तत्समपूर्यत । " साक्षिसिद्धमेव गगनं तद्भागा एव दिशो न द्रव्यान्तरम् " इति सुधोक्तेः ॥ ४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रथेन खरयुक्तेन तमागतमुदीक्ष्य सः । हनुमान् वेगसम्पन्नो जहर्ष च ननाद च ॥ ५ ॥ तं तोरणविटङ्कस्थं हनुमन्तं महाकपिम् । जम्बुमाली महाबाहुर्विव्याध निशितैः शरैः ॥ ६ ॥ अर्धचन्द्रेण वदने शिरस्येकेन कर्णिना । बाह्वोर्विव्याध नाराचैर्दशभिस्तं कपीश्वरम् ॥७॥ तस्य तच्छुशुभे ताम्रं शरेणाभिहतं मुखम् । शरदीवाम्बुजं फुल्लं विद्धं भास्कररश्मिना ॥८॥ तत्तस्य रक्तं रक्तेन रञ्जितं शुशुभे मुखम् । यथाऽऽकाशे महापद्मं सिक्तं चन्दनबिन्दुभिः ॥ ९ ॥ चुकोप बाणाभिहतो राक्षसस्य महाकपिः ॥ १० ॥ ततः पार्श्वेऽतिविपुलां ददर्श महतीं शिलाम् । तरसा तां समुत्पाट्य चिक्षेप बलवद्बली । तां शरैर्दशभिः क्रुद्धस्ताडयामास राक्षसः ॥ ११ ॥ विपन्नं कर्म तद् दृष्ट्वा हनुमांश्चण्डविक्रमः । सालं विपुलमुत्पाट्य भ्रामयामास वीर्यवान् ॥ १२ ॥ भ्रामयन्तं कपिं दृष्ट्वा सालवृक्षं महा बलम् । चिक्षेप सुबहून् बाणान् जम्बुमाली महाबलः ॥१३॥ सालं चतुर्भिश्चिच्छेद वानरं पञ्चभिर्भुजे । उरस्येकेन बाणेन दशभिस्तु स्तनान्तरे ॥ १४ ॥ स शरैः पूरिततनुः क्रोधेन महता वृतः । तमेव परिघं गृह्य भ्रामयामास वेगतः ॥ १५ ॥ अतिवेगोऽतिवेगेन भ्रामयित्वा बलोत्कटः । परिघं पातयामास जम्बुमालेर्महोरसि ॥ १६ ॥

तोरणविटङ्कं तोरणस्य कपोतपालिका । " कपोतपालिकायां तु विटङ्कं पुन्नपुंसकम् " इत्यमरः । स्तम्भोपरि तिर्यङ्निहितदार्वित्यर्थः ॥ ६ ॥ एकेनेत्येतदर्धचन्द्रस्यापि विशेषणम् । अर्धचन्द्राकाराग्रशरेणेत्यर्थः । कर्णिना कर्णवच्छरेण ॥ ७ ॥ अम्बुजं रक्तपद्मम् । भास्करराश्मिना विद्धम् अत एव फुल्लमित्यर्थः ॥ ८ ॥ रक्तं स्वत एव रक्तम् । रक्तेन शोणितेन । महापद्मं रक्तोत्पलम् । चन्दनबिन्दुभिः रक्तचन्दनबिन्दुभिः ॥ ९ ॥ चुकोपेत्यर्धम् । राक्षसस्य राक्षसविषये ॥ १०–१३ ॥ सालमिति । पञ्चभिर्भुजे इत्यादौ विव्याधेत्यध्याहारः ॥ १४–१६ ॥

दिगादिसमुदायगोचरमेकवचनम् ॥ ४ ॥ जहर्ष स्वबलानुरूपशत्रुप्राप्त्या ॥ ५ ॥ तोरणविटङ्कस्थं तोरणकपोतपालिकास्थम् । विटङ्को नाम तोरणस्तम्भयोरुपरि तिर्यक्निहितदारुः ॥ ६ ॥ कर्णिना अङ्कुशाकाराग्रशरविशेषेण ॥ ७ ॥ अम्बुजं रक्ताम्बुजम् ॥ ८ ॥ चन्दनबिन्दुभिः रक्तचन्दनबिन्दुभिः ॥ ९–१६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तस्य चैवेति। नाश्वा इति अश्वशब्देनात्र खरा उच्यन्ते। "रथेन खरयुक्तेन" इति पूर्वमुक्तत्वात् ॥ १७–२० ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥ ततस्त इत्यादि। भवनात् तस्मात् रावणभवनात्।

तस्य चैव शिरो नास्ति न बाहू न च जानुनी। न धनुर्न रथो नाश्वास्तत्राद्दश्यन्त नेषवः ॥ १७॥ स हतस्तरसा तेन जम्बुमाली महाबलः। पपात निहतो भूमौ चूर्णिताङ्गविभूषणः ॥ १८ ॥ जम्बुमालिं च निहतं किङ्करांश्च महाबलान्। चुक्रोध रावणः श्रुत्वा कोपसंरक्तलोचनः ॥ १९ ॥ स रोषसंवर्तिततामलोचनः प्रहस्तपुत्रे निहते महाबले। अमात्यपुत्रानतिवीर्यविक्रमान् समादिदेशाशु निशाचरेश्वरः ॥ २० ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

ततस्ते राक्षसेन्द्रेण चोदिता मन्त्रिणः सुताः। निर्ययुर्भवनात्तस्मात् सप्त सप्तार्चिवर्चसः ॥ १ ॥
महाबलपरीवारा धनुष्मन्तो महाबलाः। कृतास्त्रास्त्रविदां श्रेष्ठाः परस्परजयैषिणः ॥ २ ॥

सप्तार्चिवर्चस इत्यत्र सप्तार्चीति इकारान्तत्वमार्षम् ॥१ ॥ कृतास्त्राः शिक्षितास्त्राः। आर्षः सन्धिः। कृतास्त्राणामस्त्रविदां च श्रेष्ठा इति वा। ज्ञानशिक्षे उभे अप्येषां स्त इति भावः। परस्परजयैषिणः प्रत्येकं हनुमज्जयैषिण इत्यर्थः ॥ २ ॥

नाश्वाः 'रथेन खरयुक्तेन' इत्युक्तत्वादश्वशब्देन खरा उच्यन्ते ॥१७–२०॥ इति श्रीमद्देश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥ तत इति। सप्तार्चिवर्चसः अर्चींषि इकारान्तत्वमार्षम् ॥ १ ॥ कृतास्त्रास्त्रविदां श्रेष्ठाः कृतास्त्राणाम् अस्त्रविदां च श्रेष्ठाः। परस्पर

स०– चूर्णिताङ्ग इव द्रुमः इति पाठः। **चूर्णिताङ्गः** चूर्णीकृतशाखः, चूर्णीकृतावयवो राक्षसोऽपि ॥ १८ ॥ **क्रोधसंरक्तलोचनः** पूर्वं किङ्करनाशात् पुनर्जम्बुमालिनं निहतं श्रुत्वा पूर्वापेक्षया बहुकोपं कृतवानित्यर्थः ॥ १९ ॥ **अतिवीर्यविक्रमान्** वीर्यं वैरिपराक्रमः। तदतिक्रम्य पराक्रमो येषां तान् ॥ २० ॥ **सप्तार्चिवर्चसः** सप्तार्चाः प्रतिमारूपाः काली कराली इत्याद्याः अस्य सन्तीति सप्तार्ची वह्निः, तद्वद्वर्चो येषां ते तथा। यद्वा इकारान्तोऽर्चिशब्दोऽर्चिःशब्दपर्यायः। सप्त अर्चयोऽर्चींषि शिखा यस्य सोऽग्निः "अर्चिर्मयूरशिखयोः" इति विश्वः। इकारान्तोऽप्यस्ति। "अग्नेर्भ्राजन्ते अर्चयः" इतीति भानुदीक्षितलेखात् ॥ १ ॥ **परस्परजयैषिणः** परस्परमुत्कर्षापेक्षाः ॥ २ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हेमजालपरिक्षिप्तैः सुवर्णजालविनिर्मितैः । स्वासाधारणचिह्नयुक्तं ध्वजम् । केवलचित्रवस्त्रालंकृता पताका । तोयदस्वननिर्घोषैः तोयदस्वनतुल्यनिर्घोष वद्भिः ॥ ३–८ ॥ स शरान् मोघयामास, यथा शराः स्वस्मिन्न पतन्ति तथा चकारेत्यर्थः । रथवेगं च मोघयामासेत्यन्वयः । यथा रथवेगास्त्व

हेमजालपरिक्षिप्तैर्ध्वजवद्भिः पताकिभिः । तोयदस्वननिर्घोषैर्वाजियुक्तैर्महारथैः ॥ ३ ॥ तप्तकाञ्चनचित्राणि चापान्य मितविक्रमाः । विस्फारयन्तः संहृष्टास्तडित्वन्त इवाम्बुदाः ॥ ४॥ जनन्यस्तु ततस्तेषां विदित्वा किङ्करान् हतान् । बभूवुः शोकसम्भ्रान्ताः सबान्धवसुहृज्जनाः ॥५॥ ते परस्परसङ्घर्षात्तप्तकाञ्चनभूषणाः । अभिपेतुर्हनूमन्तं तोरणस्थ मवस्थितम् ॥ ६ ॥ सृजन्तो बाणवृष्टिं ते रथगर्जितनिःस्वनाः । वृष्टिमन्त इवाम्भोदा विचेरुर्नैर्ऋताम्बुदाः ॥ ७ ॥ अवकीर्णस्ततस्ताभिर्हनुमाञ्छरवृष्टिभिः । अभवत् संवृताकारः शैलराडिव वृष्टिभिः ॥ ८ ॥ स शरान् मोघयामास तेषामाशुचरः कपिः । रथवेगं च वीराणां विचरन् विमलेऽम्बरे ॥९॥ स तैः क्रीडन् धनुष्मद्भिर्व्योम्नि वीरः प्रकाशते । धनुष्मद्भिर्यथा मेघैर्मारुतः प्रभुरम्बरे ॥ १० ॥ स कृत्वा निनदं घोरं त्रासयंस्तां महाचमूम् । चकार हनुमान् वेगं तेषु रक्षस्सु वीर्यवान् ॥ ११॥ तलेनाभ्यहनत् कांश्चित् पादैः कांश्चित् परन्तपः । मुष्टिनाऽभ्यहनत् कांश्चिन्नखैः कांश्चिद व्यदारयत् ॥ १२ ॥ प्रममाथोरसा कांश्चिदूरुभ्यामपरान् कपिः । केचित्तस्य निनादेन तत्रैव पतिता भुवि ॥ १३ ॥ ततस्तेष्ववसन्नेषु भूमौ निपतितेषु च । तत्सैन्यमगमत्सर्वं दिशो दश भयार्दितम् ॥ १४ ॥

महाराय न भवन्ति तथा समचरदित्यर्थः ॥ ९ ॥ १० ॥ वेगं संहारोद्योगम् ॥ ११ ॥ पादैः कांश्चिदिति बहुवचनं वानराणां द्विपात्सु चतुष्पात्सु च ॥१२५॥
जयैषिणः अहमहमिकया परस्परोत्कर्षापेक्षिण इत्यर्थः ॥ २--१४ ॥

स०–राक्षसानां शरवर्षेण कार्ष्ण्येन च मेघसमता । पूर्वमखण्डतः शरसारगमनादेकवचनं वृष्टिमिति प्रत्येकं पृथक्पृथगञ्जनाद्वृष्टिभिरिति बहुवचनं च सम्भवतः ॥ ७ ॥ ८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ग्रहणात् ॥ १२-१४ ॥ नीडं ध्वजावयवविशेषः ॥ १५ ॥ स्रवन्त्यः नद्यः । विकृतं यथा तथा ननाद प्रतिध्वानवती बभूव ॥ १६ ॥ १७ ॥
इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

विनेदुर्विस्वरं नागा निपेतुर्भुवि वाजिनः । भग्ननीडध्वजच्छत्रैर्भूश्च कीर्णाऽभवद्रथैः ॥ १५ ॥ स्रवता रुधिरेणाथ स्रवन्त्यो दर्शिताः पथि । विविधैश्च स्वरैर्लङ्का ननाद विकृतं तदा ॥ १६ ॥ स तान् प्रवृद्धान् विनिहत्य राक्षसान् महाबलश्चण्डपराक्रमः कपिः । युयुत्सुरन्यैः पुनरेव राक्षसैस्तमेव वीरोऽभिजगाम तोरणम् ॥ १७ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

हतान् मन्त्रिसुतान् बुदध्वा वानरेण महात्मना । रावणः संवृताकारश्चकार मतिमुत्तमाम् ॥ १ ॥ स विरूपाक्षयूपाक्षौ दुर्धरं चैव राक्षसम् । प्रघसं भासकर्णं च पञ्च सेनाग्रनायकान् ॥ २ ॥ सन्दिदेश दशग्रीवो वीरान्नयविशारदान् । हनुमद्ग्रहणव्यग्रान् वायुवेगसमान् युधि ॥ ३ ॥ यात सेनाग्रगाः सर्वे महाबलपरिग्रहाः । सवाजिरथमातङ्गाः स कपिः शास्यतामिति ॥ ४ ॥ यत्तैश्च खलु भाव्यं स्यात्तमासाद्य वनालयम् । कर्म चापि समाधेयं देशकाल विरोधिनम् ॥ ५ ॥ न ह्यहं तं कपिं मन्ये कर्मणा प्रतितर्कयन् । सर्वथा तन्महद्भूतं महाबलपरिग्रहम् । भवेदिन्द्रेण वा सृष्टमस्मदर्थं तपोबलात् ॥ ६ ॥

हतानित्यादि । संवृताकारः अन्तर्मनाः । मतिं चिन्ताम् ॥ १ ॥ स इति ॥ २॥३ ॥ इति वक्ष्यमाणप्रकारेण ॥ ४ ॥ तमेवाह-यत्तैरित्यादिना । यत्तैः यत मानैः । अप्रमत्तैरिति यावत् । यतेः कर्तरि क्तः । समाधेयं परिहर्तव्यम् । देशकालविरोधिनं देशकालविरोधीत्यर्थः ॥५॥ महद्भूतम्, मन्य इत्यनुषज्यते ।
विनेदुरिति । नीडो रथावयवविशेषः ॥ १५-१७ ॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥
हतानिति । संवृताकारः गूढाकारः, अतः सञ्जातशङ्क इत्यर्थः । उत्तमां मतिं धैर्यम् ॥ १-३ ॥ इतीत्थं वक्ष्यमाणप्रकारेण कपिः शास्यताम् । यत्तैः यतमानैः, अप्र मत्तैरिति यावत् । किञ्चात्र देशकालाविरुद्धं कर्म कार्यमित्याह-कर्म चेति । देशकालविरोधिनं देशकालविरोधीत्यर्थः । आर्षो लिङ्गविभक्तिव्यत्ययः । कर्म समाधेयं परिहर्तव्यम् । देशकालाविरोधिनमिति पाठे समाधेयं कर्तव्यम् ॥ ४ ॥ ५ ॥ अत्र हेतुमाह-हीति । सर्वथेति । इन्द्रेण वेति वाशब्दादन्येन वेत्यर्थः । अस्मदर्थम्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इन्द्रेण वा, अन्यैर्वेति शेषः । वाशब्दस्य विकल्पार्थस्य प्रयोगात् ॥ ६ ॥ ७ ॥ व्यलीकम् अप्रियम् ॥ ८ ॥ नावमान्य इति । अत्र त्रयोदशसहस्रश्लोकाः

सनागयक्षगन्धर्वा देवासुरमहर्षयः । युष्माभिः सहितैः सर्वैर्मया सह विनिर्जिताः ॥ ७ ॥ तैरवश्यं विधातव्यं व्यलीकं किंचिदेव नः । तदेव नात्र सन्देहः प्रसह्य परिगृह्यताम् ॥ ८ ॥ नावमान्यो भवद्भिश्च हरिर्धीरपराक्रमः । दृष्टा हि हरयः पूर्वं मया विपुलविक्रमाः ॥ ९ ॥ वाली च सहसुग्रीवो जाम्बवांश्च महाबलः । नीलः सेनापतिश्चैव ये चान्ये द्विविदादयः ॥ १० ॥ नैवं तेषां गतिर्भीमा न तेजो न पराक्रमः । न मतिर्न बलोत्साहौ न रूपपरिकल्पनम् ॥ ११ ॥ महत्सत्त्वमिदं ज्ञेयं कपिरूपं व्यवस्थितम् । प्रयत्नं महदास्थाय क्रियतामस्य निग्रहः ॥ १२ ॥ कामं लोकास्त्रयः सेन्द्राः ससुरासुरमानवाः । भवतामग्रतः स्थातुं न पर्याप्ता रणाजिरे ॥ १३ ॥ तथापि तु नयज्ञेन जयमाकांक्षता रणे आत्मा रक्ष्यः प्रयत्नेन युद्धसिद्धिर्हि चञ्चला ॥ १४ ॥ ते स्वामिवचनं सर्वे प्रतिगृह्य महौजसः । समुत्पेतुर्महावेगा हुताशसमतेजसः ॥ १५ ॥ रथैर्मत्तैश्च मातङ्गैर्वाजिभिश्च महाजवैः । शस्त्रैश्च विविधैस्तीक्ष्णैः सर्वैश्चोपचिता बलैः ॥ १६ ॥ ततस्तं ददृशुर्वीरा दीप्यमानं महाकपिम् । रश्मिमन्तमिवोद्यन्तं स्वतेजोरश्मिमालिनम् ॥ १७ ॥

गताः । अयं चतुर्दशसहस्रस्यादिः । धीति गायत्र्याश्चतुर्दशाक्षरम् ॥ ९ ॥ १० ॥ गतिः वेगः । रूपपरिकल्पनं यथेष्टरूपग्रहणम् ॥ ११ ॥ महदिति । इत्थं महत्सत्त्वं किमपि कपिरूपं सत् व्यवस्थितमिति ज्ञेयमित्यर्थः ॥ १२–१६ ॥ स्वतेजोरश्मिमालिनं स्वतेजसा सूर्यम् । रश्मिमन्तमिवेत्यत्र उपमा,

अस्मिन्निग्रहार्थम् ॥ ६ ॥ अत्र हेतुः–सनागेत्यादि श्लोकद्वयमेकं वाक्यम् । परिगृह्यताम्, कपिरिति शेषः ॥ ७ ॥ ८ ॥ नावमान्य इत्यस्य श्लोकस्य एकादशाक्षरेण धी इति गायत्र्याश्चतुर्दशाक्षरं सङ्गृह्णाति ॥ ९ ॥ १० ॥ नैव तेषामित्यादौ सर्वत्र ईदृक्छब्दोऽध्याहर्तव्यः । तथा चेत्थं योजना । तेषां वाल्यादीनां हनुमतो भीमा गतिः तेजआदिकं च यथा तथा ईदृक् नास्तीति सम्बन्धः । रूपपरिकल्पनं यथेप्सितरूपपरिग्रहणम् ॥ ११ ॥ प्रयत्नमित्यार्षं क्लीबत्वम् ॥ १२ ॥ कामं यद्यपीत्यर्थः ॥ १३ ॥ नयज्ञेन नीतिज्ञेन । आत्मा स्वदेहः । युद्धसिद्धिः युद्धे जयः ॥ १४–१७ ॥

॥१२६॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अत्र रूपकमिति भिदा ॥ १७ ॥ तोरणस्थमिति । उत्साहः लोकोत्तरकार्येषु स्थेयान् प्रयत्नः । महासत्त्वं महाध्यवसायम् । " द्रव्यासुव्यवसायेषु सत्त्व मस्त्री तु जन्तुषु " इत्यमरः । द्वितीयबलशब्दश्शक्तिवचनः । " बलं रूपेऽस्थनि स्थौल्ये शक्तिरेतश्चमूषु च " इति वैजयन्ती ॥ १८॥ १९ ॥तीक्ष्णाः

तोरणस्थं महोत्साहं महासत्त्वं महाबलम् । महामतिं महावेगं महाकायं महाबलम् ॥ १८ ॥ तं समीक्ष्यैव ते सर्वे दिक्षु सर्वास्ववस्थिताः । तैस्तैः प्रहरणैर्भीमैरभिपेतुस्ततस्ततः ॥१९॥ तस्य पञ्चायसास्तीक्ष्णाः शिताः पीतमुखाः शराः । शिरस्युत्पलपत्राभा दुर्धरेण निपातिताः ॥ २० ॥ स तैः पञ्चभिराविद्धः शरैः शिरसि वानरः । उत्पपात नदन् व्योम्नि दिशो दश विनादयन् ॥ २१ ॥ ततस्तु दुर्धरो वीरः सरथः सज्यकार्मुकः । किरन् शरशतैस्तीक्ष्णै रभिपेदे महाबलः ॥ २२ ॥ स कपिर्वारयामास तं व्योम्नि शरवर्षिणम् । वृष्टिमन्तं पयोदान्ते पयोदमिव मारुतः ॥ २३ ॥ अर्द्यमानस्ततस्तेन दुर्धरेणानिलात्मजः । चकार कदनं भूयो व्यवर्धत च वेगवान् ॥ २४ ॥ स दूरं सहसोत्पत्य दुर्धरस्य रथे हरिः । निपपात महावेगो विद्युद्राशिर्गिराविव ॥ २५ ॥ ततः स मथिताष्टाश्वं रथं भग्नाक्षकूबरम् । विहाय न्यपतद्भूमौ दुर्धरस्त्यक्तजीवितः ॥ २६ ॥ तं विरूपाक्षयूपाक्षौ दृष्ट्वा निपतितं भुवि । सञ्जातरोषौ दुर्धर्षावुत्पेततुरिरिन्दमौ ॥ २७॥

क्रूराः । शिताः निशिताः । पीतमुखाः समीचीनायसनिर्मितत्वेन पीतरेखाग्राः । उत्पलपत्राभाः , उत्पलपत्राणि यथा निपात्यन्ते तथा निपातिता इत्यर्थः ॥ २०–२२ ॥ वारयामास स्ववेगेन प्रापयामासेत्यर्थः ॥२३॥ कदनं युद्धम् ॥२४॥ विद्युद्राशिः अशनिः ॥२५॥ कूबरः युगन्धरः ॥२६–२८॥

सत्त्वं चित्तम् ॥ १८ ॥ दिक्षु सर्वास्ववस्थिताः द्राक् तत्समीपमागन्तुं चकिता इति भावः ॥ १९ ॥ तीक्ष्णाः मर्मच्छिदः । पीतमुखाः पीतानि रुधिराणि मुखानि शल्यानि येषां ते तथा, शत्रुशोणितरञ्जिता इत्यर्थः । उत्पलपत्राभाः तद्वर्णाः । यद्वा पीतमुखाः फलभागे स्वर्णरूपिताः । उत्पलपत्राभा एव न तु तत्पीडार्हा इत्यर्थः ॥ २०–२२ ॥ कपिर्व्योम्नि स्थित्वा तं स्वनादेन हुङ्कारादिरूपेण वारयामास । पयोदान्ते जलदातृवर्षाकालान्ते ॥ २३ ॥ २४ ॥ स दूरमिति । विद्युद्राशिः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वेगं विनिहत्य परिहृत्य ॥ २९–३८ ॥ ध्वजिनीपतीन् सेनापतीन् । कृतक्षणः दत्तावसरः, अभूदिति शेषः ॥ ३९ ॥ इति श्रीगोविन्दराजविरचिते

स ताभ्यां सहसोत्पत्य विष्ठितो विमलेऽम्बरे । मुद्गराभ्यां महाबाहुर्वक्षस्यभिहतः कपिः ॥ २८ ॥ तयोर्वेगवतोर्वेगं विनिहत्य महाबलः । निपपात पुनर्भूमौ सुपर्णसमविक्रमः ॥ २९ ॥ स सालवृक्षमासाद्य तमुत्पाट्य च वानरः । तावुभौ राक्षसौ वीरौ जघान पवनात्मजः ॥ ३० ॥ ततस्तांस्त्रीन् हतान् ज्ञात्वा वानरेण तरस्विना । अभिपेदे महावेगः प्रसह्य प्रघसो हरिम् ॥ ३१ ॥ भासकर्णश्च संक्रुद्धः शूलमादाय वीर्यवान् । एकतः कपिशार्दूलं यशस्विनमवस्थितम् ॥ ३२ ॥ पट्टिशेन शिताग्रेण प्रघसः प्रत्ययोधयत् । भासकर्णश्च शूलेन राक्षसः कपिसत्तमम् ॥ ३३ ॥ स ताभ्यां विक्षतैर्गात्रैरसृग्दिग्धतनूरुहः । अभवद्वानरः क्रुद्धो बालसूर्यसमप्रभः ॥ ३४ ॥ समुत्पाट्य गिरेः शृङ्गं समृगव्याल पादपम् । जघान हनुमान् वीरो राक्षसौ कपिकुञ्जरः ॥ ३५ ॥ ततस्तेष्ववसन्नेषु सेनापतिषु पञ्चसु । बलं तदवशेषं च नाशयामास वानरः ॥ ३६ ॥ अश्वैरश्वान् गजैर्नागान् योधैर्योधान् रथै रथान् । स कपिर्नाशयामास सहस्राक्ष इवासुरान् ॥ ३७ ॥ हतैर्नागैश्च तुरगैर्भग्नाक्षैश्च महारथैः । हतैश्च राक्षसैर्भूमी रुद्धमार्गा समन्ततः ॥ ३८ ॥ ततः कपिस्तान् ध्वजिनीपतीन् रणे निहत्य वीरान् सबलान् सवाहनान् । समीक्ष्य वीरः परिगृह्य तोरणं कृतक्षणः काल इव प्रजाक्षये ॥ ३९ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षट्चत्वारिंशः सर्गः ॥ ४६ ॥

॥१२७॥

अशनेरुल्लातः ॥ २५–२७ ॥ ताभ्यां कर्तृभ्याम्, मुद्गराभ्यां करणाभ्यामभिहतः ॥ २८–३१ ॥ एकतः अवस्थितावित्यन्वयः । एकत्र स्थितावित्यर्थः ॥ ३२–३८ ॥ ध्वजिनीपतीन् सेनापतीन् परिगृह्य आश्रित्य, स्थित इति शेषः । कृतक्षणः लब्धावसरः ॥ ३९ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां षट्चत्वारिंशः सर्गः ॥ ४६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सेनापतीनित्यादि । समीक्ष्य विज्ञाय ॥ १ ॥ रामानु०–सेनापतीनिति । समीक्ष्य विज्ञाय । प्रसमैक्षताग्रत इति पाठः ॥१ ॥ द्विजातिमुख्यैः हविषा उदीरितः अभिवर्धितः पावक इवेत्यन्वयः ॥ २ ॥ ३ ॥ ततो महदित्यनेनोक्तं विस्तरेणाह–ततस्तपस्संग्रहेत्यादिना । तपस्सङ्ग्रहसञ्चयार्जितं तपोनुष्ठानसमूहसम्पादितम् ॥ ४ ॥ समाहितं सज्जीकृतम् । अष्टासिनिबद्धबन्धुरम् अष्टासिभिर्निबद्धम् अत एव बन्धुरं सुन्दरम् । "बन्धुरं सुन्दरे नम्रे" इति विश्वः ।

सेनापतीन् पञ्च स तु प्रमापितान् हनूमता सानुचरान् सवाहनान् । समीक्ष्य राजा समरोद्धतोन्मुखं कुमारमक्षं प्रसमैक्षताग्रतः ॥ १ ॥ स तस्य दृष्ट्यर्पणसंप्रचोदितः प्रतापवान् काञ्चनचित्रकार्मुकः । समुत्पपाताथ सदस्युदीरितो द्विजातिमुख्यैर्हविषेव पावकः ॥ २ ॥ ततो महद्बालदिवाकरप्रभं प्रतप्तजाम्बूनदजालसंततम् । रथं समास्थाय ययौ स वीर्यवान् महाहरिं तं प्रति नैर्ऋतर्षभः ॥ ३ ॥ ततस्तपःसंग्रहसञ्चयार्जितं प्रतप्तजाम्बूनदजालशोभितम् । पताकिनं रत्नविभूषितध्वजं मनोजवाष्टाश्ववरैः सुयोजितम् ॥ ४ ॥ सुरासुराधृष्यमसङ्गचारिणं रविप्रभं व्योमचरं समाहितम् । सतूणमष्टासिनिबद्धबन्धुरं यथाक्रमावेशितशक्तितोमरम् ॥ ५ ॥ विराजमानं प्रतिपूर्णवस्तुना सहेमदाम्ना शशिसूर्यवर्चसा । दिवाकराभं रथमास्थितस्ततः स निर्जगामामरतुल्यविक्रमः ॥ ६ ॥

यद्वा अष्टासिभिर्निबद्धं बन्धुरं यस्य स तथा । बन्धुरं फलकासङ्घाट इत्याहुः । अन्ये घण्टा इत्यप्याहुः । तदानीम् अष्टासिश्चासौ निबद्धबन्धुरश्चेति समासः । यथाक्रमावेशितशक्तितोमरं पङ्क्तितया स्थापितशक्तितोमरम् ॥ ५ ॥ प्रतिपूर्णवस्तुना समग्रोपकरणेन । शरधनुःकवचादीन्युपकरणानि ।

प्रमापितान् मारितान् । समरोद्धतोन्मुखं समरोद्धतश्चासौ समरायोन्मुखश्च तम् । आक्षं समक्षमवस्थितम् अक्षाख्यं कुमारम् । निशम्य दृष्ट्वा प्रसमैक्षत युद्धार्थं माज्ञापयामासेत्यर्थः ॥ १ ॥ द्विजातिमुख्यैर्हविषा उदीरितः पावक इति सम्बन्धः ॥ २ ॥ जाम्बूनदजालेन तत्समूहेन सन्ततं व्याप्तम् ॥ ३ ॥ ततो महदित्यादिश्लोकोक्तमेवार्थं प्रपञ्चयति–ततस्तप इत्यादिश्लोकत्रयेण । तपस्सङ्ग्रहसञ्चयार्जितं तपोनुष्ठानसमूहसम्पादितम् ॥ ४ ॥ समाहितं सज्जीकृतम् । अष्टासिनिबद्धबन्धुरम् अष्टाभिरसिभिर्निबद्धम् अत एव बन्धुरं सुन्दरम् ॥ ५ ॥ परिपूर्णवस्तुना समग्रसमरोपकरणेन । सः अक्षः शशिसूर्यवर्चसा हेमदाम्ना विराजमानं रथमास्थितो

स०–समरोद्धतोन्मुखं समरोद्धताः वैरिणः तदुन्मुखः तदभिमुखः तम् । आक्षम् अक्षाणां नेत्राणामिन्द्रियाणामयं विषयः आक्षः तम् । नेत्रविषयमिति यावत् । प्रसमैक्षताक्षम् इति पाठः ॥ १ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रतिपूर्णमस्तिनेति पाठे आस्तिना धनेनेत्यर्थः । हेमदाम्ना हेममयाश्वादिबन्धनरज्जुना । शशिसूर्यवर्चसा दामसु किञ्चित्तितवर्णं किञ्चित्सूर्यवत्पीतवर्णं मित्यर्थः । प्रतिपूर्णवस्तुना शशिसूर्यवर्चसा हेमदाम्ना च विराजमानमित्यन्वयः । यद्वा क्वचिच्छशिवर्चसा क्वचित्सूर्यवर्चसा च विराजमानमित्यन्वयः ।

स पूरयन् खं च महीं च सानुं तुरङ्गमातङ्गमहारथस्वनैः । बलैः समेतैः स हि तोरणस्थितं समर्थमासीनमुपागमत् कपिम् ॥ ७ ॥ स तं समासाद्य हरिं हरीक्षणो युगान्तकालाग्निमिव प्रजाक्षये । अवस्थितं विस्मितजातसंभ्रमः समैक्षताक्षो बहुमानचक्षुषा ॥ ८ ॥ स तस्य वेगं च कपेर्महात्मनः पराक्रमं चारिषु पार्थिवात्मजः । विधारयन् स्वं च बलं महाबलो हिमक्षये सूर्य इवाभिवर्धते ॥ ९ ॥ स जातमन्युः प्रसमीक्ष्य विक्रमं स्थिरं स्थितः संयति दुर्निवारणम् । समाहितात्मा हनुमन्तमाहवे प्रचोदयामास शरैस्त्रिभिः शितैः ॥ १० ॥ ततः कपिं तं प्रसमीक्ष्य गर्वितं जितश्रमं शत्रुपराजयोर्जितम् । अवैक्षताक्षः समुदीर्णमानसः स बाणपाणिः प्रगृहीतकार्मुकः ॥ ११ ॥ स हेम निष्काङ्गदचारुकुण्डलः समाससादाशुपराक्रमः कपिम् । तयोर्बभूवाप्रतिमः समागमः सुरासुराणामपि सम्भ्रमप्रदः ॥ १२ ॥ ररास भूमिर्न ततापभानुमान् ववौ न वायुः प्रचचाल चाचलः । कपेः कुमारस्य च वीक्ष्य संयुगं ननाद च द्यौरुदधिश्च चुक्षुभे ॥ १३ ॥

वितानादिषु शशिवर्चसा हेममयरथाङ्गेषु सूर्यवर्चसा । दिवाकराभमित्याकाशचारित्वे दृष्टान्तः । अतो न रविप्रभमित्यनेन पुनरुक्तिः । तच्छब्दद्वयं च पूर्वानुस्मरणार्थम् ॥६॥ सः अक्षः । हिः प्रसिद्धौ ॥ ७॥ हरीक्षणः सिंहप्रेक्षणः । प्रजाक्षये अवस्थितं प्राणिनाशे प्रवृत्तम् । विस्मितश्चासौ जातसम्भ्रमश्च विस्मितजातसम्भ्रमः ॥ ८ ॥ स तस्येति । विधारयन् निर्धारयन् । विचारयन्निति च पाठः ॥ ९–१२ ॥ रराविति । न ततापभानुमान् । सूर्योदयः पूर्वं

॥१२८॥

निर्जगामेति सम्बन्धः । दिवाकराभमित्यादि पुनर्वचनं रविप्रभमित्यस्यानुस्मरणार्थम् ॥ ६ ॥ तोरणस्थितं तोरणाश्रयम् । आसीनम् उपविष्टम् ॥ ७ ॥ हरीक्षणः सिंहदृष्टिः ॥ ८ ॥ अभिवर्द्धते तेजसा अभ्यवर्धतेत्यर्थः ॥ ९ ॥ स्थिरं स्थितः सः प्रसमीक्ष्यविक्रमं दर्शनीयपराक्रमम् । संयति रणे । दुःखं निवारणं यस्य तम् । त्रिभिः शरैः प्रचोदयामास युद्धाय प्रेरयामास ॥ १० ॥ ११ ॥ आशुपराक्रमः तीक्ष्णपौरुषः । समागमः संप्रहारः ॥१२॥ रराविति । अक्षयुद्धसमये सूर्योदयाभावात्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सूचितः सः न तत्तापेत्युच्यते ॥ १३ ॥ समाधिसंयोगविमोक्षतत्त्ववित् समाधिः लक्ष्यवेदनं संयोगः शरसन्धानं विमोक्षः तद्विसर्गः तेषां तत्त्ववित् यथार्थवित् ॥ १४ ॥ रक्तासितत्वे दृष्टान्तः नवोदितेति । शराचितत्वे दृष्टान्तः आदित्य इवांशुमालिक इति ॥ १५॥ आपूर्यत व्यवर्धत ॥ १६ ॥ मन्दराग्रस्थः

ततः स वीरः सुमुखान् पतत्रिणः सुवर्णपुङ्खान् सविषानिवोरगान् । समाधिसंयोगविमोक्षतत्त्ववित्छरानथ त्रीन् कपिमूर्ध्न्यपातयत् ॥ १४ ॥ स तैः शरैर्मूर्ध्नि समं निपातितैः क्षरन्नसृग्दिग्धविवृत्तलोचनः । नवोदितादित्यनिभः शरांशुमान् व्यराजतादित्य इवांशुमालिकः ॥ १५॥ ततः स पिङ्गाधिपमन्त्रिसत्तमः समीक्ष्य तं राजवरात्मजं रणे । उदग्रचित्रायुधचित्रकार्मुकं जहर्ष चापूर्यत चाहवोन्मुखः ॥ १६ ॥ स मन्दराग्रस्थ इवांशुमालिको विवृद्धकोपो बलवीर्यसंयुतः । कुमारमक्षं सबलं सवाहनं ददाह नेत्राग्निमरीचिभिस्तदा ॥ १७ ॥ ततः स बाणासनचित्रकार्मुकः शरप्रवर्षो युधि राक्षसाम्बुदः । शरान् मुमोचाशु हरीश्वराचले वलाहको वृष्टिमिवाचलोत्तमे ॥ १८ ॥ ततः कपिस्तं रणचण्डविक्रमं विवृद्धतेजोबलवीर्यसंयुतम् । कुमारमक्षं प्रसमीक्ष्य संयुगे ननाद हर्षाद्घनतुल्यविक्रमः ॥ १९ ॥

मन्दरो नाम भूमध्यपर्वतः । तदग्रे मध्याह्ने वर्तत इत्यौद्ग्योक्तिः ॥ १७ ॥ रामानु०—मन्दराग्रस्थः मन्दरो नाम सालग्रामपर्वतोत्तरभागे भारतखण्डमध्ये वर्तमानः कश्चन पर्वतः तदग्रस्थः । अनेन उत्तरायणे मध्याह्नागतत्वमुक्तं भवति ॥ १७ ॥ ततस्स बाणासनेति । बाणासनचित्रकार्मुकः बाणाः अस्यन्ते क्षिप्यन्तेऽनेनेति बाणासनः बाण विमोक्षकचित्रकार्मुक इत्यर्थः ॥ १८ ॥ रामानु०—तत इति । बाणासनचित्रकार्मुकः बाणानामासनं बाणान् क्षिपत् चित्रं च कार्मुकं यस्य स तथोक्तः । बाणासनचक्रकार्मुक

देशान्तरस्थोऽपि सूर्यः एतज्ज्ञात्वा न तत्तापेति भावः ॥१३ ॥ समाधिसंयोगविमोक्षतत्त्ववित समाधिः लक्ष्ये दृष्टिः, संयोगः शरसन्धानम्, विमोक्षः तद्विसर्गः तेषां तत्त्ववित् तेषु विशारद इत्यर्थः ॥ १४ ॥ असृग्दिग्धश्चासौ विवृत्तनेत्रश्च । विवृत्तलोचन इति पाठे अवसरोचितचक्षुरित्यर्थः । नवोदितादित्यनिभः रक्तवर्ण इत्यर्थः । शरांशुमान् स्वभस्तकस्थशररूपांशुमान् । अंशुमालावान् सूर्य इव व्यराजत ॥ १५ ॥ आपूर्यत व्यवर्द्धत ॥ १६ ॥ मन्दराग्रस्थः मन्दराग्रे मध्याह्न कालीनः सूर्यः इत्यर्थः ॥ १७ ॥ बाणासनचित्रकार्मुकः बाणानामासनं बाणान् क्षिपच्चित्रं कार्मुकं यस्य स तथोक्तः । बाणासनचक्रकार्मुक इत्यपि पाठः॥ १८ ॥ १९॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इति पाठे बाणान् क्षिप्यचक्राकारं कार्मुकं यस्य सः ॥ १८ ॥ १९–२२ ॥ स तानिति । विमोक्षयन् शरीरे असंयोजयन् । लाघवातिशयेनेति भावः ॥ २३ ॥ आस्तृणन्तम् आच्छादयन्तम् । विशिखैः विविधशिखैः । चिन्तां जगाम कथमेतादृशमेनं वधिष्यामीत्येवम् ॥ २४ ॥ इदमेवोपपादयति–ततश्शरैरित्या

स बालभावाद्युधि वीर्यदर्पितः प्रवृद्धमन्युः क्षतजोपमेक्षणः । समाससादाप्रतिमं कपिं रणे गजो महाकूपमिवावृतं तृणैः ॥ २० ॥ स तेन बाणैः प्रसभं निपातितैश्चकार नादं घननादनिस्वनः । समुत्पपाताशु नभः स मारुतिर्भुजोरु विक्षेपणघोरदर्शनः ॥ २१ ॥ समुत्पतन्तं समभिद्रवद्बली स राक्षसानां प्रवरः प्रतापवान् । रथी रथिश्रेष्ठतमः किरन् शरैः पयोधरः शैलमिवाश्मवृष्टिभिः ॥ २२ ॥ स तान् शरांस्तस्य हरिर्विमोक्षयंश्चचार वीरः पथि वायुसेविते । शरान्तरे मारुतवद्विनिष्पतन् मनोजवः संयति चण्डविक्रमः ॥ २३ ॥ तमात्तबाणासनमाहवोन्मुखं खमास्तृणन्तं विशिखैः शरोत्तमैः । अवैक्षताक्षं बहुमानचक्षुषा जगाम चिन्तां च स मारुतात्मजः ॥ २४ ॥ ततः शरैर्भिन्नभुजान्तरः कपिः कुमारवीरेण महात्मना नदन् । महाभुजः कर्मविशेषतत्त्वविद्विचिन्तयामास रणे पराक्रमम् ॥२५॥ अबालवद्बालदिवाकरप्रभः करोत्ययं कर्म महन्महाबलः । न चास्य सर्वाहवकर्मशोभिनः प्रमापणे मे मतिरत्र जायते ॥ २६ ॥ अयं महात्मा च महांश्च वीर्यतः समाहितश्चातिसहश्च संयुगे । असंशयं कर्मगुणोदयादयं सनागयक्षैर्मुनिभिश्च पूजितः ॥ २७ ॥ पराक्रमोत्साहविवृद्धमानसः समीक्षते मां प्रमुखागतः स्थितः । पराक्रमो ह्यस्य मनांसि कम्पयेत् सुरासुराणामपि शीघ्रगामिनः ॥ २८ ॥

दिना ॥ २५ ॥ २६ ॥ अतिसहः अतिसोढा । कर्मगुणोदयात् युद्धकर्मोत्कर्षाभिवृद्धेः ॥ २७–२९ ॥

तृणैरावृतं महाकूपं गजपातनार्थं कृतगर्तम् ॥ २० ॥ घननादनिस्वनः मेघशब्दसदृशशब्दः । भुजयोरूर्वोर्विक्षेपणेन घोरं दर्शनं यस्य सः ॥ २१ ॥ समभिद्रवत् अभ्यद्रवत् ॥ २२ ॥ शरान् विमोक्षयन् व्यर्थीकुर्वन् । तदुपायः शरान्तरे इति ॥ २३ ॥ आस्तृणन्तम् आच्छादयन्तम् ॥२४॥२५॥ प्रमापणे हनने ॥२६॥ समाहितः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

परस्य शत्रोः । प्रवेगम् तर्कयन् आलोचयन् । स्वकर्मयोगं विधाय युद्धक्रमं च सङ्कल्प्य । पूर्वमश्वान् हत्वा ततो रथं भङ्क्ष्यामीति निश्चित्येत्यर्थः ॥३०॥
राघवीयः—स्वकर्मयोगं विधाय स्वकर्तव्यचिन्तां कृत्वा । मतिं च चक्रेऽस्य वधे महाकपिरिति पाठः ॥ ३०॥ विवर्तने सव्यापसव्यभ्रमणेऽपि । भारसहान् रथभारसहान् ॥३१॥

न खल्वयं नाभिभवेदुपेक्षितः पराक्रमो ह्यस्य रणे विवर्धते । प्रमापणं त्वेव ममास्य रोचते न वर्धमानोऽग्निरुपेक्षितुं क्षमः ॥२९॥ इति प्रवेगं तु परस्य तर्कयन् स्वकर्मयोगं च विधाय वीर्यवान् । चकार वेगं तु महाबलस्तदा मतिं च चक्रेऽस्य वधे महाकपिः ॥३०॥ स तस्य तानष्ट हयान् महाजवान् समाहितान् भारसहान् विवर्तने । जघान वीरः पथि वायुसेविते तलप्रहारैः पवनात्मजः कपिः॥३१॥ ततस्तलेनाभिहतो महारथः स तस्य पिङ्गाधिपमन्त्रिनिर्जितः। प्रभग्ननीडः परिमुक्तकूबरः पपात भूमौ हतवाजिरम्बरात्॥३२॥ स तं परित्यज्य महारथो रथं सकार्मुकः खड्गधरः खमुत्पतन्। तपोभियोगादृषिरुग्रवीर्यवान् विहाय देहं मरुतामिवालयम् ॥३३॥ ततः कपिस्तं विचरन्तमम्बरे पतत्रिराजानिलसिद्धसेविते । समेत्य तं मारुततुल्यविक्रमः क्रमेण जग्राह स पादयोर्दृढम् ॥ ३४ ॥ स तं समाविध्य सहस्रशः कपिर्महोरगं गृह्य इवाण्डजेश्वरः । मुमोच वेगात् पितृतुल्यविक्रमो महीतले संयति वानरोत्तमः ॥ ३५ ॥ स भग्नबाहूरुकटीशिरोधरः क्षरन्नसृङ्निर्मथितास्थिलोचनः । स भग्नसन्धिः प्रविकीर्णबन्धनो हतः क्षितौ वायुसुतेन राक्षसः । महाकपिर्भूमितले निपीड्य तं चकार रक्षोधिपतेर्महद्भयम् ॥ ३६ ॥

तलेनाभिहतः अत एव पिङ्गाधिपमन्त्रिनिर्जितः, हनुमता निर्जित इत्यर्थः । प्रभग्ननीडः प्रभग्नरथाङ्गः । कूबरः युगन्धरः । वाजिरिति इकारान्तत्व मार्षम् ॥ ३२ ॥ मरुतामालयमुत्पतन् ऋषिरिव, अभवदिति शेषः ॥ ३३ ॥ ३४ ॥ गृह्य इवेत्यत्र गुणाभाव आर्षः ॥ ३५ ॥ प्रविकीर्णबन्धनः
अवस्थितः । अतिसाहः अतिसहिष्णुः ॥ २७–२९ ॥ इतीति । स्वकर्मयोगं विधाय स्वकर्तव्यचिन्तां कृत्वा पूर्वमश्वान् हत्वा पश्चाद्रथं भङ्क्ष्यामीति निश्चित्येत्यर्थः ॥ ३० ॥ विवर्तने रथगतिषु सञ्चरणसमये हयान् जघान ॥ ३१ ॥ प्रभग्ननीडः प्रभग्नरथगर्तः । कूबरः युगन्धरः ॥ ३२ ॥ मरुतामालयमुत्पतन् ऋषिरिव, बभूवेति शेषः ॥ ३३ ॥ ३४ ॥ समाविध्य भ्रामयित्वा गृह्य इव । असन्धिल्यबावार्षौ । गृहीत्वेवेत्यर्थः ॥ ३५ ॥ ३६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रविकीर्णकक्ष्यादिबन्धनः । प्रभिन्नसन्धिरिति सन्धिबन्धभङ्गस्योक्तत्वात् ॥ ३६ ॥ चक्रचरैः ज्योतिश्चक्रचरैः, नभश्चक्रचरैर्वा ॥ ३७ ॥ ३८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

महर्षिभिश्चक्रचरैर्महाव्रतैः समेत्य भूतैश्च सयक्षपन्नगैः । सुरैश्च सेन्द्रैर्भृशजातविस्मयैर्हते कुमारे स कपिर्निरीक्षितः ॥ ३७ ॥ निहत्य तं वज्रिसुतोपमप्रभं कुमारमक्षं क्षतजोपमेक्षणम् । तमेव वीरोऽभिजगाम तोरणं कृतक्षणः काल इव प्रजाक्षये ॥ ३८ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

ततः स रक्षोधिपतिर्महात्मा हनूमताऽक्षे निहते कुमारे । मनः समाधाय तदेन्द्रकल्पं समादिदेशेन्द्रजितं सरोषम् ॥ १ ॥ त्वमस्त्रविच्छस्त्रविदां वरिष्ठः सुरासुराणामपि शोकदाता । सुरेषु सेन्द्रेषु च दृष्टकर्मा पितामहाराधनसञ्चितास्त्रः ॥ २ ॥ तवास्त्रबलमासाद्य नासुरा न मरुद्गणाः । न शेकुः समरे स्थातुं सुरेश्वरसमाश्रिताः ॥ ३ ॥ न कश्चित् त्रिषु लोकेषु संयुगे नगतश्रमः । भुजवीर्याभिगुप्तश्च तपसा चाभिरक्षितः । देशकालविभागज्ञस्त्वमेव मतिसत्तमः ॥ ४ ॥ न तेऽस्त्यशक्यं समरेषु कर्मणा न तेऽस्त्यकार्यं मतिपूर्वमन्त्रणे । न सोऽस्ति कश्चित् त्रिषु संग्रहेषु वै न वेद यस्ते ऽस्त्रबलं बलं च ते ॥ ५ ॥

ततस्त्वित्यादि । मनः समाधाय धैर्यं कृत्वेत्यर्थः ॥ १ ॥ त्वमिति । अस्त्रवित् ब्रह्मास्त्रवित् । सञ्चितास्त्रः सञ्चितास्त्रविशेषः ॥ २ ॥ तव अस्त्रबल मासाद्य असुराः न, नश्यन्तीत्यर्थः ॥ ३ ॥ त्रिषु लोकेषु तव संयुगे नगतश्रमः अप्राप्तश्रमः कश्चिन्न । "सुप्सुपा" इति समासः । सर्वे प्राप्तश्रमा इत्यर्थः । हरि हयादयोऽपि श्रमं प्राप्नुवन्तीत्यर्थः । मतिसत्तमः मतिश्रेष्ठ इत्यर्थः ॥ ४ ॥ समरेषु कर्मणा पुरुषकारेण ते अशक्यं नास्तीत्यर्थः । तथा मतिपूर्वमन्त्रणे

चक्रचरैः ज्योतिश्चक्रवर्तिभिः ॥ ३७ ॥ वज्रिसुतः इन्द्रसुतः ॥ ३८ ॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्व० सुन्दरकाण्डव्याख्यायां सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

ततत इति । मनस्समाधाय पुत्रनाशखिन्नमपि चेतो धीरतया अप्रकाशितभयं प्रतिष्ठाप्य ॥ १ ॥ पितामहाराधनेन सञ्चितास्त्रः प्राप्तब्रह्मास्त्रोऽसीत्यर्थः ॥ २ ॥ तव अस्त्रबलमासाद्य आभिमुख्येन स्थित्वा सुरेश्वरसमाश्रिताश्च न शेकुः ॥ ३ ॥ कश्चिदपि न गतश्रमो न, सर्वे प्राप्तश्रमा इत्यर्थः ॥ ४ ॥ समरेषु कर्मणा पराक्रमेण ते

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विवेकपूर्वविचारे। अकार्यम् अज्ञातकार्यम्, ज्ञातुमशक्यं कार्यं नास्तीत्यर्थः। संग्रहेषु संगृह्यन्ते भोग्यतया स्वीक्रियन्ते भोक्तृभिरिति संग्रहाः लोकाः तेषु त्रिष्वपि यस्तवास्त्रबलं शारीरं बलं च न वेद स नास्ति, सर्वलोकप्रख्यातशस्त्रास्त्रबलसम्पन्नस्त्वमित्यर्थः ॥ ५ ॥ रणावमर्दे रणसङ्कटे। निश्चितार्थं

ममानुरूपं तपसो बलं च ते पराक्रमश्चास्त्रबलं च संयुगे। न त्वां समासाद्य रणावमर्दे मनः श्रमं गच्छति निश्चितार्थम् ॥ ६ ॥ निहताः किङ्कराः सर्वे जम्बुमाली च राक्षसः। अमात्यपुत्रा वीराश्च पञ्च सेनाग्रयायिनः ॥ ७ ॥ बलानि सुसमृद्धानि साश्वनागरथानि च। सहोदरस्ते दयितः कुमारोऽक्षश्च सूदितः ॥ ८ ॥ न हि तेष्वेव मे सारो यस्त्वय्यरिनिषूदन ॥ ९ ॥ इदं हि दृष्ट्वा मतिमन्महद्बलं कपेः प्रभावं च पराक्रमं च। त्वमात्मनश्चापि समीक्ष्य सारं कुरुष्व वेगं स्वबलानुरूपम् ॥ १० ॥ बलावमर्दस्त्वयि सन्निकृष्टे यथा गते शाम्यति शान्तशत्रौ। तथा समीक्ष्यात्मबलं परं च समारभस्वास्त्रविदां वरिष्ठ ॥ ११ ॥

निश्चितजयरूपार्थम्। त्वाम् आसाद्य विचिन्त्य मे मनः श्रमं न गच्छति विषादं न गच्छतीत्यर्थः ॥ ६–८ ॥ त्वयि मे यस्सारः उत्कर्षप्रत्ययः सः तेषु नास्त्येव हीति योजना ॥ ९ ॥ इदं किङ्कराद्यक्षकुमारान्तमारकम्। मतिमत् प्रशस्तमतियुक्तम्। बलं शारीरम्। प्रभावम् अन्तःशक्तिम्। पराक्रमं पौरुषम् ॥ १० ॥ बलेति। शान्तशत्रौ शमितशत्रौ, शत्रुशमनस्वभावे इति यावत्। "वा दान्तशान्त०–" इत्यादिना निपातनाण्णिलोप इडभावश्च। त्वयि संनिकृष्टे कपेरासन्ने सति। यथा बलावमर्दः सेनाक्षयः शाम्यति तथा आत्मबलं परं परबलं च समीक्ष्य समारभस्व। बलनाशात्पूर्वमेव शत्रुशान्तिं

अशक्यं नास्ति। मतिपूर्वमन्त्रणे बुद्धिपूर्वकं विचारिते। अकार्यम् अकार्यविषयज्ञानं नास्ति। भोक्तृभिः कर्मणा संगृह्यन्त इति सङ्ग्रहा लोकाः तेषु त्रिषु। ते अस्त्रबलं स्वाभाविकं बलं च यो न वेद स कश्चिन्नास्ति, सर्वे जानन्तीत्यर्थः ॥ ५ ॥ रणावमर्दे रणसङ्कटविषये मनश्च त्वां समासाद्य चिन्तयित्वा निश्चितार्थं निश्चितविजयरूपप्रयोजनं सत् श्रमं विषादं न गच्छतीत्यर्थः ॥ ६ ॥ प्रकृतमाह--निहता इति ॥ ७ ॥ ८ ॥ अरिनिषूदन ! त्वयि मे यः सारः उत्कर्षप्रत्ययः स तेषु नास्त्येव हीति योजना ॥ ९ ॥ इदं किङ्कराद्यक्षकुमारान्तमारकम्। मतिमत् प्रशस्तमतियुक्तम्। बलं शारीरम्। प्रभावं माहात्म्यम्। पराक्रमं पौरुषम् ॥१०॥ अस्त्रविदां वरिष्ठ ! शान्तशत्रौ त्वयि गते इतो निर्गते, सन्निकृष्टे हनुमत्समीपं प्राप्ते सति बलावमर्दः सेनानाशः यथा शाम्यति सेनाक्षयो यथा न स्यात् तथा आत्मबलं परं च समीक्ष्य समारभस्व, स्वसेनानाशात्पूर्वमेव शत्रुसंहारं कुर्वित्यर्थः ॥ ११ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कुर्वित्यर्थः ॥१३॥ न वीरेति । हे वीर ! गणशोचि गणानां शोचयितरि । शोचतेर्ण्यन्तात् क्विप् । एकदाऽनेकप्रहर्तरीत्यर्थः । एवंभूते हनुमति निमित्ते । सेनाः नावन्ति न रक्षन्ति । युगपदनेकविनाशके सेना अप्रयोजिकेत्यर्थः । अतः सेनाभिः सह मा गच्छेत्यर्थः । उपायान्तरं प्रतिषेधति न वज्रमिति । अलसारं

न वीर सेना गणशोच्यवन्ति न वज्रमादाय विशालसारम् ।
न मारुतस्यास्य गतेः प्रमाणं न चाग्निकल्पः करणेन हन्तुम् ॥ १२ ॥

हनुमद्विषये जीर्णसारं वज्रं वज्राख्यमायुधविशेषम् आदाय न विश, तत्समीपमिति शेषः । तत्र हेतुमाह न मारुतस्येति । अस्य गतिप्रमाणं मारुतस्य न चायं सेनाभिर्जेतुं शक्य इत्याह–न वीरेति । हे वीर ! गणशोचि गणान् शोचयतीति गणशोक् हनुमान् तस्मिन्निमित्ते सेनाः नावन्ति न रक्षन्ति । गणशोच्य

स०–हनुमद्बलाकर्णनदीप्तहृदयः सेनादिसत्त्वभ्रमतो न साहसं कुर्वंति सुतं प्रति शंसति–नेति । हे वीर आरब्धान्तगामिन् ! गणशः सङ्घीभूताः सेनाः न नोपयुक्ताः । तत्र हेतुश्च्यवन्तीति । स्वामिनं गमयित्वा पलायन्ते । उत्सनार्थम् । विशालसारं वज्रमादायापि न प्रयोजनम्, मारुतस्य हनूमतः गतेः प्रमाणम् इयत्ता न नास्ति । करणेन सेनादिरूपेण । अग्निकल्पोऽयं न च न शक्य इति शेषः । यद्वा नवीर न विद्यते वीरो यस्मादन्य इति नवीरः तत्सम्बुद्धिः । सेनाः गणशः अ च्यवन्ति न च्यवन्ति स्वस्थलाद्रणाङ्गणं प्रति नोपसर्पन्ति । " अमानोनाः प्रतिषेधे " इत्यनुशिष्टम् अ इत्यव्ययम् । ततश्च अ च्यवन्ति इति पदद्वयम् । अथवा नसेना इत्यनेनाक्षेपो ज्ञायते, अतः समासोपपत्तिः । विशालसारं वज्रं तन्नामकायुधमादायापि न नगच्छतस्तव कृत्यम्, अतद्वोवर इति भावः । यद्वा हे नवीरगणशः स्वसङ्घसुखद ! सेनाः उच्च्यवन्ति परिसर्पन्ति । न च व्यञ्जनपरस्यैकस्य वाऽनेकस्य वोच्चारणे श्रवणं प्रति विशेषोऽस्ति " इत्युक्तेः । इदंप्रकारस्तु भाष्यदीपिकायुक्तिवाल्यायामस्मत्कृतायां विस्तरत उद्घ्रितस्ततोऽनुसन्धेयः । कुतस्तेनाप्रयोजनं नास्तीत्यत आह नेति । विशालसारं वज्रमादाय न नायाति । एकवचनेन एकं वज्रमादाय नायाति किन्तु बहुवज्रानादायायातो वासवापेक्षयाऽयमतिशयितबल इत्यवलेपो न कार्य इति भावः । यथोक्तं संग्रहे–"नन्वेकवज्रो रिपुमेति वज्री दशास्य घोरा नखनामवज्राः ।" इति । यो मारुतः अग्निकल्पः अग्निसदृशः । आत्मना न " अग्निर्वै देवानामवमः " इति श्रुतेः । अतः करणेन कस्य आत्मनः रणेन युद्धेन अस्मज्जातियुद्धेन, मायामयेनेति यावत् । यद्वा कशब्दः कुत्सितवाची । कपटेत्यत्र कापट्यं कुत्सितपटत्वं च विवक्षयेति श्लेषकविसंप्रदायात् । केन कुत्सितेन रणेन हन्तुं न न हन्तुं योग्य इत्यर्थः । केनापि करणेन हन्तुं न शक्य इति । अलसारं पर्याप्तबलम् । वज्रमिव वज्रं दृढं हनुमन्तम् । आदाय विश लङ्कामिति शेषः । हे अलस न्यायमार्गेण युद्धं कर्तुमसमर्थ ! अरम् अलम् अत्यन्तम् । रलयोरभेदात् । वर्जनात् वैरिवर्जनाद्वज्रो हरिः तद्वान् । अर्शआद्यच् । तं हनुमन्तमादायेति पूर्ववत् । यत्तु नागोजिभट्टेन तत्रा कोक्षायतिस्मानार्थत्वेन एकशोप्राप्तौ सप्तमी त्वार्षी । अलतेर्वातोः पर्याप्त्यर्थत्वेन पर्याप्तसारमिति व्याख्यातुं योग्यम् । कुण्ठेत्यर्थस्य ततोऽलाभादिति तीर्थोपरि साहसं कृतम्, तत्तु प्रथमपक्षे तदुक्त्यैव द्वितीयपक्षे कुण्ठधारमित्युक्त्यैव न युक्तम् । तथाहि शब्देन्दुशेखरे–"ततश्च सम्बन्धसामान्ये षष्ठ्येव समासः । "भीत्रार्थानाम्" इति हेतुत्वप्रकारकबोधे तृतीयाद्यनार्थं विभक्तिप्रकरणे न कृतम् । कारकत्वप्रयुक्तकार्यानापत्तेरिति भावः । किञ्च हेतुत्वाविवक्षायां सम्बन्धित्वेन विवक्षया षष्ठीसूत्रारम्भेपि बोध्या । अभ्युचयेनाहेत्यादि " । " कृति च " इत्यादाविव गणशोचीति निमित्तसप्तम्युपपत्तेः । मारुतस्येति । किञ्चिद्धृतमित्युक्तिस्तु तद्बलात्सदृष्युत्वेति ज्ञेयम् ॥ १२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नास्ति, मारुतादप्यतिशयितगतिप्रमाण इत्यर्थः। अतस्तरसा यया कयापि दिशा समागम्य प्रहर्तारि न वज्रं किञ्चित्करमिति भावः। यदि समीपमागमिष्यति तदा मुष्टयादिभिरेव निहन्यत इत्याशङ्क्याह न चेति। अग्निकल्पो हनुमान् करणेन मुष्टयादिना हन्तुं न शक्यः। अग्नितुल्ये मुष्टयादिप्रहारा प्रवृत्तेरिति भावः ॥१२॥ तर्हि कथं कर्तव्यम्? तत्राह–तमिति। तं पूर्वोक्तमर्थम् एवं सम्यक् प्रसमीक्ष्य विचार्य। स्वकर्मसाम्यात्स्वकार्यसिद्ध्यर्थम्। फल

तमेवमर्थं प्रसमीक्ष्य सम्यक् स्वकर्मसाम्याद्धि समाहितात्मा। स्मरंश्च दिव्यं धनुषोऽस्त्रवीर्यं व्रजाक्षतं कर्म समारभस्व ॥ १३ ॥ न खल्वियं मतिः श्रेष्ठा यत्त्वां संप्रेषयाम्यहम्। इयं च राजधर्माणां क्षत्रस्य च मतिर्मता ॥ १४ ॥

स्यापि हेतुत्वात्पञ्चमी। साम्यं समत्वम् अन्यूनातिरिक्तत्वम्। समाहितात्मा एकाग्रचित्तः। दिव्यं धनुस्सम्बन्धि अस्त्रवीर्यमस्त्रबलं स्मरन् व्रज। अस्त्रबलं विना स निग्रहीतुमशक्यः। तेन तन्मन्त्रं स्मरन्नेव गच्छेति भावः ॥ १३ ॥ न खल्विति। अहं त्वां संप्रेषयामीति यत् इयं मतिः न श्रेष्ठा खलु नोचितेत्यर्थः। इयं मतिः त्वत्प्रेषणविषया मतिः। राजधर्माणां राजनीतिस्वरूपधर्माणाम्। क्षत्रस्य तदनुष्ठातुः क्षत्रियस्य च मता उचिता।

वन्तीति पाठे सङ्कशोपि नावन्ति। तत्र हेतुः नेति। मारुतस्य मारुतेः। गतेः परसेनाक्रमणार्थगमनस्य। प्रमाणम् इयत्ता नास्ति। मारुतेः सर्वदिग्गमनशीलतया कया दिशा समागत्य सेनाः प्रहरिष्यतीति न ज्ञायत इति भावः। यद्वा अस्य हनुमतो गतेः प्रमाणं मारुतस्य वायोरपि नास्ति, ततोऽप्यधिक इत्यर्थः। किञ्च अग्निकल्पः अग्निसदृशः अत एव करणेन मुष्टयादिना हन्तुं न, शक्य इति शेषः। अतः वज्रं वज्रप्रायमप्यायुधम् अलसारं कुण्ठितधारम्, तदादाय न विश रणं न प्रविश ॥ १२ ॥ तर्हि किं कर्तव्यमित्यत आह–तमिति। तमर्थं पूर्वोक्तमर्थम् एवं प्रसमीक्ष्य उक्तप्रकारेण निरूप्य स्वकर्मसाम्यात् स्वकार्यार्जिताद्धेतोः समाहितात्मा समाहितमनाः सन् दिव्यमस्त्रवीर्यं धनुषश्च वीर्यं स्मरन् अक्षतं यथा भवति तथा कर्म समारभस्व व्रजेति योजना ॥ १३ ॥ अहं त्वां प्रेषयामीति यत् इयं मतिर्न श्रेष्ठा खलु नोचितेत्यर्थः। इयं मतिः त्वत्प्रेषणविषया मतिः। राजधर्माणां राजनीतिरूपधर्माणां क्षत्रियस्य तदनुष्ठातुः क्षत्रियस्य च। मता उचितेत्यर्थः ॥ १४ ॥

स०–एवम् एवंविधं तं हनुमन्तम् अर्थं त्वत्प्रयोजनं च प्रसमीक्ष्य स्वकर्मसाम्यात् स्वव्यापारानुगुण्यात्। समाहितात्मा अस्य हनुमतः अस्य धनुषो वीर्यं च स्मरन् व्रज। ते कर्म व्यापारः अक्षतं फलपर्यवसायि यथा स्यात्तथा समारभस्व ॥ १३ ॥ **मतिश्रेष्ठ** बुद्धया वरिष्ठ! यदित्यव्ययं तृतीयार्थे। यया मत्या त्वां प्रेषयिष्यामि इयं मतिर्नेत्यर्थः। अथवा संप्रेषयिष्यामीति यत् इयं प्रेरणा न, नोचितेत्यर्थः। इयं प्रेरणविषया मतिः राज्ञां धर्माः राजधर्माः एषां सन्तीति राजधर्माः तेषामस्माकम्। क्षत्रियस्य च मता उचिता, नान्येषामिति भावः। अतो नानिष्टप्रसक्तिः। एतेन स्वस्य क्षत्रियत्वाभावेपि क्षत्रधर्मानुष्ठानात् पुत्रप्रेषणं युक्तमिति सूचयति ॥ १४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यद्यपि बालस्य प्रेषणमनुचितं तथापि स्वीयेषु सत्सु प्रधानगमनं नीतिशास्त्रविरुद्धमिति त्वां प्रेषयामीति भावः ॥ १४ ॥ नानाशस्त्रैः वैशारद्यं प्रहरण सामर्थ्यम् । अवश्यं बोद्धव्यम् स्मर्तव्यामित्यर्थः । रणे विजयश्च काम्यः प्रार्थनीयः । जयार्थं सर्वाण्यस्त्राणि स्मर्तव्यानीत्यर्थः ॥१५॥ तत इति । दक्षसुत

नानाशस्त्रैश्च संग्रामे वैशारद्यमरिन्दम । अवश्यमेव बोद्धव्यं काम्यश्च विजयो रणे ॥ १५ ॥ ततः पितुस्तद्वचनं निशम्य प्रदक्षिणं दक्षसुतप्रभावः । चकार भर्तारमदीनसत्त्वो रणाय वीरः प्रतिपन्नबुद्धिः ॥ १६ ॥ ततस्तैः स्वगणैरिष्टैरिन्द्रजित् प्रतिपूजितः । युद्धोद्धतः कृतोत्साहः सग्रामं प्रत्यपद्यत ॥ १७॥ श्रीमान् पद्मपलाशाक्षो राक्षसाधिपतेः सुतः । निर्जगाम महातेजाः समुद्र इव पर्वसु ॥ १८ ॥ स पक्षिराजोपमतुल्यवेगैर्व्यालैश्चतुर्भिः सिततीक्ष्णदंष्ट्रैः । रथं समायुक्तमसङ्गवेगं समारुरोहेन्द्रजिदिन्द्रकल्पः ॥ १९॥ स रथी धन्विनां श्रेष्ठः शस्त्रज्ञोऽस्त्रविदां वरः । रथेनाभिययौ क्षिप्रं हनूमान् यत्र सोऽभवत्॥२०॥स तस्य रथनिर्घोषं ज्यास्वनं कार्मुकस्य च । निशम्य हरिवीरोऽसौ संप्रहृष्टतरोऽभवत् ॥ २१ ॥ सुमहच्चापमादाय शितशल्यांश्च सायकान् । हनुमन्तमभिप्रेत्य जगाम रणपण्डितः ॥ २२ ॥

प्रभावः दक्षसुता देवाः । तथोक्तं श्रीविष्णुपुराणे--"मनसा त्वेव भूतानि पूर्वं दक्षोऽसृजत्तथा । देवानृषीन्सगन्धर्वानुरगान् पक्षिणस्तथा॥" इति॥१६॥ततस्तैरिति । युद्धोद्धतः कृतोत्साह इति पाठः ॥ १७ ॥ १८ ॥ स इति । पक्षिराजोपमतुल्यवेगैः पक्षिराजोपमैः अन्योन्यतुल्यवेगैश्च । व्यालैः हिंस्रपशुभिः, सिंहैरिति यावत् । सिंहाश्च रक्षसां वाहनानि भवन्ति । " सर्पहिंस्रपशू व्यालौ " इत्यमरः ॥ १९ ॥ २० ॥ ज्यास्वनमित्यत्र ज्या इति लुप्तषष्ठीविभक्तिकं

हे अरिन्दम ! सङ्गामे नानाशस्त्रैः वैशारद्यं सामर्थ्यम्, तवास्तीति शेषः । अतः अवश्यमेव योद्धव्यम् । रणे विजयः काम्यः प्रार्थनीय एव ॥१५॥ दक्षसुतप्रभावः दक्षसुता देवाः तत्सदृशप्रभावः ॥१६॥ स्वगणैः इष्टैः सभास्थैः राक्षसैः । युद्धे उद्धतश्चासौ कृतोत्साहश्च । संप्रपद्यत सम्प्रापद्यत ॥१७॥१८॥ पक्षिराजोपमतुल्यवेगैः

स०—अथ राज्ञः क्षत्रियस्य च कृत्यमाह—**नानेति** । नानाशास्त्रेषु धर्मार्थनीत्यादिशास्त्रेषु संग्रामे च वैशारद्यं, संपाद्यमिति शेषः । यस्य रणे विजयः काम्यो भवति तेनोक्तं नानाशास्त्रम् अवश्यं बोद्धव्यमेवेत्यर्थः। यद्वा परस्य नानाशास्त्रेषु यद्वैशारद्यमस्ति तद्योद्धाऽवश्यमेव बोद्धव्यम्। बुद्ध्वापि रणे स्वस्य विजयः प्रार्थ्य एव । अहं जेष्याम्येवेति बुद्धया युद्धमारभ्यमेव, न तु तादृशशत्रोरपि निवर्तितव्यमित्यर्थः । केचित्तु नानाशस्त्रैरिति योद्धव्यमिति च पठित्वा नानाशस्त्रकरणकसंग्रामे वैशारद्यं सामर्थ्यं तवास्ति, अतस्त्वयाऽवश्यं योद्धव्यमेव रणे जयश्च प्रार्थनीय एवेति व्याचक्षते ॥ १९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पृथक्पदम् । कार्मुकस्येत्यत्र स्वनमिति वा अध्याहारः ॥ २१ ॥ २२ ॥ तस्मिंस्तत इति । संयति युद्धे । जातहर्षे जातोत्साहे ॥ २३ ॥ चक्रचराः सङ्घचारिणः ॥ २४ ॥ २५ ॥ तडिदूर्जितनिःस्वनम् । अत्र तडिच्छब्देन तत्सङ्घातोऽशनिरुच्यते । विद्युत्सङ्घातनिस्वनमिति पूर्वमुक्तत्वात् । अशनिवद

तस्मिंस्ततः संयति जातहर्षे रणाय निर्गच्छति बाणपाणौ । दिशश्च सर्वाः कलुषा बभूवुर्मृगाश्च रौद्रा बहुधा विनेदुः ॥ २३ ॥ समागतास्तत्र तु नागयक्षा महर्षयश्चक्रचराश्च सिद्धाः । नभः समावृत्य च पक्षिसङ्घा विनेदुरुच्चैः परम प्रहृष्टाः ॥ २४ ॥ आयान्तं सरथं दृष्ट्वा तूर्णमिन्द्रजितं कपिः । विननाद महानादं व्यवर्धत च वेगवान् ॥ २५ ॥ इन्द्रजित्तु रथं दिव्यमास्थितश्चित्रकार्मुकः । धनुर्विस्फारयामास तडिदूर्जितनिःस्वनम् ॥ २६ ॥ ततः समेतावति तीक्ष्णवेगौ महाबलौ तौ रणनिर्विशङ्कौ । कपिश्च रक्षोधिपतेश्च पुत्रः सुरासुरेन्द्राविव बद्धवैरौ ॥ २७ ॥ स तस्य वीरस्य महारथस्य धनुष्मतः संयति संमतस्य । शरप्रवेगं व्यहनत् प्रवृद्धश्चचार मार्गे पितुरप्रमेये ॥२८॥ ततः शरानायततीक्ष्णशल्यान् सुपत्रिणः काञ्चनचित्रपुङ्खान् । मुमोच वीरः परवीरहन्ता सुसन्नतान् वज्रनिपातवेगान् ॥२९॥ ततस्तु तत्स्यन्दननिःस्वनं च मृदङ्गभेरीपटहस्वनं च । विकृष्यमाणस्य च कार्मुकस्य निशम्य घोषं पुनरुत्पपात ॥ ३० ॥ शराणामन्तरेष्वाशु व्यवर्तत महाकपिः । हरिस्तस्याभिलक्ष्यस्य मोघयँल्लक्ष्यसंग्रहम् ॥ ३१ ॥

दृढनिस्वनमित्यर्थः ॥ २६ ॥ तत इति । सुरासुरेन्द्राविव समेतावित्यन्वयः ॥ २७ ॥ स तस्येति । शरप्रवेगं व्यहनत् चचार चेत्यन्वयः ॥ २८–३० ॥

रामानु०–सुपत्रिण इति । पत्रिणः प्रशस्तपत्राः । शोभनाश्च ते पत्रिणश्चेति विग्रहः ॥ २९ ॥ शराणामिति । अभिलक्ष्यस्य लक्ष्यवेधने प्रसिद्धस्य । लक्ष्यसंग्रहं लक्ष्यसंग्रहणम्, लक्ष्यविषयदृष्टिमिति यावत् । मोघयन् वितथयन् ॥ ३१ ॥ रामानु०–शराणामन्तरेष्वाशु व्यवर्तत महाकपिरिति पाठः । अभिलक्ष्यस्य लक्ष्यवेधप्रसिद्धस्य ।

पक्षिराजोपमैः तुल्यवेगैः अन्योन्यसमवेगैश्च । व्यालैः हिंस्रपशुभिः ॥१९–२३॥ चक्रचराः ज्योतिश्चक्रसञ्चारिणः ॥२४॥२५ ॥ तडिदूर्जितनिस्वनं तडिच्छब्देनाशनि रुच्यते ॥ २६–२८ ॥ सुपत्रिणः प्रशस्तपत्राः ॥ २९ ॥ ३० ॥ अभिलक्ष्यस्य लक्ष्यवेधनप्रसिद्धस्य । तस्य इन्द्रजितः । लक्ष्यसंग्रहं लक्ष्यसङ्ग्रहणम् । लक्ष्यविषय

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मोघयन् वितथीकुर्वन् । मोहयान्निति पाठे विपर्यासयान्नित्यर्थः । लक्ष्यसंग्रहं लक्ष्यसंग्रहणम्, लक्ष्यविषयदृष्टिमिति यावत् ॥ ३१ ॥ **समभिवर्तत समभ्यवर्तत उत्पपात चेत्यन्वयः ॥ ३२ ॥ मनोग्राहि मनआकर्षकम् ॥ ३३ ॥ अन्तरं छिद्रम् ॥ ३४ ॥ अमोघेषु शरेषु संपतत्स्वपि लक्ष्ये लक्ष्यभूते हनुमति विहन्यमाने**

शराणामग्रतस्तस्य पुनः समभिवर्तत । प्रसार्य हस्तौ हनुमानुत्पपातानिलात्मजः ॥ ३२ ॥ तावुभौ वेगसम्पन्नौ रणकर्मविशारदौ । सर्वभूतमनोग्राहि चक्रतुर्युद्धमुत्तमम् ॥ ३३ ॥ हनूमतो वेद न राक्षसोऽन्तरं न मारुतिस्तस्य महात्मनोऽन्तरम् । परस्परं निर्विषहौ बभूवतुः समेत्य तौ देवसमानविक्रमौ ॥ ३४ ॥ ततस्तु लक्ष्ये स विहन्यमाने शरेष्वमोघेषु च संपतत्सु । जागम चिन्तां महतीं महात्मा समाधिसंयोगसमाहितात्मा ॥ ३५ ॥ ततो मतिं राक्षस राजसूनुश्चकार तस्मिन् हरिवीरमुख्ये । अवध्यतां तस्य कृपेः समीक्ष्य कथं निगच्छेदिति निग्रहार्थम् ॥ ३६ ॥ ततः पैतामहं वीरः सोऽस्त्रमस्त्रविदां वरः । सन्दधे सुग्रहातेजास्तं हरिप्रवरं प्रति ॥ ३७ ॥

स्वयं तेभ्यो विमुच्यमाने सति । हन्तेर्गत्यर्थात्कर्मकर्तरि लटश्शानजादेशः । समाधिसंयोगसमाहितात्मा सम्यगाधीयत इति समाधिः लक्ष्यं तस्मिन् संयोगे शरसन्धाने समाहितात्मा अप्रमत्तचित्तः । स महात्मा इन्द्रजित । महतीं चिन्तां जगाम ॥ ३५ ॥ रामानु०—अमोघेषु शरेषु संपतत्स्वपि लक्ष्ये लक्ष्यभूते हनुमति विहन्यमाने स्वयमेव तेभ्यो विमुच्यमाने सति । हन्तेर्गत्यर्थात् कर्मकर्तरि लटश्शानजादेशः । समाधिसंयोगसमाहितात्मा समाधीयत इति समाधिः लक्ष्यं तस्मिन् संयोगे शरसन्धाने च समाहितात्मा अप्रमत्तचित्तः महात्मा स इन्द्रजित् महतीं चिन्तां जगामेति योजना । शरेषु मोघेष्विति पाठे—संपतत्सु शरेषु मोघेषु सत्सु लक्ष्ये लक्ष्यभूते हनुमति विहन्यमाने च सति सः चिन्तां जगामेति संबन्धः ॥ ३५ ॥ **अवध्यतां तस्य कृपेस्समीक्ष्य निग्रहार्थं कथं निगच्छेत् नीचतां गच्छेदिति मतिं चकार ॥ ३६ ॥ ३७ ॥**

दृष्टिमिति यावत् । मोघयन् वितथीकुर्वन् । मोहयन्निति पाठे—विपर्यासयन् व्यवर्तत्तेति सम्बन्धः ॥ ३१ ॥ अभिवर्तत अभ्यवर्तत । ततः शरमोक्षसमये पुनरुत्पपात ॥ ३२ ॥ ३३ ॥ अन्तरं रन्ध्रम् ॥३४॥ अमोघेषु शरेषु सम्पतत्स्वपि लक्ष्ये लक्ष्यभूते हनुमति विहन्यमाने स्वयमेव शरेभ्यो विमुच्यमाने सति, शरैरभिहन्यमाने सतीत्यर्थः । हन्तेर्गत्यर्थात्कर्मकर्तरि लटः शानजादेशः । समाधिसंयोगसमाहितात्मा समाधीयत इति समाधिः लक्ष्यं तस्मिन संयोगे शरसन्धाने समाहितात्मा अप्रमत्तचित्तः लक्ष्यसन्धानशरसन्धानबद्धचित्त इत्यर्थः । शरेषु मोघेष्वित्यपि पाठः ॥ ३५ ॥ राक्षसराजसूनुः तस्य कपेः अवध्यतां समीक्ष्य निग्रहार्थं बन्धनार्थम् कथं

॥१३३॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

निजग्राह बबन्ध ॥ ३८–४० ॥ ब्रह्मास्त्रमभिमन्त्रितम्, विज्ञायेति शेषः ॥ ४१ ॥ लोकगुरोः प्रभावात् अस्य बन्धस्य मोक्षणे मे शक्तिर्नास्तीत्येवं मत्वा एवं विहितः इन्द्रजिता अनेन प्रकारेण कृतः आत्मयोनेरस्त्रबन्धः मया अनुवर्तितव्य इत्यन्वयः ॥४२॥ पितामहानुग्रहं विमोक्षहेतुभूतमनुग्रहम्

अवध्योऽयमिति ज्ञात्वा तमस्त्रेणास्त्रतत्त्ववित् । निजग्राह महाबाहुर्मारुतात्मजमिन्द्रजित् ॥ ३८ ॥ तेन बद्धस्ततोऽस्त्रेण राक्षसेन स वानरः। अभवन्निर्विचेष्टश्च पपात च महीतले ॥३९॥ ततोऽथ बुद्ध्वा स तदस्त्रबन्धं प्रभोः प्रभावाद् विगतात्मवेगः । पितामहानुग्रहमात्मनश्च विचिन्तयामास हरिप्रवीरः ॥ ४० ॥ ततः स्वायम्भुवैर्मन्त्रैर्ब्रह्मास्त्रमभिमन्त्रितम् । हनूमांश्चिन्तयामास वरदानं पितामहात् ॥ ४१ ॥ न मेऽस्य बन्धस्य च शक्तिरस्ति विमोक्षणे लोकगुरोः प्रभावात् । इत्येव मत्वा विहितोऽस्त्रबन्धो मयाऽऽत्मयोनेरनुवर्तितव्यः ॥ ४२ ॥ स वीर्यमस्त्रस्य कपिर्विचार्य पितामहानुग्रहमात्मनश्च । विमोक्षशक्तिं परिचिन्तयित्वा पितामहाज्ञामनुवर्तते स्म ॥ ४३ ॥ अस्त्रेणापि हि बद्धस्य भयं मम न जायते । पितामहमहेन्द्राभ्यां रक्षितस्यानिलेन च ॥ ४४ ॥ ग्रहणे चापि रक्षोभिर्महान् मे गुणदर्शनः । राक्षसेन्द्रेण संवादस्तस्मादगृह्णन्तु मां परे ॥ ४५ ॥

॥ ४३ ॥ स्वस्यादित्यग्रासानन्तरं पितामहमहेन्द्राभ्यामनिलेन च रक्षितत्वान्न मे भयमित्यर्थः ॥ ४४ ॥ ग्रहण इति । गुणदर्शनः गुणपर्यवसायी

निगच्छेत् निश्चेष्टां गच्छेत् इति तस्मिन् हरिवीरमुख्ये मर्तिं चकारेति सम्बन्धः ॥ ३६ ॥ ३७ ॥ निजग्राह बबन्ध ॥ ३८ ॥ ३९ ॥ सः हनुमान् स्वस्य तदस्त्रबन्धं ब्रह्मास्त्रबन्धम् । कृतं बुद्ध्वापि प्रभोः ब्रह्मणः प्रभावात् वरदानात् विगतालल्पवेगः विगतः अपगतः अल्पोऽपि वेगः पीडा येन तादृशः, अभीतचित्त इति यावत् । आत्मनः पितामहानुग्रहं मुहूर्तमात्रेण मदस्त्रनिरोधमुक्तिरित्येवंरूपम् । विगतालल्पवेग इति पाठः ॥ ४० ॥ ब्रह्मास्त्रमभिमन्त्रितम्, विदित्वेति शेषः ॥ ४१ ॥ अथेन्द्रजिदभिप्रायानुवादपूर्वकं स्वकर्तव्यमाह–न म इति । लोकगुरोः प्रभावादस्य बन्धस्य विमोक्षणे मम शक्तिर्नास्ति इत्येवं मत्वा एवं विहितः इन्द्रजिता अनेन प्रकारेण कृतः, तत आत्मयोनेरस्त्रबन्धः मया अनुवर्तितव्य इत्यन्वयः ॥ ४२ ॥ विमोक्षशक्तिं मुहूर्तानन्तरभाविनीं तां परिचिन्तयित्वा मुहूर्तमात्रं पितामहाज्ञामनुवर्तते स्म ॥ ४३ ॥ पितामहमहेन्द्राभ्यां रक्षितस्यानिलेन चेत्युक्तिः आदित्यग्रासप्रवृत्त्यनन्तरमिति ज्ञेयम् ॥ ४४ ॥ ४५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

संवादः ॥ ४५ ॥ ४६ ॥ ततस्तमिति । शणवल्कैः शणत्वग्भिः । संहतैः सञ्जीकृतैः । द्रुमचीरैः वल्कलैः ॥ ४७ ॥ स इति । राक्षसेन्द्रः कौतूहलात् मां द्रष्टुं व्यवस्येदिति निश्चितार्थस्सन् बन्धनादिकं रोचयामासेति सम्बन्धः ॥ ४८ ॥ ४९ ॥ अन्येन शणवल्कलादिना । बद्धः अस्त्रं नानुवर्तते,

स निश्चितार्थः परवीरहन्ता समीक्ष्यकारी विनिवृत्तचेष्टः । परैः प्रसह्याभिगतैर्निगृह्य ननाद तैस्तैः परिभर्त्स्यमानः ॥ ४६ ॥ ततस्तं राक्षसा दृष्ट्वा निर्विचेष्टमरिन्दमम् । बबन्धुः शणवल्कैश्च द्रुमचीरैश्च संहतैः ॥४७॥ स रोचयामास परैश्च बन्धं प्रसह्य वीरैरभिनिग्रहं च । कौतूहलान्मां यदि राक्षसेन्द्रो द्रष्टुं व्यवस्येदिति निश्चितार्थः ॥ ४८ ॥ स बद्धस्तेन वल्केन विमुक्तोऽस्त्रेण वीर्यवान् । अस्त्रबन्धः स चान्यं हि न बन्धमनुवर्तते ॥ ४९ ॥ अथेन्द्रजित्तु द्रुमचीरबद्धं विचार्य वीरः कपिसत्तमं तम् । विमुक्तमस्त्रेण जगाम चिन्तां नान्येन बद्धो ह्यनुवर्ततेऽस्त्रम् ॥५०॥ अहो महत् कर्म कृतं निरर्थकं न राक्षसैर्मन्त्रगतिर्विमृष्टा । पुनश्च नास्त्रे विहतेऽस्त्रमन्यत् प्रवर्तते संशयिताः स्म सर्वे॥५१॥ अस्त्रेण हनुमान् मुक्तो नात्मानमवबुध्यत । कृष्यमाणस्तु रक्षोभिस्तैश्च बन्धैर्निपीडितः ॥ ५२ ॥

नास्त्रेण बद्ध इव वर्तत इत्यर्थः ॥ ५० ॥ अहो इति । मन्त्रगतिः ब्रह्मास्त्रमन्त्रपद्धतिः । न विमृष्टा न पर्यालोचितेत्यर्थः । बन्धान्तरेण सहानवस्थानरूपं ब्रह्मास्त्रस्वभावमनालोच्य शणबन्धादिकं राक्षसैः कृतमिति भावः । अस्त्रे विहते ब्रह्मास्त्रे प्रतिहते । अन्यदस्त्रं न प्रवर्तते, न प्रभवतीत्यर्थः । तदेव ब्रह्मास्त्रं प्रयुज्यतामित्याशङ्क्याह–पुनश्चेति । पुनर्न प्रवर्तते, प्रयुक्तं ब्रह्मास्त्रं पुनर्न प्रभवतीत्यर्थः । सर्वे इत्यनन्तरमितिकरणं बोध्यम् । इति चिन्तां जगामेति पूर्वेण सम्बन्धः ॥ ५१ ॥ अस्त्रेणेति । नावबुद्धचत नावधृतवान् ॥ ५२–५७ ॥

स इति । समीक्ष्य विचार्य करोतीति समीक्ष्यकारी ॥४६ ॥ शणवल्कैः शणत्वग्भिः । संहतैः त्रिगुणितैः ॥ ४७ ॥ सः हनुमान् राक्षसेन्द्रः कौतूहलान्मां द्रष्टुं व्यवस्येदिति निश्चितार्थस्सन् बन्धनादिकं रोचयामासेति सम्बन्धः ॥ ४८ ॥ अस्त्रबन्धमोक्षोऽपि तथैवाजायतेत्याह–स इति । वल्केन तज्जन्यरज्ज्वैव बद्धः अस्त्रेण तु विमुक्तः । कुतस्तत्राह अस्त्रबन्धो मन्त्रबन्धोऽन्यं बन्धं नानुवर्तते इतरबन्धेन सह न तिष्ठति, तस्मिन् सति मन्त्रबन्धो नश्यतीत्यर्थः ॥ ४९ ॥ द्रुमचीरबद्धम् अत एव अस्त्रेण विमुक्तं विचार्य अन्येन शणवल्कलादिना बद्धो हनुमान् अस्त्रमनुवर्तते अस्त्रेण बद्ध इव वर्तते इत्यपि विचार्य चिन्तां जगामेति सम्बन्धः ॥ ५० ॥ अथात्मानमुपालभते–अहो इति । महत्कर्म ब्रह्मास्त्रेण हनुमद्बन्धनकर्म राक्षसैः निरर्थकं कृतम् । कुतः ? मन्त्रधृतिः न शक्या,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अतीत्येति । परिचारवृद्धान् अमात्यवृद्धान् ॥ ५८–६१ ॥ कार्यार्थं कर्तव्यार्थम् । अर्थस्य कर्तव्यार्थस्य । मूलं निमित्तम्, प्रेषयितारमित्यर्थः । अनयोः

हन्यमानस्ततः क्रूरै राक्षसैः काष्ठमुष्टिभिः । समीपं राक्षसेन्द्रस्य प्राकृष्यत स वानरः॥५३॥ अथेन्द्रजित्तं प्रसमीक्ष्य मुक्तमस्त्रेण बद्धं द्रुमचीरसूत्रैः । व्यदर्शयत्तत्र महाबलं तं हरिप्रवीरं सगणाय राज्ञे ॥ ५४ ॥ तं मत्तमिव मातङ्गं बद्धं कपिवरोत्तमम् । राक्षसा राक्षसेन्द्राय रावणाय न्यवेदयन् ॥ ५५ ॥ कोऽयं कस्य कुतो वाऽत्र किं कार्यं को व्यपाश्रयः । इति राक्षसवीराणां तत्र संजज्ञिरे कथाः॥५६॥ हन्यतां दह्यतां वापि भक्ष्यतामिति चापरे । राक्षसास्तत्र संक्रुद्धाः परस्परमथाब्रुवन् ॥ ५७ ॥ अतीत्य मार्गं सहसा महात्मा स तत्र रक्षोधिपपादमूले । ददर्श राज्ञः परिचार वृद्धान् गृहं महारत्नविभूषितं च ॥ ५८ ॥ स ददर्श महातेजा रावणः कपिसत्तमम् । रक्षोभिर्विकृताकारैः कृष्य माणमितस्ततः ॥ ५९ ॥ राक्षसाधिपतिं चापि ददर्श कपिसत्तमः । तेजोबलसमायुक्तं तपन्तमिव भास्करम् ॥६०॥ स रोषसंवर्तिताम्रदृष्टिर्दशाननस्तं कपिमन्ववेक्ष्य । अथोपविष्टान् कुलशीलवृद्धान् समादिशत्तं प्रति मन्त्रिमुख्यान् ॥ ६१ ॥ यथाक्रमं तैः स कपिर्विपृष्टः कार्यार्थमर्थस्य च मूलमादौ । निवेदयामास हरीश्वरस्य दूतः सकाशादह मागतोऽस्मि ॥ ६२ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे अष्टचत्वारिंशः सर्गः ॥४८॥

विपृष्ट इत्यनेन संबन्धः । श्लोकान्त इतिकरणं बोध्यम् । वक्ष्यमाणसङ्गहोऽयम् ॥ ६२ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गार तिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

ब्रह्मास्त्रमन्त्रधारणमशक्यमित्यर्थः । नच पुनः करणं शक्यमित्याह पुनश्चेति । न प्रवर्तते प्रयुक्तं ब्रह्मास्त्रं पुनर्न प्रभवतीत्यर्थः । अतः संशयिताः स्म सर्व इति चिन्तां जगामेति पूर्वेण सम्बन्धः ॥ ५१–५५ ॥ कोऽयमिति । अत्र रावणपुरे । को व्यपाश्रयः को वा आश्रयः ॥ ५६ ॥ ५७ ॥ अतीत्येति । परिचारवृद्धान् अमात्य वृद्धान् ॥ ५८–६१ ॥ कार्यार्थं कर्तव्यार्थम् । अर्थस्य च मूलम् अर्थकारणम् । कार्यं प्रति प्रेषयितारमिति यावत् । पृष्टस्सन् दूतस्सन् अहमागतोस्मीति निवेदया मासेति सम्बन्धः ॥६२॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायाम् अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ततः स इत्यादि । कर्मणा तस्य विस्मितः, युद्धार्थं रावणेनागन्तव्यामिति भया यत्नः कृतः । स तु नीतिज्ञ आसनस्थ एव इन्द्रजिन्मुखेन मां निबध्यानीतवा नित्यानयनकर्मणा जातविस्मय इत्यर्थः ॥ १ ॥ भ्राजमानमित्यादि । वज्रसंयोगसंयुक्तैः वज्रकीलनेन संबद्धैः । अत्र भ्राजमानमित्यनुषज्यते ॥ २ ॥ ३ ॥

ततः स कर्मणा तस्य विस्मितो भीमविक्रमः । हनुमान् रोषताम्राक्षो रक्षोधिपमवेक्षत ॥ १ ॥ भ्राजमानं महार्हेण काञ्चनेन विराजता । मुक्ताजालावृतेनाथ मुकुटेन महाद्युतिम् ॥ २ ॥ वज्रसंयोगसंयुक्तैर्महार्हमणिविग्रहैः । हैमैराभरणैश्चित्रैर्मनसेव प्रकल्पितैः ॥ ३ ॥ महार्हक्षौमसंवीतं रक्तचन्दनरूषितम् । स्वनुलिप्तं विचित्राभिर्विविधाभिश्च भक्तिभिः ॥ ४ ॥ विवृतैर्दर्शनीयैश्च रक्ताक्षैर्भीमदर्शनैः । दीप्ततीक्ष्णमहादंष्ट्रैः प्रलम्बदशनच्छदैः ॥ ५ ॥ शिरोभिर्दशभिर्वीरं भ्राजमानं महौजसम् । नानाव्यालसमाकीर्णैः शिखरैरिव मन्दरम् ॥ ६ ॥ नीलाञ्जनचयप्रख्यं हारेणोरसि राजता । पूर्णचन्द्राभवक्त्रेण सबलाकमिवाम्बुदम् ॥ ७ ॥ बाहुभिर्बद्धकेयूरैश्चन्दनोत्तमरूषितैः । भ्राजमानाङ्गदैः पीनैः पञ्चशीर्षैरिवोरगैः ॥८॥ महति स्फाटिके चित्रे रत्नसंयोगसंस्कृते । उत्तमास्तरणास्तीर्णे सूपविष्टं वरासने ॥ ९ ॥ अलंकृताभिरत्यर्थं प्रमदाभिः समन्ततः । वालव्यजनहस्ताभिरारात् समुपसेवितम् ॥ १० ॥ दुर्धरेण प्रहस्तेन महापार्श्वेन रक्षसा । मन्त्रिभिर्मन्त्रतत्त्वज्ञैर्निकुम्भेन च मन्त्रिणा ॥ ११ ॥

भक्तिभिः पङ्क्तिभिः । इत्थंभूतलक्षणे तृतीया । यथा पङ्क्त्या भवन्ति तथाऽनुलिप्त इत्यर्थः ॥ ४–६ ॥ पूर्णचन्द्राभवक्त्रेण पूर्णचन्द्रतुल्यनायकरत्नेन । वक्त्रं नायकरत्नम् अभितोलम्बमुक्ताभाणमण्डलम् ॥ ७ ॥ केयूरं भुजोपरि धार्यमाणमाभरणम् । अङ्गदं बाहुमध्यस्थाभरणम् ॥ ८–१० ॥ मन्त्रिभिः

तत इति । कर्मणा तस्य विस्मितः स्वयं सिंहासनादचालित एव ब्रह्मास्त्रेण स्ववन्धनकर्मविस्मित इत्यर्थः ॥ १ ॥ २ ॥ वज्रसंयोगसंयुक्तैः वज्रकीलेन सम्बद्धैः आभरणैर्भ्राजमानमित्यनुषङ्गः ॥ ३ ॥ भक्तिभिः कस्तूर्यादिरचनाविशेषैः ॥ ४–१० ॥ मन्त्री बुद्धिसहायः ॥ ११ ॥ १२ ॥

॥१३५॥

स०–तस्य रावणस्य । कर्मणा स्वयं महाराज इति साक्षादसम्भाष्य मन्त्रिमुखेन वाचयामासेत्येवंरूपकर्मणेत्यर्थः॥ कृतक०–तस्य इन्द्रजितः । यत्तु रावणस्येति तन्न । तेन हनूमति कस्यापि कर्मणोऽकृतत्वात् ॥ १ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रशस्तमन्त्रैः । अतस्तासचिवैरित्यपुनरुक्तिः ॥ ११--१७ ॥ अयं रावणकृतः अधर्मः बलवान् स्याद्यदि । तदाऽयं राक्षसेश्वरः सशक्रस्य सुरलोकस्यापि रक्षिता स्यात् ॥ १८ ॥ अस्येति । तेन कर्मभिः कृतेन पूर्वोक्तेनाधर्मेण हेतुना ॥ १९ ॥ २० ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गार

सुखोपविष्टं रक्षोभिश्चतुर्भिर्बलदर्पितैः । कृत्स्नं परिवृतं लोकं चतुर्भिरिव सागरैः ॥ १२ ॥ सचिवैर्मन्त्रतत्त्वज्ञैरन्यैश्च शुभबुद्धिभिः । अन्वास्यमानं रक्षोभिः सुरैरिव सुरेश्वरम् ॥ १३ ॥ अपश्यदाक्षसपतिं हनुमानतितेजसम् । विष्ठितं मेरुशिखरे सतोयमिव तोयदम् ॥ १४ ॥ स तैः संपीड्यमानोऽपि रक्षोभिर्भीमविक्रमैः । निस्मयं परमं गत्वा रक्षो धिपमवैक्षत ॥ १५ ॥ भ्राजमानं ततो दृष्ट्वा हनुमान् राक्षसेश्वरम् । मनसा चिन्तयामास तेजसा तस्य मोहितः ॥ १६ ॥ अहो रूपमहो धैर्यमहो सत्त्वमहो द्युतिः । अहो राक्षसराजस्य सर्वलक्षणयुक्तता ॥ १७ ॥ यद्यधर्मो न बलवान् स्यादयं राक्षसेश्वरः । स्यादय सुरलोकस्य सशक्रस्यापि रक्षिता ॥ १८ ॥ अस्य क्रूरैर्नृशंसैश्च कर्मभिर्लोककुत्सितैः । तेन बिभ्यति खल्वस्माल्लोकाः सामरदानवाः ॥ १९ ॥ अयं ह्युत्सहते क्रुद्धः कर्तुमेकार्णवं जगत् । इति चिन्तां बहुविधामकरोन्मतिमान् हरिः । दृष्ट्वा राक्षसराजस्य प्रभावममितौजसः ॥ २० ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

तिलकाख्याने सुन्दरकाण्डव्याख्याने एकोनपञ्चाशः सर्गः ॥ ४९ ॥

सचिवः कार्यसहायः ॥ १३ ॥ १४ ॥ रक्षोधिपमवैक्षत न तु रक्षःकृतपीडामित्यर्थः ॥ १५–१७ ॥ अयमधर्मः रावणकृतोऽधर्मः न स्याद्यदि अयं राक्षसेश्वरः बलवान् स्यात सशक्रस्य सुरलोकस्य रक्षितापि स्यादिति सम्बन्धः ॥ १८ ॥ क्रूरैः भीषणैः । नृशंसैः परदोहाचरणशीलैः । तेन पूर्वोक्तेनाधर्मेण च ॥ १९ ॥ २० ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायाम् एकोनपञ्चाशः सर्गः ॥ ४९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तमुद्वीक्ष्येत्यादि ॥ १ ॥ २॥ बाणः महाबलिसुतः । अनेन तेनापि किञ्चित् शप्तमिति गम्यते । अत्रेतिकरणं द्रष्टव्यम् ॥ ३ ॥ ४ ॥ दुरात्मा पृच्छ्यता मिति । अस्य विवरणम् कुत इत्यादि । कुतः कस्मादेशादागतः । किं वाऽस्य कारणम् अस्य कः प्रेरकः । मत्पुरीम्, प्रतीति शेषः । आयोधने युद्धे ।

तमुद्वीक्ष्य महाबाहुः पिङ्गाक्षं पुरतः स्थितम् । कोपेन महताऽऽविष्टो रावणो लोकरावणः॥ १॥ शङ्काहतात्मा दध्यौ स कपीन्द्रं तेजसावृतम् । किमेष भगवान्नन्दी भवेत् साक्षादिहागतः॥२॥ येन शप्तोऽस्मि कैलासे मया सञ्चालिते पुरा । सोऽयं वानरमूर्तिः स्यात् किंस्विद्बाणोपि वाऽसुरः ॥ ३ ॥ स राजा रोषताम्राक्षः प्रहस्तं मन्त्रिसत्तमम् । कालयुक्तमुवाचेदं वचो विपुलमर्थवत् ॥४॥ दुरात्मा पृच्छ्यतामेष कुतः किं वाऽस्य कारणम् । वनभङ्गे च कोऽस्यार्थो राक्षसीनां च तर्जने ॥ ५ ॥ मत्पुरीमप्रधृष्यां वाऽऽगमने किं प्रयोजनम् । आयोधने वा किं कार्यं पृच्छ्यतामेष दुर्मतिः ॥६॥ रावणस्य वचः श्रुत्वा प्रहस्तो वाक्यमब्रवीत् । समाश्वसिहि भद्रं ते न भीः कार्या त्वया कपे ॥ ७ ॥ यदि तावत्त्वमिन्द्रेण प्रेषितो रावणालयम् । तत्त्वमाख्याहि मा भूत्ते भयं वानर मोक्ष्यसे॥८॥ यदि वैश्रवणस्य त्वं यमस्य वरुणस्य च । चाररूपमिदं कृत्वा प्रविष्टो नः पुरीमिमाम् । विष्णुना प्रेषितो वापि दूतो विजयकांक्षिणा ॥ ९ ॥ न हि ते वानरं तेजो रूपमात्रं तु वानरम् ॥ १० ॥ तत्त्वतः कथयस्वाद्य ततो वानर मोक्ष्यसे । अनृतं वदतश्चापि दुर्लभं तव जीवितम् । अथवा यन्निमित्तं ते प्रवेशो रावणालये ॥ ११ ॥ एवमुक्तो हरिश्रेष्ठस्तदा रक्षोगणेश्वरम् ॥ १२ ॥

किं कार्यं किं प्रयोजनम् ॥ ५-७ ॥ यदि तावत्त्वमिन्द्रेणेत्यादि । यदि वैश्रवणस्येत्यादेः दूतो विजयकाङ्क्षिणेत्यन्तस्य तत्त्वमाख्याहीति पूर्वेण संबन्धः ॥ ८ ॥ ९ ॥ न हीत्यादि । अथवेति । यन्निमित्तं कृत्वा ते प्रवेशः तन्निमित्तं कथयस्वेति पूर्वेण संबन्धः ॥ १० ॥ ११ ॥ एवमुक्त इत्यादि । रक्षोगणेश्वर

आविष्टः, आसीदिति शेषः ॥१॥ तेजसावृतं, दृष्टेति शेषः । शङ्काहतात्मेत्युक्तां शङ्कामेवाह–नन्दी वानरमुख्य एषः प्रमथगणाधिपः॥२॥ शप्तः मन्मुखसदृशमुखैस्तव नाशो भविष्यतीति शप्तः । सोऽयमिति । बाणो बलिसुतः महासुरः । इति दध्याविति पूर्वेण सम्बन्धः ॥ ३ ॥ कालयुक्तं कालोचितम् ॥४॥ कुतः कस्मादेशादागतः । किंवाऽस्य कारणम् अस्य को वा प्रेषकः ॥५॥ मत्पुरीमिति, उद्दिश्येति शेषः ॥ ६–१० ॥ यन्निमित्तं कृत्वा ते प्रवेशः तन्निमित्तं कथयस्वेति पूर्वेण सम्बन्धः । अथवा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मित्यनेन प्रष्टारं प्रहस्तं पृष्ठतः कृतवानिति गम्यते ॥१२॥१३॥ एषा वानरता । राक्षसेन्द्रस्य, तवेति शेषः ॥ १४॥१५॥ प्रतियुद्धाः प्रतिप्रहृताः॥१६॥ ममापीति तवेवेत्यर्थः । तर्हि कथं बद्धोऽसीत्याशङ्क्याह राजानमिति ॥ १७ ॥ पीडितः बद्धस्सन् । अस्त्रेण विमुक्तः । हिशब्दोऽवधारणे । ब्रह्मास्त्रस्य

अब्रवीन्नास्मि शक्रस्य यमस्य वरुणस्य वा । धनदेन न मे सख्यं विष्णुना नास्मि चोदितः ॥१३॥ जातिरेव मम त्वेषा वानरोऽहमिहागतः । दर्शने राक्षसेन्द्रस्य दुर्लभे तदिदं मया ॥१४॥ वनं राक्षसराजस्य दर्शनार्थं विनाशितम् । ततस्ते राक्षसाः प्राप्ता बलिनो युद्धकांक्षिणः ॥ १५ ॥ रक्षणार्थं तु देहस्य प्रतियुद्धा मया रणे । अस्त्रपाशैर्न शक्योऽहं बद्धुं देवासुरैरपि ॥ १६ ॥ पितामहादेव वरो ममाप्येषोऽभ्युपागतः । राजानं द्रष्टुकामेन मयास्त्रमनुवर्तितम् ॥ १७ ॥ विमुक्तो ह्यहमस्त्रेण राक्षसैस्त्वभिपीडितः । केनचिद्राजकार्येण संप्राप्तोऽस्मि तवान्तिकम् ॥ १८ ॥ दूतोऽहमिति विज्ञेयो राघवस्यामितौजसः । श्रूयतां चापि वचनं मम पथ्यमिदं प्रभो ॥ १९ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

साधनान्तरासहत्वादिति भावः । अस्तु सर्वमेतन्मद्दर्शनार्थम्, मद्दर्शनं वा किमर्थम् ? तत्राह--केनचिदिति ॥ १८ ॥ १९ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चाशः सर्गः ॥ ५० ॥

यन्निमित्तस्ते इति पाठे बहुव्रीहिः ॥ ११-१३ ॥ दर्शन इति । राक्षसेन्द्रस्य, तवेति शेषः । दर्शने दुर्लभे सति । राक्षसेन्द्रस्य तव दर्शनार्थं तदिदं वनं नाशितमिति सम्बन्धः ॥ १४ ॥ १५ ॥ रक्षणार्थमिति । प्रतियुद्धाः प्रहृताः ॥ १६ ॥ ननु तवास्त्रबन्धाभावे किमिति ब्रह्मास्त्रेण बद्धो राक्षसैः पीडयस इत्यत आह-राजानमिति । अस्त्रविमुक्तोऽपि कार्यवशाद् बुद्धिपूर्वकमेवाहमेभिः पीडये एतन्ममाकिञ्चित्करमिति भावः ॥ १७-१९ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां पञ्चाशः सर्गः ॥ ५० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तं समीक्ष्येत्यादि । समीक्षणोक्तिक्रियाभेदात्तच्छब्दद्वयम् ॥ १ ॥ अहं रामदूत एव, सन्देशस्तु सुग्रीवस्येति भावः । सुग्रीवसन्देशात् सुग्रीवसन्देशाद्धेतोः, सन्देशप्रापणार्थमित्यर्थः । " सन्देशवाग्वाचिकं स्यात् " इत्यमरः । इह लङ्कायाम् । भ्राता भ्रातृवद्धितकरः । अब्रवीत् अप्राक्षीत् । यद्यपि

तं समीक्ष्य महासत्त्वं सत्त्ववान् हरिसत्तमः । वाक्यमर्थवदव्यग्रस्तमुवाच दशाननम् ॥ १ ॥ अहं सुग्रीवसन्देशादिह प्राप्तस्तवालयम् । राक्षसेन्द्र हरीशस्त्वां भ्राता कुशलमब्रवीत् ॥ २ ॥ भ्रातुः शृणु समादेशं सुग्रीवस्य महात्मनः । धर्मार्थोपहितं वाक्यमिह चामुत्र च क्षमम् ॥ ३ ॥ राजा दशरथो नाम रथकुञ्जरवाजिमान् । पितेव बन्धुर्लोकस्य सुरेश्वरसमद्युतिः ॥ ४ ॥ ज्येष्ठस्तस्य महाबाहुः पुत्रः प्रियकरः प्रभुः । पितुर्निदेशान्निष्क्रान्तः प्रविष्टो दण्डकावनम् ॥ ५ ॥ लक्ष्मणेन सह भ्रात्रा सीतया चापि भार्यया । रामो नाम महातेजा धर्म्यं पन्थानमाश्रितः ॥ ६ ॥ तस्य भार्या वने नष्टा सीता पतिमनुव्रता । वैदेहस्य सुता राज्ञो जनकस्य महात्मनः ॥ ७ ॥

सुग्रीवेण न सन्दिष्टं तथापि दूतोक्तं सर्वं स्वाम्युक्तमेवेत्याशयेनोक्तम् ॥ २ ॥ भ्रातुरिति । समादेशं सन्देशरूपमिति वाक्यविशेषणम् । इह अस्मिँल्लोके । अमुत्र परलोके । क्षमम् अभ्युदयसाधनम् ॥ ३–५ ॥ रामानु०–रावणहृदयपरिज्ञानार्थं तत्कालोदितप्रतिभया सुग्रीवसन्देशं कल्पयित्वा वदति–भ्रातुरिति । समादेशं सन्देशम् । सुग्रीवसन्देशस्य रामप्रयोजनपरत्वात्सन्देशोपयोगितया रामसुग्रीवयोस्सख्यादिकं राजा दशरथ इत्यारभ्य–भ्रमता च मया दृष्टा गृहे ते जनकात्मजेत्यन्तेन प्रतिपादयन् तद्भवानित्यादिना कृत्वा सुखमवाप्नुयादित्यन्तेन सुग्रीवसन्देशं वदति ॥ ३–५ ॥ धर्म्यं धर्मादनपेतम् । " धर्मपथ्यर्थन्यायादनपेते " इति यत्प्रत्ययः ॥ ६ ॥ ७ ॥

रामानु०–धर्म्यं धर्मादनपेतम् । " धर्मपथ्यर्थन्यायादनपेते " इति यत्प्रत्ययः ॥ ६ ॥

अथ सुग्रीवसन्देशकथनव्याजेन सामदण्डान्यतरविषयत्वनिश्चयाय न्यायानुसारी न वेति जिज्ञासति–तमित्यादि ॥ १ ॥ अहमिति । वालिरावणयोस्सखित्वसम्बन्धत्वाद्भ्रातृत्वम् । कुशलमब्रवीत् अप्राक्षीदित्यर्थः ॥ २ ॥ समादेशं सन्देशरूपं वाक्यमिति सामानाधिकरण्यम् ॥ ३ ॥ ननु किं तत्सुग्रीवसन्दिष्टमित्याकाङ्क्षायां ॥१३७॥

स०–राक्षसेभ हरीशः इति पाठः । हे **राक्षसेभ** राक्षसश्रेष्ठ ! वालिरावणयोर्भ्रातृसौहार्दात्तत्प्रकाशिका मृदूक्तिर्भ्रातेति । हरीशः कुशलमब्रवीत् त्वत्कुशलमुद्दिश्य पृच्छेति मामब्रवीत् । राक्षसेभहरीशः, न शृणोषि तेनोक्तं चेत्तव हननमनायासेन कृत्वा सीतां नेष्यतीत्यान्तरङ्गिकोऽर्थः राक्षसेभस्य हरीशः महासिंह इत्येकपदतायां ज्ञेयः । तथा भ्रातेत्यनेन त्वद्राज्यग्रहणेऽपि योग्यता तस्यास्तीति सूचयति ॥ २ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स मार्गमाण इति । सुग्रीवेण, मयेति शेषः । यद्वा लोके वक्तारः स्वात्मानमन्यमिव निर्दिशन्त्योद्धत्यातिशयात् । यद्वा अत्रानुवादात् पूर्वं सुग्रीवेणेवं वक्तव्यमिति पठितं तथैव हनुमान् पठतीति समादेशप्राधान्यादन्यवाक्यमपि तथोच्यत इति केचित् प्राहुः । यद्वा सुग्रीवसन्देशस्य रामप्रयाजनपर

स मार्गमाणस्तां देवीं राजपुत्रः सहानुजः । ऋश्यमूकमनुप्राप्तः सुग्रीवेण समागतः ॥ ८ ॥ तस्य तेन प्रतिज्ञातं सीतायाः परिमार्गणम् । सुग्रीवस्यापि रामेण हरिराज्यं निवेदितम् ॥९॥ ततस्तेन मृधे हत्वा राजपुत्रेण वालिनम् । सुग्रीवः स्थापितो राज्ये हर्यृक्षाणां गणेश्वरः ॥१०॥ त्वया विज्ञातपूर्वश्च वाली वानरपुङ्गवः । रामेण निहतः सङ्ख्ये शरेणैकेन वानरः ॥ ११ ॥ स सीतामार्गणे व्यग्रः सुग्रीवः सत्यसङ्गरः । हरीन् संप्रेषयामास दिशः सर्वा हरीश्वरः ॥ १२ ॥ तां हरीणां सहस्राणि शतानि नियुतानि च । दिक्षु सर्वासु मार्गन्ते ह्यधश्चोपरि चाम्बरे ॥ १३ ॥ वैनतेयसमाः केचित् केचित्तत्रानिलोपमाः । असङ्गगतयः शीघ्रा हरिवीरा महाबलाः ॥ १४ ॥ अहं तु हनुमान्नाम मारुतस्यौरसः सुतः । सीतायास्तु कृते तूर्णं शतयोजनमायतम् ॥ १५ ॥ समुद्रं लङ्घयित्वैव तां दिदृक्षुरिहागतः । भ्रमता च मया दृष्टा गृहे ते जनकात्मजा ॥ १६ ॥

त्वात्सन्देशोपयोगितया रामसुग्रीवयोस्सख्यादिकं दर्शयति—राजा दशरथ इत्यादिना ॥ ८–११ ॥ स इति । सत्यसङ्गरः सत्यप्रतिज्ञः । " कर्बुरे च प्रतिज्ञाजिसंविदापत्सु सङ्गरः " इत्यमरः ॥ १२ ॥ रामानु०—सत्यसङ्गरः सत्यप्रतिज्ञः । " कर्बुरे च प्रतिज्ञाजिसंविदापत्सु सङ्गरः " इत्यमरः ॥ १२ ॥ तामिति । अधश्चोपरि चाम्बरे, पाताले भूमौ आकाशे चेत्यर्थः ॥ १३ ॥ वैनतेयेति । असङ्गगतय इति शीघ्रत्वे हेतुः ॥ १४ ॥ अहन्त्विति । औरसस्सुतः क्षेत्रजत्वव्यावृत्तये औरसपदम् । सीतायास्तु कृते सीतालाभाय तां दिदृक्षुरिति योज्यम् ॥ १५ ॥ १६ ॥

यन्मयोच्यते तदेव तदीयाशयेन हनुमान् स्वयमेव सर्वं सन्दिशति-राजा दशरथ इत्यादिना जानकी प्रतिदीयतामित्यन्तेन ॥ ४–१० ॥ त्वयेति । त्वया विज्ञात पूर्वश्च वालीति ममोक्तिः । स तेन निहत इति पाठः । रामोत्कर्षश्च प्रतिपादित इति ज्ञेयम् ॥ ११–१५ ॥ त्वां दिदृक्षुरिहागत इति पाठः । त्वां सुग्रीवभ्रातरं रावणम्, तस्मिन् दृष्टे सर्वलोकवृत्तान्तज्ञः स सीतागतिं वक्ष्यतीति सुग्रीवेणोक्त्वात्वां दिदृक्षुरिहागतः, दैवात्पङ्गूपरि गङ्गानिपतनवत् तव गृहे भ्रमता मया

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

एवं सुग्रीवसंबन्धं प्रतिपाद्य सुग्रीवसन्देशं वदति–तद्भवानित्यादिना । दृष्टधर्मार्थः शास्त्रेण विदितधर्मार्थस्वरूप इत्यर्थः । तपःकृतपरिग्रहः तपसि विषये कृतस्वीकारः । यद्वा तपसा स्वयं कृतपरिग्रहः । स्वारसिकतपस्क इति यावत् । हेतुगर्भे विशेषणे ॥ १७ ॥ धर्मविरुद्धेषु धर्मशास्त्र

तद्भवान् दृष्टधर्मार्थस्तपःकृतपरिग्रहः । परदारान् महाप्राज्ञ नोपरोद्धुं त्वमर्हसि ॥१७॥ न हि धर्मविरुद्धेषु बह्वपायेषु कर्मसु । मूलघातिषु सज्जन्ते बुद्धिमन्तो भवद्विधाः ॥ १८ ॥ कश्च लक्ष्मणमुक्तानां रामकोपानुवर्तिनाम् । शराणामग्रतः स्थातुं शक्तो देवासुरेष्वपि ॥ १९ ॥ न चापि त्रिषु लोकेषु राजन् विद्येत कश्चन । राघवस्य व्यलीकं यः कृत्वा सुखमवाप्नुयात् ॥२०॥ तन्त्रिकालहितं वाक्यं धर्म्यमर्थानुबन्धि च । मन्यस्व नरदेवाय जानकी प्रतिदीयताम् ॥ २१ ॥ दृष्टा हीयं मया देवी लब्धं यदिह दुर्लभम् । उत्तरं कर्म यच्छेषं निमित्तं तत्र राघवः ॥ २२ ॥

विरुद्धेषु । धर्मविरुद्धत्वेऽपि यत्सौख्यावहं तत्कार्यमित्यत्राह बह्वपायेष्विति । बहुहानिकरेष्वित्यर्थः । अपायाः कथंचित्परिहियन्त इत्याशङ्क्याह मूलघातिष्विति । स्वविनाशकरेष्वित्यर्थः । कर्मसु परदारापहारेषु । न सज्जन्ते नोद्युक्ता भवन्ति ॥ १८॥ रामकोपानुवर्तिनां रामकोपानुसारेण निर्गतानामित्यर्थः ॥ १९ ॥ व्यलीकम् अप्रियम् । "व्यलीकं त्वप्रियेऽनृते" इत्यमरः ॥ २० ॥ तादिति । तत्तस्मात् अधर्मावहत्वात् रामापराधस्य परिहर्तव्यत्वाच्च । त्रिकालहितं भूतभविष्यद्वर्तमानकालहितम् । दारुणाधर्मस्य स्वपूर्वपुरुषविनाशकत्वेन तत्परिहारस्य भूतकालहितत्वं मन्यस्व । मत्वा प्रतिदीयतामिति योज्यम् ॥२१॥ जानकीहरणे किं मानं तत्राह–दृष्टा हीति । यत् सीतादर्शनम् दुर्लभम् । इतरवानरालभ्यं

जानकी दृष्टा ॥१६॥ दृष्टधर्मार्थः धर्मार्थशास्त्रपारदृश्वा । तपःकृतपरिग्रहः कृततपःपरिग्रहः, महातपस्सम्पन्न इत्यर्थः । यस्मादेतादृशस्त्वं तस्मात्परदारानुपरोद्धुं नार्हसीति योजना ॥ १७ ॥ अनेन मम का हानिरित्यत आह–नहीति । धर्मविरुद्धेषु अधर्मेष्वित्यर्थः । अधर्मफलमाह बह्वपायेषु बह्वनर्थेषु । ननु सर्वापायप्रतीकारसमर्थस्य किमियं वाचोयुक्तिः ? तत्राह मूलघातिषु । मूलतो विनष्टः किं प्रतिकरिष्यतीति भावः ॥ १८ ॥ ननु सर्वमूलफलच्छेदिनो मे को मूलच्छेदीत्यत आह– कश्चेत्यादि ॥ १९ ॥ व्यलीकम् अपराधम् ॥ २० ॥ तद्वाक्यं सुग्रीवोक्तम् । त्रिकालहितं सीतानुपरोधेन पूर्वापराधनाशात् वर्तमानैश्वर्याविरोधात् भाविशुभहेतुत्वाच्च त्रिकालहितम् । धर्म्यं धर्मादनपेतम् अर्थानुबन्धि च मन्यस्व जानीहि अतो नरदेवाय जानकी प्रतिदीयतामिति सम्बन्धः ॥ २१ ॥ न च सीताऽत्र नास्तीत्यपह्नोतुं शक्यमित्याह–दृष्टा हीति । यत् सीतादर्शनरूपं वस्तु दुर्लभं सीतान्वेषणप्रेषितैः सर्वैरपि वानरैः प्राप्तुमशक्यं तदिह मया लब्धम् । यावदाज्ञप्तं तावत्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तल्लब्धम् । तर्हि सा नीयतामित्यत्राह–उत्तरमिति । सीतादर्शनोत्तरं यच्छेषं कर्म सीतानयनं तत्र राघवो निमित्तम् । आज्ञप्तस्यैव मया कर्तव्यत्वादिति भावः ॥ २२ ॥ दृष्टयाऽपि मद्वशंवदया सीतया रामः किं करिष्यतीत्याशङ्क्याह–लक्षितेयमिति । तथेति वाचामगोचरत्वोक्तिः । नेयं तव वश्या प्रत्युत पन्नगीव तव प्राणहारिणीति भावः ॥ २३ ॥ नेयमिति । ओजसा अमरपक्षे प्रतापेन । अन्नपक्षे जाठराग्निना ॥ २४ ॥ तपःकृच्छ्रलब्धमिदं मह

लक्षितेयं मया सीता तथा शोकपरायणा । गृह्य यां नाभिजानासि पञ्चास्यामिव पन्नगीम् ॥ २३ ॥
नेयं जरयितुं शक्या सासुरैरमरैरपि । विषसंसृष्टमत्यर्थं भुक्तमन्नमिवौजसा ॥ २४ ॥
तपस्सन्तापलब्धस्ते योऽयं धर्मपरिग्रहः । न स नाशयितुं न्याय्यमात्मप्राणपरिग्रहः ॥ २५ ॥
अवध्यतां तपोभिर्यां भवान् समनुपश्यति । आत्मनः सासुरैर्देवैर्हेतुस्तत्राप्ययं महान् ॥ २६ ॥

जीवनं वृथा मा नाशयेत्याह–तप इति । तपस्सन्तापः तपश्चर्या । ओदनपाकं पचतीतिवन्निर्देशः । तेन लब्धः । परिगृह्यत इति परिग्रहः फलं धर्मपरिग्रहः धर्मफलम् । तादृशो योऽयमात्मप्राणपरिग्रहः आत्मनः प्राणानां च परिग्रहः स्वीकारः, जीवनमिति यावत् । स नाशयितुं न न्याय्यं न युक्तम् । अव्ययमेतत् । तपःक्लेशलब्धं तद्व्यतिरिक्तधर्मफलभूतं च यज्जीवनमायुः तन्न विनाशयेत्यर्थः । चकाराभावादित्थमेव योजना ॥ २५ ॥ सर्वावध्यस्येह मे कोऽयमायुर्विनाशक इत्याशङ्क्य परिहरति–अवध्यतामिति । तपोभिरार्जितां सासुरैर्देवैर्याम् आत्मनोऽवध्यतां भवान् समनुपश्यति । तत्रापि

कृतम् । उत्तरकर्तव्यं तु रामायत्तमित्याह उत्तरमिति ॥ २२ ॥ पञ्चास्यां पन्नगीमिव यां गृह्य गृहीत्वा नाभिजानासि तथा शोकपरायणा वाचामगोचरशोकतत्परा इयं सीता मया लक्षितेति सम्बन्धः । परमपतिव्रता सीता शोकपरायणा सती लङ्कायां रुद्धेति कृत्वा लङ्का विनङ्क्ष्यतीति भावः ॥ २३ ॥ ओजसा आहारशक्ति बलेन ॥ २४ ॥ तपस्सन्तापलब्धः तपश्चर्यालब्धो योऽयं धर्मपरिग्रहः आत्मप्राणपरिग्रहः आत्मप्राणानां परिग्रहः, तवायुर्वर्द्धक इति यावत् । नाशयितुं न न्याय्य इति योजना ॥ २५ ॥ पितामहवरावध्यस्य मे केयं बिभीषिकेत्याशङ्क्याह–अवध्यतामिति । तपोभिर्हेतुभिः सासुरैर्देवैरात्मनो यामवध्यतां भवान् समनुपश्यति तत्रापि यथा अवध्यत्वे तथैव वध्यत्वेपि अयं हेतुरिति योजना ॥ २६ ॥

स० –पञ्चास्यामित्यनेन आस्यस्थानीयानि रामो लक्ष्मणो राजाऽहं चेति चत्वारि स्वयं सीतेत्येकं चेति पञ्च आस्यानि यस्यास्ता ताम्, विस्तृतमुखीं वा ॥ २३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अवध्यतायां सत्यामपि। अयं वक्ष्यमाणः। हेतुः भवद्वधहेतुरस्ति। महान् अपरिहार्यः ॥ २६ ॥ तमेव हेतुमाह–सुग्रीव इति। न च राक्षस इति पाठस्सम्यक्। न च मानुष इति पाठे प्रतिषेधप्रसक्तिरपि नास्तीत्युच्यते। " तृणभूता हि मे सर्वे प्राणिनो मानुषादयः " इत्युत्तरश्रीरामायणे मनुष्यादिभिरवध्यत्वस्याप्रार्थितत्वात्। न च तिर्यञ्च इति न प्रसज्य च प्रतिषिद्ध्यत इति भावः। तस्मात्सुग्रीवात् ॥ २७ ॥ ननु किमनेनोपदेशेन, कृतानि

सुग्रीवो न हि देवोऽयं नासुरो न च राक्षसः। न दानवो न गन्धर्वो न यक्षो न च पन्नगः। तस्मात् प्राणपरित्राणं कथं राजन् करिष्यसि ॥ २७ ॥ न तु धर्मोपसंहारमधर्मफलसंहितम्। तदेव फलमन्वेति धर्मश्चाधर्मनाशनः ॥ २८ ॥

मया पापानि तैश्चावश्यं फलप्रदैर्भवितव्यमित्याशङ्क्याह–न त्विति। तुशब्द उक्तशङ्काव्यावर्तकः। धर्मः उपसंहियतेऽनेनेति धर्मोपसंहारं धर्मफलम्। फलेन धर्मस्योपसंहियमाणत्वात्। क्लीबत्वमार्षम्। तत अधर्मफलसंहितं न भवति। कुत इत्यत्राह–तदेव फलमन्वेतीति। धर्मफलमेवानुवर्तते। नन्वधर्मे च विद्यमाने कथं तत्फलाननुवृत्तिस्तत्राह धर्मश्चाधर्मनाशन इति। च उक्तशङ्कानिवृत्त्यर्थः। विरोधिनि धर्मे जाग्रति कथमधर्मवार्ताऽपीत्यर्थः। " धर्मेण पापमपनुदति " इति श्रुतेः। यद्वा व्यत्ययो वा किं न स्यात्तत्राह धर्मश्चेति। चोऽवधारणे। धर्म एवाधर्मनाशनः तथा श्रुतेः। न त्वधर्मः

कोऽसौ हेतुस्तत्राह–सुग्रीव इत्यादि। यद्यपि मानुषादवध्यत्वं न प्रार्थितम तथाप्यङ्गीकृत्योत्तरमाह–नच मानुष इति। नासुरो नच राक्षसः इति पाठः सम्यक्। फलितमाह–तस्मादिति ॥ २७ ॥ ननु महता पूर्वसञ्चितेनैव धर्मेण मम त्राणं भविष्यतीत्याशङ्क्य रोगराज्यादिविरुद्धधर्माधर्मफलयोः सम्भूयानुभवसिद्धेरात्मत्राण सिद्धिः, उताधर्मबाधेन धर्मफलानुभवश्चेति द्वेधा विकल्प्याद्यस्यासम्भवमाह–न त्विति। धर्मोपसंहारं धर्मस्य फलविनाश्यत्वात् धर्मः उपसंहियतेऽनेनेति धर्मोपसंहारं धर्मफलं सुखं तत अधर्मफलसंहितं न भवति. अधर्मेण सह भोग्यं न भवतीत्यर्थः। तीव्रतपःपरदारापहरणभवदीयधर्माधर्मफलयोरवश्यत्वावध्यत्वयोः जीवनतदभावयोः सहावस्थानविरोधात रोगराज्यादिवत्सम्भूयानुभवो न सम्भवतीति भावः। द्वितीयं दूषयति तदेवेति। तत धर्मफलमेवान्वेति. धर्मफलं धर्मफलेन सह तिष्ठतीति यावत। धर्मो नाधर्मनाशनः अधर्मबाधेन धर्मफलानुभवो न घटत इति भावः। यद्वा ननु, येभ्योऽवध्यत्वं न प्रार्थितं तेभ्योऽपि पूर्वोपार्जितो महासुकृतसञ्चय एव रक्षिष्यतीत्याशङ्क्य एवञ्चेत्तुल्यन्यायतया त्वत्कृतोऽधर्मस्तिस्योऽपि त्वां नाशयिष्यतीत्याह न त्विति। धर्मोपसंहारं धर्मस्य फलविनाश्यत्वात् धर्मः उपसंहियतेऽनेनेति धर्मोपसंहारं धर्मफलं सुखं, तत अधर्मफलसंहितं विरुद्धकारणकत्वाद्दुःखसंहितं न भवतीत्यर्थः। किन्तु तदेव फलमन्वेति सुखमेव फलत्वेनानुवर्तते। तुः चार्थे। तेन अधर्मफलमपि धर्मफलसंहितं न भवति, अधर्मफलमेव फलत्वेनानुवर्तत इति लभ्यते। नन्वधर्मे धर्मो नाशयिष्यतीत्याशङ्क्याह धर्मश्चेति। अत्र नञ् अनुवर्तते। धर्मोऽधर्मनाशनो न भवति। पूर्वकृतो धर्मः इदानीं कृताधर्मनाशनो न भवतीत्यर्थः। चकारादेवमधर्मोऽपि धर्मनाशनो न

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रमाणाभावादिति भावः । ननु यदि धर्मः अधर्मनाशनः तर्हि प्राथमिक एव धर्मः आधुनिकानधर्मान्निवर्तयेदित्याशङ्क्याह-प्राप्तमिति । तावच्छब्दः कात्स्न्यवाची । कृत्स्नं धर्मफलम् । फलमस्येति । तथा च क्षिप्रं धर्ममाचर अन्यथा सद्यस्ते विनाशो भविष्यतीति भावः । अत्र कर्तव्यत्वेन विधीय

प्राप्तं धर्मफलं तावद्भवता नात्र संशयः । फलमस्याप्यधर्मस्य क्षिप्रमेव प्रपत्स्यसे ॥ २९ ॥ जनस्थानवधं बुद्ध्वा बुद्ध्वा वालिवधं तथा । रामसुग्रीवसख्यं च बुद्धयस्व हितमात्मनः ॥ ३० ॥ कामं खल्वहमप्येकः सवाजिरथकुञ्जरां । लङ्कां नाशयितुं शक्तस्तस्यैष तु न निश्चयः ॥ ३१ ॥ रामेण हि प्रतिज्ञातं हर्यृक्षगणसन्निधौ । उत्सादनममित्राणां सीता यैस्तु प्रधर्षिता ॥ ३२ ॥ अपकुर्वन् हि रामस्य साक्षादपि पुरन्दरः । न सुखं प्राप्नुयादन्यः किं पुनस्त्वद्विधो जनः ॥ ३३ ॥ यां सीतेत्यभिजानासि येयं तिष्ठति ते वशे । कालरात्रीति तां विद्धि सर्वलङ्कानिवासिनीम् ॥ ३४ ॥ तदलं कालपाशेन सीताविग्रहरूपिणा । स्वयं स्कन्धावसक्तेन क्षममात्मनि चिन्त्यताम् ॥ ३५ ॥

मानो धर्मस्सीताप्रदानपूर्वकरामविषयशरणागतिरेव । शूरस्याशौर्यप्रवृत्त्या धर्मफलं सर्वं क्षीणमिति हनुमताऽवगतमिति मन्तव्यम् ॥ २८ ॥ २९ ॥ मा भूद्धर्मापेक्षा कार्योपस्थितिरवेक्ष्यतामित्याह–जनस्थानेति । रामसुग्रीवसख्यं चेति परोक्षनिर्देशस्य गतिः पूर्वमुक्ता ॥ ३० ॥ कामम् अत्यन्तम् । अहं सुग्रीवः । एषः तन्नाशनम् । तस्य रामस्य । निश्चयः निश्चयविषयः ॥ ३१ ॥ कथमित्यत्राह–रामेणेति । हर्यृक्षगणसन्निधौ वृद्धसभायां प्रतिज्ञातमनतिक्रमणीयमिति भावः ॥ ३२ ॥ ३३ ॥ कालरात्रीति काचिच्छक्तिरिति वदन्ति । "समी च कालरात्रिश्च भैरवी गणनायिका" इत्यमरशेषः ॥ ३४ ॥ तदिति।

भवतीति लभ्यते । धर्माधर्मावनुभवैकक्षिनाश्यावितिं भावः ॥ २८ ॥ ननु महतः पुण्यफलानुभवस्य समाप्त्यनन्तरम् अधर्मफलानुभवो भविष्यतीत्यत्राह–प्राप्तमिति । धर्मफलं तावत् साकल्येन प्राप्तं भुक्तम् । अस्याधर्मस्य सीताहरणरूपस्य ॥ २९ ॥ मानुषो रामः किं मां करिष्यतीति मा शङ्केरित्याशयेनाह–जनस्थानेति ॥ ३० ॥ काममिति । एष तु मत्कर्तृकलङ्कानिवासस्तु । तस्य रामस्य । न निश्चयः न सम्मत इत्यर्थः ॥ ३१ ॥ कुत इत्यत आह–रामेणेति ॥ ३२ ॥ अतिबलशालिनो मे सीतापहारेण रामादिभिः किमित्यत आह–अपकुर्वन् हीति ॥ ३३ ॥ कालरात्री महाभयकर्त्री भगवतः शक्तिः ॥ ३४ ॥ विग्रहः शरीरम् । स्कन्धावसक्तेन स्कन्धसम्बन्धकरणेन । आत्मनि आत्मत्राणे ॥ ३५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कालपाशेन यमपाशेन । अतस्सीतां रामाय देहीति हृदयम् ॥ ३५ ॥ अट्टः अट्टालः । प्रतोलिका वीथिका ॥ ३६ ॥ स्वानीति । मन्त्रीन् मन्त्रिणः । इकारान्तत्वमार्षम् ॥ ३७ ॥ सत्यमिति । रामदासस्येत्यनेन रामसामर्थ्यपरिज्ञानमुक्तम् । दूतस्येत्यनेन हितोपदेशाधिकारः । वानरस्येति माध्यस्थ्यम् ॥ ३८ ॥ सर्वानिति । लोकान् भूरादीन् । सभूतान् पृथिव्यतेजोवाय्वाकाशरूपपञ्चमहाभूतयुक्तान् । सचराचरान् चतुर्मुखद्वारा सृष्टजङ्गमाजङ्गम

सीतायास्तेजसा दग्धां रामकोपप्रपीडिताम् । दह्यमानामिमां पश्य पुरीं साट्टप्रतोलिकाम् ॥ ३६ ॥ स्वानि मित्राणि मन्त्रींश्च ज्ञातीन् भ्रातॄन् सुतान् हितान् । भोगान् दारांश्च लङ्कां च मा विनाशमुपानय ॥ ३७ ॥ सत्यं राक्षसराजेन्द्र शृणुष्व वचनं मम । रामदासस्य दूतस्य वानरस्य विशेषतः ॥ ३८ ॥ सर्वान् लोकान् समाहृत्य सभूतान् सचराचरान् । पुनरेव तथा स्रष्टुं शक्तो रामो महायशाः ॥ ३९ ॥ देवासुरनरेन्द्रेषु यक्षरक्षोगणेषु च । विद्याधरेषु सर्वेषु गन्धर्वेषूरगेषु च ॥ ४० ॥ सिद्धेषु किन्नरेन्द्रेषु पतत्रिषु च सर्वतः ॥ ४१ ॥ सर्वभूतेषु सर्वत्र सर्वकालेषु नास्ति सः । यो रामं प्रतियुद्ध्येत विष्णुतुल्यपराक्रमम् ॥४२॥ सर्वलोकेश्वरस्यैवं कृत्वा विप्रियमुत्तमम् । रामस्य राजसिंहस्य दुर्लभं तव जीवितम् ॥ ४३ ॥ देवाश्च दैत्याश्च निशाचरेन्द्र गन्धर्वविद्याधरनागयक्षाः । रामस्य लोकत्रयनायकस्य स्थातुं न शक्ताः समरेषु सर्वे ॥ ४४ ॥ ब्रह्मा स्वयम्भूश्चतुराननो वा रुद्रस्त्रिनेत्र स्त्रिपुरान्तको वा । इन्द्रो महेन्द्रः सुरनायको वा त्रातुं न शक्ता युधि रामवध्यम् ॥ ४५ ॥

युक्तान् । संहृत्य प्रलयावसाने रुद्रद्वारा स्वयं च संहृत्य पुनः कल्पादौ तथैव " धाता यथापूर्वमकल्पयत् " इति श्रुत्युक्तरीत्या स्रष्टुं समर्थः । तत्र प्रमाणमाह महायशा इति । " न तस्येशे कश्चन तस्य नाम महद्यशः " इति हि श्रुतिः । श्रुतिस्मृतिषु तथा प्रसिद्ध इत्यर्थः ॥ ३९–४४ ॥

रामानु०-सर्वभूतेषु सर्वत्र सर्वकालेषु नास्ति सः । इति पाठस्साधुः ॥ ४२ ॥ मा भूवन् शक्तास्सामान्यदेवाः, ईश्वराश्शक्ताः स्युरित्याशङ्क्याह–ब्रह्मेति । अत्र

प्रतोलिका रथ्या ॥ ३६ ॥ मन्त्रीन् मंत्रिणः ॥ ३७ ॥ सत्यमिति । रामदासस्येत्यादिविशेषणत्रयेण स्वस्य रामसामर्थ्यपरिज्ञानं हितोपदेशाधिकारं माध्यस्थ्यं च सूचितम् ॥ ३८–४४ ॥ ब्रह्मेति । ब्रह्मा स्वयम्भूरित्यादिविशेषणानि तेषां सामर्थ्यविशेषद्योतनार्थम् । इन्द्रः परमैश्वर्यवानिन्द्रः । " इदि परमैश्वर्ये " इति धातुः ।

स०–अजेत्यादिपादत्रयेपि त्रिवारमुक्तिर्दार्ढ्यार्थ, भट्टिकाव्ये–" जहिहि जहीहि जहाहि रामभार्याम् " इतिवत् । यद्वा ब्रह्मा बृहस्पतिः " ब्रह्मापि तत्र जानाति " इति गीताभाष्यप्रमेयदीपिकायां ' ब्रह्मा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विशेषणान्तरोपादानं तेषां सामर्थ्यविशेषद्योतनार्थम् । पतत्प्रकर्षत्वपरिहाराय व्युत्क्रमेण योजनीयम् । इन्द्रः परमैश्वर्यवान् । " इदि परमैश्वर्ये " इत्यस्माद्धातोः " ऋज्रेन्द्राग्र–" इत्यादिना निपातनात्साधुत्वम् । त्रैलोक्याधिपतिरपि त्रातुं न शक्त इत्यर्थः । तस्य त्रैलोक्याधिपतित्वेऽपि परनिरसनसामर्थ्याभावादशक्तेत्यत्राह–महेन्द्र इति । वृत्रहननप्रसिद्धसामर्थ्योऽपि न शक्तः । " यो वृत्रमवधीदिति तन्महेन्द्रस्य महेन्द्रत्वम् " इति श्रौतनिर्वचनम् । स्वयं चतुरोऽपि सहायसम्पत्त्यभावान्न शक्त इत्यत्राह सुरनायक इति । स्वतुल्यत्रयस्त्रिंशत्कोटिसुरगणसहायोऽपि न शक्त इत्यर्थः । मा भूत्क्षुद्र इन्द्रश्शक्तः, सर्वसंहारको रुद्रस्तु शक्तस्स्यात्तत्राह रुद्र इति । संहारकाले प्रजाः रोदयतीति रुद्रः । " रोदेर्णिलुक् च " इति रप्रत्ययः । कालविशेषे संहारकोऽपीदानीमप्रातकालत्वादशक्त इत्यत्राह त्रिनेत्र इति । निटिलनयनदहनज्वालाविलोपितमदनोऽपीत्यर्थः । काकतालीयत्वशङ्काव्युदासायाह त्रिपुरान्तक इति । प्रबलतरमहासुरसंहारकोऽपीत्यर्थः । मा भूत्तस्य शक्तिः " ब्रह्मणः पुत्राय ज्येष्ठाय श्रेष्ठाय " इत्युक्तरीत्या रुद्रस्यापि पिता ब्रह्मा शक्तस्स्यात्, तत्राह ब्रह्मेति । बृंहतीति ब्रह्मा । " बृहेरम् नलोपश्च " इति मनिन् अमागमो नकारलोपश्च । रुद्रपिता स्वयं कर्मवश्यः कथं शक्नुयात् तत्राह स्वयंभूरिति । कर्मवश्यत्वेऽपीतरसाधारण्येनानुत्पन्नः स्वयंभूः । स्वयंभूत्वेऽपि सहायसंपत्त्यभावात्कथं त्रायेतेत्यत्राह चतुरानन इति । युगपदेव सर्ववेदोच्चारणसम्पादितातिशयोऽपि न शक्तः । प्रत्येकमशक्तत्वेऽपि किं संभूयागताश्शक्नुवन्ति ? तत्राह न शक्ता इति । बहुवचनेनायमर्थो लभ्यते–वधमर्हतीति वध्यः । दण्डादित्वाद्यः । रामस्य वध्यो रामवध्यः । तं त्रातुं न शक्ताः । 'स्थानविन्निग्रहस्य च' इत्युचितवधार्हस्य त्राता कः । युधि युद्धे न शक्ताः किन्तु शरणं गत्वा त्रातुं शक्ता इत्यर्थः । अत्र " हिरण्यगर्भस्समवर्तताग्रे । न सन्न चासीच्छिव एव केवलः । इन्द्रो मायाभिः पुरुरूप ईयते " इति परदेवतात्वेन प्रसक्तात्रिकादधिकत्वमुक्तम् । राम इत्यनेन वेदान्तोदितानां सद्ब्रह्मादिसामान्यशब्दानां हिरण्यगर्भशिवेन्द्रादिविशेषशब्दानां च व्यक्तिविशेषपरत्वं व्यञ्जितम् । त्रातृत्वेन प्रसक्तप्रधानदेवतानिराकरणप्रकरणे विष्णोरनुपादानात् पारिशेष्याद्राम एव विष्णुरिति प्रतिपादितम् ॥ ४५ ॥

यो वृत्रहा स महेन्द्रः " महान्वा अयमभूद्यो वृत्रमवधीदिति तन्महेन्द्रस्य महेन्द्रत्वम् " इति श्रुतेः । त्रैलोक्यययन्तृत्ववृत्रहन्तृत्वसर्वसुरसंवृतत्वादिधर्मविशिष्टो वज्रपाणिर्वा । रुद्रः संहारकाले प्रजाः संहरन् रोदयतीति रुद्रः । रुतं शब्दं वेदात्मानं ब्रह्मणे कल्पादौ रातीति वा रुद्रः। यद्वा रुता नादेन सकलं जगदिदं द्रावयतीति

-बृहस्पतिः ' इति व्याख्यानात्। अस्वयंभूः स्वयम्भूभिन्नः स्वयम्भूसदृशो वायुः । चतुराननो विरिञ्चः । वाशब्दस्सर्वत्रान्वेति । रुद्रः क्रूरो यमः । त्रिनेत्रो रुद्रः । त्रिपुरान्तेन रुद्रेण कं शिरो यस्य दक्षस्य विनाशकस्य वा । इन्द्रः शचीपतिः । अमहेन्द्रः वृत्रहेतरः तत्सदृशः कामः । सुरनायकः सुरसेनानायकः षण्मुखः ॥ ४६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अस्माच्छ्लोकात्परं स सौष्ठवेति श्लोकः । तस्य तद्वचनमिति श्लोकस्तु उत्तरसर्गादिः । अत्र स प्रमादाल्लिखितः ॥ ४६ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकपञ्चाशः सर्गः ॥ ५१ ॥ तस्य तद्वचनं श्रुत्वेति श्लोकस्सर्गस्य प्रथमः ॥ १ ॥ दौत्यं

स सौष्ठवोपेतमदीनवादिनः कपेर्निशम्याप्रतिमोऽप्रियं वचः । दशाननः कोपविवृत्तलोचनः समादिशत् तस्य वधं महाकपेः ॥ ४६ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

तस्य तद्वचनं श्रुत्वा वानरस्य महात्मनः । आज्ञापयद्वधं तस्य रावणः क्रोधमूर्च्छितः ॥ १ ॥
वधे तस्य समाज्ञप्ते रावणेन दुरात्मना । निवेदितवतो दौत्ये नानुमेने विभीषणः ॥ २ ॥
तं रक्षोधिपतिं क्रुद्धं तच्च कार्यमुपस्थितम् । विदित्वा चिन्तयामास कार्यं कार्यविधौ स्थितः ॥ ३ ॥

दूतकर्म । ब्राह्मणादेराकृतिगणत्वात् ष्यञ् । तन्निवेदितवतः उक्तवतः । नानुमेने, वधमित्यनुवर्तनीयम् । निवेदितमतौ दूत्यमिति पाठान्तरम् । मन्यत इति मतिः कार्यम् । निवेदितमतौ निवेदितकार्यांशे यथार्थवादित्वेनावध्ये हनुमति दूत्यं दूतसंबन्धितया रावणादिष्टं वधम् । "दूतवणिग्भ्यां चेति वक्तव्यम्" इति भावकर्मणोर्विहितो यप्रत्ययः अर्थानुगुण्यात्सम्बन्धमात्रे गमयितव्यः ॥ २ ॥ तच्च कार्यं दूतवधरूपकार्यम् । कार्यम् अनन्तरानुष्ठेयम् । कार्यविधौ कार्यकरणे । स्थितः निश्चितार्थः, साध्वसाधुविवेकनिश्चितकार्य इत्यर्थः ॥ ३ ॥

रञ्जयतीति नादात्मकत्वाद्रुद्रः । यद्वा रुता नादेन प्रणवरूपेण वेदरूपेण वा दापयतीति इष्टमर्थं गमयतीति वा रुद्रः । यद्वा रुतं संसारदुःखं दुःखहेतुं वा द्रावयतीति रुद्रः । तदुक्तम्–"भदुःखं दुःखहेतुं वा तद्द्रावयति यः प्रभुः । रुद्र इत्युच्यते तस्माच्छिवः परमकारणम् ॥" इति । एवं व्युत्पत्तियुक्तरुद्रत्वशत्रुभस्मीकरणसमर्थ फाललोचनयुक्तत्वत्रिपुरान्तकत्वादिधर्मविशिष्टो महेश्वरो वा । बृंहति बृंहयतीति वा ब्रह्मा । स्वयम्भूः स्वयमेव स्वतन्त्रो भवति न परतन्त्र इति स्वयम्भूः । बृहत्त्व नित्यस्वतन्त्रत्वबहुमुखत्वकार्यनिर्वाहकत्वादिधर्मविशिष्टो विरिञ्चिर्वा युधि रामवध्यं त्रातुं न शक्ता इत्यर्थः ॥ ४५ ॥ ४६ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायाम् एकपञ्चाशः सर्गः ॥ ५१ ॥१॥ वध इति । निवेदितमतौ इति पाठः । मन्यत इति मतिः कार्यम् । निवेदित स्वागमनकार्ये हनुमति । अनेनास्य यथादिष्टार्थवादित्वेनानपराधित्वादवध्यत्वमुक्तम् । अतोऽस्मिन्विषये दूत्यं दूतसम्बन्धिनं रावणनिर्दिष्टं वधं नानुमेने ॥ २ ॥ तच्च

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

निश्चितार्थ इति । आपूज्येति च्छेदः ॥ ४ ॥ परावरज्ञाः त्याज्योपादेयविवेकयुक्ताः ॥५॥ प्रमापणं मारणम् ॥ ६ ॥ भूतानामिति निर्धारणे षष्ठी । भूतानां मध्ये ॥ ७ ॥ शास्त्रविपश्चित्त्वं विविधं पश्यतीति विपश्चित तस्य भावः विपश्चित्त्वम्, शास्त्रविषये विविधज्ञानोपेतत्वमिति यावत् ॥८॥ दूतदण्डः दूतयोग्य

निश्चितार्थस्ततः साम्नाऽऽपूज्य शत्रुजिदग्रजम् । उवाच हितमत्यर्थं वाक्यं वाक्यविशारदः ॥ ४ ॥ क्षमस्व रोषं त्यज राक्षसेन्द्र प्रसीद मद्वाक्यमिदं शृणुष्व । वधं न कुर्वन्ति परावरज्ञा दूतस्य सन्तो वसुधाधिपेन्द्राः॥५॥ राजधर्मविरुद्धं च लोकवृत्तेश्च गर्हितम् । तव चासदृशं वीर कपेरस्य प्रमापणम् ॥६॥ धर्मज्ञश्च कृतज्ञश्च राजधर्मविशारदः । परावरज्ञो भूतानां त्वमेव परमार्थवित् ॥७॥ गृह्यन्ते यदि रोषेण त्वादृशोऽपि विपश्चितः । ततः शास्त्रविपश्चित्त्वं श्रम एव हि केवलम् ॥ ८ ॥ तस्मात् प्रसीद शत्रुघ्न राक्षसेन्द्र दुरासद । युक्तायुक्तं विनिश्चित्य दूतदण्डो विधीयताम् ॥९॥ विभीषणवचः श्रुत्वा रावणो राक्षसेश्वरः । रोषेण महताविष्टो वाक्यमुत्तरमब्रवीत् ॥ १० ॥ न पापानां वधे पापं विद्यते शत्रुसूदन । तस्मादेनं वधिष्यामि वानरं पापचारिणम् ॥ ११ ॥ अधर्ममूलं बहुरोषयुक्तमनार्यजुष्टं वचनं निशम्य । उवाच वाक्यं परमार्थतत्त्वं विभीषणो बुद्धिमतां वरिष्ठः ॥ १२ ॥ प्रसीद लङ्केश्वर राक्षसेन्द्र धर्मार्थ युक्तं वचनं शृणुष्व । दूता न वध्याः समयेषु राजन् सर्वेषु सर्वत्र वदन्ति सन्तः ॥ १३ ॥ असंशयं शत्रुरयं प्रवृद्धः कृतं ह्यनेनाप्रियमप्रमेयम् । न दूतवध्यां प्रवदन्ति सन्तो दूतस्य दृष्टा बहवो हि दण्डाः ॥ १४ ॥

दण्डः ॥ ९–१२ ॥ प्रसीदेति । सर्वेषु सर्वत्र सर्वदेशेषु सर्वजातिष्वित्यर्थः ॥ १३ ॥ न केवलं दूतोऽयम् अक्षादिवधेन शत्रुश्च, तथाच हन्तव्य

कार्यं दूतवधरूपं कार्यम् । कार्यविधौ कर्तव्यविधाने स्थितः, कार्यकरणे कृतनिश्चय इत्यर्थः ॥ ३ ॥ शत्रुजितं च तमग्रजं च ॥ ४ ॥ रोषं त्यज, परावरज्ञाः त्याज्योपादेयविवेकयुक्ताः ॥ ५ ॥ प्रमापणं मारणम् ॥ ६ ॥ ७ ॥ शास्त्रविपश्चित्त्वं शास्त्रपाण्डित्यसम्पादनम् । श्रमः केवलं श्रम एव, व्यर्थप्रयास एवेत्यर्थः ॥ ८ ॥ दूतदण्डः दूते विहितो दण्डः ॥ ९ ॥ १० ॥ पापचारिणं राजद्रोहिणम् ॥ ११ ॥ अधर्मस्य मूलम् अधर्ममूलम् । दोषः अपकीर्तिरूपः ॥ १२ ॥ समयेषु स्वस्वामि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इत्याशङ्क्याह–असंशयमिति। दूतवध्यां दूतवधम्। स्त्रियां भावे क्यप्। हन्तेर्वधादेश आर्षः ॥१४॥ लक्षणसन्निपातः दूतयोग्याङ्कनसंबन्धः। नः अस्माभिः ॥ १५ ॥ धर्मार्थविनीतबुद्धिः धर्मार्थयोरिशिक्षितबुद्धिः। परावरप्रत्ययनिश्चितार्थः उत्कृष्टापकृष्टपरिज्ञाननिश्चितार्थः। अस्मिन् विषये इदं कार्यं परम्

वैरूप्यमङ्गेषु कशाभिघातो मौण्ड्यं(ढ्यं) तथा लक्षणसन्निपातः। एतान् हि दूते प्रवदन्ति दण्डान् वधस्तु दूतस्य न नः श्रुतोऽपि ॥ १५ ॥ कथं च धर्मार्थविनीतबुद्धिः परावरप्रत्ययनिश्चितार्थः। भवद्विधः कोपवशे हि तिष्ठेत् कोपं नियच्छन्ति हि सत्त्ववन्तः ॥ १६ ॥ न धर्मवादे न च लोकवृत्ते न शास्त्रबुद्धिग्रहणेषु चापि। विद्येत कश्चित्तव वीर तुल्यस्त्वं ह्युत्तमः सर्वसुरासुराणाम् ॥ १७ ॥ न चाप्यस्य कपेर्घाते कश्चित् पश्याम्यहं गुणम्। तेष्वयं पात्यतां दण्डो यैरयं प्रेषितः कपिः॥ १८॥ साधुर्वा यदिवाऽसाधुः परैरेष समर्पितः। ब्रुवन् परार्थं परवान् न दूतो वधमर्हति ॥ १९॥ अपि चास्मिन् हते राजन् नान्यं पश्यामि खेचरम्। इह यः पुनरागच्छेत् परं पारं महोदधेः ॥ २० ॥

इदमवरमिति विवेकनिश्चितकार्य इत्यर्थः। नियच्छन्ति निगृह्णन्ति। सत्त्ववन्तः व्यवसायवन्तः ॥ १६ ॥ धर्मवादे धर्मशास्त्रे। लोकवृत्ते लौकिकाचारे। शास्त्रबुद्धिग्रहणेषु शास्त्रशब्देन शास्त्रार्थ उच्यते। शास्त्रार्थज्ञानतद्धारणेष्वित्यर्थः ॥ १७ ॥ न केवलं दूतस्य वधे शास्त्रविरोधः गुणमपि न कंचित्पश्यामि अतः एतत्प्रेषकेष्वेव वधरूपो दण्डः पात्यतामित्याह–न चेत्यादि ॥ १८ ॥ साधुर्वेति। समर्पितः प्रेषितः ॥ १९ ॥ अस्मिन् हते सति वृत्तान्तनिवेदकाभावाद्रामलक्ष्मणयोरिहागमनाभावेन तव शत्रुक्षयो न स्यात्, विमुक्तेऽस्मिन् एतन्निवेदितवृत्तान्तयोस्तयोरिहागमनादयत्नेन तव शत्रुनाशो भवेदित्यभिप्रेत्याह–अपि चेत्यादिना। इह परं पारम् इह विद्यमानं महोदधेः परं पारम्, इदं दक्षिणकूलमित्यर्थः ॥ २० ॥ २१ ॥

नियोगानुष्ठानकालेषु ॥ १३ ॥ १४ ॥ लक्षणसन्निपातः दूतयोग्याङ्कनसम्बन्धः। न नः श्रुतेऽपि नोऽस्माभिः न श्रुतः ॥ १५ ॥ परावरप्रत्ययनिश्चितार्थः उत्कृष्टापकृष्ट ज्ञानेन निश्चितकार्यः। अस्मिन विषये इदं कार्यं परम् इदमवरमिति विवेकेन निश्चितप्रयोजन इत्यर्थः। भवद्विधः त्वादृशः। सत्त्ववन्तः बलवन्तः ॥ १६ ॥ न तु तवान्येनोपदेष्टव्यांशोऽस्तीत्याह–न धर्मवाद इति ॥ १७ ॥ १८ ॥ परुषवक्ताऽयमवश्यं हन्तव्य इत्यत आह–साधुरिति। समर्पितः प्रेषितः ॥ १९ ॥ अस्मिन् हते सति वृत्तान्तनिवेदकाभावाद्रामलक्ष्मणयोरिहागमनाभावेन तव शत्रु

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अस्मिन् विनष्ट इति । दीर्घपथावरुद्धौ दूरमार्गेण निरुद्धगमनावित्यर्थः । एतच्छ्लोकानन्तरं पराक्रमोत्साहमनस्विनां चेति श्लोकः । ततो हिताश्चेति श्लोकः । अथ तदेकदेशेनेति श्लोकः । अथ निशाचराणामिति सर्गान्तश्लोकः । अयमेव पाठक्रमः समीचीनः । अन्येष्यत्र सर्गे श्लोकाः कल्पिता

तस्मान्नास्य वधे यत्नः कार्यः परपुरञ्जय । भवान् सेन्द्रेषु देवेषु यत्नमास्थातुमर्हति ॥ २१ ॥ अस्मिन् विनष्टे नहि दूतमन्यं पश्यामि यस्तौ नरराजपुत्रौ । युद्धाय युद्धप्रिय दुर्विनीतावुद्योजयेद्दीर्घपथावरुद्धौ ॥२२॥ पराक्रमोत्साहमनस्विनां च सुरासुराणामपि दुर्जयेन । त्वया मनोनन्दन नैर्ऋतानां युद्धायतिर्नाशयितुं न युक्ता ॥ २३ ॥ हिताश्च शूराश्च समाहिताश्च कुलेषु जाताश्च महागुणेषु । मनस्विनः शस्त्रभृतां वरिष्ठाः कोट्यग्रतस्ते सुभृताश्च योधाः ॥२४॥ तदेकदेशेन बलस्य तावत् केचित्तवादेशकृतोऽभियान्तु । तौ राजपुत्रौ विनिगृह्य मूढौ परेषु ते भावयितुं प्रभावम् ॥ २५ ॥ निशाचराणामधिपोऽनुजस्य विभीषणस्योत्तमवाक्यमिष्टम् । जग्राह बुद्ध्या सुरलोकशत्रुर्महाबलो राक्षसराजमुख्यः ॥ २६ ॥ इत्यार्षे श्रीरामायणे० श्रीमत्सुन्दरकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

दृश्यन्ते ॥ २२–२४ ॥ रामानु०–अस्मिन्निति । उद्योजयेद्दीर्घपथावरुद्धावित्यतः परं पराक्रमोत्साहमनस्विनां चेति श्लोकः । ततः परं हिताश्चेति श्लोकः । तदनन्तरं तदेकदेशेनेति । ततो निशाचराणामिति सर्गान्तश्लोकः । अयमेव समीचीनः पाठक्रमः ॥ २२–२४ ॥ तदिति । तत्तस्मात्कारणात् । एकदेशेनेति सहयोगे तृतीया । बलस्य सैन्यस्य ॥ २५ ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्विपञ्चाशः सर्गः ॥ ५२ ॥

नाशो भवेदित्याशयेनाह–अपिचेत्यादि । इह पारम् इदं पारमित्यर्थः । नान्यं पश्यामि योऽत्रागच्छेदित्यर्थः ॥२०॥ तस्मात् पुनरागन्तुकाभावात् ॥ २१ ॥ नन्वस्मिन् हते अन्यस्यानागमने च का मम क्षतिः ? इष्टमेवेदम्, तत्राह–अस्मिन् विनष्ट इति । तौ राजपुत्रौ द्वौ य उद्योजयेत् तं न पश्यामि । ननु तदुद्योगाभावोऽपि ममेष्ट एव, नेत्याह युद्धप्रियेति सम्बोधनेन । युद्धप्रियस्य तव तयोरनागमनमेव क्षतिरिति भावः ॥ २२ ॥ महावीरस्य तव न कुत्रापि भयशङ्केत्याशयेनाह–पराक्रमेत्यादिना ॥ २३ ॥ हिताश्चेति । समाहिताः दानमानाभ्यां वशीकृता इत्यर्थः । सुभृताः सद्भृत्याः योधाश्च वर्तन्ते खलिवति शेषः ॥ २४ ॥ तत् तस्मात्कारणात् बलस्य सैन्यस्य एकदेशेन एकांशेन सह आदेशकृतः आज्ञाकारिणः केचित्कतिचित् भावयितुं प्रकाशयितुम् ॥ २५ २६ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां द्विपञ्चाशः सर्गः ॥ ५२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तस्येत्यादि । देशकालहितं देशकालोचितमिति विभीषणवचनविशेषणम् ॥ १ ॥ दूतवध्या दूतवधः ॥ २ ॥३ ॥ तत इति । समित्रेति । मित्राणि आप्ताः, समसुखदुःखा वा सहाया वा । ज्ञातयः भ्रात्रादयः । बान्धवाः सम्बन्धिनः । सुहृज्जनाः स्निग्धजनाः ॥ ४ ॥ आज्ञापयदिति । प्रदीप्तेन लाङ्गूलेन

तस्य तद्वचनं श्रुत्वा दशग्रीवो महाबलः । देशकालहितं वाक्यं भ्रातुरुत्तरमब्रवीत् ॥ १ ॥ सम्यगुक्तं हि भवता दूतवध्या विगर्हिता । अवश्यं तु वधादन्यः क्रियतामस्य निग्रहः ॥ २ ॥ कपीनां किल लाङ्गूलमिष्टं भवति भूषणम् । तदस्य दीप्यतां शीघ्रं तेन दग्धेन गच्छतु ॥ ३ ॥ ततः पश्यन्त्विमं दीनमङ्गवैरूप्यकर्शितम् । समित्र ज्ञातयः सर्वे बान्धवाः ससुहृज्जनाः ॥ ४ ॥ आज्ञापयद्राक्षसेन्द्रः पुरं सर्वं सचत्वरम् । लाङ्गूलेन प्रदीप्तेन रक्षोभिः परिणीयताम् ॥ ५ ॥ तस्य तद्वचनं श्रुत्वा राक्षसाः कोपकर्शिताः । वेष्टयन्ति स्म लाङ्गूलं जीर्णैः कार्पासकैः पटैः ॥ ६ ॥ संवेष्ट्यमाने लाङ्गूले व्यवर्धत महाकपिः । शुष्कमिन्धनमासाद्य वनेष्विव हुताशनः । तैलेन परिषिच्याथ तेऽग्निं तत्राभ्यपातयन् ॥ ७ ॥ लाङ्गूलेन प्रदीप्तेन राक्षसांस्तानपातयत् । रोषामर्षपरीतात्मा बालसूर्यसमाननः ॥ ८ ॥ लाङ्गूलं संप्रदीप्तं तु दृष्ट्वा तस्य हनूमतः । सहस्रबालवृद्धाश्च जग्मुः प्रीता निशाचराः ॥ ९ ॥ स भूयः सङ्गतैः क्रूरै राक्षसैर्हरिसत्तमः । निबद्धः कृतवान् वीरस्तत्कालसदृशीं मतिम् ॥ १० ॥

युक्तो हनुमान् सचत्वरं सर्वं पुरं परिणीयतां परितो नीयताम् इत्याज्ञापयदित्यन्वयः ॥ ५–७ ॥ लाङ्गूलेनेति । अपातयत् लाङ्गूलभ्रामणेन

तस्य विभीषणस्य ॥ १ ॥ दूतवध्या दूतवधः २ ॥ दग्धेन लाङ्गूलेनोपलक्षितो गच्छतु, स्वस्वामिसमीपमिति शेषः ॥ ३ ॥ मित्राण्याप्ताः ये समसुखदुःखाः, ज्ञातयः भ्रात्रादयः, बान्धवाः सम्बन्धिनः, सुहृज्जनाः स्निग्धजनाः ॥ ४ ॥ परिणीयतामित्याज्ञापयदिति योजना ॥ ५ ॥ ६ ॥ शुष्कमिति । आरण्यका यथा शुष्कमिन्धनमासाद्य हुताशनमुत्पादयन्ति तथा जीर्णपटवेष्टितं लाङ्गूलं तैलेन परिषिच्य तत्र तेऽग्निमुपपादयन् । हुताशन इति पाठे–वृद्धौ दृष्टान्तोऽयम् । उपपादयन्नित्यस्य समयोजयन्नित्यन्ये । तान् बद्ध्वा नेतॄन् ॥ ७–९ ॥ सङ्गतैः मिलितैः राक्षसैः स भूयः निबद्ध इति सम्बन्धः । बन्धसंहारशक्तावपि स नोचित इत्यचिन्तय

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अद्रावयदित्यर्थः ॥ ८-१० ॥ न मे शक्ताः न मे पर्याप्ता इत्यर्थः । मम निग्रहे न समर्था इति यावत् ॥ ११ ॥ यदीति । भर्तृहितार्थाय रामहितार्थाय । चरन्तं प्रवर्तमानम्, मामिति शेषः । भर्तृशासनात् रावणशासनात् यदि बध्नन्ति, तावता मे निष्कृतिः प्रतिक्रिया न कृता । इदं बन्धनमकिञ्चित्करमिति भावः ॥ १२ ॥ रामस्य प्रीत्यर्थमिदं विषहिष्ये । रावणादिवधस्य स्वेनैव कर्तव्यत्वेन रामाभिमतत्वाद्राक्षसानामहमीदृशं

कामं खलु न मे शक्ता निबद्धस्यापि राक्षसाः । छित्त्वा पाशान् समुत्पत्य हन्यामहमिमान् पुनः ॥ ११ ॥ यदि भर्तृहितार्थाय चरन्तं भर्तृशासनात् । बध्नन्त्येते दुरात्मानो न तु मे निष्कृतिः कृता ॥ १२ ॥ सर्वेषामेव पर्याप्तो राक्षसानामहं युधि । किं तु रामस्य प्रीत्यर्थं विषहिष्येऽहमीदृशम् ॥ १३ ॥ लङ्का चारयितव्या वै पुनरेव भवेदिति । रात्रौ न हि सुदृष्टा मे दुर्गकर्मविधानतः ॥ १४ ॥ अवश्यमेव द्रष्टव्या मया लङ्का निशाक्षये ॥ १५ ॥ कामं बद्धस्य मे भूयः पुच्छस्योद्दीपनेन च । पीडां कुर्वन्तु रक्षांसि न मेऽस्ति मनसः श्रमः ॥ १६ ॥ ततस्ते संवृताकारं सत्त्ववन्तं महाकपिम् । परिगृह्य ययुर्हृष्टा राक्षसाः कपिकुञ्जरम् ॥ १७ ॥

बन्धनाकर्षणादिरूपं परिभवं सहिष्य इति भावः । रामस्य प्रीत्यर्थमित्यत्र च्छन्दोभङ्ग आर्षः ॥ १३ ॥ लङ्केति । लङ्का रात्रौ दुर्गकर्मविधानतः दुर्गकर्मविधानाद्धेतोः । न हि सुदृष्टा नैव सुदृष्टा । यद्वा दुर्गकर्मविधानतः नगरगुप्तिविशेषज्ञानपूर्वकमित्यर्थः । न दृष्टेति हेतोर्मया लङ्का पुनश्चारयितव्या भवेत् । विचारित्वा द्रष्टव्या भवेदित्यर्थः । अयं च प्रातःकालः न तूषःकालः । प्रातःकालेऽपि तथा व्यवहारोपपत्तेः ॥ १४ ॥ १५ ॥ काममिति । मनसः श्रम इत्यनन्तरमितिकरणं बोध्यम् ॥ १६ ॥ संवृताकारं गूढस्वभावम् । महाकपिमिति बुद्ध्या महत्त्वम् । कपिकुञ्जरमिति सजातीयश्रेष्ठत्वम् ॥ १७

दित्याह कृतवानिति ॥ १० ॥ निबद्धस्यापि मे न शक्ताः मम निग्रहे न समर्था इत्यर्थः ॥ ११ ॥ भर्तुः स्वामिनो रामस्य । भर्तृशासनात् रावणशासनात् । निष्कृतिः प्रतिक्रिया न कृता मया कृतस्य कार्यस्य बन्धनमात्रं प्रतिक्रिया न भवतीति भावः ॥ १२ ॥ सर्वेषां, हनन इति शेषः । अहं पर्याप्तः, रामस्य प्रीत्यर्थम् ईदृशमवमानं विषहिष्ये, सर्वराक्षससंहारस्य रामेण प्रतिज्ञातत्वादिति भावः ॥ १३ ॥ दुर्गकर्मविधानतः विधानाद्धेतोः रात्रौ लङ्का न हि सुदृष्टा, अतो मे मया लङ्का पुनश्चारयितव्या भवेत् शोधयितव्या भवेदिति योजना । यद्वा दुर्गकर्मविधानतः नगरगुप्तिविशेषज्ञानपूर्वकमित्यर्थः । अनेन उषःकालः सम्प्राप्त इत्यवगम्यते ॥ १४ ॥ १५ ॥ मनसः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्वकर्मभिः आस्फोटनसिंहनादैरित्यर्थः। तां पुरीं घोषयन्तः। अत्यन्तसंयोगे द्वितीया। चारयन्ति स्म, तमिति शेषः ॥ १८ ॥ चारयामास शोधयामास ॥ १९ ॥ चत्वरान् गृहबहिरङ्गणानि ॥ २० ॥ शृङ्गाटकानि चतुष्पथानि। रथ्याः महावीथीः। उपरथ्याः अवान्तरवीथीः। गृहकान्तरान्

शङ्खभेरीनिनादैस्तं घोषयन्तः स्वकर्मभिः। राक्षसाः क्रूरकर्माणश्चारयन्ति स्म तां पुरीम् ॥ १८ ॥ अन्वीयमानो रक्षोभिर्ययौ सुखमरिन्दमः। हनुमांश्चारयामास राक्षसानां महापुरीम् ॥ १९ ॥ अथापश्यद्विमानानि विचित्राणि महाकपिः। संवृतान् भूमिभागांश्च सुविभक्तांश्च चत्वरान् ॥ २० ॥ वीथीश्च गृहसंबाधाः कपिः शृङ्गाटकानि च। तथा रथ्योपरथ्याश्च तथैव गृहकान्तरान्। गृहांश्च मेघसङ्काशान् ददर्श पवनात्मजः ॥ २१ ॥ चत्वरेषु चतुष्केषु राजमार्गे तथैव च। घोषयन्ति कपिं सर्वे चारीक इति राक्षसाः ॥ २२ ॥ स्त्रीबालवृद्धा निर्जग्मुस्तत्र तत्र कुतूहलात्। तं प्रदीपितलाङ्गूलं हनुमन्तं दिदृक्षवः ॥२३॥ दीप्यमाने ततस्तस्य लांगूलाग्रे हनूमतः। राक्षस्यस्ता विरूपाक्ष्यः शंसुर्देव्यास्तदप्रियम् ॥ २४ ॥ यस्त्वया कृतसंवादः सीते ताम्रमुखः कपिः। लाङ्गूलेन प्रदीप्तेन स एष परिणीयते ॥ २५ ॥ श्रुत्वा तद्वचनं क्रूरमात्मापहरणोपमम्। वैदेही शोकसन्तप्ता हुताशनमुपागमत् ॥ २६ ॥

गृहकाणि क्षुद्रगृहाणि, अन्तराणि प्रच्छन्नद्वाराणि अन्तर्द्वाराणीत्यर्थः। "तोरणोऽस्त्री बहिर्द्वारं प्रच्छन्नद्वारमन्तरम्" इति वैजयन्ती। अक्लीबत्वमार्षम् ॥ २१ ॥ चत्वरेष्विति। चत्वरेषु चतसृणां रथ्यानां संभेदेषु। चतुष्केषु चतुस्तम्भमण्डपेषु। चार एव चारीकः। स्वार्थे कप्रत्ययः। आर्षो दीर्घः ॥ २२ ॥ २३ ॥ शंसुः शशंसुः। आर्षो द्विर्वचनाभावः ॥ २४ ॥ परिणीयते परितो नीयते ॥ २५ ॥ उपागमत् उपासितवती ॥ २६ ॥

श्रममित्यत्र चिन्तासमाप्तिद्योतकमितिकरणं द्रष्टव्यम् ॥ १६ ॥ १७ ॥ शङ्खेति। स्वकर्मभिः आस्फोटसिंहनादैः तां पुरीं घोषयन्तः तं चारयन्ति स्मेति सम्बन्धः ॥ १८ ॥ चारयामास चोदयामासेत्यर्थः ॥ १९ ॥ चत्वरान् गृहबहिरङ्गणानि ॥ २० ॥ गृ[illegible] सम्बाधाः गृहैः सम्बाधाः निबिडाः रथ्याः। शृङ्गाटकानि चतुष्पथानि। उपरथ्याः क्षुद्रवीथीः। चत्वरेषु चतसृणां रथ्यानां सम्बन्धेषु। चतुष्केषु चतुस्तम्भमण्ड[illegible]। चार एव चारीकः ॥ २१–२३ ॥ शंसुः शशंसुः ॥ २४ ॥ परिणीयते परितो नीयते ॥ २५ ॥ आत्मापहरणोपमं तादृग्दुःखजनकमित्यर्थः। हुताशनमुपागमत उपासितवती ॥ २६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तस्य हनुमतः । मङ्गलाभिमुखी अदाहपरा । प्रयता शुद्धिमती । "पवित्रः प्रयतः पूतः" इत्यमरः ॥२७॥ यद्यस्तीति । पतिशुश्रूषादिपदं तत्फलपरम् । शीतो भव, तेनेति शेषः । एकपत्नीत्वं पातिव्रत्यम् ॥२८॥ किंचिदनुक्रोश इति समस्तं पदम् । तस्य रामस्य । भाग्यशेषः इदानीं निरन्तरदुःखानुभवात्

मङ्गलाभिमुखी तस्य सा तदाऽऽसीन्महाकपेः । उपतस्थे विशालाक्षी प्रयता हव्यवाहनम् ॥ २७ ॥ यद्यस्ति पतिशुश्रूषा यद्यस्ति चरितं तपः । यदि चास्त्येकपत्नीत्वं शीतो भव हनूमतः ॥ २८ ॥ यदि किंचिदनुक्रोशस्तस्य मय्यस्ति धीमतः । यदि वा भाग्यशेषो मे शीतो भव हनूमतः ॥२९॥ यदि मां वृत्तसम्पन्नां तत्समागमलालसाम् । स विजानाति धर्मात्मा शीतो भव हनूमतः ॥ ३० ॥ यदि मां तारयेदार्यः सुग्रीवः सत्यसङ्गरः । अस्माद्दुःखाम्बुसंरोधाच्छीतो भव हनूमतः ॥३१॥ ततस्तीक्ष्णार्चिरव्यग्रः प्रदक्षिणशिखोऽनलः । जज्वाल मृगशावाक्ष्याः शंसन्निव शिवं कपेः ॥ ३२ ॥ हनुमज्जनकश्चापि पुच्छानलयुतोऽनिलः । ववौ स्वास्थ्यकरो देव्याः प्रालेयानिलशीतलः ॥ ३३ ॥ दह्यमाने च लाङ्गूले चिन्तयामास वानरः ॥ ३४ ॥

भाग्यप्रसक्तिरेव नास्तीति मन्यमानाया इदं वचनम् ॥२९॥ मम पातिव्रत्यं यदि हनुमान् जानाति तदा शीतो भवेत्याह—यदि मामिति ॥ ३० ॥ यदि मां तारयेदिति । मत्तारणे इदमेव ज्ञापकमिति भावः ॥३१॥ तत इति । ततः सीतोपगमात् । कपेरनलः कपिवालाग्निः मृगशावाक्ष्याः सीतायाः शुभं शंसन्निव प्रदक्षिणशिखो जज्वालेत्यन्वयः ॥ ३२ ॥ हनुमदिति । अनिलश्च पुच्छानलयुतोऽपि । प्रालेयानिलशीतलः हिममारुतवच्छीतलस्सन् । देव्याः सीतायाः स्वास्थ्यकरः सुखकरः ववौ । अस्मात्परं दह्यमाने च लाङ्गूल इति श्लोकः । अनयोः श्लोकयोर्मध्ये केचन श्लोकाः कतिपयकोशेषु दृश्यन्ते । बहुकोशेषु

प्रयता शुद्धिमती ॥२७॥ यदि एकपत्नीत्वम् एकः पतिर्यस्याः सा एकपत्नी तस्या भावस्तत्त्वम्, पातिव्रत्यमित्यर्थः ॥ २८ ॥ तस्य रामस्य ॥ २९–३१ ॥ मृगशावाक्ष्याः सीतायाः, महिम्नेति शेषः । अनलः पुच्छानलः । प्रदक्षिणशिखः प्रदक्षिणाकारज्वालस्सन् कपेः शिवं शंसन्निव जज्वालेति सम्बन्धः ॥३२॥ किञ्च हनुमज्जनकः अनिलः पुच्छानलयुतः हनुमत्पुच्छानलसंयुतोऽपि देव्याः, प्रभावादिति शेषः । कपेरित्यनुकर्षः । प्रालेयानिलशीतलः हिममारुतवच्छीतलस्सन् स्वास्थ्यकरः सुखकरः ववाविति सम्बन्धः ॥ ३३ ॥ ३४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अदर्शनादर्थाधिक्याभावाच्च ते अनादरणीयाः ॥ ३३ ॥ ३४ ॥ रामानु०—हनुमज्जनक इति । अनिलः पुच्छानलयुतोपि । प्रालेयानिलशीतलः हिममारुतवच्छीतलस्सन् । देव्याः स्वास्थ्यकरो ववाविति सम्बन्धः । अस्मात्परतः दह्यमाने च लाङ्गूल इति श्लोकः । अनयोः श्लोकयोर्द्वयोर्मध्ये सरमावाक्यभूताः केचन श्लोकाः कतिपयकोशेषु दृश्यन्ते । बहुकोशेषु अदर्शनादर्थौचित्याभावाच्च ते अनादरणीयाः ॥ ३३ ॥ ३४ ॥ प्रदीप्त इति । रुजं पीडाम् । शिशिरस्येव सम्पातः शिशिरस्य चन्दनोशीरादेः संपातः सङ्घट्ट इव स्थितः । अत्यन्तशीतल इत्यर्थः । एतेन हेतुविशेषं न पश्यामीत्युक्तम् ॥ ३५ ॥ हेतुविशेषान्निश्चिनोति—अथवेत्यादिना । प्लवता मया सरितां पतौ ।

प्रदीप्तोऽग्निरयं कस्मान्न मां दहति सर्वतः । दृश्यते च महाज्वालः करोति न च मे रुजम् । शिशिरस्येव सम्पातो लाङ्गूलाग्रे प्रतिष्ठितः ॥ ३५ ॥ अथवा तदिदं व्यक्तं यद्र दृष्टं प्लवता मया । रामप्रभावादाश्चर्यं पर्वतः सरितां पतौ ॥ ३६ ॥ यदि तावत् समुद्रस्य मैनाकस्य च धीमतः । रामार्थं सम्भ्रमस्तादृक् किमग्निर्न करिष्यति ॥ ३७ ॥ सीतायाश्चानृशंस्येन तेजसा राघवस्य च । पितुश्च मम सख्येन न मां दहति पावकः ॥ ३८ ॥ भूयः स चिन्तयामास मुहूर्तं कपिकुञ्जरः ॥ ३९ ॥

आर्षं घिसंज्ञाकार्यम् । समुद्रमध्ये पर्वतः पर्वतरूपं यदाश्चर्यम् अद्भुतरूपं वस्तु दृष्टं तद्वदिदमग्नेः शैत्यं रामप्रभावात् सञ्जातं व्यक्तं निश्चितम् ॥ ३६ ॥ एतदेवोपपादयति—यदीति । संभ्रमः त्वरा । किमग्निर्न करिष्यति, संभ्रममिति शेषः । रामार्थं मैनाकस्य संभ्रमो यदि स्यादग्नेस्तादृशस्संभ्रमः कुतो न भविष्यतीत्यर्थः ॥ ३७ ॥ आनृशंस्येन दयया ॥ ३८ ॥ स चिन्तयामास, अनन्तरकर्तव्यमिति शेषः ॥ ३९ ॥

दृश्यत इति । मे रुजं न करोति प्रत्युत शिशिरस्य सम्पात इव हिमसङ्घात इव वर्तते । अत्र हेतुं न पश्यामीति शेषः ॥ ३५ ॥ हेतुविशेषान् निश्चिनोति—अथवेत्यादि । प्लवता मया सरितां पतौ रामप्रभावात् पर्वतः पर्वतरूपमाश्चर्यं यत् यस्मात्कारणात् दृष्टं तस्मात्कारणात् इदम् अग्नेः शैत्यमपि रामप्रभावात्सञ्जातम् व्यक्तं निश्चितमिति योजना ॥ ३६ ॥ कुत इत्यत्र आह—यदीति । सम्भ्रमः त्वरा यदि तदा अग्निः किं किमिति न करिष्यति, शैत्यमिति शेषः ॥ ३७ ॥ सीतायाइति । आनृशंस्येन कृपया ॥ ३८ ॥ भूयः स चिन्तयामास । अनन्तरकर्तव्यमिति शेषः ॥ ३९ ॥

ति०—ननु समुद्रप्रेरणेन मैनाकोत्थानं युज्यते, अग्नेस्तु स्वभाववैपरीत्यं कुतस्तत्राह—यदीति । तावदिति वाक्यालङ्कारे । रामार्थं रामोपकारार्थम् । तादृक् सम्भ्रमो यदि आदरपूर्वकं त्वरा यदि । तदा रामेण नित्यमुपासितोऽग्निः रामोपकारार्थं कथमपि शैत्यं किं न करिष्यतीत्यर्थः ॥ ३७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चिन्तितमेवाह—उत्पपातेति । पुरद्वारमिति । विभक्तरक्षस्सम्बाधं निवृत्तरक्षस्सञ्चारम् ॥ ४० ॥ स इति । अवशातयत् अवाशातयत्, अच्यावयदित्यर्थः ॥ ४१–४३ ॥ निहत्वा निहत्य । ल्यबभावआर्षः । लाङ्गूलकृतार्चिमाली लाङ्गूले कृतज्वालामालः । अर्चिमाली तेजःपुञ्जवानादित्य इव

उत्पपाताथ वेगेन ननाद च महाकपिः । पुरद्वारं ततः श्रीमान् शैलशृङ्गमिवोन्नतम् । विभक्तरक्षस्सम्बाधमाससादा निलात्मजः ॥ ४० ॥ स भूत्वा शैलसङ्काशः क्षणेन पुनरात्मवान् । ह्रस्वतां परमां प्राप्तो बन्धनान्यवशातयत् ॥ ४१ ॥ विमुक्तश्चाभवच्छ्रीमान् पुनः पर्वतसन्निभः । वीक्षमाणश्च ददृशे परिघं तोरणाश्रितम् ॥ ४२ ॥ स तं गृह्य महाबाहुः कालायसपरिष्कृतम् । रक्षिणस्तान् पुनः सर्वान् सूदयामास मारुतिः ॥ ४३ ॥ स तान्निहत्वा रणचण्ड विक्रमः समीक्षमाणः पुनरेव लङ्काम् । प्रदीप्तलाङ्गूलकृतार्चिमाली प्रकाशतादित्य इवार्चिमाली ॥ ४४ ॥

इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

वीक्षमाणस्ततो लङ्कां कपिः कृतमनोरथः । वर्धमानसमुत्साहः कार्यशेषमचिन्तयत् ॥ १ ॥
किं नु खल्ववशिष्टं मे कर्तव्यमिह साम्प्रतम् । यदेषां रक्षसां भूयः सन्तापजननं भवेत् ॥ २ ॥
वनं तावत् प्रमथितं प्रकृष्टा राक्षसा हताः । बलैकदेशः क्षपितः शेषं दुर्गविनाशनम् ॥ ३ ॥

प्रकाशत प्राकाशत । अनित्यत्वादडभावः । अर्चीतीकारान्तत्वमार्षम् ॥ ४४ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रिपञ्चाशः सर्गः ॥ ५३ ॥ वीक्षमाण इत्यादि । कृतमनोरथः पर्याप्तमनोरथः ॥ १ ॥ २ ॥ बलैकदेशः सेनैकदेशः । क्षपितः

विभक्तरक्षःसम्बाधं वियुक्तरक्षस्सञ्चारमित्यर्थः ॥ ४० ॥ शैलसङ्काशो महान् भूत्वा ह्रस्वतां प्राप्त इत्यनेन देहसौक्ष्म्यात्स्वयमेव बन्धगलनमुक्तम् । एवं रीत्या बन्धनान्यवशातयत ॥ ४१ ॥ विमुक्तत्यनन्तरं पुनः पर्वताकारोऽभवत ॥ ४२ ॥ ४३ ॥ प्रदीप्तलाङ्गूलकृतार्चिमाली पुच्छावृतज्वलन इत्यर्थः । अत्र रेफाभावः आर्षः ॥ ४४ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां त्रिपञ्चाशः सर्गः ॥ ५३ ॥ ॥ १ ॥ यदेषां भूयस्सन्तापजननं भवेत नादृशमेव साम्प्रतं कर्तव्यं किमिति कार्यशेषमचिन्तयदित्यर्थः ॥ २ ॥ तदेव निश्चिनोति शेषं दुर्गविनाशनमिति ॥ ३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नाशितः । दुर्गविनाशनं पुरविनाशनम् । शेषम् अवशिष्टम् ॥ ३ ॥ कर्म पूर्वोक्तं वनभङ्गादिकम्, समुद्रलङ्घनं दूत्यं वा । सुखपरिश्रमं सफलायासम् । शक्यमेतदित्याह अल्पयत्नेनेति । अस्मिन्कार्ये, कृते सतीति शेषः ॥४॥ केनोपायेनेदं सुकरमित्याशङ्क्य तमाह-यो हीति । यः अग्निः । अतिशीतलतया

दुर्गे विनाशिते कर्म भवेत् सुखपरिश्रमम् । अल्पयत्नेन कार्येऽस्मिन् मम स्यात् सफलः श्रमः ॥ ४ ॥
यो ह्ययं मम लांगूले दीप्यते हव्यवाहनः । अस्य सन्तर्पणं न्याय्यं कर्तुमेभिर्गृहोत्तमैः ॥५॥ ततः प्रदीप्तलाङ्गूलः
सविद्युदिव तोयदः । भवनाग्रेषु लङ्कायाः विचचार महाकपिः ॥ ६ ॥ गृहाद् गृहं राक्षसानामुद्यानानि च वानरः ।
वीक्षमाणो ह्यसन्त्रस्तः प्रासादांश्च चचार सः ॥ ७ ॥ अवप्लुत्य महावेगः प्रहस्तस्य निवेशनम् । अग्निं तत्र स
निक्षिप्य श्वसनेन समो बली ॥ ८ ॥ ततोऽन्यत् पुप्लुवे वेश्म महापार्श्वस्य वीर्यवान् । मुमोच हनुमानग्निं कालानल
शिखोपमम् ॥ ९ ॥ वज्रदंष्ट्रस्य च तथा पुप्लुवे स महाकपिः । शुकस्य च महातेजाः सारणस्य च धीमतः । तथा
चेन्द्रजितो वेश्म ददाह हरियूथपः ॥ १० ॥ जम्बुमालेः सुमालेश्च ददाह भवनं ततः ॥ ११ ॥ रश्मिकेतोश्च भवनं
सूर्यशत्रोस्तथैव च । ह्रस्वकर्णस्य दंष्ट्रस्य रोमशस्य च रक्षसः ॥ १२ ॥ युद्धोन्मत्तस्य मत्तस्य ध्वजग्रीवस्य
रक्षसः । विद्युज्जिह्वस्य घोरस्य तथा हस्तिमुखस्य च ॥ १३ ॥ करालस्य पिशाचस्य शोणिताक्षस्य चैव हि । कुम्भ
कर्णस्य भवनं मकराक्षस्य चैव हि ॥ १४ ॥

मम महोपकारं कृतवान् । अस्य सन्तर्पणं न्याय्यमित्यर्थः॥५॥ तत इत्यादि । अत्र बन्धविस्रसनाय पूर्वं तनुसङ्कोचे कृतेपि कार्यार्थमग्निवर्तिः स्थापितेति बोध्यम् । सविद्युदिव तोयद इति सर्वत आवृत्य सञ्चारे दृष्टान्तः ॥ ६–९ ॥ वज्रदंष्ट्रस्येत्यादि सार्धश्लोकः ॥ १० ॥ जम्बुमालेरित्यर्धम् ॥ ११ ॥ रश्मि

कर्म समुद्रलङ्घनादिकम् । सुखपरिश्रमं सफलप्रयासम् । न चाशक्यमेतदित्याह अल्पयत्नेनेति । अस्मिन् कार्ये दुर्गविनाशकार्ये, कृते सतीति शेषः ॥४॥ केनोपा येन दुर्गविनाशनं स्यात् ? अत आह–यो हीति ॥ ५ ॥ तोयदः सन्ध्यातोयदः, हनुमतो रक्तवर्णत्वात् ॥ ६ ॥ उद्यानानि गृहारामाः ॥७॥ प्रहस्तस्य प्रधानमन्त्रित्वा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

केतोरित्यादिपञ्चश्लोकी । वर्जयित्वेति । विभीषणगृहं प्रति वर्जयित्वेति सम्बन्धः ॥ १२–१६ ॥ तेषु तेष्विति । भवनेष्विति गृहविशेषणं समृद्धिमत्परम् । ऋद्धिं मणिमुक्ताप्रवालादिकाम् ॥१७॥१८॥ तत इत्यादि । सर्वमङ्गलशोभिते सर्वमङ्गलद्रव्ययुक्ते ॥१९॥२०॥ श्वसनेनेति । पूर्वं रावणादिभीतावग्न्यनिलौ

यज्ञशत्रोश्च भवनं ब्रह्मशत्रोस्तथैव च । नरान्तकस्य कुम्भस्य निकुम्भस्य दुरात्मनः ॥ १५ ॥ वर्जयित्वा महातेजा विभीषणगृहं प्रति । क्रममाणः क्रमेणैव ददाह हरिपुङ्गवः ॥ १६ ॥ तेषु तेषु महार्हेषु भवनेषु महायशाः । गृहेष्वृद्धि मतामृद्धिं ददाह स महाकपिः ॥ १७ ॥ सर्वेषां समतिक्रम्य राक्षसेन्द्रस्य वीर्यवान् । आससादाथ लक्ष्मीवान् रावणस्य निवेशनम् ॥ १८ ॥ ततस्तस्मिन् गृहे मुख्ये नानारत्नविभूषिते । मेरुमन्दरसङ्काशे सर्वमङ्गलशोभिते ॥ १९ ॥ प्रदीप्तमग्निमुत्सृज्य लाङ्गूलाग्रे प्रतिष्ठितम् । ननाद हनुमान् वीरो युगान्तजलदो यथा ॥ २० ॥ श्वसनेन च संयोगादतिवेगो महाबलः । कालाग्निरिव जज्वाल प्रावर्धत हुताशनः ॥ २१ ॥ प्रदीप्तमग्निं पवनस्तेषु वेश्मस्वचारयत् । अभूच्छ्वसनसंयोगादतिवेगो हुताशनः ॥ २२ ॥ तानि काञ्चनजालानि मुक्तामणिमयानि च । भवनान्यवशीर्यन्त रत्नवन्ति महान्ति च ॥ २३ ॥ तानि भग्नविमानानि निपेतुर्वसुधातले । भवनानीव सिद्धानामम्बरात् पुण्यसंक्षये ॥ २४ ॥ संजज्ञे तुमुलः शब्दो राक्षसानां प्रधावताम् । स्वगृहस्य परित्राणे भग्नोत्साहगतश्रियाम् । नूनमेषोऽग्निरायातः कपिरूपेण हा इति ॥ २५ ॥

इदानीं राक्षससक्षयं देवबलोदयं च प्रत्यासन्नं विदित्वा निश्शङ्कावभूतामिति भावः ॥ २१–२४ ॥ संजज्ञ इत्यादि । स्वगृहस्य परित्राणे भग्नोत्साह

दादौ तद्गृहेऽग्निप्रक्षेपः, प्रथमं तत्सम्भावनस्यौचित्यात् ॥ ८–१५ ॥ वर्जयित्वेति । विभीषणगृहं प्रति वर्जयित्वेति सम्बन्धः । ददाहेति । क्रमेणैव ददाहेत्यर्थः । विभीषणेन स्वस्य वधतो रक्षणाद्विभीषणगृहं वर्जयित्वा प्रतिगृहं क्रममाणो ददाहेत्यन्वयः ॥ १६ ॥ ददाह स महाकपिरिति । पूर्वं रावणाद्भीतोप्यग्निः सीतातेजस्सम्बन्धेन निश्शङ्कं ददाहेत्युक्तम् ॥ १७–२० ॥ श्वसनेनेति । पूर्वं रावणादतिभीतावग्न्यनिलौ इदानीं राक्षसबलक्षयं देवबलोदयञ्च प्रत्यासन्नं विदित्वा निश्शङ्कावभूतामिति भावः ॥२१॥ अचारयदिति हेतौ, यतश्चारयति स्म ततश्चारणाद्धेतोस्तानि व्यशीर्यन्तेत्यन्वयः ॥२२॥२३॥ भग्नविमानानि भग्नप्रासादानि ॥२४॥ भग्नोत्साहो

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गतश्रियामिति पाठः । स्वगृहस्य परित्राणे भग्नोत्साहोर्जितश्रियामिति पाठे-उत्साहश्च ऊर्जितश्रीश्च उत्साहोर्जितश्रियौ भग्ने उत्साहोर्जितश्रियौ येषामिति विग्रहः । स्वगृहस्य परित्राणे भग्नोत्साहानां श्रीमतां राक्षसानामिति वाऽर्थः । हा इति "निपात एकाजनाङ्" इति प्रकृतिभावः ॥ २५ ॥ क्रन्दन्त्य इति । काश्चित् स्त्रियः हर्म्येभ्यः पेतुरिति सम्बन्धः । सुकेशवंश्यानां जननमात्रे रुद्रेण मातृतुल्यत्ववरप्रदानेपि तदितरेषु तदभावात् स्तनन्धय

क्रन्दन्त्यः सहसा पेतुः स्तनन्धयधराः स्त्रियः । काश्चिदग्निपरीतेभ्यो हर्म्येभ्यो मुक्तमूर्धजाः ॥ २६ ॥ पतन्त्यो रेजिरेऽभ्रेभ्यः सौदामिन्य इवाम्बरात् ॥ २७ ॥ वज्रविद्रुमवैदूर्यमुक्ताजनसंहितान् । विचित्रान् भवनान् धातून् स्यन्दमानान् ददर्श सः ॥२८॥ नाग्निस्तृप्यति काष्ठानां तृणानां हरियूथपः । नाग्नेर्नापि विशस्तानां राक्षसानां वसुन्धरा ॥ २९ ॥ क्वचित् किंशुकसङ्काशाः क्वचिच्छाल्मलिसन्निभाः । क्वचित् कुङ्कुमसङ्काशाः शिखा वह्नेश्चकाशिरे ॥ ३० ॥ हनूमता वेगवता वानरेण महात्मना । लङ्कापुरं प्रदग्धं तद्रुद्रेण त्रिपुरं यथा ॥ ३१ ॥

धरत्वम् । अन्यजातीयाश्च राक्षसास्तत्र सन्त्येव ॥ २६ ॥ अम्बरात् पतन्त्यः अभ्रेभ्यो मेघेभ्यः पतन्त्यः सौदामिन्यः तडित इव रेजिरे २७ ॥ वज्रेति । भवनानिति पुँल्लिङ्गत्वमार्षम् । धातून् सुवर्णादीन् । "धातुस्तु गैरिके स्वर्णे" इति दर्पः । स्यन्दमानान् स्यन्दतः । अग्नितप्तत्वेन द्रवाभूतस्वर्णादीनित्यर्थः ॥ २८ ॥ नाग्निरिति । काष्ठानां तृणानां चेति सम्बन्धसामान्ये षष्ठी । काष्ठैस्तृणैश्चेत्यर्थः । "पूरणगुण-" इत्यादिना षष्ठी वा । अग्निः काष्ठैः तृणैश्च न तृप्यति । हरियूथपः अग्नेः न तृप्यति अग्निना न तृप्यति, अग्निप्रक्षेपणेन न तृप्यतीत्यर्थः । एवं वसुन्धरा विशस्तानां राक्षसानां विशस्तैः राक्षसैः न तृप्यतीति योज्यम् । अनेन राक्षससञ्चाकीर्णा भूरभूदित्यर्थः ॥२९॥ रामानु०-नाग्निरिति । तृणानां च यथा तथा । हनुमान् राक्षसेन्द्राणां वधे किंचिन्न तृप्यति । न हनूमद्विशस्तानां राक्षसानां वसुन्धरा ॥ इति पाठः ॥२९॥ शिखाः ज्वालाः ॥ ३० ॥ ननु एतावत्पर्यन्तमल्पबलतया स्थितस्य हनुमतः कथमेतादृशी शक्तिरित्यत्राह रुद्रेण त्रिपुरं यथेति । " विष्णुरात्मा भगवतो भवस्यामिततेजसः । तस्माद्धनुर्ज्यासंस्पर्शं स विषेहे महेश्वरे ॥ " इत्युक्तरीत्या विष्ण्वाप्यायिततेजसा

जितश्रियां भग्नोत्साहाश्चोर्जितश्रियश्चेति विशेषणसमासः । स्तनन्धयः शिशुः ॥ २५ ॥ २६ ॥ अभ्रेभ्यो मेघेभ्यः ॥ २७ ॥ २८ ॥ नाग्निरिति । तृणानां काष्ठानां स०-यथा अग्निर्न तृप्यति तथा हनुमान् राक्षसानां वहिना वधे सति किञ्चिन्न तृप्यति स्वल्पं वा न तृप्यति । यद्वा एवं बहुवधे सत्यपि किञ्चिदिदमिति न तृप्यति ॥ २९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रुद्रेण त्रिपुरं यथा दग्धं तथाऽनेनेति भावः ॥ ३१ ॥ लङ्कापुरपर्वताग्रे लङ्कापुराधारत्रिकूटशिखरे । तद्वर्तित्वात्तस्यास्तथा निर्देशः । पर्वताग्रस्थलङ्कापुर इति परनिपातो वा । चूडावलयं ज्वालाजालमित्यर्थः । तत् प्रसार्य विस्तार्य । प्रदीप्तः विसृष्टः, गृहेष्विति शेषः ॥ ३२ ॥ दिविस्पृक् अभ्रंलिहः

ततस्तु लङ्कापुरपर्वताग्रे समुत्थितो भीमपराक्रमोऽग्निः । प्रसार्य चूडावलयं प्रदीप्तो हनूमता वेगवता विसृष्टः ॥ ३२ ॥ युगान्तकालानलतुल्यवेगः समारुतोऽग्निर्ववृधे दिविस्पृक् । विधूमरश्मिर्भवनेषु सक्तो रक्षश्शरीराज्य समर्पितार्चिः ॥ ३३ ॥ ❋ आदित्यकोटीसदृशः सुतेजा लङ्कां समाप्तां परिवार्य तिष्ठन् । शब्दैरनेकैरशनिप्ररूढै र्भिन्दन्निवाण्डं प्रबभौ महाग्निः॥३४॥ तत्राम्बरादग्निरतिप्रवृद्धो रूक्षप्रभः किंशुकपुष्पचूडः । निर्वाणधूमाकुलराजयश्च नीलोत्पलाभाः प्रचकाशिरेऽभ्राः ॥ ३५ ॥

" हृदद्युभ्यां ङेरलुग्वक्तव्यः " इति सप्तम्या अलुक् । रक्षश्शरीराज्यसमर्पितार्चिः रक्षश्शरीराण्येवाज्यानि तैस्समर्पितार्चिः उत्थापितज्वालः ॥ ३३ ॥ आदित्यकोटीति । समाप्तां निःशेषाम् । अशनिप्ररूढैः अशनिवन्निष्ठुरैः । अण्डं ब्रह्माण्डम् ॥ ३४ ॥ अम्बरात् अम्बरपर्यन्तम् । किंशुकपुष्पचूडः

तृणैः काष्ठैरित्यर्थः ॥ २९–३१ ॥ लङ्कापुरपर्वताग्रे लङ्कापुराधारत्रिकूटशिखरे । चूडावलयं ज्वालासमूहं प्रसार्य समुत्थितोऽग्निः विसृष्टः, गृहेष्विति शेषः । भीमपराक्रमः भयङ्करवेगः ॥ ३२ ॥ दिविस्पृक् अभ्रंलिह इत्यर्थः । रक्षश्शरीराज्यसमर्पितार्चिः रक्षश्शरीराण्येवाज्यानि तैः समर्पितार्चिः उत्थापितज्वालः ॥ ३३ ॥ आदित्येति श्लोकद्वयमेकं वाक्यम् । अम्बरात् अम्बरपर्यन्तं प्रवृद्धः । किंशुकपुष्पचूडः तत्सदृज्वालः । अग्निः हनुमद्विसृष्टोऽग्निः । अशनिप्ररूढैः अशनिवन्निष्ठुरैरनेकैः शब्दैः समाप्तां निश्शेषां लङ्कां परिवार्य परिवेष्ट्य तिष्ठन् ब्रह्माण्डं भिन्दन् महाग्निः प्रलयोऽग्निरिव प्रबभौ ॥ ३४ ॥ तत्र तदा निर्वाणधूमाकुलराजयः पूर्व

[❋ स तामत्यर्थतां वह्निर्लङ्कां राक्षससंकुलाम् । ज्वालामालापरिक्षेपैरदहन्मारुतात्मजः ॥ १ ॥ तेन शब्देन वित्रस्ता धर्षितास्तेन चाग्निना । अभिपेतुस्तदा घोरा हनूमन्तं निशाचराः ॥ २ ॥ तं प्रदीप्तश्च शूलाग्रैः प्रासैः खड्गैः परश्वधैः । हनूमन्तं महावेगैरक्षिपन्नैर्ऋतर्षभाः ॥ ३ ॥ ते राक्षसा भीमबला नानाप्रहरणान्विताः । निहत्य च स तांस्तत्र दिवमेवोत्पपात ह ॥ ४ ॥ स च विक्रम्य सहसा संक्रामंश्च गृहाद् गृहम् । लङ्कामादीपयामास वायुपुत्रः प्रतापवान् ॥ ५॥ सलाङ्गूलोपसक्ताग्निर्मुक्तो मृत्युगृहादिव । लङ्कां पर्यदहत्कृत्स्नां खे ग्रहः सम्पतन्निव ॥६॥ तोरणेषु गवाक्षेषु रम्येषु शिखरेषु च । तिष्ठन्ति रम प्रपश्यन्ति राक्षसाः पूर्वगोत्तमम् ॥ ७ ॥ हुताशनज्वालसमावृता सा हतप्रवीरा हतसर्वशोभना । हनूमतः क्रोधबलाभिभूता बभूव कालोपहतेव लङ्का ॥ ८ ॥ स सम्भ्रमत्रस्तविशस्तराक्षसां समुज्ज्वलज्ज्वालहुताशनाङ्किताम् । ददर्श लङ्कां हनुमान् महामनाः स्वयम्भुवः कोपहतामिवावनिम् ॥ ९ ॥ गृहाग्रशृङ्गाग्रतले विचित्रे प्रतिष्ठितो वानरराजसिंहः । प्रदीप्तलाङ्गूलकृतार्चिमाली व्यराजतादित्य इवार्चिमाली ॥ १० ॥]

एते श्लोकाः केषुचित्कोशेषु दृश्यन्ते, व्याख्याताश्च महेश्वरतीर्थैः ॥

स तामिति । वह्निः ज्वालामालापरिक्षेपैः ज्वालासमूहानां प्रसारणैः । लङ्काम् अत्यर्थमदहदिति सम्बन्धः । सः हनुमान् ॥ १–४ ॥ **स चेति** । संक्रामन् गच्छन् ॥ ५ ॥ **स** इति । लांगूलोपसक्ताग्निः लांगूलस्थितोऽग्निः । मृत्युगृहान्मुक्त इव, तथा अतिभीकर इत्यर्थः ॥ ६ ॥ ७ ॥ **हुताशनेति** । कालोपहतेव प्रलयकालोपहतेव ॥ ८–१० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तत्तुल्यशिखः । निर्वाणधूमाकुलराजयः पूर्वपूर्वदग्धभवनाग्निनिर्वाणसमयोत्थितधूमैः व्याप्तपक्षयः । अत एव नीलोत्पलाभाः निर्वाणधूमानां नीलवर्णत्वा दिति भावः । अभ्राः मेघाः । पुँल्लिङ्गत्वमार्षम् ॥ ३५ ॥ अथ रक्षोवचनम्–वज्रीत्यादि । महेन्द्रः वज्रीत्यादि विशेषणं सामर्थ्यविशेषद्योतनार्थम् । उत्तर

वज्री महेन्द्रस्त्रिदशेश्वरो वा साक्षाद्यमो वा वरुणोऽनिलो वा । रुद्रोऽग्निरर्को धनदश्च सोमो न वानरोऽयं स्वयमेव कालः ॥३६॥ किं ब्रह्मणः सर्वपितामहस्य सर्वस्य धातुश्चतुराननस्य । इहागतो वा रूपधारी रक्षोपसंहारकरः प्रकोपः ॥३७॥ किं वैष्णवं वा कपिरूपमेत्य रक्षोविनाशाय परं सुतेजः । अनन्तमव्यक्तमचिन्त्यमेकं स्वमायया साम्प्रतमागतं वा ॥ ३८ ॥ इत्येवमूचुर्बहवो विशिष्टा रक्षोगणास्तत्र समेत्य सर्वे । सप्राणिसङ्घां सगृहां सवृक्षां दग्धां पुरीं तां सहसा समीक्ष्य ॥ ३९ ॥ ततस्तु लङ्का सहसा प्रदग्धा सराक्षसा साश्वरथा सनागा । सपक्षिसङ्घा समृगा सवृक्षा रुरोद दीना तुमुलं सशब्दम् ॥ ४० ॥

त्राप्येवमेव गतिः । यमकालयोर्मूर्तिभेदान्न पुनरुक्तिः ॥ ३६ ॥ रक्षोपसंहारकर इत्यत्र आर्षस्सलोपः । प्रकोपः प्रकोपकृतमूर्तिविशेषः ॥ ३७ ॥ किं वैष्णवमिति । अत्राद्यो वाशब्दोऽवधारणे । "वा स्याद्विकल्पोपमयोरेवार्थे च समुच्चये" इति विश्वः । द्वितीयो वितर्के । अनन्तं त्रिविधपरिच्छेदरहितम् । अव्यक्तं चक्षुराद्यगोचरम् । अचिन्त्यं केवलमनसोऽप्यविषयम् । एकम् अद्वितीयं यद्वैष्णवं सुतेजः पूज्यं धाम तदेव स्वमायया स्वासाधारणया आश्चर्यशक्त्या कपिरूपमेत्य साम्प्रतमागतं वा इति योजना । वैष्णवमिति स्वार्थे अण् । विष्णुशरीरान्तर्वर्तीति वाऽर्थः ॥ ३८ ॥ विशिष्टाः ज्ञानाधिकाः ॥३९॥ ४० ॥

दग्धभवनात् निर्वाणसमयोत्थितधूमैर्व्याकुलपक्षयः अभ्राः प्रचकाशिरे इति सम्बन्धः । अभ्रा इति पुँल्लिङ्गत्वमार्षम् ॥३५॥ वज्रीति । वज्रित्वत्रिदशेश्वरत्वविशिष्टो महेन्द्र इत्यर्थः । रुद्रोऽग्निः रुद्रतृतीयनयनसम्बन्ध्यग्निः ॥ ३६ ॥ ३७ ॥ अनन्तं त्रिविधपरिच्छेदरहितम् । अव्यक्तं चक्षुराद्यगोचरम् । अचिन्त्यं मनसोऽविषयम् । एकमद्वितीयम् । वैष्णवं सुतेजः स्वमायया शक्त्या कपिरूपमेत्य रक्षोविनाशायागतं किं वेति योजना ॥३८॥ विशिष्टा महाबलाः प्रहस्तादय इत्यर्थः । समीक्ष्य

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हा तातेति । युगपदेव शोके दूराह्वाने च हाशब्दो वर्तते । हा जीवितमित्यत्र संबुद्धचलोप आर्षः । हतमिति शेष इत्यत्ये । "अभितःपरितस्समयानिक षाहाप्रतियोगेऽपि" इति द्वितीया वा । दरिद्रैरशोच्यत्वाद्विशिनष्टि–भोगयुतं सुपुण्यमिति । सुखाढ्यं सुकृतैकफलं चेत्यर्थः । घोरतरः तीव्रतरः । अत एव सुभीमः भयङ्करः ॥ ४१ ॥ परिवृत्तयोधा परिवृत्तभटा ॥४२॥ हनुमान्महामना इति पाठः । हनुमान् महात्मेति पाठे विषमवृत्तं वा । स्वयंभुकोपो

हा तात हा पुत्रक कान्त मित्र हा जीवितं भोगयुतं सुपुण्यम् । रक्षोभिरेवं बहुधा ब्रुवद्भिः शब्दः कृतो घोरतरः सुभीमः ॥ ४१ ॥ हुताशनज्वालसमावृता सा हतप्रवीरा परिवृत्तयोधा । हनूमतः क्रोधबलाभिभूता बभूव शापोप हतेव लङ्का ॥ ४२ ॥ स सम्भ्रमत्रस्तविषण्णराक्षसां समुज्ज्वलज्ज्वालहुताशनाङ्किताम् । ददर्श लङ्कां हनुमान् महामनाः स्वयम्भुकोपोपहतामिवावनिम् ॥ ४३॥ भङ्क्त्वा वनं पादपरत्नसङ्कुलं हत्वा तु रक्षांसि महान्ति संयुगे । दग्ध्वा पुरीं तां गृहरत्नमालिनीं तस्थौ हनूमान् पवनात्मजः कपिः ॥ ४४ ॥ त्रिकूटशृङ्गाग्रतले विचित्रे प्रतिष्ठितो वानरराजसिंहः । प्रदीप्तलाङ्गूलकृतार्चिमाली व्यराजतादित्य इवांशुमाली ॥ ४५ ॥ स राक्षसांस्तान् सुबहूंश्च हत्वा वनं च भङ्क्त्वा बहुपादपं तत् । विसृज्य रक्षोभवनेषु चाग्निं जगाम रामं मनसा महात्मा ॥ [ततो महात्मा हनुमान् मनस्वी निशाचराणां क्षतकृत् कृतार्थः । रामस्य नाथस्य जगत्त्रयाणां श्रीपादमूलं मनसा जगाम ॥] ॥ ४६ ॥ ततस्तु तं वानरवीरमुख्यं महाबलं मारुततुल्यवेगम् । महामतिं वायुसुतं वरिष्ठं प्रतुष्टुवुर्देवगणाश्च सर्वे ॥ ४७ ॥ भङ्क्त्वा वनं महातेजा हत्वा रक्षांसि संयुगे । दग्ध्वा लङ्कापुरीं रम्यां रराज स महाकपिः ॥ ४८ ॥ तत्र देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः । दृष्ट्वा लङ्कां प्रदग्धां तां विस्मयं परमं गताः ॥ ४९ ॥

पहृतां प्रलये भगवता दग्धामित्यर्थः ॥ ४३ ॥ भङ्क्त्वेति । रत्नशब्दः श्रेष्ठवाची । तस्थौ सङ्कल्पितकार्यस्य परिसमाप्तत्वादुपरतोद्योगोऽभूदित्यर्थः ॥ ४४ ॥ ४५ ॥ जगाम रामं मनसेति । कृतकृत्यत्वाद्रामं गन्तुमियेषेत्यर्थः ॥ ४६ ॥ वरिष्ठमिति, बलवतामिति शेषः ॥ ४७–५० ॥ इत्येवमूचुरित्यन्वयः ॥ ३९ ॥ ४० ॥ सुपुण्यम् अतिशयेनार्जितं पुण्यम् ॥ ४१ ॥ परिवृत्तयोधा परावृत्तभटा ॥ ४२ ॥ ४३॥ तस्थौ सङ्कल्पितकार्यस्य परिसमाप्तत्वा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रामानु०–रराज स महाकपिरित्यतः परमुत्तरसर्गादिभूतो ' लङ्कां समस्तां संदीप्य ' इत्ययं श्लोकः केषुचित्कोशेषु प्रमादाल्लिखितः ॥ ४८ ॥ देवाश्चेति । परामित्यस्य विवरणम् अतुल्यरूपामिति । अस्मिन् सर्गे एकपञ्चाशच्छ्लोकाः । ततो महात्मेति श्लोकः स राक्षसानिति श्लोकोक्तार्थकतया बहुकोशेष्वदर्शनाच्च प्रक्षिप्तः ।

तं दृष्ट्वा वानरश्रेष्ठं हनुमन्तं महाकपिम् । कालाग्निरिति सञ्चिन्त्य सर्वभूतानि तत्रसुः ॥ ५० ॥ देवाश्च सर्वे मुनिपुङ्गवाश्च गन्धर्वविद्याधरनागयक्षाः । भूतानि सर्वाणि महान्ति तत्र जग्मुः परां प्रीतिमतुल्यरूपाम् ॥ ५१ ॥
इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

लङ्कां समस्तां सन्दीप्य लाङ्गूलाग्निं महाबलः । निर्वापयामास तदा समुद्रे हरिसत्तमः ॥ १ ॥ सन्दीप्यमानां विध्वस्तां त्रस्तरक्षोगणां पुरीम् । अवेक्ष्य हनुमान् लङ्कां चिन्तयामास वानरः ॥ २ ॥ तस्याभूत् सुमहांस्त्रासः कुत्सा चात्मन्य जायत । लङ्कां प्रदहता कर्म किंस्वित् कृतमिदं मया ॥ ३ ॥ धन्यास्ते पुरुषश्रेष्ठा ये बुद्ध्या कोपमुत्थितम् । निरुन्धन्ति महात्मानो दीप्तमग्निमिवाम्भसा ॥ ४ ॥ क्रुद्धः पापं न कुर्यात् कः क्रुद्धो हन्याद् गुरूनपि । क्रुद्धः परुषया वाचा नरः साधूनधिक्षिपेत् ॥ ५ ॥ वाच्यावाच्यं प्रकुपितो न विजानाति कर्हिचित् । नाकार्यमस्ति क्रुद्धस्य नावाच्यं विद्यते क्वचित् ॥ ६ ॥ यः समुत्पतितं क्रोधं क्षमयैव निरस्यति । यथोरगस्त्वचं जीर्णां स वै पुरुष उच्यते ॥ ७ ॥

बहुकोशेष्वेतत्सर्गसमाप्तिविपर्ययः उत्तरसर्गारम्भविपर्ययश्च दृश्यते ॥ ५१ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामा० शृङ्गारतिलकाख्याने सुन्दरकाण्ड व्याख्याने चतुष्पञ्चाशः सर्गः ॥ ५४ ॥ लङ्कामित्यादि । लाङ्गूलाग्निं समुद्रे निर्वापयामासेत्यन्वयः ॥ १ ॥ २ ॥ तस्येति । कुत्सा निन्दा ॥ ३–८ ॥ दुष्परतोद्योगोऽभूदित्यर्थः॥ ४४–५१॥ लङ्कामिति । निर्वापयामास लांगूलाग्निं शमयामास ॥ ५२ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां चतुष्पञ्चाशः सर्गः ॥ ५४ ॥ १ ॥ २ ॥ ' कुत्सा चात्मन्यजायत ' इत्युक्तां कुत्सामाह–लङ्कामिति । किंस्वित् कर्म कृतं कुत्सितमेव कृतमित्यर्थः ॥ ३ ॥ उक्तकुत्सितकार्यमूलं कोप इति निश्चित्य तद्रहितान् स्तौति–धन्या इति । दुःखातिशयादेव महात्मपदप्रयोगस्तदुक्तयं न दोषाय ॥ ४ ॥ क्रुद्धः पापं न कुर्याद्यः इति पाठे–क्रुद्धो यः कश्चित्पापं कुर्यान्न, तत्र काकुः । अपितु कुर्यादेव, अकरणमशक्यमेवेत्यर्थः । तदेव दर्शयति क्रुद्धो हन्यादिति ॥ ५ ॥ न विजानाती

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यदीति । जानक्यपि यदि दग्धेत्यन्वयः ॥९॥१०॥ ईषत्कार्यमिति । इदं कार्यम् अन्वेषणपूर्वकरावणनिलयपरिज्ञानसीतादर्शनतन्निवेदनरूपं महत्कार्यम् ईषत्कार्यम् ईषदवशिष्टकार्यम असमग्रप्रायमेव कृतमासीत् । रामनिवेदनमात्रावशेषं कृतमासीदित्यर्थः । किन्तु इदानीं क्रोधाभिभूतेन क्रोधान्धेन मया तस्य

धिगस्तु मां सुदुर्बुद्धिं निर्लज्जं पापकृत्तमम् । अचिन्तयित्वा तां सीतामग्निदं स्वामिघातकम् ॥ ८ ॥ यदि दग्धा त्वियं लङ्का नूनमार्यापि जानकी । दग्धा तेन मया भर्तुर्हतं कार्यमजानता ॥ ९ ॥ यदर्थमयमारम्भस्तत्कार्य मवसादितम् । मया हि दहता लङ्कां न सीता परिरक्षिता ॥ १० ॥ ईषत्कार्यमिदं कार्यं कृतमासीन्न संशयः । तस्य क्रोधाभिभूतेन मया मूलक्षयः कृतः ॥ ११ ॥ विनष्टा जानकी नूनं न ह्यदग्धः प्रदृश्यते । लङ्कायां कश्चि दुद्देशः सर्वा भस्मीकृता पुरी ॥ १२ ॥ यदि तद्विहतं कार्यं मम प्रज्ञाविपर्ययात् । इहैव प्राणसंन्यासो ममापि ह्यद्य रोचते ॥ १३ ॥ किमग्नौ निपताम्यद्य आहोस्विद्वडवामुखे । शरीरमाहो मत्त्वानां दद्मि सागरवासिनाम् ॥ १४ ॥ कथं हि जीवता शक्यो मया द्रष्टुं हरीश्वरः । तौ वा पुरुषशार्दूलौ कार्यसर्वस्वघातिना ॥ १५ ॥ मया खलु तदे वेदं रोषदोषात् प्रदर्शितम् । प्रथितं त्रिषु लोकेषु कपित्वमनवस्थितम् ॥ १६ ॥ धिगस्तु राजसं भावमनीशमनव स्थितम् । ईश्वरेणापि यद्रागान्मया सीता न रक्षिता ॥ १७ ॥

कार्यस्य मूलक्षयः कृतः न संशयः, विफलीकृतमित्यर्थः ॥११॥ सीतानाशे तत्तथैव, स एव तु कुत इत्यत्राह–विनष्टेति ॥१२॥ यदीति । विहतं यदि सीता नाशाद्विनष्टं यदि । प्राणसंन्यासः प्राणत्यागः ॥१३–१५॥ मयेति । कपित्वं कापेयम् । अनवस्थितं चापलात्मकमित्यर्थः ॥१६॥ धिगस्त्विति । राजसं भावं

त्येतदेव स्पष्टयति नाकार्यमिति । क्रुद्धस्याकार्यमयुक्तबुद्धया करणीयं न किञ्चिदप्यस्ति, अतो गुरुहननाद्यपि करोत्येवेत्यर्थः ॥ ६–८ ॥ यदीति । यदि जानकी दग्धा भर्तुः कार्यं हतमिति सम्बन्धः ॥ ९ ॥ एतदेव विवृणोति–यदर्थमिति ॥ १० ॥ ईषदिति । अन्वेषणपूर्वकरावणनिलयपरिज्ञानसीतादर्शनतन्निवेदनरूपं महत् कार्यम् ईषत्कार्यं कृतमासीत्, रामनिवेदनमात्रावशिष्टं यथा भवति तथा कृतमासीदित्यर्थः। अतः इदानीं क्रोधाभिभूतेन मया तस्य कार्यस्य मूलक्षयः कृतः न संशय इति योजना ॥ ११ ॥ ननु सीताविनाशनिश्चयस्ते कथम् ? तत्राह-विनष्टेति ॥ १२ ॥ १३ ॥ दद्मि ददामि ॥१४॥१५॥ अनवस्थितम् अव्यवस्थितम् ॥१६॥ राजसं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रजोगुणनिबन्धनचेष्टाविशेषम् । अनीशं नियामकरहितम् । स्वतन्त्रमिति यावत् । अवश्यितं कुर्वत्स्वभावम् । ईश्वरेणापि रक्षणसमर्थेनापि । रागात् मात्सर्यात् । "रागोऽनुरागे मात्सर्ये रक्तवर्णे कुसुम्भके" इति यादवः । यद्वा रागात् रजोगुणात् । आग्रहादिति यावत् ॥ १७–२१ ॥ इतीति । निमित्ता

विनष्टायां तु सीतायां तावुभौ विनशिष्यतः । तयोर्विनाशे सुग्रीवः सबन्धुर्विनशिष्यति ॥१८॥ एतदेव वचः श्रुत्वा भरतो भ्रातृवत्सलः । धर्मात्मा सहशत्रुघ्नः कथं शक्ष्यति जीवितुम् ॥१९॥ इक्ष्वाकुवंशे धर्मिष्ठे गते नाशमसंशयम् । भविष्यन्ति प्रजाः सर्वाः शोकसन्तापपीडिताः ॥२०॥ तदहं भाग्यरहितो लुप्तधर्मार्थसंग्रहः । रोषदोषपरीतात्मा व्यक्तं लोकविनाशनः ॥२१॥ इति चिन्तयस्तस्य निमित्तान्युपपेदिरे । पूर्वमप्युपलब्धानि साक्षात्पुनरचिन्तयत् ॥ २२ ॥ अथवा चारुसर्वाङ्गी रक्षिता स्वेन तेजसा । न नशिष्यति कल्याणी नाग्निरग्नौ प्रवर्तते ॥२३॥ न हि धर्मात्मनस्तस्य भार्यामामिततेजसः । स्वचारित्राभिगुप्तां तां स्प्रष्टुमर्हति पावकः॥२४॥ नूनं रामप्रभावेन वैदेह्याः सुकृतेन च । यन्मां दहनकर्माऽयं नादहद्द्रव्यवाहनः ॥२५॥ त्रयाणां भरतादीनां भ्रातॄणां देवता च या । रामस्य च मनःकान्ता सा कथं विनशिष्यति ॥२६॥ यद्वा दहनकर्माऽयं सर्वत्र प्रभुरव्ययः । न मे दहति लाङ्गूलं कथमार्यां प्रधक्ष्यति ॥२७॥

न्युपपेदिरे शुभशंसिनिमित्तानि प्रादुर्बभूवुरित्यर्थः ॥ २२ ॥ एवं लोकदृष्ट्या अनर्थमाशङ्क्य तत्त्वदृष्ट्या समाधत्ते–अथवेत्यादिना । नाग्निरग्नौ प्रवर्तते अग्निरग्निं न दहतीत्यर्थः ॥ २३ ॥ २४ ॥ दहनकर्मा भस्मीकरणस्वभावः । यत्प्रभावादयं मां नादहत् स तामेव कथं दहतीत्यर्थः ॥ २५–३२ ॥

भावं रजोगुणनिबन्धनचेष्टाविशेषम् । अनीशं नियामकरहितम्, स्वतन्त्रमिति यावत् । ईश्वरेणापि रक्षणसमर्थेनापि । रागात् मात्सर्यात्, आग्रहादिति यावत् ॥१७॥ उभौ रामलक्ष्मणौ ॥ १८–२१ ॥ इतीति । निमित्तानि शुभशंसीनि । उपपेदिरे प्रादुर्बभूवुः ॥ २२ ॥ नाग्निरग्नौ प्रवर्तते अग्निरग्निं न दहतीत्यर्थः ॥ २३ ॥ २४ ॥ नूनमिति । दहनकर्मा भस्मीकरणस्वभावः । अयं हव्यवाहनः । मां तत्किङ्करं मां यत यतो नादहत् अतस्तां स्प्रष्टुं नार्हतीति पूर्वेण सम्बन्धः ॥ २५ ॥ त्रयाणां भरतलक्ष्मणशत्रुघ्नानां देवतात्वात्तस्यामग्न्यमवृत्ती रामभयाच्चेति भावः ॥ २६ ॥ सर्वत्र प्रभुरपि यत्सेवकत्वान्मे लांगूलं न दहति ततस्तां कथं प्रधक्ष्यति ? ॥ २७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विस्मयोऽद्भुत एव न इति। अयं विस्मयः अद्भुत एव। 'अद्भुतमाश्चर्ये कल्याणं च' इत्युणादिवृत्तिः। यद्वा विस्मयः आश्चर्यम्। अद्भुतः अभूतपूर्व इत्यर्थः। अद्भुतः अद्भुतरसः। तस्य स्थायीभावो विस्मयः। तथा च अद्भुत एव अद्भुतरसतां प्राप्त एव महानयं विस्मयः, न विस्मयमात्र इत्यर्थः ॥ ३३ ॥

पुनश्चाचिन्तयत्तत्र हनुमान् विस्मितस्तदा। हिरण्यनाभस्य गिरेर्जलमध्ये प्रदर्शनम् ॥ २८ ॥ तपसा सत्यवाक्येन अनन्यत्वाच्च भर्तरि। अपि सा निर्दहेदग्निं न तामग्निः प्रधक्ष्यति ॥ २९ ॥ स तथा चिन्तयंस्तत्र देव्या धर्मपरिग्रहम्। शुश्राव हनुमान् वाक्यं चारणानां महात्मनाम् ॥ ३० ॥ अहो खलु कृतं कर्म दुष्करं हि हनूमता। अग्निं विसृजता ऽभीक्ष्णं भीमं राक्षसवेश्मनि॥ ३१ ॥ प्रपलायितरक्षःस्त्रीबालवृद्धसमाकुला। जनकोलाहलाध्माता क्रन्दन्तीवाद्रिकन्दरे ॥ ३२ ॥ दग्धेयं नगरी सर्वा साट्टप्राकारतोरणा। जानकी न च दग्धेति विस्मयोऽद्भुत एव नः ॥ ३३ ॥ स निमित्तैश्च दृष्टार्थैः कारणैश्च महागुणैः। ऋषिवाक्यैश्च हनुमानभवत् प्रीतमानसः ॥ ३४ ॥ ततः कपिः प्राप्त मनोरथार्थस्तामक्षतां राजसुतां विदित्वा। प्रत्यक्षतस्तां पुनरेव दृष्ट्वा प्रतिप्रयाणाय मतिं चकार ॥ ३५ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

निमित्तैः दक्षिणाक्षिस्पन्दादिभिः। दृष्टार्थैः दृष्टफलसंवादैः। कारणैः सीतापातिव्रत्यरामप्रभावादिभिः। ऋषिवाक्यैः चारणवाक्यैः ॥ ३४ ॥ पूर्वं देवीप्रभावात्सिन्धौ मद्विश्रान्तिनिमित्तगिरिदर्शनहेतुनापि देवीमग्निर्न दहतीत्याह–पुनश्चेति। तत्र तस्मिन् समये। विस्मितो हनुमान् जलमध्ये सागरान्तर्देशे। हिरण्यनाभस्य गिरेः प्रदर्शनं पुनरचिन्तयत्। एतेन पर्वतादीनामपि सर्वेषां रामाज्ञावशवर्तित्वं सूचितम्। तेन सीताया नाग्नेर्भीतिरिति सूचितम् ॥ २८ ॥ २९ ॥ देव्या धर्मपरिग्रहम्, धर्मप्रभावमित्यर्थः। चिन्तयन् हनुमान चारणानां वाक्यं शुश्रावेति सम्बन्धः ॥ ३०–३२ ॥ विस्मयः आश्चर्यम्। अद्भुतः अभूतपूर्व इत्यर्थः ॥ ३३ ॥ निमित्तैः दक्षिणाक्षिस्पन्दनादिभिः। कारणैः सीतापातिव्रत्यरामप्रभावादिभिः। ऋषिवाक्यैः चारणवाक्यैरित्यर्थः। दृष्टार्थैः दृष्टफलसंवादैः ॥ ३४ ॥ विदित्वा

स०—सः हनुमान्। **धर्मपरिग्रहं** धारकत्वाद्धर्मो भगवान् रामः, तत्परिग्रहं भार्याम्। चिन्तयन् देव्या विषये चारणानां शुश्राव, वच इति शेषः। धर्मपरिग्रहं रक्षकधर्मसम्पत्तिं वा ॥ ३० ॥
प्राप्तमनोरथार्थः प्राप्तसीतादर्शनरूपमनोरथफलः ॥ ३५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चारणवाक्यैर्विदित्वा पुनः प्रत्यक्षं दृष्ट्वा ततः प्रतिप्रयाणाय मतिं चकार, प्रतियास्यामीति सङ्कल्पितवानित्यर्थः ॥ ३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारातिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

ततस्तु शिंशुपामूले जानकीं पर्यवस्थिताम् । अभिवाद्याब्रवीद्दिष्ट्या पश्यामि त्वामिहाक्षताम् ॥ १ ॥ ततस्तं प्रस्थितं सीता वीक्षमाणा पुनः पुनः । भर्तृस्नेहान्वितं वाक्यं हनुमन्तमभाषत ॥ २ ॥ काममस्य त्वमेवैकः कार्यस्य परिसाधने । पर्याप्तः परवीरघ्न यशस्यस्ते बलोदयः ॥ ३ ॥ शरैस्तु सङ्कुलां कृत्वा लङ्कां परबलार्दनः । मां नयेद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत् ॥ ४ ॥ तद्यथा तस्य विक्रान्तमनुरूपं महात्मनः । भवत्याहवशूरस्य तथा त्वमुपपादय ॥ ५ ॥ तदर्थोपहितं वाक्यं प्रश्रितं हेतुसंहितम् । निशम्य हनुमांस्तस्या वाक्यमुत्तरमब्रवीत् ॥ ६ ॥ क्षिप्रमेष्यति काकुत्स्थो हर्यृक्षप्रवरैर्वृतः । यस्ते युधि विजित्यारीन् शोकं व्यपनयिष्यति ॥ ७ ॥ एव माश्वास्य वैदेहीं हनुमान् मारुतात्मजः । गमनाय मतिं कृत्वा वैदेहीमभ्यवादयत् ॥ ८ ॥

॥ १ ॥ प्रस्थितं प्रस्थानोद्युक्तम् ॥ २ ॥ वनभङ्गाक्षवधादिना हनुमतश्शक्तिं विज्ञाय असौ रामाय निवेद्य स्वयमेव सकलराक्षससंहारपूर्वकं मम नेता मा भूदित्याभिप्रायेणाह–काममिति । अस्य कार्यस्य सर्वराक्षसवधपूर्वकमत्प्रापणरूपकार्यस्य । बलोदयः सत्त्वप्रकर्षः, सैन्योत्थापनं वा । ते यशस्यः यशस्करः । न तु रामस्येति भावः ॥३॥ तर्हि रामस्य किं यशस्करमित्यत्राह–शरैरिति । तत् स्वपराक्रमेण मन्नयनम् । तस्य काकुत्स्थस्य । सदृशम् । एतदेव ममाभिलषितम्, अन्यथा मे कथं वीरपत्नीत्वमिति भावः ॥ ४ ॥ तच्च त्वदायत्तमेवेत्याह–तद्यथेति । विक्रान्तं विक्रमणम्॥५–८॥

पूर्वं चारणैर्विदित्वा पुनः प्रत्यक्षतो दृष्ट्वा ततः प्रतिप्रयाणाय मतिं चकारेति सम्बन्धः ॥ ३५ ॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्ड व्याख्यायां पञ्चपञ्चाशः सर्गः ॥ ५५ ॥ १ ॥ २ ॥ काममिति । अस्य कार्यस्य सर्वराक्षससंहारपूर्वकमत्प्रापणरूपकार्यस्य परिसाधने त्वमेक एव कामं पर्याप्तः, तथापि बलोदयः ते तवैव । यशस्यः यशस्करः, न तु रामस्येति शेषः ॥३॥ तर्हि रामस्य किं यशस्करमित्यत्राह–शरैरिति ॥४॥ तदिति । विक्रान्तं विक्रमणम् ॥५–८॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अरिष्टम् अरिष्टाख्यम् ॥ ९ ॥ अथैनं गिरिं चतुर्दशधोत्प्रेक्षते—तुङ्गेत्यादिना । पद्मकाः पद्मवर्णवृक्षाः । परिधानालेख्यस्थानीयतया विशेषणमिति बोध्यम् । सपरिधानमिव, स्थितमिति शेषः । उत्तरार्धे सोत्तरीयत्वोत्प्रेक्षणात् ॥१०॥ शुभैः तरुणैः । करैः अंशुभिः हस्तैश्च । बोध्यमानमिव स्थितम् । तत्र ज्ञापकमाह उद्भूतैरिति । उद्भूतैः उद्गतैः लोचनैरिव स्थितैः धातुभिः उन्मिषन्तं पश्यन्तमिव स्थितम् ॥ ११ ॥ तोयौघनिस्वनैः गिरिनदी घोषैः । मन्द्रैः गम्भीरैः । प्राधीतमिव प्राध्येतुं प्रवृत्तमिव । आदिकर्मणि कर्तरि क्तः । अधीयानमिवेत्यर्थः । प्रस्रवणस्वनैः पर्वतमूलाद्बहिः प्रवहन्ति

ततः स कपिशार्दूलः स्वामिसन्दर्शनोत्सुकः । आरुरोह गिरिश्रेष्ठमरिष्टमरिमर्दनः ॥९॥ तुङ्गपद्मकजुष्टाभिर्नीलाभिर्वनराजिभिः । सोत्तरीयमिवाम्भोदैः शृङ्गान्तरविलम्बिभिः ॥ १० ॥ बोध्यमानमिव प्रीत्या दिवाकरकरैः शुभैः । उन्मिषन्तमिवोद्भूतैर्लोचनैरिव धातुभिः ॥ ११ ॥ तोयौघनिस्वनैर्मन्द्रैः प्राधीतमिव पर्वतम् । प्रगीतमिव विस्पष्टैर्नानाप्रस्रवणस्वनैः ॥१२॥ देवदारुभिरत्युच्चैरूर्ध्वबाहुमिव स्थितम् । प्रपातजलनिर्घोषैः प्राक्रुष्टमिव सर्वतः ॥१३॥ वेपमानमिव श्यामैः कम्पमानैः शरदघनैः । वेणुभिर्मारुतोद्धूतैः कूजन्तमिव कीचकैः ॥ १४ ॥

जलानि प्रस्रवणानि तेषां स्वनैः । प्रगीतमिव गातुं प्रवृत्तमिव, गायन्तमिवेत्यर्थः । आदिकर्मणि कर्तरि क्तः ॥ १२ ॥ ऊर्ध्वबाहुमिवेति तपोविशेष उच्यते । प्रपातजलनिर्घोषैः प्रपाताः भृगवः । "प्रपातस्त्ववटो भृगुः" इत्यमरः । तेषां जलानि तेभ्यः पतन्तो निर्झरा इत्यर्थः । तेषां निर्घोषैः प्राक्रुष्टमिव आक्रोशन्तमिव । पूर्ववत् क्तः ॥१३॥ शरदि ये घना भवन्ति ते शरद्घनाः । शरत्कालपुष्पिणस्सप्तच्छदादयः तैः शुभ्रीभूतैः जरया कम्पमानामिव स्थितमित्यर्थः । शरद्घनैरिति पाठे बहुवार्षिकवृक्षैरित्यर्थः । शरवणैरिति वाऽर्थः । तकारान्तोऽप्यस्ति । शरवणे जातस्य कृपाचार्यस्य शारद्वत इति नाम

अरिष्टम् अरिष्टाख्यं पर्वतम् ॥ ९ ॥ पद्मकः वृक्षविशेषः । सोत्तरीयमिव सपरिधानमिव ॥ १० ॥ उद्भूतैः उद्गतैः ॥ ११ ॥ प्राधीतमिव अध्येतुमुपक्रान्तमिव । कर्तरि क्तः । प्रगीतं गातुमुपक्रान्तम्, गायन्तमिवेत्यर्थः । प्रस्रवणस्वनैः पर्वतमूलाद्बहिः प्रवहन्ति जलानि प्रस्रवणानि तेषां स्वनैः ॥ १२ ॥ प्रपातजलनिर्घोषैः प्रपाताः भृगवः तेषां जलानि भृगुदेशेभ्यः पतन्तो निर्झरा इत्यर्थः । तेषां निर्घोषैः उत्क्रुष्टं क्रोशन्तमिवेत्यर्थः । कर्तरि क्तः ॥ १३ ॥ शरदि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दर्शनात्। कीचकैः कीचकाख्यैर्वेणुभिः। तदाहामरः-"वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः" इति ॥ १४ ॥ आशीविषोत्तमैः निश्वसन्तमिव सर्पश्रेष्ठनिश्वासैर्निश्वसन्तमिव। अमर्षात् हनुमति क्रोधादित्यर्थः। नीहारकृतगम्भीरैः नीहारपूर्णैः गम्भीरैश्च। गह्वरैः गुहाभिः ध्याननिरुद्धेन्द्रिय

निःश्वसन्तमिवामर्षाद्घोरैराशीविषोत्तमैः। नीहारकृतगम्भीरैर्ध्यायन्तमिव गह्वरैः ॥ १५ ॥ मेघपादनिभैः पादैः प्रक्रान्तमिव सर्वतः। जृम्भमाणमिवाकाशे शिखरैरभ्रमालिभिः ॥ १६ ॥ कूटैश्च बहुधाकीर्णैः शोभितं बहुकन्दरैः। सालतालाश्वकर्णैश्च वंशैश्च बहुभिर्वृतम् ॥ १७ ॥ लताविताने र्विततैः पुष्पवद्भिरलंकृतम्। नानामृगगणाकीर्णं धातु निष्यन्दभूषितम्। बहुप्रस्रवणोपेतं शिलासञ्चयसङ्कटम् ॥ १८ ॥ महर्षियक्षगन्धर्वकिन्नरोरगसेवितम्। लतापादप सञ्जातं सिंहाध्युषितकन्दरम् ॥ १९ ॥ व्याघ्रसङ्घसमाकीर्णं स्वादुमूलफलद्रुमम् ॥ २० ॥ तमारुरोह हनुमान् पर्वतं पवनात्मजः। रामदर्शनशीघ्रेण प्रहर्षेणाभिचोदितः ॥ २१ ॥ तेन पादतलाक्रान्ता रम्येषु गिरिसानुषु। सघोषाः समशीर्यन्त शिलाश्चूर्णीकृतास्ततः ॥ २२ ॥

स्थानीयैः ध्यायन्तमिव स्थितम्। निरुद्धेन्द्रियद्वारा ध्यानारूढमिव स्थितमित्यर्थः ॥१५॥ मेघपादनिभैः मेघावरोहनिभैः पादैः प्रत्यन्तपर्वतैः। प्रक्रान्तमिव गन्तुमुद्युक्तमिव। पूर्ववत् ऋः। जृम्भमाणमिव गात्रभङ्गं कुर्वाणमिव। अभ्रमालिभिः मेघमालावद्भिः ॥ १६ ॥ बहुधाकीर्णैः हनुमत्पादस्पर्शेन शिथिलैरित्यर्थः। धातुनिष्यन्दः धातुस्रावः। लतापादपानां सञ्जातो यस्मिन्निति व्यधिकरणबहुव्रीहिः ॥ १७–२० ॥ रामदर्शनशीघ्रेण रामदर्शनत्वरावता ॥ २१ ॥ चूर्णीकृताः समशीर्यन्त, यथा चूर्णीकृता भवन्ति तथा समशीर्यन्तेत्यर्थः ॥ २२ ॥

वनैः शरद्वनैः सप्तपर्णादिशारदवृक्षसङ्घैरित्यर्थः ॥ १४ ॥ नीहारकृतानि कृतनीहाराणि, नीहाररुद्धानीत्यर्थः। तैर्गम्भीरैश्च गह्वरैर्ध्यायन्तमिव निरुद्धेन्द्रिय द्वारा ध्यानारूढमिव स्थितमित्यर्थः ॥१५॥ मेघपादनिभैः पादैः मेघपादाः मेघप्ररोहाः तेषां निभैः पादैः प्रत्यन्तपर्वतैः। प्रक्रान्तमिव गच्छन्तमिव। जृम्भमाणमिव गात्रभङ्गं कुर्वाणमिव। अभ्रमालिभिः अभ्रङ्कषैः ॥ १६ ॥ १७ ॥ धातुनिष्यन्दभूषितं धातुनिष्यन्दाः धातुनिर्गमाः। शिलासञ्चयसङ्कटं शिलाबाहुल्यनीरन्ध्रम् ॥ १८–२० ॥ रामदर्शनशीघ्रेण उत्कटेन। दक्षिणादुत्तरं पारं, जिगमिषुरिति शेषः ॥ २१–२८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दक्षिणात् दक्षिणपारात् । प्रार्थयन्, गन्तुमिति शेषः ॥ २३ ॥ २४ ॥ स हरिशार्दूल इति सम्बन्धः । पितृतुल्यवेगवत्त्वं सूचयति–मारुतस्येति ॥ २५ ॥ तैर्भूतैः तत्रत्यजन्तुभिः ॥ २६ ॥ रुग्णाः शीर्णा इति यावत् । शक्रायुधहताः वज्रहताः ॥ २७ ॥ नभो भिन्दन् भिन्दन्निव । महत्तायां

स तमारुह्य शैलेन्द्रं व्यवर्धत महाकपिः । दक्षिणादुत्तरं पारं प्रार्थयन् लवणाम्भसः ॥ २३ ॥ अधिरुह्य ततो वीरः पर्वतं पवनात्मजः । ददर्श सागरं भीमं मीनोरगनिषेवितम् ॥ २४ ॥ स मारुत इवाकाशं मारुतस्यात्मसम्भवः । प्रपेदे हरिशार्दूलो दक्षिणादुत्तरां दिशम् ॥ २५ ॥ स तदा पीडितस्तेन कपिना पर्वतोत्तमः । ररास सह तैर्भूतैः प्रविशन् वसुधातलम् । कम्पमानैश्च शिखरैः पतद्भिरपि च द्रुमैः ॥ २६ ॥ तस्योरुवेगोन्मथिताः पादपाः पुष्प शालिनः । निपेतुर्भूतले रुग्णाः शक्रायुधहता इव ॥ २७ ॥ कन्दरान्तरसंस्थानां पीडितानां महौजसाम् । सिंहानां निनदो भीमो नभो भिन्दन् स शुश्रुवे ॥ २८ ॥ स्रस्तव्याविद्धवसना व्याकुलीकृतभूषणाः । विद्याधर्यः समुत्पेतुः सहसा धरणीधरात् ॥ २९ ॥ अतिप्रमाणा बलिनो दीप्तजिह्वा महाविषाः । निपीडितशिरोग्रीवा व्यवेष्टन्त महा हयः ॥ ३० ॥ किन्नरोरगगन्धर्वयक्षविद्याधरास्तदा । पीडितं तं नगवरं त्यक्त्वा गगनमास्थिताः ॥ ३१ ॥ स च भूमिधरः श्रीमान् बलिना तेन पीडितः । सवृक्षशिखरोदग्रः प्रविवेश रसातलम् ॥ ३२ ॥ दशयोजनविस्तार स्त्रिंशद्योजनमुच्छ्रितः । धरण्यां समतां यातः स बभूव धराधरः ॥ ३३ ॥

तात्पर्यम् ॥ २८ ॥ स्रस्तानि व्याविद्धानि च वसनानि यासां ताः स्रस्तव्याविद्धवसनाः ॥ २९ ॥ निपीडितशिरोग्रीवाः, शिथिलपतितशिलातलैरिति शेषः ॥ ३० ॥ ३१ ॥ सवृक्षशिखरोदग्रः सवृक्षैः शिखरैः उदग्रः श्रेष्ठः ॥ ३२॥ ३३ ॥

स्रस्तव्याविद्धवसना इति पाठः । स्रस्तेन त्रासेन व्याविद्धानि व्यत्यस्तानि वसनानि यासां ताः ॥ २९ ॥ व्यवेष्टन्त कुण्डलीकृतशरीरा अजायन्त । व्यचेष्टन्तेति पाठे–पीडया अलुठन्नित्यर्थः ॥ ३० ॥ ३१ ॥ सवृक्षशिखरोदग्रः सवृक्षैः शिखरैः उदग्रः उन्नतः ॥ ३२ ॥ ३३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कल्लोलास्फालवेलान्तं तरङ्गैरास्फाल्यमानतीरोपान्तम् ॥३४॥ इति श्रीगोविन्द० श्रीरामा० शृङ्गार० सुन्दरकाण्डव्याख्याने षट्पञ्चाशः सर्गः ॥५६॥

'उत्पपात नभो हरिः' इत्युक्तम्। तल्लङ्घनं रूपकेण चतुर्भिर्वर्णयति—सचन्द्रेत्यादिना। कारण्डवः जलकुक्कुटः। कादम्बः कलहंसः। "कादम्बः कल

स लिलङ्घयिषुर्भीमं सलीलं लवणार्णवम्। कल्लोलास्फालवेलान्तमुत्पपात नभो हरिः ॥ ३४ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

[आप्लुत्य च महावेगः पक्षवानिव पर्वतः।] सचन्द्रकुमुदं रम्यं सार्कारण्डवं शुभम्। तिष्यश्रवणकादम्बमभ्र शैवालशाद्वलम् ॥ १ ॥ पुनर्वसुमहामीनं लोहिताङ्गमहाग्रहम्। ऐरावतमहाद्वीपं स्वातीहंसविलोलितम् ॥ २ ॥ वातसङ्घातजातोर्मिचन्द्रांशुशिशिराम्बुमत्। भुजङ्गयक्षगन्धर्वप्रबुद्धकमलोत्पलम् ॥ ३ ॥ हनुमान् मारुतगतिर्महानौरिव सागरम्। अपारमपरिश्रान्तः पुप्लुवे गगनार्णवम् ॥ ४ ॥

हंसः स्यात् " इत्यमरः। अभ्रशैवालशाद्वल मेघस्य शैवालत्वेन पर्वतस्थशाद्वलत्वेन च रूपणम् ॥१॥ लोहिताङ्गः अङ्गारकः स एव महाग्रहः महाग्राहः यस्य तम्। ऐरावतस्याभ्रमातङ्गत्वेनाभ्रगामित्वात्तत्र संभवः। विलोलितम् अवगाढम् ॥ २ ॥ वातसङ्घातजातोर्मय एव चन्द्रांशवः तैः शीतलजलवत्। भुजङ्गादीनां कमलोत्पलत्वेन रूपणं तत्तद्वर्णभेदेन। अत्र गगनस्यार्णवत्वेन चन्द्रादीनां तदवयवकुमुदादित्वेन च रूपणात्सावयवरूपकम्। तस्य नौरिव

कल्लोलास्फालवेलान्तम् आस्फाल्यत इत्यास्फालः कल्लोलानामास्फालो वेलान्तो यस्य तम् ॥ ३४ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां षट्पञ्चाशः सर्गः ॥५६॥ [लङ्घनीयं गगनमर्णवत्वेन निरूपयति—आप्लुत्येत्यादिना।] चन्द्र एव कुमुदम्। कारण्डवः जलपक्षिविशेषः। कादम्बः कलहंसः ॥ १ ॥ लोहिताङ्गः अङ्गारकः। ऐरावतः इन्द्रगजः ॥ २ ॥ चन्द्रांशुशिशिराम्बुमत् चन्द्रांशव एव शिशिराम्बु तदस्यास्तीति तद्वत्। भुजङ्गयक्षगन्धर्वा एव प्रबुद्धकमलोत्पलानि यस्मिन् तत्। अत्र गगनस्यार्णवत्वेन चन्द्रादीनां तदवयवकुमुदादित्वेन च निरूपणात् सावयवरूपकम् ॥ ३ ॥ ४ ॥

स०-गगनार्णवमिति नपुंसकत्वमार्षम्। नपुंसको वाऽर्णवशब्दः। " अस्मदीयं गुणार्णवम् " इत्यनुव्याख्यानसुधायां पूर्वमाचारक्विबन्ततामाश्रित्यानन्तरं पचाद्यचि अर्णवमिति त्रिलिङ्गः साधुरित्युक्तेः। गगनार्णवः प्रसिद्धार्णव इव। न पुनस्स एवेति आचारक्विबन्तत्वादिकमुपपन्नम् ॥ ० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इत्युपमया तिलतण्डुलवत्संसृष्टिः ॥३॥४॥ अथ तदेवोत्प्रेक्षया वर्णयति—ग्रसमान इवेत्यादिना ॥५॥६॥ पाण्डरेति । व्यक्ताव्यक्तवाचित्वेन अरुणशब्दयोः कथंचिदपौनरुक्त्यमुन्नेयम् । यद्वा "अरुणः कृष्णलोहितः" इत्यमरशेषः । महाभ्राणि चकाशिरे, हनुमत्सम्पर्कादित्यर्थः । अन्यथा वाजपेयशरद्वर्णनवत्

ग्रसमान इवाकाशं ताराधिपमिवोल्लिखन् । हरन्निव सनक्षत्रं गगनं सार्कमण्डलम् ॥५॥ मारुतस्यात्मजः श्रीमान् कपिर्व्योमचरो महान् । हनुमान् मेघजालानि विकर्षन्निव गच्छति ॥ ६ ॥ पाण्डरारुणवर्णानि नीलमाञ्जिष्ठकानि च । हरितारुणवर्णानि महाभ्राणि चकाशिरे ॥ ७ ॥ प्रविशन्नभ्रजालानि निष्पतंश्च पुनः पुनः । प्रच्छन्नश्च प्रकाशश्च चन्द्रमा इव लक्ष्यते ॥ ८ ॥ विविधाभ्रघनापन्नगोचरो धवलाम्बरः । दृश्यादृश्यतनुर्वीरस्तदा चन्द्रायतेऽम्बरे ॥ ९ ॥ तार्क्ष्यायमाणो गगने बभासे वायुनन्दनः । दारयन् मेघवृन्दानि निष्पतंश्च पुनः पुनः ॥ १० ॥ नदन्नादेन महता मेघस्वनमहास्वनः । प्रवरान् राक्षसान् हत्वा नाम विश्राव्य चात्मनः ॥ ११ ॥ आकुलां नगरीं कृत्वा व्यथयित्वा च रावणम् । अर्दयित्वा बलं घोरं वैदेहीमभिवाद्य च ॥१२॥ आजगाम महातेजाः पुनर्मध्येन सागरम् ॥१३॥ पर्वतेन्द्रं सुनाभं च समुपस्पृश्य वीर्यवान् । ज्यामुक्त इव नाराचो महावेगोऽभ्युपागतः ॥१४॥ स किंचिदनु संप्राप्तः समालोक्य महागिरिम् । महेन्द्र मेघसङ्काशं ननाद हरिपुङ्गवः ॥ १५ ॥

अभ्रवर्णनस्यासङ्गतत्वापातः । हनुमतस्तेजस्वीत्यनेन मेघानां नानावर्णत्वापत्तिः सूर्येन्दुसम्पर्कवत् ॥७॥८॥ विविधेष्वभ्रघनेषु मेघसङ्घातेषु । आपन्नगोचरः प्राप्तविषयः । लब्धमार्ग इति यावत् । धवलाम्बरः शुक्लवासाः । दृश्यादृश्यतनुः मेघान्तःप्रवेशनिष्क्रमणाभ्यामिति भावः । चन्द्रायते चन्द्र इवाचरति ॥९॥ तार्क्ष्य इवाचरन् तार्क्ष्यायमाणः । उभयत्र " उपमानादाचारे " " कर्तुः क्यङ् स लोपश्च " इति क्यङ् ॥ १०–१३ ॥ सुनाभं मैनाकम् ॥१४॥ किंचि

ताराधिपमुल्लिखन्निव, नखैरिति शेषः । हरन्निव गृह्णन्निव ॥५॥६॥ महाभ्राणीत्यस्य कपिना कृष्यमाणानीति शेषः ॥ ७ ॥ ८ ॥ विविधेति । विविधाभ्रघनापन्नगोचरः विविधेष्वभ्रघनेषु मेघसङ्घातेष्वापन्नः प्राप्तः गोचरो मार्गो येन सः । दृश्यादृश्यतनुः मेघान्तःप्रवेशनिष्क्रमाभ्यामिति भावः ॥ ९–१३ ॥ सुनाभं मैनाकम् ॥१४–१७॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दनुसंप्राप्तः मैनाकात्परं कंचित् प्रदेशं प्राप्तः ॥ १५ ॥ १६ ॥ लालसः साभिलाषः । तं देशं सुहृद्दर्शनसमीपप्रदेशम् ॥ १७ ॥ नानद्यमानस्य पुनः पुनर्भृशं नदत इत्यर्थः । फलतीव दलतीव ॥ १८ ॥ वातनुन्नस्य वातसङ्घट्टितस्य । घोषम् ऊरुवेगमिति, ऊरुवेगजन्यं घोषमित्यर्थः ॥ १९ ॥ २० ॥

स पूरयामास कपिर्दिशो दश समन्ततः । नदन्नादेन महता मेघस्वनमहास्वनः ॥ १६ ॥ स तं देशमनुप्राप्तः सुहृद्दर्शनलालसः । ननाद हरिशार्दूलो लाङ्गूलं चाप्यकम्पयत् ॥ १७ ॥ तस्य नानद्यमानस्य सुपर्णचरिते पथि । फलतीवास्य घोषेण गगनं सार्कमण्डलम् ॥ १८ ॥ ये तु तत्रोत्तरे तीरे समुद्रस्य महाबलाः । पूर्वं संविष्ठिताः शूरा वायुपुत्रदिदृक्षवः ॥ १९ ॥ महतो वायुनुन्नस्य तोयदस्येव गर्जितम् । शुश्रुवुस्ते तदा घोषमूरुवेगं हनूमतः ॥ २० ॥ ते दीनमनसः सर्वे शुश्रुवुः काननौकसः । वानरेन्द्रस्य निर्घोषं पर्जन्यनिनदोपमम् ॥ २१ ॥ निशम्य नदतो नादं वानरास्ते समन्ततः । बभूवुरुत्सुकाः सर्वे सुहृद्दर्शनकाङ्क्षिणः ॥ २२ ॥ जाम्बवान् स हरिश्रेष्ठः प्रीतिसंहृष्टमानसः । उपामन्त्र्य हरीन् सर्वानिदं वचनमब्रवीत् ॥ २३ ॥ सर्वथा कृतकार्योऽसौ हनूमान्नात्र संशयः । न ह्यस्याकृतकार्यस्य नाद एवंविधो भवेत् ॥ २४ ॥ तस्य बाहूरुवेगं च निनादं च महात्मनः । निशम्य हरयो हृष्टाः समुत्पेतुस्ततस्ततः ॥ २५ ॥ ते नगाग्रान्नगाग्राणि शिखराच्छिखराणि च । प्रहृष्टाः समपद्यन्त हनूमन्तं दिदृक्षवः ॥ २६ ॥ ते प्रीताः पादपाग्रेषु गृह्य शाखाः सुविष्ठिताः । वासांसीव प्रशाखाश्च समाविध्यन्त वानराः ॥ २७ ॥

ते दीनमनस इति । अनिष्टश्रवणशङ्क्येति भावः ॥ २१–२४ ॥ तस्येति । निशम्य ज्ञात्वेत्यर्थः । यद्वा दृष्ट्वा चेत्यध्याहार्यम् । अन्यथा बाहूरुवेगं पदानन्वयात् ॥ २५ ॥ समुत्पेतुरित्युक्तं विवृणोति–ते नगाग्रादिति । नगाग्रात् वृक्षाग्रात् । समपद्यन्त सङ्गीभूताः ॥ २६ ॥ प्रीता इति हेतुगर्भं विशेषणम् ।

फलतीव दलतीव । ये पूर्वं संविष्ठिताः ते तोयदनिस्वनमिव ऊरुवेगं तज्जन्यं घोषं शुश्रुवुरित्यन्वयः ॥ १८–२० ॥ वानरेन्द्रस्य निर्घोषं तदीयसिंहनादम् ॥ २१ ॥ सुहृद्दर्शनकाङ्क्षिणः तेन शब्देन हनुमानेवैतीति निश्चित्य तद्दर्शनलालसाः ॥ २२–२४ ॥ बाहूरुवेगं तज्जन्यशब्दं निनादं च कण्ठशब्दं च ॥ २५ ॥ नगाग्रात् स्वाश्रयादूर्ध्वदेशस्थानि नगाग्राणीत्यर्थः ॥ २६ ॥ पादपाग्रेषु निष्ठिताः प्रशाखाः प्राग्रशाखाः वासांसीव समाविध्यन्त व्याधुन्वन् ॥ २७ ॥ २८ ॥

॥१५४॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यथा मनुष्याः दूरस्थस्वकीयानयनाय वासांसि धून्वन्ति तथा वानराश्चान्योन्याह्वानाय पुष्पितशाखाः गृहीत्वा प्रशाखाः प्रागग्रशाखाः समाविद्धचन्त पर्यभ्रामयन् ॥ २७ ॥२८॥ अभ्रघनसङ्काशम् अभ्रसमूहतुल्यम् ॥ २९ ॥ निपपात निर्भरमाक्रान्तवान् ॥ ३० ॥ पपातेति । अच्छिन्नपक्षस्य

गिरिगह्वरसंलीनो यथा गर्जति मारुतः । एवं जगर्ज बलवान् हनूमान् मारुतात्मजः ॥ २८ ॥ तमभ्रघनसङ्काश मापतन्तं महाकपिम् । दृष्ट्वा ते वानराः सर्वे तस्थुः प्राञ्जलयस्तदा ॥ २९ ॥ ततस्तु वेगवांस्तस्य गिरेर्गिरिनिभः कपिः । निपपात महेन्द्रस्य शिखरे पादपाकुले ॥ ३० ॥ हर्षेणापूर्यमाणोऽसौ रम्ये पर्वतनिर्झरे । छिन्नपक्ष इवाकाशात् पपात धरणीधरः ॥ ३१ ॥ ततस्ते प्रीतमनसः सर्वे वानरपुङ्गवाः । हनुमन्तं महात्मानं परिवार्योप तस्थिरे । परिवार्य च ते सर्वे परां प्रीतिमुपागताः ॥ ३२ ॥ प्रहृष्टवदनाः सर्वे तमरोगमुपागतम् । उपायनानि चादाय मूलानि च फलानि च । प्रत्यर्चयन् हरिश्रेष्ठं हरयो मारुतात्मजम् ॥ ३३ ॥ हनुमांस्तु गुरून् वृद्धान् जाम्बवत्प्रमुखांस्तदा । कुमारमङ्गदं चैव सोऽवन्दत महाकपिः ॥ ३४ ॥ स ताभ्यां पूजितः पूज्यः कपिभिश्च प्रसादितः । दृष्ट्वा सीतेति विक्रान्तः संक्षेपेण न्यवेदयत् ॥ ३५ ॥

पातासम्भवाच्छिन्नपक्ष इत्युक्तम् ॥३१॥३२॥ प्रहृष्टवदनाः प्रसन्नमुखाः, आसन्निति शेषः । अरोगं कुशलेनामेत्यर्थः । उपायनानि उपहारान् ॥३३॥ हनुमांस्त्वित्यादि । कुमारमङ्गदं चेति, स्वामित्वादिति भावः ॥ ३४–३९ ॥

अभ्रघनसङ्काशं मेघसमूहसदृशम् ॥ २९ ॥ ततो गिरेः अरिष्टाख्याद्रेः प्लुतः कपिः तस्य महेन्द्रस्य गिरेः शिखरे निपपात, अनेनाविश्रममागमनं ध्वनितम् ॥ ३० ॥ छिन्नपक्षो धरणीधर इवाकाशात्पपात । हर्षेणापूर्यमाणः पूर्यमाणहृदयः । पर्वतनिर्झरे निर्झरप्रवर्तके शिखरे इत्यर्थ इत्येके । श्रमनिवृत्तये जल एव पतित इत्यन्ये ॥ ३१–३४ ॥ ताभ्यां जाम्बवदङ्गदाभ्याम् । प्रसादितः प्रसन्नदृष्ट्या कारितात्मनिरीक्षणः ॥ ३५–४१ ॥

स०–छिन्नपक्षः धरणीधरः पर्वत इव पपात, अनेन मान्द्याभावः सूच्यते । छिदिति भावे सम्पदादिक्विबन्तः । छित् छिदा न ययोस्तौ छिन्नौ । नशब्दो निषेधार्थकः । तस्य छिच्छब्दानन्तरत्वं जन इत्यादिवद् बोध्यम् । ततश्च अच्छिन्नौ पक्षौ यस्य सः । एवञ्चेत् हर्षापूर्यमाणता विवक्षितस्थललाभो विजयेनागमनं चेति बहूर्थलाभो भवतीति बोध्यम् ॥३१ ॥ परां पूर्वप्रीतितोप्युत्कृष्टाम् । सन्तोषातिशयेन सर्वे इति द्विरुक्तिः । सर्वे रुद्रे । लुप्तोपमेयम् । ते दूताः त्रिपुरं हत्वा आयाते रुद्रे इति वा । " सर्वो ह्येष रुद्रः " इति श्रुतेः । " सर्वश्शर्वः कालंजरः शिवः " इति नामनिधानात्॥ ३२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भवन् अभवन् । अनित्यत्वादडभावः ॥ ४० ॥ क्ष्वेलन्ति सिंहनादं कुर्वन्ति । नदन्ति अव्यक्तशब्दं कुर्वन्ति । गर्जन्ति वृषभनादं कुर्वन्ति । किलिकिलां स्वजात्युचितकिलिकिलाशब्दम् ॥ ४१ ॥ केचिदिति । अञ्चितायतदीर्घाणि अत्र दीर्घपदसन्निधानादायतपदं स्थूलपरम् । प्रविव्यधुः लाङ्गूला

निषसाद च हस्तेन गृहीत्वा वालिनः सुतम् । रमणीये वनोद्देशे महेन्द्रस्य गिरेस्तदा ॥३६॥ हनुमानब्रवीद्धृष्टस्तदा तान् वानरर्षभान् ॥३७॥ अशोकवनिकासंस्था दृष्टा सा जनकात्मजा । रक्ष्यमाणा सुघोराभी राक्षसीभिरनिन्दिता ॥३८॥ एकवेणीधरा बाला रामदर्शनलालसा । उपवासपरिश्रान्ता जटिला मलिना कृशा ॥३९॥ ततो दृष्टेति वचनं महार्थममृतोपमम् । निशम्य मारुतेः सर्वे मुदिता वानरा भवन् ॥४०॥ क्ष्वेलन्त्यन्ये नदन्त्यन्ये गर्जन्त्यन्ये महाबलाः । चक्रुः किलिकिलामन्ये प्रतिगर्जन्ति चापरे ॥४१॥ केचिदुच्छ्रितलाङ्गूलाः प्रहृष्टाः कपिकुञ्जराः । अञ्चितायतदीर्घाणि लांगूलानि प्रविव्यधुः ॥४२॥ अपरे च हनूमन्तं वानरा वारणोपमम् । आप्लुत्य गिरिशृङ्गेभ्यः संस्पृशन्ति स्म हर्षिताः ॥ ४३ ॥ उक्तवाक्यं हनूमन्तमङ्गदस्तमथाब्रवीत् । सर्वेषां हरिवीराणां मध्ये वचनमुत्तमम् ॥ ४४ ॥ सत्त्वे वीर्ये न ते कश्चित् समो वानर विद्यते । यदवप्लुत्य विस्तीर्णं सागरं पुनरागतः ॥ ४५ ॥ [जीवितस्य प्रदाता नस्त्वमेको वानरोत्तम । त्वत्प्रसादात् समेष्यामः सिद्धार्था राघवेण ह ॥] अहो स्वामिनि ते भक्तिरहो वीर्यमहो धृतिः । दिष्ट्या दृष्टा त्वया देवी रामपत्नी यशस्विनी ॥ ४६ ॥ दिष्ट्या त्यक्ष्यति काकुत्स्थः शोकं सीतावियोगजम् । ततोऽङ्गदं हनूमन्तं जाम्बवन्तं च वानराः ॥ ४७ ॥ परिवार्य प्रमुदिता भेजिरे विपुलाः शिलाः । श्रोतुकामाः समुद्रस्य लङ्घनं वानरोत्तमाः ॥ ४८ ॥

न्युद्धृत्य भूमावताडयन्नित्यर्थः ॥ ४२ ॥ अपरे चेति । संस्पृशन्ति आलिङ्गन्तीत्यर्थः ॥ ४३ ॥ ४४ ॥ सत्त्व इति । अवप्लुत्य विस्तीर्णमित्यङ्गदेतरव्यावृत्तिः । पुनरागत इत्यङ्गदव्यावृत्तिः ॥ ४५–५० ॥

अञ्चितायतदीर्घाणि दीर्घशब्दसन्निधानादायतशब्देन स्थौल्यमुच्यते ॥ ४२–४५ ॥ अहो इति । तव स्वामिभक्त्यादिकमाश्चर्यमित्यर्थः ॥ ४६–४२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कीर्तिमतात हनुमद्विशेषणम् । यशस्विनेत्यङ्गदविशेषणम् । भृत्यकीर्त्या स्वामिनः कीर्तिः । अन्यथा पौनरुक्त्यात् । यद्वा बुद्धिमत्त्वजन्या कीर्तिः । शौर्यजन्यं यशः ॥ ५१ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तपञ्चाशः सर्गः ॥ ५७ ॥

दर्शनं चापि लङ्कायाः सीताया रावणस्य च । तस्थुः प्राञ्जलयः सर्वे हनुमद्वदनोन्मुखाः ॥ ४९ ॥ तस्थौ तत्राङ्गदः श्रीमान् वानरैर्बहुभिर्वृतः । उपास्यमानो विबुधैर्दिवि देवपतिर्यथा ॥ ५० ॥ हनूमता कीर्तिमता यशस्विना तथाऽङ्गदेनाङ्गदबद्धबाहुना । मुदा तदाध्यासितमुन्नतं महन्महीधराग्रं ज्वलितं श्रियाऽभवत् ॥५१॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

ततस्तस्य गिरेः शृङ्गे महेन्द्रस्य महाबलाः । हनुमत्प्रमुखाः प्रीतिं हरयो जग्मुरुत्तमाम् ॥ १ ॥ तं ततः प्रीतिसंहृष्टः प्रीतिमन्तं महाकपिम् । जाम्बवान् कार्यवृत्तान्तमपृच्छदनिलात्मजम् ॥ २ ॥ कथं दृष्टा त्वया देवी कथं वा तत्र वर्तते । तस्यां वा स कथंवृत्तः क्रूरकर्मा दशाननः ॥ ३ ॥ तत्त्वतः सर्वमेतन्नः ब्रूहि त्वं महाकपे । श्रुतार्थाश्चिन्तयिष्यामो भूयः कार्यविनिश्चयम् ॥४॥ यश्चार्थस्तत्र वक्तव्यो गतैरस्माभिरात्मवान् । रक्षितव्यं च यत्तत्र तद्भवान् व्याकरोतु नः ॥ ५ ॥ स नियुक्तस्ततस्तेन संप्रहृष्टतनूरुहः । प्रणम्य शिरसा देव्यै सीतायै प्रत्यभाषत ॥ ६ ॥

ततस्तस्येत्यादि ॥ १ ॥ तमिति । कार्यवृत्तान्तं कार्यविषयवृत्तान्तम्, सीतादर्शनविषयवृत्तान्तम् ॥ २ ॥ कथमिति । कथं केन प्रकारेण । कथं वृत्तः कीदृग्व्यापारः ॥ ३ ॥ तत्त्वत इति । तत्त्वकथनस्य प्रयोजनमाह–श्रुतार्था इत्यादि ॥ ४ ॥ यश्चेति । तत्र रामसन्निधौ योऽर्थो वक्तव्यः वक्तुमर्हः

विबुधैर्देवैरुपास्यमान इत्यर्थः ॥ ५० ॥ हनूमतेति । यशस्विनेति अङ्गदविशेषणम् । अतो न पुनरुक्तिः ॥ ५१ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां सप्तपञ्चाशः सर्गः ॥ ५७ ॥ हनुमत्प्रमुखाः, परस्परं मिलिता इति शेषः ॥ १ ॥ कार्यविषयं वृत्तान्तम् ॥ २ ॥ दशाननः कथंवृत्तः कीदृग्व्यापारः ॥ ३ ॥ ४ ॥ यश्चेति । तत्र रामसन्निधौ । रक्षितव्यं गोपनीयम्, अवक्तव्यमिति यावत् । आत्मवान् भवान् ॥ ५–७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यच्च रक्षितव्यं गोप्तव्यं तत् । आत्मवान् बुद्धिमान् । भवान् व्याकरोतु ॥ ५ ॥ ६॥ प्रत्यक्षमेवेति । इदं न वक्तव्यमेवेति भावः । आप्लुतः आप्लुतोस्मि । पारं, गन्तुमिति शेषः । समाहितः एकाग्रः । इत्येतद्भवतां प्रत्यक्षमेवेति सम्बन्धः ॥ ७ ॥ गच्छत इत्यादि । विघ्नरूपमिव, वस्तुतो न तथेति भावः ।

प्रत्यक्षमेव भवतां महेन्द्राग्रात् खमाप्लुतः । उदधेर्दक्षिणं पारं कांक्षमाणः समाहितः ॥७॥ गच्छतश्च हि मे घोरं विघ्नरूपमिवाभवत् । काञ्चनं शिखरं दिव्यं पश्यामि सुमनोहरम् ॥ ८ ॥ स्थितं पन्थानमावृत्य मेने विघ्नं च तं नगम् ॥ ९ ॥ उपसङ्गम्य तं दिव्यं काञ्चनं नगसत्तमम् । कृता मे मनसा बुद्धिर्भेत्तव्योऽयं मयेति च ॥ १० ॥ प्रहृतं च मया तस्य लांगूलेन महागिरेः । शिखरं सूर्यसङ्काशं व्यशीर्यत सहस्रधा॥ ११॥ व्यवसायं च तं बुद्ध्वा सहोवाच महागिरिः । पुत्रेति मधुरां वाणीं मनः प्रह्लादयन्निव ॥ १२ ॥ पितृव्यं चापि मां विद्धि सखायं मातरिश्वनः । मैनाक मिति विख्यातं निवसन्तं महोदधौ ॥ १३ ॥ पक्षवन्तः पुरा पुत्र बभूवुः पर्वतोत्तमाः । छन्दतः पृथिवीं चेरुर्बाध मानाः समन्ततः ॥ १४ ॥ श्रुत्वा नगानां चरितं महेन्द्रः पाकशासनः । चिच्छेद भगवान् पक्षान् वज्रेणैषां सहस्रशः ॥ १५ ॥ अहं तु मोक्षितस्तस्मात्तव पित्रा महात्मना । मारुतेन तदा वत्स प्रक्षिप्तोऽस्मि महार्णवे ॥ १६ ॥ रामस्य च मया साह्ये वर्तितव्यमरिन्दम । रामो धर्मभृतां श्रेष्ठो महेन्द्रसमविक्रमः ॥ १७ ॥

पश्यामीत्यादौ व्यत्ययेन लट् । शिखरं विघ्नरूपमिवाभवत् तत् पश्यामीति योजना ॥ ८ ॥ स्थितमिति । मेने इति लिट्युत्तमपुरुषैकवचनं परोक्षत्वाद्य भावेपि च्छान्दसम् । अमनिषीत्यर्थः ॥ ९ ॥ उपसङ्गम्येति । गमनदशायामुरसा पातयामासेति सूचितं विवृणोति भेत्तव्योऽयमित्यादिना ॥ १०–१२ ॥ पितृव्यं चेति । पितृव्यत्वे हेतुमाह सखायमिति । पितृसखत्वात् पितृव्यत्वव्यपदेश इत्यर्थः ॥ १३ ॥ छन्दतः यथेच्छम् ॥ १४ ॥ ॥ १५ ॥ मोक्षणप्रकारमाह प्रक्षिप्तोऽस्मि महार्णव इति ॥ १६ ॥ साह्ये साहाय्ये । साहाय्यकरणे हेतुमाह रामो धर्मभृतां श्रेष्ठ इति ॥ १७ ॥

पश्यामि अपश्यम् ॥ ८ ॥ मेने इति लिङुत्तमपुरुषैकवचनम् ॥ ९–११ ॥ व्यवसायं स्वभेदनरूपम् ॥ १२ ॥ १३ ॥ छन्दतः स्वेच्छयेत्यर्थः ॥ १४ ॥ चरितं प्रजा बाधनरूपम् ॥ १५ ॥ मोचनप्रकारमाह–मारुतेनेति ॥ १६ ॥ साह्ये साहाय्ये । तत्र हेतुः–धर्मभृतां श्रेष्ठ इत्यादि ॥ १७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

उद्यतम् उद्युक्तम् ॥१८॥ अनुज्ञातः, अस्मीति शेषः । वपुष्मता पुष्कलवपुषा । मानुषेण शरीरेणान्तर्हितः । शैलेन तु शरीरेण महोदधौ सागरोपरि, स्थित इति शेषः । 'स वै दत्तवरः शैलो बभूवावस्थितस्तथा' इति प्रथमसर्गोक्तेः । प्रतिप्रयाणे च–'पर्वतेन्द्रं सुनाभं च समुपस्पृश्य वीर्यवान्' इत्युक्तम् ।

एतच्छ्रुत्वा वचस्तस्य मैनाकस्य महात्मनः । कार्यमावेद्य तु गिरेरुद्यतं च मनो मम ॥ १८ ॥ तेन चाहमनुज्ञातो मैनाकेन महात्मना । स चाप्यन्तर्हितः शैलो मानुषेण वपुष्मता । शरीरेण महाशैलः शैलेन च महोदधौ ॥ १९ ॥ उत्तमं जवमास्थाय शेषं पन्थानमास्थितः । ततोऽहं सुचिरं कालं वेगेनाभ्यगमं पथि ॥ २० ॥ ततः पश्याम्यहं देवीं सुरसां नागमातरम् । समुद्रमध्ये सा देवी वचनं मामभाषत ॥ २१ ॥ मम भक्षः प्रदिष्टस्त्वममरैर्हरिसत्तम । अतस्त्वां भक्षयिष्यामि विहितस्त्वं चिरस्य मे ॥ २२ ॥ एवमुक्तः सुरसया प्राञ्जलिः प्रणतः स्थितः । विवर्णवदनो भूत्वा वाक्यं चेदमुदीरयम् ॥ २३ ॥ रामो दाशरथिः श्रीमान् प्रविष्टो दण्डकावनम् । लक्ष्मणेन सह भ्रात्रा सीतया च परन्तपः ॥ २४ ॥ तस्य सीता हृता भार्या रावणेन दुरात्मना । तस्याः सकाशं दूतोऽहं गमिष्ये रामशासनात् ॥ २५ ॥ कर्तुमर्हसि रामस्य साहाय्यं विषये सती । अथवा मैथिलीं दृष्ट्वा रामं चाक्लिष्टकारिणम् ॥ २६ ॥ आगमिष्यामि ते वक्त्रं सत्यं प्रतिशृणोमि ते ॥ २७ ॥ एवमुक्ता मया सा तु सुरसा कामरूपिणी । अब्रवीन्नातिवर्तेत कश्चिदेष वरो मम ॥ २८ ॥ एवमुक्तः सुरसया दशयोजनमायतः । ततोऽर्धगुणविस्तारो बभूवाहं क्षणेन तु । मत्प्रमाणानुरूपं च व्यादितं तु मुखं तया ॥ २९ ॥

'हिरण्यनाभं शैलेन्द्रं काञ्चनं पश्य मैथिलि' इति रामेण चोक्तम् ॥ १९–२५॥ कर्तुमिति । विषये सती स्वराज्ये वसन्ती ॥२६–२८॥ एवमुक्त इति । तत

उद्यतम् अग्रे चलितम् ॥ १८ ॥ वपुष्मता पौष्कलयवता । मानुषेण शरीरेणान्तर्हितः । शैलेन शिलारूपेण शरीरेण तु महोदधौ सागरोपरि, स्थित इति शेषः ॥ १९–२१ ॥ ममेति । प्रदिष्टः दत्तः । विहितः लब्धः ॥ २२–२५ ॥ विषये सती विषयवासिनी ॥ २६ ॥ २७ ॥ नातिवर्तेत नातिक्रमेत । मां प्राप्तो मदाहारतां प्राप्तो न गच्छेदित्यर्थः ॥ २८ ॥ ततोऽर्द्धगुणविस्तारः ततो दशयोजनादर्धस्य पञ्चयोजनस्य गुण आवृत्तिः तद्विस्तारो दशयोजनविस्तारः । प्रथमसर्गे दशयोजन

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इति । अर्धगुणविस्तारः अत्रार्धशब्दः एकदेशवाची । किंचिदधिकविस्तारोऽभवमित्यर्थः । एवमेवार्थः, प्रथमसर्गोक्तशतयोजनविस्तारस्तु विरुद्धः । तद्ग्रन्थः कल्पितश्चेत्युक्तम् । मत्प्रमाणेति । व्यादितं व्यात्तम् ॥ २९ ॥ तद्दृष्ट्वेति । ह्रस्वत्वं विशेषयति अङ्गुष्ठमात्रक इति ॥ ३० ॥ ३१ ॥ अर्थसिद्धचै

तद्दृष्ट्वा व्यादितं चास्यं ह्रस्वं ह्यकरवं वपुः । तस्मिन् मुहूर्ते च पुनर्बभूवाङ्गुष्ठमात्रकः ॥ ३० ॥ अभिपत्याशु तद्वक्त्रं निर्गतोऽहं ततः क्षणात् । अब्रवीत् सुरसा देवी स्वेन रूपेण मां पुनः ॥ ३१ ॥ अर्थसिद्धचै हरिश्रेष्ठ गच्छ सौम्य यथासुखम् । समानय च वैदेहीं राघवेण महात्मना । सुखी भव महाबाहो प्रीताऽस्मि तव वानर ॥ ३२ ॥ ततोऽहं साधु साध्वीति सर्वभूतैः प्रशंसितः ॥ ३३ ॥ ततोऽन्तरिक्षं विपुलं प्लुतोऽहं गरुडो यथा । छाया मे निगृहीता च न च पश्यामि किंचन ॥ ३४ ॥ सोऽहं विगतवेगस्तु दिशो दश विलोकयन् । न किंचित्तत्र पश्यामि येन मेऽपहृता गतिः ॥ ३५ ॥ ततो मे बुद्धिरुत्पन्ना किं नाम गगने मम । ईदृशो विघ्न उत्पन्नो रूपं यत्र न दृश्यते ॥ ३६ ॥ अधोभागे न मे दृष्टिः शोचता पातिता मया । ततोऽद्राक्षमहं भीमां राक्षसीं सलिलेशयाम् ॥ ३७ ॥ प्रहस्य च महानादमुक्तोऽहं भीमया तया । अवस्थितमसम्भ्रान्तमिदं वाक्यमशोभनम् ॥ ३८ ॥ क्व नु यन्ता महाकाय क्षुधिताया ममेप्सितः । भक्षः प्रीणय मे देहं चिरमाहारवर्जितम् ॥ ३९ ॥ बाढमित्येव तां वाणीं प्रत्यगृह्णामहं ततः । आस्य प्रमाणादधिकं तस्याः कायमपूरयम् । तस्याश्चास्यं महद्भीमं वर्धते मम भक्षणे ॥ ४० ॥

इति । समानय संयोजय ॥ ३२ ॥ ततोऽहमिति । साधु साध्वीति दीर्घश्छान्दसः ॥ ३३–३६ ॥ अधोभागे नेति । सलिलेशयां सलिले स्थिताम् ॥ ३७ ॥ अवस्थितं दृढभूतम् । असम्भ्रान्तम् अव्यग्रम् ॥ ३८ ॥ ३९ ॥ तस्याः आस्यप्रमाणादधिकं यथा तथा कायम् आत्मदेहम् अपूरयम् अवर्धयम् । विस्तारोक्त्यानुगुण्येनैवं व्याख्यातम् ॥ २९ ॥ ह्रस्वम्, स्वशरीरमिति शेषः ॥ ३० ॥ ३१ ॥ समानय सङ्गमय ॥ ३२ ॥ साधु साध्वीत्यत्र दीर्घ आर्षः ॥ ३३ ॥ ३४ ॥ न पश्यामि नापश्यम् । येन गतिर्विहता तत्किंचित्र पश्यामि नापश्यमित्यन्वयः ॥ ३५–३७ ॥ अवस्थितं निश्चेष्टम् । तथाप्यसम्भ्रान्तं भयहीनम् मां लक्षीकृत्येदं वाक्यमहमुक्त इत्यन्वयः ॥ ३८ ॥ ममेप्सितः भक्षस्त्वं मतो मे देहं प्रीणयेत्यन्वयः ॥ ३९ ॥ तस्या आस्यप्रमाणादधिकं कायम् आत्मनः कायम् अपूरयम् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मयि वृद्धे साप्यवर्धिष्टेत्यर्थः ॥ ४० ॥ अयं कामरूपीति माम्, साधु सम्यक्, न बुबुधे न ज्ञातवती । मम कृतं निकृतं मया कृतां निकृतिं वा न बुबुधे ॥४१॥ निकृतिमेव दर्शयति–ततोऽहमिति ॥४२॥ विसृष्टभुजा विसृष्टसन्धिकभुजा ॥४३॥ शृणोमीति । हतेत्यनन्तरमितिकरणं बोध्यम् ॥४४॥ कृत्य

न च मां साधु बुबुधे मम वा निकृतं कृताम् ॥ ४१ ॥ ततोऽहं विपुलं रूपं संक्षिप्य निमिषान्तरात् । तस्या हृदय मादाय प्रपतामि नभःस्थलम् ॥ ४२ ॥ सा विसृष्टभुजा भीमा पपात लवणाम्भसि । मया पर्वतसङ्काशा निकृत्त हृदया सती ॥ ४३ ॥ शृणोमि खगतानां च सिद्धानां चारणैः सह । राक्षसी सिंहिका भीमा क्षिप्रं हनुमता हता ॥ ४४ ॥ तां हत्वा पुनरेवाहं कृत्यमात्ययिकं स्मरन् । गत्वा चाहं महाध्वानं पश्यामि नगमण्डितम् ॥ ४५ ॥ दक्षिणं तीरमुदधेर्लङ्का यत्र च सा पुरी । अस्तं दिनकरे याते रक्षसां निलयं पुरम् । प्रविष्टोऽहमविज्ञातो रक्षोभि र्भीमविक्रमैः ॥ ४६ ॥ तत्र प्रविशतश्चापि कल्पान्तघनसन्निभा । अट्टहासं विमुञ्चन्ती नारी काप्युत्थिता पुरः ॥ ४७ ॥ जिघांसन्तीं ततस्तां तु ज्वलदग्निशिरोरुहाम् । सव्यमुष्टिप्रहारेण पराजित्य सुभैरवाम् ॥ ४८ ॥ प्रदोष काले प्रविशं भीतयाऽहं तयोदितः । अहं लङ्कापुरी वीर निर्जिता विक्रमेण ते ॥ ४९ ॥ यस्मात्तस्माद्विजेतासि सर्व रक्षांस्यशेषतः ॥५०॥ तत्राहं सर्वरात्रं तु विचिन्वन् जनकात्मजाम् । रावणान्तःपुरगतो न चापश्यं सुमध्यमाम्॥५१॥

मात्ययिकं स्मरन् प्राणान्तिकं तत्कर्म विचिन्तयन्नित्यर्थः ॥ ४५–४८ ॥ रामानु०–जिघांसन्तीमित्यादि । प्राविशं प्राविशम् ॥ ४८ ॥ ४९ ॥ भीतयेत्यादि । भीतया तया नार्या । अशेषत इत्यनन्तरमितिकरणं द्रष्टव्यम् ॥ ४९ ॥ ५० ॥ सर्वरात्रं सर्वां रात्रिम् । " अहःसर्व–" इत्यादिना समासान्तोऽच् । अत्यन्त वर्द्धते अवर्द्धत ॥ ४० ॥ सा मां न बुबुधे अयं कामरूपीति मां न ज्ञातवतीत्यर्थः । मम कृतं विकृतं सा मया कृतं विकारस्वरूपं वा न बुबुधे ॥ ४१ ॥ तद्विकृतं किमित्यत आह–ततोऽहमिति । हृदयमादाय हृदयं निकृत्य । प्रपतामि प्रापतम् ॥ ४२ ॥ विसृष्टभुजा विस्रंसितभुजा ॥ ४३ ॥ शृणोमीति । सिंहिका हनुमता हतेति द्युगतानां देवानां वाचः शृणोमीति सम्बन्धः ॥ ४४ ॥ कृत्यम् आत्ययिकं प्राणान्तिकं कर्म चिन्तयन्नित्यर्थः ॥ ४५–४७ ॥ मां जिघांसन्तीं ज्वलदग्नितुल्य केशपाशाम् ॥ ४८ ॥ प्रविशं प्राविशम् ॥ ४९ ॥ ५० ॥ सर्वरात्रं सर्वां रात्रिम् । तत्राहं मध्यरात्रे तु इति पाठः साधुः ॥ ५१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

संयोगे द्वितीया। तत्र लङ्कायाम्। विचिन्वन् अनन्तरं रावणान्तःपुरमपि गतः सन् सुमध्यमां नापश्यम् ॥ ५१ ॥ ५२ ॥ रामानु०–तत्रेति। सर्वरात्रं सर्वां रात्रिम्। "अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः" इत्यच्प्रत्ययः। "कालाध्वनोरत्यन्तसंयोगे" इति द्वितीया। तत्राहं मध्यरात्रे त्विति पाठः साधुः ॥ ५१ ॥ तत इति। उपलक्षये

ततः सीतामपश्यंस्तु रावणस्य निवेशने। शोकसागरमासाद्य न पारमुपलक्षये ॥ ५२ ॥ शोचता च मया दृष्टं प्राकारेण समावृतम्। काञ्चनेन विकृष्टेन गृहोपवनमुत्तमम् ॥ ५३ ॥ स प्राकारमवप्लुत्य पश्यामि बहुपादपम् ॥ ५४ ॥ अशोकवनिकामध्ये शिंशुपापादपो महान्। तमारुह्य च पश्यामि काञ्चनं कदलीवनम् ॥ ५५ ॥ अदूरे शिंशुपावृक्षात् पश्यामि वरवर्णिनीम्। श्यामां कमलपत्राक्षीमुपवासकृशाननाम् ॥ ५६ ॥ तदेकवासःसंवीतां रजोध्वस्तशिरोरुहाम्। शोकसन्तापदीनाङ्गीं सीतां भर्तृहिते स्थिताम् ॥ ५७ ॥ राक्षसीभिर्विरूपाभिः क्रूराभिरभिसंवृताम्। मांसशोणितभक्षाभिर्व्याघ्रीभिर्हरिणीमिव ॥ ५८ ॥ सामया राक्षसीमध्ये तर्ज्यमाना मुहुर्मुहुः। एकवेणीधरा दीना भर्तृचिन्तापरायणा ॥ ५९ ॥ भूमिशय्या विवर्णाङ्गी पद्मिनीव हिमागमे। रावणाद्विनिवृत्तार्था मर्तव्यकृतनिश्चया। कथंचिन्मृगशावाक्षी तूर्णमासादिता मया ॥ ६० ॥

उपालक्षयम् ॥ ५२ ॥ विकृष्टेन विप्रकृष्टेन। अतिदीर्घेणेति यावत् ॥ ५३ ॥ बहुपादपम् अनेकपादपप्रमाणामिति प्राकारविशेषणम् ॥ ५४ ॥ शिंशुपापादपः, अस्तीति शेषः ॥ ५५ ॥ शिंशुपावृक्षात् शिंशुपावृक्षस्य। श्यामां यौवनमध्यस्थाम्। तदेकवासस्संवीतां येन वाससा हृता तेनैकवाससा संवीताम्। यद्वा तेन तत्कालदृष्टेन पूर्वदृष्टेन एकेन वाससा संवीताम्, वेषान्तरनिस्स्पृहामित्यर्थः। मानसिकत्वकायिकत्वभेदेन शोकसन्तापयोर्भेदः ॥ ५६–५८ ॥ सामयेति। आमयः खेदः तेन सह वर्तत इति सामया। मर्तव्ये मरणे। "कृत्यल्युटो बहुलम्" इति साधुः ॥ ५९ ॥ ६० ॥

उपलक्षये उपालक्षयम् ॥ ५२ ॥ विकृष्टेन विप्रकृष्टेन, अतिदीर्घेणेति यावत् ॥ ५३ ॥ बहुपादपं गृहोपवनं गृहारामं दृष्टमिति सम्बन्धः ॥ ५४–५६ ॥ तदेकवासः संवीतां तेन तत्कालदृष्टेन पूर्वधृतेनैव वाससा संवीताम् ॥ ५७ ॥ राक्षसीभिरिति। व्याघ्रीपरिवृतां हरिणीमिव तामपश्यमिति सम्बन्धः। राक्षसीमध्ये ताभिरेव तर्ज्यमाना सदुःखा मया कथञ्चिदासादितेत्यन्वयः ॥ ५८ ॥ सामया आमयसहिता, दुःखसहितेत्यर्थः, अतस्तूर्णमासादिता मयेत्यनेन न पुनरुक्तिः। मर्तव्यकृत

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पश्यन् परामृशन् ॥ ६१ ॥ ६२ ॥ गहने पर्णगूढप्रदेशे। 'पर्णघने निलीनः' इत्यधस्तादप्युक्तेः ॥ ६३--६५ ॥ रामानु०--परिरभ्य, वित्रासेति शेषः ॥ ६५ ॥
परमोद्विग्नाम् अतीवोद्भ्रान्तहृदयाम् । ततस्ततः वीक्षमाणां नानादिक्षु वीक्षमाणाम् । त्राणमित्यनुषज्यते ॥६६॥ अवाक्शिराः अवनतमूर्द्धा । प्रपतितः,

तां दृष्ट्वा तादृशीं नारीं रामपत्नीं यशस्विनीम्। तत्रैव शिंशुपावृक्षे पश्यन्नहमवस्थितः ॥ ६१ ॥ ततो हलहलाशब्दं काञ्चीनूपुरमिश्रितम्। शृणोम्यधिकगम्भीरं रावणस्य निवेशने ॥६२॥ ततोऽहं परमोद्विग्नः स्वं रूपं प्रतिसंहरन्। अहं तु शिंशुपावृक्षे पक्षीव गहने स्थितः ॥ ६३ ॥ ततो रावणदाराश्च रावणश्च महाबलः। तं देशं समनुप्राप्ता यत्र सीताऽभवत् स्थिता ॥६४॥ तद् दृष्ट्वाऽथ वरारोहा सीता रक्षोमहाबलम्। सङ्कुच्योरू स्तनौ पीनौ बाहुभ्यां परिरभ्य च ॥ ६५ ॥ वित्रस्तां परमोद्विग्नां वीक्षमाणां ततस्ततः। त्राणं किंचिदपश्यन्तीं वेपमानां तपस्विनीम् ॥ ६६ ॥ तामुवाच दशग्रीवः सीतां परमदुःखिताम्। अवाक्शिराः प्रपतितो बहुमन्यस्व मामिति ॥ ६७ ॥ यदि चेत्त्वं तु दर्पान्मां नाभिनन्दसि गर्विते। द्वौ मासावन्तरं सीते पास्यामि रुधिरं तव ॥ ६८ ॥ एतच्छ्रुत्वा वचस्तस्य रावणस्य दुरात्मनः। उवाच परमक्रुद्धा सीता वचनमुत्तमम् ॥ ६९ ॥ राक्षसाधम रामस्य भार्यामिततेजसः। इक्ष्वाकुकुल नाथस्य स्नुषां दशरथस्य च। अवाच्यं वदतो जिह्वा कथं न पतिता तव ॥ ७० ॥ किंचिद्धीर्यं तवानार्य यो मां भर्तुरसन्निधौ। अपहृत्यागतः पाप तेनादृष्टो महात्मना ॥ ७१ ॥

भूमाविति शेषः ॥ ६७ ॥ द्वौ मासौ अन्तरम् अवधिः। ततः पास्यामीति योज्यम् ॥ ६८--७० ॥ किंचिद्धीर्यं कुत इत्यत्राह--यो मामिति। भर्तुरसन्निधौ

निश्चया मरणकृतनिश्चयेत्यर्थः ॥ ५९--६१ ॥ शृणोमि श्रुतवान्। रावणस्य निवेशने तत्समीपे। यद्वा निवेशने सीतासमीपप्रवेशनकाले ॥ ६२ ॥ गहने स्थितः अत्र गहनशब्देन पर्णसंहतिगूढप्रदेश उच्यते ॥ ६३ ॥ परिरभ्य, वित्रासेति शेषः ॥ ६४--७० ॥ तदसन्निधौ अपहृत्य तेनादृष्ट इति लङ्कामागतः अन्यथा तदैव

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तेन भर्त्रा अदृष्टः सन् यो मामपहृत्यागतः तस्य तव किंचिद्वीर्यमिति योज्यम् ॥ ७१ ॥ ७२ ॥ जानक्येति । घोरत्वसिद्धये चितास्थ इत्युक्तम् ॥ ७३ ॥ आरब्धः, रावण इति शेषः । हा हा कृतं हा हेत्येतत्कृतम् ॥ ७४ ॥ समुत्पत्य, रावणसमीपं गतेति शेषः । मण्डोदरी मण्डनभूतोदरी ।

न त्वं रामस्य सदृशो दास्येऽप्यस्य न युज्यसे । यज्ञीयः सत्यवादी च रणश्लाघी च राघवः ॥ ७२ ॥ जानक्या परुषं वाक्यमेवमुक्तो दशाननः । जज्वाल सहसा कोपाच्चितास्थ इव पावकः ॥ ७३ ॥ विवर्त्य नयने क्रूरे मुष्टिमुद्यम्य दक्षिणम् । मैथिलीं हन्तुमारब्धः स्त्रीभिर्हा हा कृतं तदा ॥ ७४ ॥ स्त्रीणां मध्यात् समुत्पत्य तस्य भार्या दुरात्मनः । वरा मण्डोदरी नाम तया स प्रतिषेधितः ॥७५॥ उक्तश्च मधुरां वाणीं तया स मदनार्दितः । सीतया तव किं कार्यं महेन्द्रसमविक्रम॥७६॥ [मया सह रमस्वाद्य मद्विशिष्टा न जानकी ।]देवगन्धर्वकन्याभिर्यक्षकन्याभिरेव च । सार्धं प्रभो रमस्वेह सीतया किं करिष्यसि ॥ ७७ ॥ ततस्ताभिः समेताभिर्नारीभिः स महाबलः । प्रसाद्य सहसा नीतो भवनं स्वं निशाचरः॥७८॥ याते तस्मिन् दशग्रीवे राक्षस्यो विकृताननाः । सीतां निर्भर्त्सयामासुर्वाक्यैः क्रूरैः सुदारुणैः ॥७९॥ तृणवद्भाषितं तासां गणयामास जानकी । गर्जितं च तदा तासां सीतां प्राप्य निरर्थकम् ॥८०॥

मडि भूषायाम् " इत्यस्माद्धातोः पचाद्यच् । मन्दोदरी वा । दडयोरभेदः । दम्भो दाडिमवित्यादिवत् । यद्वा मन्दत्वं चालपत्वम् । "मूढालपापटु निर्भाग्या मन्दाः " इत्यमरः । सूक्ष्मोदरी इत्यर्थः । मन्दा स्थूलपिपीलिकेत्याचक्षते । तस्या इव कृशमस्या उदरमित्यर्थः । ननु पूर्वं धान्यमालिन्या प्रतिषिद्ध इत्युक्तम्, संप्रति मण्डोदर्येत्युच्यते । विप्रतिषिद्धमिदम् । मैवम् । उभाभ्यामपि प्रतिषिद्धत्वेनान्यतरोक्तावविरोधात् । मण्डोदर्यादिनामपरिज्ञानं च हनुमतस्तदीयव्यवहारात् ॥ ७५–७७ ॥ ताभिः देवकन्याभिः । अनेन मण्डोदर्यादिवदन्यासामपि निवारयितृत्वमुक्तम् ॥ ७८ ॥ क्रूरैः क्रूरशब्दैः । सुदारुणैः अर्थतोपि क्रूरैः ॥ ७९ ॥ तृणवत् गणयामासेत्यन्वयः ॥ ८० ॥

ते हननं स्यादित्यर्थः ॥ ७१ ॥ सादृश्यसम्भावनापि दूरापास्तेत्याह दास्येपीति ॥ ७२–७४ ॥ पूर्वं धान्यमालिन्या प्रतिषिद्धमित्युक्तम्, इदानीं मण्डोदरीत्य

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वृथागर्जितनिश्चेष्टाः वृथागर्जितेन निर्व्यापाराः ॥८१॥ ततस्ता इति । तूष्णीं रक्षतेति रावणोक्ता इति शेषः । परिक्षिप्य परिवार्य ॥ ८२ ॥ सुदुःखिता प्रशुशोच, उत्तरोत्तरं दुःखितवतीत्यर्थः ॥ ८३–८६ ॥ अलं शक्ता । " अलं भूषणपर्याप्तिशक्तिवारणवाचकम् " इत्यमरः । परित्रातुम्, एषेति शेषः

वृथागर्जितनिश्चेष्टा राक्षस्यः पिशिताशनाः । रावणाय शशंसुस्ताः सीताध्यवसितं महत् ॥ ८१ ॥ ततस्ताः सहिताः सर्वा विहताशा निरुद्यमाः । परिक्षिप्य समन्तात्तां निद्रावशमुपागताः ॥ ८२ ॥ तासु चैव प्रसुप्तासु सीता भर्तृहिते रता । विलप्य करुणं दीना प्रशुशोच सुदुःखिता ॥ ८३ ॥ तासां मध्यात् समुत्थाय त्रिजटा वाक्यमब्रवीत् । आत्मानं खादत क्षिप्रं न सीता विनशिष्यति ॥ ८४ ॥ जनकस्यात्मजा साध्वी स्नुषा दशरथस्य च । स्वप्नो ह्यद्य मया दृष्टो दारुणो रोमहर्षणः ॥ ८५ ॥ राक्षसां च विनाशाय भर्तुरस्या जयाय च ॥ ८६ ॥ अलमस्मात् परित्रातुं राघवाद्राक्षसीगणम् । अभियाचाम वैदेहीमेतद्धि मम रोचते ॥ ८७ ॥ यस्या ह्येवंविधः स्वप्नो दुःखितायाः प्रदृश्यते । सा दुःखैर्विविधैर्मुक्ता सुखमाप्नोत्यनुत्तमम् ॥ ८८ ॥ प्रणिपातप्रसन्ना हि मैथिली जनकात्मजा ॥८९॥ ततः सा ह्रीमती बाला भर्तुर्विजयहर्षिता । अवोचद्यदि तत्तथ्यं भवेयं शरणं हि वः ॥ ९० ॥ तां चाहं तादृशीं दृष्ट्वा सीतायां दारुणां दशाम् । चिन्तयामास विक्रान्तो न च मे निर्वृतं मनः ॥ ९१ ॥

॥ ८७ ॥ ८८ ॥ अपराधिजनत्राणत्राणे हेतुमाह–प्रणिपातेति ॥ ८९ ॥ ततः त्रिजटावाक्यानन्तरम् । भर्तुर्विजयहर्षिता त्रिजटाकथितस्वप्नसूचितराम विजयहर्षिता । तत् त्रिजटास्वप्नवाक्यम् । शरणं हि व इत्यत्रेतिकरणं द्रष्टव्यम् ॥ ९० ॥ न च मे निर्वृतम् किन्तु दुःखितमित्यर्थः ॥ ९१ ॥

भिधानादुभाभ्यामपीति कल्पनीयम् ॥ ७५–८६ ॥ अलमस्मात्परित्रातुमिति । इयं सीतेति शेषः ॥ ८७–८९ ॥ ततः त्रिजटावाक्यानन्तरम् । भर्तुर्विजयहर्षिता त्रिजटाकथितस्वप्नसूचितरामविजयहर्षिता । तत् त्रिजटास्वप्नवाक्यम् तथ्यं यदि वः शरणं भवेयमित्यवोचदिति सम्बन्धः ॥ ९० ॥ चिन्तयामासेति लिङुत्तम

स०–राक्षसीगणं रावणात्परित्रातुम् अलं समर्था । प्रसादिता सीतेति शेषः । तस्मादभियाचाम प्रार्थयामः ॥ ८७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विधिः उपायः ॥ ९२--१०१ ॥ रामानु०-तन्मे शंसितुमर्हसीत्यतः परं-तस्यास्तद्वचनं श्रुत्वा ह्यहमप्यब्रवं वचः । इत्यर्धं द्रष्टव्यम् । केषुचित्कोशेषु प्रमादात्पातितम् ॥ ९४-९५ ॥ तादिति । त्वया आज्ञप्तमिच्छामि त्वत्कर्तृकमाज्ञापनमिच्छामीत्यर्थः । किंशब्दः क्षेपे । रामलक्ष्मणयोः पार्श्वं त्वां नयामि । उत्तरं किम् एवमेवं वदेत्याज्ञापनरूपमुत्तरं किमित्यर्थः ॥ ९८ ॥

सम्भाषणार्थ च मया जानक्याश्चिन्तितो विधिः । इक्ष्वाकूणां हि वंशस्तु ततो मम पुरस्कृतः ॥ ९२ ॥ श्रुत्वा तु गदितां वाचं राजर्षिगणपूजिताम् । प्रत्यभाषत मां देवी बाष्पैः पिहितलोचना ॥ ९३ ॥ कस्त्वं केन कथं चेह प्राप्तो वानरपुङ्गव । का च रामेण ते प्रीतिस्तन्मे शंसितुमर्हसि ॥ ९४ ॥ तस्यास्तद्वचनं श्रुत्वा ह्यहमप्यब्रवं वचः । देवि रामस्य भर्तुस्ते सहायो भीमविक्रमः । सुग्रीवो नाम विक्रान्तो वानरेन्द्रो महाबलः ॥ ९५ ॥ तस्य मां विद्धि भृत्यं त्वं हनुमन्तमिहागतम् । भर्त्राऽहं प्रेषितस्तुभ्यं रामेणाक्लिष्टकर्मणा ॥ ९६ ॥ इदं च पुरुषव्याघ्रः श्रीमान् दाशरथिः स्वयम् । अङ्गुलीयमभिज्ञानमदात्तुभ्यं यशस्विनि ॥ ९७ ॥ तदिच्छामि त्वयाऽऽज्ञप्तं देवि किं करवाण्यहम् । रामलक्ष्मणयोः पार्श्वं नयामि त्वां किमुत्तरम् ॥ ९८ ॥ एतच्छ्रुत्वा विदित्वा च सीता जनक नन्दिनी । आह रावणमुत्साद्य राघवो मां नयत्विति ॥९९॥ प्रणम्य शिरसा देवीमहमार्यामनिन्दिताम् । राघवस्य मनोह्लादमभिज्ञानमयाचिषम् ॥ १०० ॥ अथ मामब्रवीत् सीता गृह्यतामयमुत्तमः । मणिर्येन महाबाहू रामस्त्वां बहुमन्यते ॥ १०१॥ इत्युक्ता तु वरारोहा मणिप्रवरमद्भुतम् । प्रायच्छत् परमोद्विग्ना वाचा मां संदिदेश ह ॥ १०२॥ ततस्तस्यै प्रणम्याहं राजपुत्र्यै समाहितः । प्रदक्षिणं परिक्राममिहाभ्युद्गतमानसः ॥ १०३ ॥

इत्युक्त्वेति । वाचा मां संदिदेशेति । स्वरामैकवेद्यं प्रागुक्तं काकासुरवृत्तान्तं तिलकनिर्माणादिकं च सन्दिष्टवतीत्यर्थः ॥ १०२ ॥ परिक्रामं

पुरुषैकवचनम् ॥९१॥ मम मया पुरस्कृतः स्तुतः ॥९२-९७॥ त्वया आज्ञप्तमिच्छामि त्वत्कर्तृकमाज्ञापनमिच्छामीत्यर्थः॥९८-१०१॥ इत्युक्त्वेति । वाचा मां सन्दिदेश स्वरामैकवेद्यं प्रागुक्तं काकासुरवृत्तान्तं ति लकनिर्माणादिकं च सन्दिष्टवतीत्यर्थः ॥ १०२ ॥ इहाभ्युद्गतमानसः इहागन्तुं निश्चितमानसः ॥ १०३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पर्यक्रामम् । इहाभ्युद्गतमानसः इहाभ्युद्गते इहाभ्यागमने मानसं यस्य स तथा ॥ १०३–१०५ ॥ एतत् उपयानं यद्यन्यथा भवेत् यदि नोपेयाता मित्यर्थः । तदा द्वौ मासौ मम जीवितम् ततः परं न जीवामीत्यर्थः । न मां द्रक्ष्यति मासद्वयाभ्यन्तरे मां न द्रक्ष्यति चेत् तदा म्रिय इति योज्यम् ।

उत्तरं पुनरेवेदं निश्चित्य मनसा तया । हनुमन् मम वृत्तान्तं वक्तुमर्हसि राघवे ॥ १०४ ॥ यथा श्रुत्वैव नचिरात्तावुभौ रामलक्ष्मणौ । सुग्रीवसहितौ वीरावुपेयातां तथा कुरु ॥ १०५ ॥ यद्यन्यथा भवेदेतद्वौ मासौ जीवितं मम । न मां द्रक्ष्यति काकुत्स्थो म्रिये साऽहमनाथवत् ॥ १०६ ॥ तच्छ्रुत्वा करुणं वाक्यं क्रोधो मामभ्यवर्तत । उत्तरं च मया दृष्टं कार्यशेषमनन्तरम् ॥ १०७ ॥ ततोऽवर्धत मे कायस्तदा पर्वतसन्निभः । युद्धकांक्षी वनं तच्च विनाशयितुमारभे ॥ १०८ ॥ तद्भग्नं वनषण्डं तु भ्रान्तत्रस्तमृगद्विजम् । प्रतिबुद्धा निरीक्षन्ते राक्षस्यो विकृताननाः ॥ १०९ ॥ मां च दृष्ट्वा वने तस्मिन् समागम्य ततस्ततः । ताः समभ्यागताः क्षिप्रं रावणायाचचक्षिरे ॥ ११० ॥ राजन् वनमिदं दुर्गं तव भग्नं दुरात्मना । वानरेण ह्यविज्ञाय तव वीर्यं महाबल ॥ १११ ॥ दुर्बुद्धेस्तस्य राजेन्द्र तव विप्रियकारिणः । वधमाज्ञापय क्षिप्रं यथाऽसौ विलयं व्रजेत् ॥ ११२ ॥ तच्छ्रुत्वा राक्षसेन्द्रेण विसृष्टा भृशदुर्जयाः । राक्षसाः किङ्करा नाम रावणस्य मनोनुगाः ॥ ११३ ॥ तेषामशीतिसाहस्रं शूलमुद्गरपाणिनाम् । मया तस्मिन् वनोद्देशे परिघेण निषूदितम् ॥ ११४ ॥ तेषां तु हतशेषा ये ते गत्वा लघुविक्रमाः । निहतं च महत्सैन्यं रावणायाचचक्षिरे ॥ ११५ ॥

मासशब्दोऽत्र पक्षपरः । "पक्षा वै मासाः" इति श्रुतेः ॥ १०६ ॥ उत्तरम् अनन्तरम् । अनन्तरम् अनन्तरकर्तव्यम्, उत्तरकार्यमित्यर्थः ॥ १०७–११५ ॥

रामानु०–शूलमुद्गरपाणिनामित्यत्र दीर्घाभाव आर्षः ॥ ११४ ॥

मम वृत्तान्तं त्वयाऽनुभूतं मद्विषयं रावणराक्षसीवृत्तान्तम् ॥ १०४ ॥ १०५ ॥ यदि यस्मात् अन्यथा अनागमने द्वौ मासौ मम जीवितं भवेत् । अनाथवत् म्रिये राक्षसीकृतवधे नेति भावः ॥ १०६ ॥ उत्तरं कार्यशेषं लङ्कानाशनरूपम् ॥ १०७–१०९ ॥ समागम्य मिलित्वा ॥ ११०–११३ ॥ शूलमुद्गरपाणिनामित्यत्र दीर्घाभाव आर्षः ॥ ११४–१२४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ततो मे बुद्धिरुत्पन्ना वक्ष्यमाणकार्यविषयेत्यर्थः । तादृशं बुद्धिकार्यमाह चैत्येत्यादिना । चैत्यप्रासादं नगरमध्यस्थप्रासादम् । ललामभूतः

ततो मे बुद्धिरुत्पन्ना चैत्यप्रासादमाक्रमम् । तत्रस्थान् राक्षसान् हत्वा शतं स्तम्भेन वै पुनः । ललामभूतो लङ्कायाः स वै विध्वंसितो मया ॥ ११६ ॥ ततः प्रहस्तस्य सुतं जम्बुमालिनमादिशत् । राक्षसैर्बहुभिः सार्धं घोररूपैर्भयानकैः ॥ ११७ ॥ तमहं बलसम्पन्नं राक्षसं रणकोविदम् । परिघेणातिघोरेण सूदयामि सहानुगम् ॥ ११८ ॥ तच्छ्रुत्वा राक्षसेन्द्रस्तु मन्त्रिपुत्रान् महाबलान् ॥ ११९ ॥ पदातिबलसम्पन्नान् प्रेषयामास रावणः । परिघेणैव तान् सर्वान्नयामि यमसादनम् ॥ १२० ॥ मन्त्रिपुत्रान् हताञ्छ्रुत्वा समरे लघुविक्रमान् । पञ्च सेनाग्रगाञ्छूरान् प्रेषयामास रावणः ॥ १२१ ॥ तानहं सहसैन्यान् वै सर्वानेवाभ्यसूदयम् । ततः पुनर्दशग्रीवः पुत्रमक्षं महाबलम् ॥ १२२ ॥ बहुभी राक्षसैः सार्धं प्रेषयामास रावणः । तं तु मन्दोदरीपुत्रं कुमारं रणपण्डितम् ॥ १२३ ॥ सहसा खं समुत्क्रान्तं पादयोश्च गृहीतवान् । चर्मासिनं शतगुणं भ्रामयित्वा व्यपेषयम् । तमक्षमागतं भग्नं निशम्य स दशाननः ॥ १२४ ॥ तत इन्द्रजितं नाम द्वितीयं रावणः सुतम् । व्यादिदेश सुसंक्रुद्धो बलिनं युद्धदुर्मदम् ॥ १२५ ॥ तच्चाप्यहं बलं सर्वं तं च राक्षसपुङ्गवम् । नष्टौजसं रणे कृत्वा परं हर्षमुपागमम् ॥ १२६ ॥ महतापि महाबाहुः प्रत्ययेन महाबलः । प्रेषितो रावणेनैव सह वीरैर्मदोत्कटैः ॥ १२७ ॥ सोऽविषह्यं हि मां बुद्ध्वा स्वबलं चावमर्दितम् । ब्राह्मेणास्त्रेण स तु मां प्राबध्नाच्चातिवेगितः ॥ १२८ ॥

अलङ्कारभूतः ॥ ११६–११९ ॥ पदातिबलसम्पन्नान् पदातिप्रभृतिसैन्यसंपन्नान् ॥ १२०–१३१ ॥ रामानु०–चर्मासिनमित्यत्र इन्द्रजित्वमार्षम् ॥ १२४ ॥ द्वितीयं प्रेषितपुत्रापेक्षया द्वितीयम् ॥ १२५ ॥ द्वितीयं प्रेषितपुत्रापेक्षया द्वितीयम् ॥ १२५–१२८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रज्जुभिश्चाभिबध्नन्ति ततो मां तत्र राक्षसाः । रावणस्य समीपं च गृहीत्वा मामुपानयन् ॥ १२९ ॥ दृष्ट्वा सम्भाषितश्चाहं रावणेन दुरात्मना । पृष्टश्च लङ्कागमनं राक्षसानां च तं वधम् ॥ १३० ॥ तत्सर्वं च मया तत्र सीतार्थमिति जल्पितम् ॥ १३१ ॥ अस्याहं दर्शनाकांक्षी प्रातस्त्वद्भवनं विभो । मारुतस्यौरसः पुत्रो वानरो हनुमानहम् ॥ १३२ ॥ * रामदूतं च मां विद्धि सुग्रीवसचिवं कपिम् । सोऽहं दूत्येन रामस्य त्वत्सकाशमिहागतः ॥ १३३ ॥ सुग्रीवश्च महातेजाः स त्वां कुशलमब्रवीत् । धर्मार्थकामसहितं हितं पथ्यमुवाच च ॥ १३४ ॥ वसतो ऋश्यमूके मे पर्वते विपुलद्रुमे । राघवो रणविक्रान्तो मित्रत्वं समुपागतः ॥ १३५ ॥ तेन मे कथितं राज्ञा भार्या मे रक्षसा हृता । तत्र साहाय्यमस्माकं कार्यं सर्वात्मना त्वया ॥ १३६ ॥ मया च कथितं तस्मै वालिनश्च वधं प्रति । तत्र साहाय्यहेतोर्मे समयं कर्तुमर्हसि ॥ १३७ ॥ वालिना हृतराज्येन सुग्रीवेण महाप्रभुः । चक्रेऽग्निसाक्षिकं सख्यं राघवः सहलक्ष्मणः ॥ १३८ ॥ तेन वालिनमुत्पाट्य शरेणैकेन संयुगे । वानराणां महाराजः कृतः स प्लवतां प्रभुः ॥ १३९ ॥

अभिबध्नन्ति अभ्यबध्नन् ॥ १२९ ॥ अस्याहमित्यादि । अस्याः सीतायाः । विसन्धिरार्षः ॥ १३२ ॥ १३३ ॥ रामानु०—अस्या इति । अस्याहमित्यत्र अस्याः इति पदच्छेदः । सन्धिरार्षः । अहं प्राप्तः अहं हनुमानित्यहंशब्दद्वयस्य निर्वाहः ॥ १३२ ॥ धर्मार्थकामसहितमिति । तत्र धर्मसाहित्यात् हितं परत्र उपकारकम् अर्थसाहित्यात्पथ्यम् इहोपकारकं चेत्यर्थः ॥ १३४–१३७ ॥ सुग्रीवश्चेत्यादिना सुग्रीवोक्तं कियदनूद्य संप्रति शेषं स्वयं कथयन्नाह—वालिनेति ॥ १३८–१४२ ॥ रामानु०—वालिनेति । सुग्रीवेण, मयेति शेषः । चक्रेऽग्निसाक्षिकं सख्यमिति पाठः ॥ १३८ ॥ वानराणां महाराजः कृतः, अहमित्यत्र शेषः ॥ १३९ ॥

अभिबध्नन्ति अभ्यबध्नन ॥ १२९–१३१ ॥ अस्याहं दर्शनाकाङ्क्षीत्यत्र सन्धिरार्षः । त्वद्भवनं प्रातोऽहं हनुमानहमित्यस्मच्छब्दद्वयस्य निर्वाहः ॥ १३२ ॥ १३३ ॥ धर्मकामार्थसहितं धर्मसहितत्वात् हितम् परलोकोपयोगि । अर्थकामयुक्तत्वात्पथ्यम् ॥ १३४–१३७ ॥ सुग्रीवेण, मयेति शेषः ॥ १३८ ॥ वानराणां महाराजः कृतः, अह

* [शृणु चापि समादेशं वदहं प्रब्रवीमि ते । राक्षसेश हरीशत्वां वाक्यमाह समाहितम् ॥] इत्यधिकः पाठः ।

स०—समोऽहितेन शत्रुणेति समाहितः । पूर्वं वालिमुक्तनः सख्येपि इदानीं रामसाहाय्येन शत्रुं त्वामित्यर्थः ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तस्येति । तेन साहाय्यस्यास्माभिः कर्तव्यत्वेन प्रस्थापितः, दूत इति शेषः ॥ १४० ॥ विधमन्ति यावदिति । "यावत्पुरानिपातयोर्लट्" इति लृडर्थे लट् ॥ १४१ ॥ वानराणामिति । ये हि निमन्त्रिताः युद्धसाहाय्यार्थमाहूताः देवतानां सकाशं गच्छन्ति तेषां वानराणां प्रभावः पुरा केन न विदितः, त्वया विज्ञात एवेति भावः ॥ १४२ ॥ इदं वचस्सुग्रीवोक्तमेव

तस्य साहाय्यमस्माभिः कार्यं सर्वात्मना त्विह । तेन प्रस्थापितस्तुभ्यं समीपमिह धर्मतः । क्षिप्रमानीयतां सीता दीयतां राघवाय च ॥ १४० ॥ यावन्न हरयो वीरा विधमन्ति बलं तव ॥ १४१ ॥ वानराणां प्रभावो हि न केन विदितः पुरा । देवतानां सकाशं च ये गच्छन्ति निमन्त्रिताः ॥१४२॥ इति वानरराजस्त्वामाहेत्यभिहितो मया । मामैक्षत ततः क्रुद्धश्चक्षुषा प्रदहन्निव ॥ १४३ ॥ तेन वध्योऽहमाज्ञप्तो रक्षसा रौद्रकर्मणा । मत्प्रभावमविज्ञाय रावणेन दुरात्मना ॥ १४४ ॥ ततो विभीषणो नाम तस्य भ्राता महामतिः । तेन राक्षसराजोऽसौ याचितो मम कारणात् ॥ १४५ ॥ नैवं राक्षसशार्दूल त्यज्यतामेष निश्चयः । राजशास्त्रव्यपेतो हि मार्गः संसेव्यते त्वया ॥ १४६ ॥ दूतवध्या न दृष्टा हि राजशास्त्रेषु राक्षस । दूतेन वेदितव्यं च यथार्थं हितवादिना ॥ १४७ ॥ सुमहत्य पराधेऽपि दूतस्यातुलविक्रम । विरूपकरणं दृष्टं न वधोऽस्तीति शास्त्रतः ॥१४८॥ विभीषणेनैवमुक्तो रावणः संदिदेश तान् । राक्षसानेतदेवास्य लाङ्गूलं दह्यतामिति ॥ १४९ ॥ ततस्तस्य वचः श्रुत्वा मम पुच्छं समन्ततः । वेष्टितं शणवल्कैश्च जीर्णैः कार्पासजैः पटैः ॥ १५० ॥

मयोक्तमित्याह–इतीति ॥१४३–१४५॥ नैवमिति । कर्तव्यमिति शेषः । राजशास्त्रम् राजधर्मशास्त्रम् ॥१४६॥ वेदितव्यं वक्तव्यमित्यर्थः ॥१४७–५०॥

मिति शेषः ॥ १३९ ॥ तस्य रामस्य तेन साहाय्यस्य कर्तव्यत्वेन प्रस्थापितः, दूत इति शेषः । तुभ्यं तव । धर्मतः कलहं विनेत्यर्थः । सीता दीयताम् ॥ १४० ॥ विपक्षे बाधकमाह–यावदिति । विधमन्ति विधमिष्यन्ति ॥ १४१ ॥ लङ्घानाशने वानराणां सामर्थ्यमस्तीत्याशयेनाह–वानराणामिति । ये निमन्त्रिताः युद्धसाहाय्यार्थमाहूताः देवतानां सकाशं गच्छन्ति तेषां वानराणां प्रभावः पुरा त्वया न विदितः न विज्ञातो हीति योजना ॥ १४२॥१४३ ॥ मत्प्रभावं वरदानलब्धावध्यत्व रूपम् ॥ १४४ ॥ तत इत्यादि श्लोकत्रयमेकं वाक्यम् । शास्त्रेण दूतवध्या न दृष्टा, विरूपकरणं ताडनं वा शास्त्रतः दृष्टमिति राक्षसराजः रावणः तेन विभीषणेन

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यन्त्रितस्य आवृतस्य ॥ १५१ ॥ तत इति । नगरद्वारमागतास्तन्तः राजमार्गे अघोषयन्निति योजना ॥ १५२–१५४ ॥ पुच्छेन चेति । अट्टं बलभिः ॥ १५५–१५८ ॥ विस्मयोदन्तभाषितां भाषितविस्मयोदन्ताम्, उक्ताद्भुतवार्तामित्यर्थः । विस्मयवृत्तान्तव्यवहृतामिति वा ॥ १५९ ॥ निमित्ते

राक्षसाः सिद्धसन्नाहास्ततस्ते चण्डविक्रमाः । तदाऽदह्यन्त मे पुच्छं निघ्नन्तः काष्ठमुष्टिभिः । बद्धस्य बहुभिः पाशैर्यन्त्रितस्य च राक्षसैः ॥ १५१ ॥ ततस्ते राक्षसाः शूरा बद्धं मामग्निसंवृतम् । अघोषयन् राजमार्गे नगरद्वार मागताः ॥ १५२ ॥ ततोऽहं सुमहद्रूपं संक्षिप्य पुनरात्मनः ॥ १५३ ॥ विमोचयित्वा तं बन्धं प्रकृतिस्थः स्थितः पुनः । आयसं परिघं गृह्य तानि रक्षांस्यमूदयम् । ततस्तन्नगरद्वारं वेगेनाप्लुतवानहम् ॥ १५४ ॥ पुच्छेन च प्रदीप्तेन तां पुरीं साट्टगोपुराम् । दहाम्यहमसम्भ्रान्तो युगान्ताग्निरिव प्रजाः ॥ १५५ ॥ विनष्टा जानकी व्यक्तं न ह्यदग्धः प्रदृश्यते । लङ्कायां कश्चिदुद्देशः सर्वा भस्मीकृता पुरी ॥ १५६ ॥ दहता च मया लङ्कां दग्धा सीता न संशयः । रामस्य हि महत् कार्यं मयेदं वितथीकृतम् ॥ १५७ ॥ इति शोकसमाविष्टश्चिन्तामहमुपागतः ॥ १५८ ॥ अथाहं वाचमश्रौषं चारणानां शुभाक्षराम् । जानकी न च दग्धेति विस्मयोदन्तभाषिताम् ॥ १५९ ॥ ततो मे बुद्धिरुत्पन्ना श्रुत्वा तामद्भुतां गिरम् । अदग्धा जानकीत्येवं निमित्तैश्चोपलक्षिता ॥ १६० ॥ दीप्यमाने तु लाङ्गूले न मां दहति पावकः । हृदयं च प्रहृष्टं मे वाताः सुरभिगन्धिनः ॥ १६१ ॥ तैर्निमित्तैश्च दृष्टार्थैः कारणैश्च महागुणैः । ऋषि वाक्यैश्च सिद्धार्थैरभवं हृष्टमानसः ॥ १६२ ॥

श्चोपलक्षिता शकुनादिभिश्च सीता न दग्धेति ज्ञातेत्यर्थः॥ १६० ॥ हृदयं प्रहृष्टम्, आसीदिति शेषः । सुरभिगन्धिनः, आसन्निति शेषः ॥ १६१ ॥ दृष्टार्थैः दृष्टफलैः । निमित्तैः शकुनैः । कारणैः नेत्रस्फुरणादिभिः । महागुणैः फलव्याप्तैः । सिद्धार्थैः अबाधितार्थैः । तत्र हेतुत्वेन ऋषिपदोपादानम् ॥ १६२ ॥

याचित इति सम्बन्धः ॥ १४५–१५० ॥ यन्त्रितस्य निरुद्धस्य ॥ १५१–१५८ ॥ विस्मयोदन्तभाषितां विस्मयवृत्तान्तविषयव्यवहाराम् । विस्मयोदन्तभाषिणाम् इति वा पाठः ॥ १५९ ॥ निमित्तैः शुभसूचकैः ॥ १६० ॥ निमित्तान्याह–दीप्यमान इत्यादि ॥ १६१ ॥ दृष्टार्थैः दृष्टसंवादैः । महागुणैः कारणैः मत्प्रवृत्तिकारणैः सीता

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पुनरित्यर्धमेकं वाक्यम्। विसृष्टः प्रेषितोऽस्मि ॥ १६३ ॥ तत्र लङ्कासमीपे। सामीप्ये सप्तमी। तत्र वर्तमानम् अरिष्टं पर्वतम् ॥ १६४ ॥ तत इति।

पुनर्दृष्ट्वा च वैदेहीं विसृष्टश्च तया पुनः ॥ १६३ ॥ ततः पर्वतमासाद्य तत्रारिष्टमहं पुनः। प्रतिप्लवनमारभ्य युष्मद्दर्शनकांक्षया ॥ १६४ ॥ ततः पवनचन्द्रार्कसिद्धगन्धर्वसेवितम्। पन्थानमहमाक्रम्य भवतो दृष्टवानिह ॥ १६५ ॥ राघवस्य प्रभावेण भवतां चैव तेजसा। सुग्रीवस्य च कार्यार्थं मया सर्वमनुष्ठितम् ॥ १६६ ॥ एतत्सर्वं मया तत्र यथावदुपपादितम्। अत्र यन्न कृतं शेषं तत्सर्वं क्रियतामिति ॥ १६७ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे अष्टपञ्चाशः सर्गः ॥ ५८ ॥

एतदाख्याय तत्सर्वं हनुमान् मारुतात्मजः। भूयः समुपचक्राम वचनं वक्तुमुत्तरम् ॥ १ ॥ सफलो राघवोद्योगः सुग्रीवस्य च संभ्रमः। शीलमासाद्य सीताया मम च प्रवणं मनः ॥ [आर्यायाः सदृशं शीलं सीतायाः प्लवगर्षभाः।]॥२॥

भवतो दृष्टवानिह। भवतः युष्मान्। इह समुद्रतीरे ॥ १६५ ॥ राघवस्येति। भवतां चैव तेजसा भवदनुग्रहेणेत्यर्थः। सुग्रीवस्य च कार्यार्थम्, स्वामिकार्यस्यावश्यकर्तव्यत्वादिति भावः। कार्यार्थं कार्यवस्तु। क्लीबत्वमार्षम्। अस्यानुवादवाक्यविस्तरस्य प्रयोजनं वानराणां श्रवणकुतूहलातिशयप्रकाशनम्। अस्मिन् सर्गे सार्धषट्षष्ट्युत्तरशतश्लोकाः ॥ १६६ ॥ १६७ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टपञ्चाशः सर्गः ॥ ५८ ॥ एतदिति। तदेतदाख्याय उत्तरं वचनं वक्तुमुपचक्रामेत्यन्वयः ॥ १ ॥ अथ संप्रत्येव रावणं जित्वा रामरूपैः ॥१६२॥१६३॥ आरेभे लिङुत्तमपुरुषैकवचनम् ॥१६४॥ तत इत्यनन्तरम्–अहं पन्थानमाक्रम्य भवतो दृष्टवानिह इति पाठः। अन्यथाऽहंशब्दपौनरुक्त्यात् ॥ १६५–१६७ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायाम् अष्टपञ्चाशः सर्गः ॥५८ ॥ १ ॥ सफल इति। सम्भ्रमः

स०—राघवोद्योगः सीतावृत्तान्तज्ञानोत्साहः। सुग्रीवस्य सङ्गमः सुग्रीवेण सह सख्यं च। सीतायाः शीलं पातिव्रत्यादिसद्वृत्तम्। आसाद्य प्राप्य। दृष्ट्वा सफल इति ज्ञातः। एतादृश्याः स्त्रिया अन्यस्याः काप्य भावेनास्या विषये बहुलायासोपि यत्नः कर्तव्य एवेति भावः। **आर्यायाः** पार्वत्याः सदृशं शीलं सीतायाः। अथवा आर्यायाः सीतायाः शीलं सीताया एव सदृशमित्यनन्वयालङ्कारः ॥ २ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सीतया सहैवास्माभिः प्रतियातव्यमिति हृदि निधायाह–सफल इति । संभ्रमः त्वरा, उत्साह इति यावत् । कुतस्साफल्यमित्याशङ्क्य सीतापातिव्रत्यो पलम्भादित्याह–शीलमिति । शीलं वृत्तम्, पातिव्रत्यमिति यावत् । अहं तु प्रागेव तदेकशरण इत्याह–मम चेति । प्रवणं प्रह्वं तत्परमिति यावत् । सीताचारित्रस्य न किंचिदसाध्यमस्तीति भावः ॥ २ ॥ तर्हि तं दुरात्मानं रावणं स्पृशन्तमेव किमिति नादहदित्याशङ्क्य तस्यापि तपस्सम्प त्ति

तपसा धारयेल्लोकान् क्रुद्धो वा निर्दहेदपि । सर्वथाऽतिप्रवृद्धोऽसौ रावणो राक्षसाधिपः । तस्य तां स्पृशतो गात्रं तपसा न विनाशितम् ॥ ३ ॥ न तदग्निशिखा कुर्यात् संस्पृष्टा पाणिना सती । जनकस्यात्मजा कुर्याद्यत् क्रोधकलुषीकृता ॥ ४ ॥

सद्भावादित्याह–तपसेत्यादिना । यद्वा रावणतपःकथनद्वारा सीतायाः पातिव्रत्यातिशयमाह–तपसेत्यादिना । तपसा अतिप्रवृद्ध इत्यन्वयः । कोप प्रसादाभ्यां सर्वलोकनिग्रहानुग्रहसमर्थोऽसौ रावणः सर्वथा महातपस्संपन्नः । अत एव सीतास्पर्शेऽप्यविनाशित इत्यर्थः ॥ ३ ॥ तर्हि सीताशीलं दुर्बल मस्माकं किमुपकरिष्यतीत्याशङ्क्य नेत्याह–न तदिति । सीताशीलमेव बलीयस्त्वादुपकरिष्यतीत्यर्थः । क्रोधकलुषीकृतेति वचनाद्भर्तृमुखेन वैर निर्यातनं वीरपत्नीधर्मः । अन्यथा महालाघवं भर्तुरित्यद्यापि पारतन्त्र्यपालनाय तादृक्क्रोधाकरणाद्रावणो जीवतीति गम्यते । एतदेवोक्तं प्राक्– "असन्देशात्तु रामस्य तपसश्चानुपालनात् । न त्वां कुर्मि दशग्रीव भस्म भस्मार्ह तेजसा ॥" इति ॥ ४ ॥

त्वरा, उत्साह इत्यर्थः । कुतः साफल्यमित्याशङ्क्य सीतापातिव्रत्यादित्याह–शीलमिति । शीलं सद्वृत्तम् । पातिव्रत्यमिति यावत् । आसाद्य दृष्ट्वेत्यर्थः । मम मनः प्रवणं प्रह्वम्, अभूदिति शेषः । सीतापातिव्रत्यस्य न किञ्चिदसाध्यमस्तीति मम निश्चयोऽभूदिति भावः ॥ २ ॥ तर्हि दुरात्मानं रावणं किमिति नादहदित्याशङ्क्य तस्यापि तपस्सम्पत्तिमत्त्वादित्याह–तपसेति सार्धश्लोकेन । सर्वथाऽसौ तपसाऽतिप्रवृद्धः । कोपप्रसादाभ्यां सर्वलोकनिग्रहानुग्रहसमर्थोऽसौ रावणो महातपस्सम्पन्न इत्यर्थः । अत एव तां सीतां स्पृशतोऽपि तस्य गात्रं तपसा न विनाशितमिति सम्बन्धः ॥ ३ ॥ तर्हि सीताशीलं दुर्बलमस्माकं किमुपकरिष्यतीत्याशङ्क्य दुर्बलं न भवतीत्याह–न तदिति । जनकस्यात्मजा क्रोधकलुषीकृता सती यत्कुर्यात् पाणिना स्पृष्टा अग्निशिखा तत्र कुर्यादिति सम्बन्धः । क्रोधकलुषीकृतेति विशेषणात् भर्तृमुखेन वैरनिर्यातन वीरपत्नीधर्मः । अन्यथा महल्लाघवं भर्तुरित्यद्यापि भर्तृवीर्यपरिपालनाय तादृक्क्रोधाकरणात् रावणो जीवति अत एव प्राक् 'असन्देशात्तु

स०–सर्वथा सर्वप्रकारेण तपोबलादिनाऽतिप्रकृष्टः अभिवृद्धः । कथमेवं ज्ञायत इत्यत आह–**यस्येति** । सर्वथा रावणतपोबलेन सीतायाः क्रोपातिशयानुदयात्तस्य जीवनमिति फलितार्थः ॥ ३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जाम्बवत्प्रमुखान् सर्वाननुज्ञाप्य महाहरीन् । अस्मिन्नेवंगते कार्ये भवतां च निवेदिते ॥ ५ ॥ न्याय्यं स्म सह वैदेह्या द्रष्टुं तौ पार्थिवात्मजौ ॥ ६ ॥ अहमेकोऽपि पर्याप्तः सराक्षसगणां पुरीम् । तां लङ्कां तरसा हन्तुं रावणं च महाबलम् ॥ ७ ॥ किं पुनः सहितो वीरैर्बलवद्भिः कृतात्मभिः । कृतास्त्रैः प्लवगैः शूरैर्मत्तुल्यैर्विजयैषिभिः ॥ ८ ॥ अहं तु रावणं युद्धे ससैन्यं सपुरस्सरम् । सहपुत्रं वधिष्यामि सहोदरयुतं युधि ॥ ९ ॥ ब्राह्ममैन्द्रं च रौद्रं च वायव्यं वारुणं तथा । यदि शक्रजितोऽस्त्राणि दुर्निरीक्षाणि संयुगे ॥ १० ॥ तान्यहं विधमिष्यामि निहनिष्यामि राक्षसान् । भवतामभ्यनुज्ञातो विक्रमो मे रुणद्धि तम् ॥ ११ ॥ मयाऽतुला विसृष्टा हि शैलवृष्टिर्निरन्तरा । देवानपि रणे हन्यात् किं पुनस्तान्निशाचरान् ॥ १२ ॥ सागरोऽप्यतियाद्वेलां मन्दरः प्रचलेदपि । न जाम्बवन्तं समरे कम्पयेदरिवाहिनी ॥ १३ ॥ सर्वराक्षससङ्घानां राक्षसा ये च पूर्वकाः । अलमेको विनाशाय वीरो वालिसुतः कपिः ॥ १४ ॥

एवं स्थिते युष्मदनुमत्या भृत्यविजयोऽपि स्वामिन एवेति कृत्वा सीतारामपदावलम्बादहमेव रावणं निर्जित्य सीतापुरस्कारेणैव राघवौ द्रक्ष्यामीत्याह–जाम्बवदिति ॥ ५ ॥ ६ ॥ न चाशक्तिशङ्का कार्येति बहुधा प्रपञ्चयन्नाह–अहमित्यादिना ॥ ७–९ ॥ ब्राह्ममित्यादि । अभ्यनुज्ञातः अभ्यनुज्ञानात् । पञ्चम्यास्तसिः । मे विक्रमः तं रावणम् रुणद्धि हन्तीत्यर्थः ॥ १०–१२ ॥ अतियात् आर्षं ह्रस्वत्वम् ॥ १३ ॥ सर्वेति । पूर्वकाः,

रामस्य' इत्युक्तमिति भावः ॥ ४ ॥ भृत्यजयोऽपि स्वामिन एवेति कृत्वा सीतापातिव्रत्यमहिम्ना रावणं वयमेव जित्वा देव्या सह राघवौ द्रक्ष्याम इत्याह–जाम्बवत्प्रमुखानिति । अस्मिन् कार्ये एवंगते भवतां निवेदिते सति जाम्बवत्प्रमुखान् सर्वाननुज्ञाप्य वैदेह्या सह तौ पार्थिवात्मजौ द्रष्टुं न्याय्यं स्मेति सम्बन्धः । जाम्बवदादयो यद्यनुजानीयुः तदा राक्षसान् हत्वा देव्या सहैव रामसमीपं गमिष्याम इति भावः ॥ ५ ॥ ६ ॥ न चाशक्तिशङ्का कार्येत्याह–अहमेकोऽपीत्यादि ॥ ७ ॥ कृतास्त्रैः देवांशत्वादस्त्रप्रयोगसमर्थैः ॥ ८–१० ॥ अभ्यनुज्ञातः अभ्यनुज्ञानादित्यर्थः । मे विक्रमः तम् इन्द्रजितं रुणद्धि वारयति, आक्रमतीत्यर्थः । भवतामनुज्ञया इन्द्रजितमपि वधिष्यामीति भावः ॥ ११ ॥ १२ ॥ इदानीं सर्वेऽपि भवन्तस्तद्वधे समर्था इत्याह–सागरोऽपीति ॥१३॥ ये च पूर्वकाः, तेषामपीति शेषः ॥१४–२१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तेषामिति शेषः ॥ १४–२१ ॥ मयैवेति । दग्धत्वेप्यङ्गारावस्था भवति साऽपि नास्तीत्याह–भस्मीकृतेति ॥ २२ ॥ नामविश्रावणमेवाह–जयतीति ।

पनसस्योरुवेगेन नीलस्य च महात्मनः । मन्दरोऽप्यवशीर्येत किं पुनर्युधि राक्षसाः ॥ १५ ॥ सदेवासुरयक्षेषु गन्धर्वोरगपक्षिषु । मैन्दस्य प्रतियोद्धारं शंसत द्विविदस्य वा ॥ १६ ॥ अश्विपुत्रौ महाभागावेतौ प्लवगसत्तमौ । एतयोः प्रतियोद्धारं न पश्यामि रणाजिरे ॥ १७ ॥ पितामहवरोत्सेकात् परमं दर्पमास्थितौ । अमृतप्राशिनावेतौ सर्ववानरसत्तमौ ॥ १८ ॥ अश्विनोर्माननार्थं हि सर्वलोकपितामहः । सर्वावध्यत्वमतुलमनयोर्दत्तवान् पुरा ॥ १९ ॥ वरोत्सेकेन मुक्तौ च प्रमथ्य महतीं चमूम् । सुराणाममृतं वीरौ पीतवन्तौ प्लवङ्गमौ ॥ २० ॥ एतावेव हि संक्रुद्धौ सवाजिरथकुञ्जराम् । लङ्कां नाशयितुं शक्तौ सर्वे तिष्ठन्तु वानराः ॥ २१ ॥ मयैव निहता लङ्का दग्धा भस्मीकृता पुनः । राजमार्गेषु सर्वत्र नाम विश्रावितं मया ॥ २२ ॥ जयत्यतिबलो रामो लक्ष्मणश्च महाबलः । राजा जयति सुग्रीवो राघवेणाभिपालितः ॥ २३ ॥ अहं कोसलराजस्य दासः पवनसम्भवः । हनुमानिति सर्वत्र नाम विश्रावितं मया ॥ २४ ॥ अशोकवनिकामध्ये रावणस्य दुरात्मनः । अधस्ताच्छिंशुपावृक्षे साध्वी करुणमास्थिता ॥ २५ ॥ राक्षसीभिः परिवृता शोकसन्तापकर्शिता । मेघलेखापरिवृता चन्द्रलेखेव निष्प्रभा । अचिन्तयन्ती वैदेही रावणं बलदर्पितम् ॥ २६ ॥ पतिव्रता च सुश्रोणी अवष्टब्धा च जानकी ॥ २७ ॥

जयति सर्वोत्कर्षेण वर्तते । तदुक्तं हरिणा–"जयिर्जयाभिभवयोराद्यर्थेऽसावकर्मकः । उत्कर्षप्राप्तिराद्यार्थो द्वितीयेऽर्थे सकर्मकः ॥" इति ॥ २३ ॥ २४ ॥ अथ सीतादुर्दशाविमर्शेऽपि सम्प्रत्यसौ समानेतव्येत्याशयेन तद्दशां दर्शयति–अशोकेत्यादिना ॥ २५ ॥ २६ ॥ पतिव्रता चेत्यादि ।

मयेति । नाम विश्रावितम्, सुग्रीवादेरिति शेषः ॥ २२ ॥ तदेवाह–जयतीति ॥ २३ ॥ २४ ॥ सीतादुर्दशाविमर्शेऽपि संप्रति सा समानेतव्येत्याशयेन तद्दशां वर्णयति–अशोकवनिकेत्यादि ॥ २५ ॥ अचिन्तयन्ती अगणयन्ती ॥ २६ ॥ अवष्टब्धा निरुद्धा ॥ २७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पौलोमीव पुरन्दरे इति। नहुषनिर्बन्ध इति भावः ॥२७–२९॥ प्रमदावने अशोकवनिकायाम्। विनिवृत्तार्था त्यक्तप्रयोजना। रावणप्रलोभनवाक्यैरवशीकृतेत्यर्थः। सर्वमर्थं रामोद्योगादिकम्। दर्शिता बोधिता ॥३०–३२॥ समुदाचारः चारित्रमिति यावत्। नन्वेवंमाहात्म्या सीता स्वयमेव रावणं किमिति

अनुरक्ता हि वैदेही रामं सर्वात्मना शुभा। अनन्यचित्ता रामे च पौलोमीव पुरन्दरे ॥ २८ ॥ तदेकवासः संवीता रजोध्वस्ता तथैव च। शोकसन्तापदीनाङ्गी सीता भर्तृहिते रता ॥ २९ ॥ सा मया राक्षसीमध्ये तर्ज्यमाना मुहुर्मुहुः। राक्षसीभिर्विरूपाभिर्दृष्टा हि प्रमदावने ॥ ३० ॥ एकवेणीधरा दीना भर्तृचिन्तापरायणा। अधःशय्या विवर्णाङ्गी पद्मिनीव हिमागमे ॥ ३१ ॥ रावणाद् विनिवृत्तार्था मर्तव्यकृतनिश्चया। कथंचिन्मृगशावाक्षी विश्वासमुपपादिता ॥ ३२ ॥ ततः सम्भाषिता चैव सर्वमर्थं च दर्शिता। रामसुग्रीवसख्यं च श्रुत्वा प्रीतिमुपागता ॥ ३३ ॥ नियतः समुदाचारो भक्तिर्भर्तरि चोत्तमा। यन्न हन्ति दशग्रीवं स महात्मा कृतागसम्। निमित्तमात्रं रामस्तु वधे तस्य भविष्यति ॥ ३४ ॥ सा प्रकृत्यैव तन्वङ्गी तद्वियोगाच्च कर्शिता। प्रतिपत्पाठशीलस्य विद्येव तनुतां गता ॥ ३५ ॥ एवमास्ते महाभागा सीता शोकपरायणा। यदत्र प्रतिकर्तव्यं तत्सर्वमुपपद्यताम् ॥ ३६ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

न हन्तीत्याशङ्क्याह–यन्न हन्तीति। दशग्रीवं न हन्तीति यत् तत्र कारणं स दशाननः महात्मा महानुभावः। शापनिबन्धनदुर्मरणाभावादिति भावः। अतस्तस्य वधे रामस्तु राम एव निमित्तमात्रं भविष्यति। तथा तस्योत्कर्षात्। सीता तु निमित्तकारणमिति शेषः। भर्त्रैव वैरनिर्यातनं वीरपत्नीधर्मः अन्यथा भर्तुर्महल्लाघवमिति मनीषया न स्वयं हन्ति न त्वसामर्थ्यादिति भावः ॥३४॥३५॥ फलितमुपसंहरति–एवमिति। उपपद्यताम् अनुष्ठीयताम्।

पौलोमीव पुरन्दरे इति, नहुषबद्धापीति भावः ॥ २८--३१ ॥ रावणाद्विनिवृत्तार्था विनिवृत्तः अर्थः प्रयोजनं यस्यास्सा, रावणप्रलोभनवाक्यैरवशीकृतेत्यर्थः ॥३२॥ दर्शिता उक्तेत्यर्थः ॥ ३३ ॥ नियतः समुदाचारः दृढपातिव्रत्यं भर्तरि उत्तमा भक्तिश्च दशग्रीवं न हन्तीति यत् अतः स दशाननो महात्मा शापनिबन्धनदुर्मरणा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अस्मिन् सर्गे सार्द्धषट्त्रिंशच्छ्लोकाः ॥ ३६ ॥ इति श्रीगोविन्द० श्रीरामा० शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकोनषष्टितमः सर्गः ॥ ५९ ॥ तस्येत्यादि ॥ १ ॥ अयुक्तं त्विति । वानरा इति सम्बोधनम् ॥२–६॥ अथ जाम्बवानङ्गदवाक्यं बहुमन्यमानस्सुहृद्भावेन प्रतिषेधति–न तावदिति ।

तस्य तद्वचनं श्रुत्वा वालिसूनुरभाषत ॥ १॥ अयुक्तं तु विना देवीं दृष्टवद्भिश्च वानराः । समीपं गन्तुमस्माभी राघवस्य महात्मनः ॥२॥ दृष्टा देवी न चानीता इति तत्र निवेदनम् । अयुक्तमिव पश्यामि भवद्भिः ख्यातविक्रमैः ॥ ३ ॥ न हि नः प्लवने कश्चिन्नापि कश्चित्पराक्रमे । तुल्यः सामरदैत्येषु लोकेषु हरिसत्तमाः ॥ ४ ॥ तेष्वेवं हतवीरेषु राक्षसेषु हनूमता । किमन्यदत्र कर्तव्यं गृहीत्वा याम जानकीम् ॥ ५ ॥ तमेवं कृतसङ्कल्पं जाम्बवान् हरिसत्तमः । उवाच परमप्रीतो वाक्यमर्थवदर्थवित् ॥ ६ ॥ न तावदेषा मतिरक्षमा नो यथा भवान् पश्यति राजपुत्र । यथा तु रामस्य मतिर्निविष्टा तथा भवान् पश्यतु कार्यसिद्धिम् ॥७॥ इत्यार्षे० श्रीमत्सुन्दरकाण्डे षष्टितमः सर्गः ॥६०॥

अक्षमा अयुक्ता न किन्तु युक्तैवेत्यर्थः । यद्यपि सम्यगुक्तं समर्थैश्चापि रामाज्ञानुसारेण कर्तव्यम् न स्वातन्त्र्येणेत्यर्थः । अस्मिन् सर्गे सार्धषट्श्लोकाः ॥ ७ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षष्टितमः सर्गः ॥ ६० ॥

भावादिति भावः । देव्या तस्य वधाकरणे हेतुमाह निमित्तमात्रमिति । तुशब्दोऽवधारणे, निमित्तमात्रं सीतेति भावः । तस्य वधे राम एव भविष्यति ॥३४--३६॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायाम् एकोनषष्टितमः सर्गः ॥ ५९ ॥ १ ॥ २ ॥ दृष्टा देवी न चानीतेति भवद्भिर्निवेदितुं न युक्तमिव पश्यामीति सम्बन्धः ॥ ३ ॥ ४ ॥ तेष्विति । हनुमता तेषु राक्षसेषु हतशेषेषु सत्सु । अत्र राक्षसेषु अन्यत् किं कर्तव्यम् ? न किमपि किन्तु जानकीं गृहीत्वा यामेति सम्बन्धः ॥ ५ ॥ ६ ॥ जाम्बवानङ्गदस्य मतं बहुमान्य सुहृद्भावेन निवर्तयति–न तावदिति । हे राजपुत्र ! यथा भवान् पश्यति एषा मतिः नः अस्माकम् अक्षमा न अयुक्ता न किन्तु युक्तैव तथापि यथा रामस्य मतिर्निविष्टा अवस्थिता तथा भवान् कार्यसिद्धिं पश्यत्विति सम्बन्धः ॥७॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां षष्टितमः सर्गः ॥ ६० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ततो जाम्बवतो वाक्यमगृह्णन्त वनौकसः । अङ्गदप्रमुखा वीरा हनूमांश्च महाकपिः ॥ १ ॥ प्रीतिमन्तस्ततः सर्वे वायुपुत्रपुरस्सराः । महेन्द्राद्रिं परित्यज्य पुप्लुवुः प्लवगर्षभाः ॥ २ ॥ मेरुमन्दरसङ्काशा मत्ता इव महागजाः । छादयन्त इवाकाशं महाकाया महाबलाः ॥ ३ ॥ सभाज्यमानं भूतैस्तमात्मवन्तं महाबलम् । हनुमन्तं महावेगं वहन्त इव दृष्टिभिः ॥ ४ ॥ राघवे चार्थनिर्वृत्तिं कर्तुं च परमं यशः । समाधाय समृद्धार्थाः कर्मसिद्धिभिरुन्नताः ॥ ५ ॥ प्रियाख्यानोन्मुखाः सर्वे सर्वे युद्धाभिनन्दिनः । सर्वे रामप्रतीकारे निश्चितार्था मनस्विनः ॥ ६ ॥ प्लवमानाः खमाप्लुत्य ततस्ते काननौकसः । नन्दनोपममासेदुर्वनं द्रुमलतायुतम् ॥ ७ ॥ यत्तन्मधुवनं नाम सुग्रीवस्याभिरक्षितम् । अधृष्यं सर्वभूतानां सर्वभूतमनोहरम् ॥ ८ ॥ यद्रक्षति महावीर्यः सदा दधिमुखः कपिः । मातुलः कपिमुख्यस्य सुग्रीवस्य महात्मनः ॥ ९ ॥ ते तद्वनमुपागम्य बभूवुः परमोत्कटाः । वानरा वानरेन्द्रस्य मनः कान्ततमं महत् ॥ १० ॥ ततस्ते वानरा हृष्टा दृष्ट्वा मधुवनं महत् । कुमारमभ्ययाचन्त मधूनि मधुपिङ्गलाः ॥ ११ ॥

ततः इत्यादि ॥ १ ॥ प्रीतिमन्त इत्यादि ॥ २ ॥ ३ ॥ सभाज्यमानं संपूज्यमानम् । वहन्त इव दृष्टिभिरिति । प्रीतिपूर्वकानिमिषदर्शनाद्दृष्टिष्वारोप्य नयन्त इवेत्युत्प्रेक्षा ॥४॥ अर्थनिर्वृत्तिम् अर्थसिद्धिम् । समाधाय निश्चित्य सङ्कल्प्य वा । समृद्धार्थाः सिद्धकार्याः । कर्मसिद्धिभिः कार्यसिद्धिभिः उन्नताः इतरेभ्य उत्कृष्टाः ॥ ५ ॥ रामप्रतीकारे रामप्रत्युपकारे । पुप्लुवुरिति पूर्वेण सम्बन्धः ॥ ६–९ ॥ परमोत्कटाः परमोत्सुकाः ॥ १० ॥ मधुपिङ्गलाः मधुवत्

अगृह्णन्त युक्तियुक्तत्वेनामन्यन्त ॥ १ ॥ पुप्लुवुः प्लवन्तो जग्मुः ॥ २ ॥ आकाशं छादयन्त इवेत्युत्प्रेक्षा ॥ ३ ॥ सभाज्यमानं पूज्यमानम् । वहन्त इव दृष्टिभिरिति प्रीतिपूर्वकानिमिषदर्शनात दृष्टीनां वाहकत्वोत्प्रेक्षा ॥ ४ ॥ अर्थनिर्वृत्तिं कार्यसिद्धिम् । समाधाय निश्चित्य पुप्लुवुरिति पूर्वेण सम्बन्धः ॥ ५ ॥ रामप्रतीकारे रामस्य प्रत्युपकारे ॥ ६ ॥ वनं सुग्रीवस्य मधुवनम् ॥ ७–९ ॥ परमोत्कटाः परमोत्सुकाः ॥ १० ॥ मधुपिङ्गलाः मधुवत्पिङ्गलवर्णाः ॥ ११ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पिङ्गलवर्णाः वानराः ॥ ११ ॥ अनुमान्य अनुमतिं कारयित्वा । निसर्गं विसर्जनम्, अनुमतिमिति यावत् ॥ १२ ॥ ततश्चेति । पूर्वमेव सीतादर्शनात् प्रहृष्टाः ततः मधुवनभङ्गे अङ्गदेनानुमतास्सन्तस्ततो मुदिताः तत्प्रेरिताः प्रनृत्यन्तोऽभवन् ॥ १३ ॥ रामानु०–मुदिताश्च ततश्चेति पाठः ॥ १३ ॥ मधुवनभङ्गा

ततः कुमारस्तान् वृद्धाञ्जाम्बवत्प्रमुखान् कपीन् । अनुमान्य ददौ तेषां निसर्गं मधुभक्षणे ॥ १२ ॥ ततश्चानुमताः सर्वे सम्प्रहृष्टा वनौकसः । मुदिताः प्रेरिताश्चापि प्रनृत्यन्तोऽभवंस्ततः ॥ १३ ॥ गायन्ति केचित् प्रणमन्ति केचिन्नृत्यन्ति केचित् प्रहसन्ति केचित् । पतन्ति केचिद्विचरन्ति केचित् प्लवन्ति केचित् प्रलपन्ति केचित् ॥ १४ ॥ परस्परं केचिदुपाश्रयन्ते परस्परं केचिदुपाक्रमन्ते । परस्परं केचिदुपब्रुवन्ते परस्परं केचिदुपारमन्ते ॥ १५ ॥ द्रुमाद् द्रुमं केचिदभिद्रवन्ते क्षितौ नगाग्रान्निपतन्ति केचित् । महीतलात् केचिदुदीर्णवेगा महाद्रुमाग्राण्यभिसम्पतन्ति ॥ १६ ॥ गायन्तमन्यः प्रहसन्नुपैति हसन्तमन्यः प्ररुदन्नुपैति । रुदन्तमन्यः प्रणुदन्नुपैति नुदन्तमन्यः प्रणदन्नुपैति ॥ १७ ॥ समाकुलं तत्कपिसैन्यमासीन्मधुप्रपानोत्कटसत्त्वचेष्टम् । न चात्र कश्चिन्न बभूव मत्तो न चात्र कश्चिन्न बभूव तृप्तः ॥ १८ ॥ ततो वनं तत्परिभक्ष्यमाणं द्रुमांश्च विध्वंसितपत्रपुष्पान् । समीक्ष्य कोपाद्दधिवक्त्र नामा निवारयामास कपिः कपींस्तान् ॥ १९ ॥

भ्यनुज्ञानकृतं वानरहर्षविकारमेव वर्णयति सर्गशेषेण–गायन्ति केचित् प्रणमन्ति केचिन्नृत्यन्ति केचित्प्रहसन्ति केचित् । पतन्ति केचिद्विचरन्ति केचित्प्लवन्ति केचित्प्रलपन्ति केचित् ॥ इति पाठः । प्रणमन्ति अधाक्शिरसः पतन्ति । पतन्ति ऊर्ध्वपादाः पृष्ठेन पतन्ति ॥ १४–१७ ॥ समाकुलमिति । मधुप्रपानोत्कटसत्त्वचेष्टं मत्तचित्तचेष्टम् ॥ १८ ॥ रामानु०–मधुप्रपानोत्कटसत्त्वचेष्टमिति सम्यक् ॥ १८ ॥ १९–२२ ॥

अनुमान्य अनुमतिं कारयित्वा । निसर्गम् अनुज्ञामित्यर्थः ॥ १२ ॥ अनुमताः मधुपानादौ कृतानुमतिकाः । हर्षमुदोर्बाह्याभ्यन्तरकृतो भेदः ॥ १३ ॥ तत्र बाह्यमानन्दसूचकमाह–गायन्तीति ॥ १४–१७ ॥ मधुप्रपानोत्कटसत्त्वचेष्टं मधुप्रपाने उत्कटसत्त्वचेष्टम्, मत्तचित्तचेष्टमित्यर्थः ॥ १८–२१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नखैरिति । निर्विषयं निर्गतमधुमूलादिभोग्यवस्तुकं चक्रुरित्यर्थः ॥ २३ ॥ रामानु०–इयं संग्रहोक्तिः ॥ २३ ॥ इति श्रीगोविन्दराज० श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकषष्टितमः सर्गः ॥६१॥ तानित्यादि । तान् दधिमुखकलहव्याकुलितान् । अन्ये तु तानुवाचेत्यादिना

स तैः प्रवृद्धैः परिभर्त्स्यमानो वनस्य गोप्ता हरिवीरवृद्धः । चकार भूयो मतिमुग्रतेजा वनस्य रक्षां प्रति वानरेभ्यः ॥ २० ॥ उवाच कांश्चित् परुषाणि धृष्टमसक्तमन्यांश्च तलैर्जघान । समेत्य कैश्चित् कलहं चकार तथैव साम्नोप जगाम कांश्चित् ॥ २१ ॥ स तैर्मदात् सम्परिवार्य वाक्यैर्बलाच्च तेन प्रतिवार्यमाणैः । प्रधर्षितस्त्यक्तभयैः समेत्य प्रकृष्यते चाप्यनवेक्ष्य दोषम् ॥२२॥ नखैस्तुदन्तो दशनैर्दशन्तस्तलैश्च पादैश्च समापयन्तः । मदात् कपिं कपयः समग्रा महावनं निर्विषयं च चक्रुः ॥२३॥ इत्यार्षे श्रीरामायणे० श्रीमत्सुन्दरकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

तानुवाच हरिश्रेष्ठो हनुमान् वानरर्षभः । अव्यग्रमनसो यूयं मधु सेवत वानराः । अहमावारयिष्यामि युष्माकं परिपन्थिनः ॥ १ ॥ श्रुत्वा हनुमतो वाक्यं हरीणां प्रवरोऽङ्गदः । प्रत्युवाच प्रसन्नात्मा पिबन्तु हरयो मधु ॥ २ ॥ अवश्यं कृतकार्यस्य वाक्यं हनुमतो मया । अकार्यमपि कर्तव्यं किमङ्ग पुनरीदृशम् ॥ ३ ॥ अङ्गदस्य मुखाच्छ्रुत्वा वचनं वानरर्षभाः । साधु साध्विति संहृष्टा वानराः प्रत्यपूजयन् ॥४॥ पूजयित्वाऽङ्गदं सर्वे वानरा वानरर्षभम् । जग्मुर्मधुवनं यत्र नदीवेगा इव द्रुतम् ॥ ५ ॥

पूर्वसर्गोक्तं संक्षेपेणानूद्य उपरि गच्छतीत्याचक्षते । अपरे तु सर्गमुखे केचिच्छ्लोकाः पतिताः इत्याहुः ॥१॥२॥ अङ्गेति सम्बोधने निपातः ॥ ३ ॥ अङ्गदस्य स्वामिनः मुखाद्वचनं हनुमदुक्तं श्रुत्वा ॥ ४ ॥ जग्मुर्मधुवनमिति प्रदेशभेदविवक्षया । यद्वा दधिमुखनिवारणेन भीतानां हनुमदङ्गदाभ्यां पुनरनु

स तैरिति । तेन दधिमुखेन । बलाच्च प्रतिवार्यमाणैस्त्यक्तभयैः समेत्य सम्परिवार्य मदाद्वाक्यैः प्रधर्षणदोषमनवेक्ष्य प्रकृष्यत इति सम्बन्धः ॥२२॥ निर्विषयं चक्रुः निर्गतमधुफलादिभोज्यं चक्रुरित्यर्थः ॥ २३ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायाम् एकषष्टितमः सर्गः ॥ ६१ ॥

पुनरुक्तमेव विस्तरेणाह–तानिति ॥ १॥ श्रुत्वेति । पिबन्त्विति प्रत्युवाचेति सम्बन्धः ॥ २–४ ॥ जग्मुर्मधुवनमिति पुनर्वचनं प्रदेशभेदविवक्षयेति द्रष्टव्यम् ॥ ५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ज्ञापनेन पुनर्जग्मुरित्यर्थः ॥ ५ ॥ वीर्यतः बलात् । अतिसर्गादङ्गदाभ्यनुज्ञानात् । दृष्ट्वा श्रुत्वा च मैथिलीं दर्शनश्रवणाभ्यां च हेतुना । वनपालानाक्रम्य आक्षिप्य ॥६॥७॥ सक्तान् वनपालने रतान् ॥८॥ मधूनि मधुपटलानि । द्रोणमात्राणि द्रोणप्रमाणानि आढकप्रमाणानि । निघ्नन्ति स्म पीतावशिष्टानि मधु

ते प्रविष्टा मधुवनं पालानाक्रम्य वीर्यतः ॥ ६ ॥ अतिसर्गाच्च पटवो दृष्ट्वा श्रुत्वा च मैथिलीम् । पपुः सर्वे मधु तदा रसवत् फलमाददुः ॥ ७ ॥ उत्पत्य च ततः सर्वे वनपालान् समागतान् । ताडयन्ति स्म शतशः सक्तान् मधुवने तदा ॥ ८ ॥ मधूनि द्रोणमात्राणि बाहुभिः परिगृह्य ते । पिबन्ति सहिताः सर्वे निघ्नन्ति स्म तथाऽपरे ॥ ९ ॥ केचित्पीत्वाऽपविध्यन्ति मधूनि मधुपिङ्गलाः । मधूच्छिष्टेन केचिच्च जघ्नुरन्योन्यमुत्कटाः ॥ १० ॥ अपरे वृक्षमूले तु शाखां गृह्य व्यवस्थिताः । अत्यर्थं च मदग्लानाः पर्णान्यास्तीर्य शेरते ॥ ११ ॥ उन्मत्तभूताः प्लवगा मधुमत्ताश्च हृष्टवत् । क्षिपन्ति च तदाऽन्योन्यं स्खलन्ति च तथाऽपरे ॥ १२ ॥ केचित् क्ष्वेलां प्रकुर्वन्ति केचित् कूजन्ति हृष्टवत् । हरयो मधुना मत्ताः केचित् सुप्ता महीतले ॥ १३ ॥ कृत्वा केचिद्धसन्त्यन्ये केचित् कुर्वन्ति चेतरत् । कृत्वा केचिद्रदन्त्यन्ये केचिद्बुद्ध्यन्ति चेतरत् ॥ १४ ॥

पटलानि भिन्दन्ति स्म ॥९॥ अपविध्यन्ति अवक्षिपन्ति । मधूच्छिष्टेन सिक्थकेन । "मधूच्छिष्टं तु सिक्थकम्" इत्यमरः । उत्कटाः मत्ताः ॥१०॥११॥ हृष्टवत् हर्षयुक्तमिति क्रियाविशेषणम् । हृष्टार्हमिति वार्थः । क्षिपन्ति उत्क्षिप्य पातयन्ति । स्खलन्ति पादेन नुदन्तीत्यर्थः ॥ १२ ॥ क्ष्वेलां सिंहनादम् । "क्ष्वेला तु सिंहनादः स्यात्" इत्यमरः । कूजन्ति पक्षिवच्छब्दायन्ते ॥ १३ ॥ अन्ये अवाच्यं किंचिद्ग्राम्यं कर्म कृत्वा हसन्ति । इतरत्

ते प्रविष्टाः पटवः समर्थाः हरयः मैथिलीं दृष्ट्वा स्ववर्गस्थहनुमद्दर्शनेन सर्वे हृष्टवन्तः श्रुत्वा हनुमन्मुखेन अतिसर्गादङ्गदाभ्यनुज्ञानात् मधुवनं प्रविष्टाः वीर्यतः बलात्पालानाक्रम्य मधु पपुः रसवत्फलमाददुरिति योजना ॥ ६॥७ ॥ मधुवने सक्तान् भधुरक्षणार्थं लग्नान् ॥ ८॥ मधूनि मधुपटलानि । निघ्नन्ति छिन्दन्ति ॥ ९ ॥ अपविध्यन्ति क्षिपन्ति ॥१०॥ मधुमत्ताः अत एव उन्मत्तभूताः उन्मत्तसदृशा इत्यर्थः । हृष्टवत् हृष्टाः ॥१२॥१३॥ अन्य किञ्चिदवाच्यं कर्म कृत्वा हसन्ति । केचित

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तद्विलक्षणं ग्राम्यं कर्म केचित्कुर्वन्ति । केचिदन्यत् ग्राम्यं कर्म कृत्वा अस्माभिरिदं कृतमिति वदन्ति उच्चारयन्ति । केचिदितरदुध्यन्ति एवं करिष्यामीति सङ्कल्पयन्तीत्यर्थः ॥ १४ ॥ १५ ॥ जानुभिः प्रकृष्टाः । जानून्यवलम्ब्य कृष्टा इत्यर्थः । देवमार्गम् अपानद्वारम् । देवशब्दो वायुवाची ।

येऽप्यत्र मधुपालाः स्युः प्रेष्या दधिमुखस्य तु । तेऽपि तैर्वानरैर्भीमैः प्रतिषिद्धा दिशो गताः ॥ १५ ॥ जानुभिस्तु प्रकृष्टाश्च देवमार्गं प्रदर्शिताः । अब्रुवन् परमोद्विग्ना गत्वा दधिमुखं वचः ॥ १६ ॥ हनूमता दत्तवरैर्हतं मधुवनं बलात् । वयं च जानुभिः कृष्टा देवमार्गं च दर्शिताः ॥ १७ ॥ ततो दधिमुखः क्रुद्धो वनपस्तत्र वानरः । हतं मधुवनं श्रुत्वा सान्त्वयामास तान् हरीन् ॥ १८ ॥ इहागच्छत गच्छामो वानरान् बलदर्पितान् । बलेन वारयिष्यामो मधु भक्षयतो वयम् ॥ १९ ॥ श्रुत्वा दधिमुखस्येदं वचनं वानरर्षभाः । पुनर्वीरा मधुवनं तेनैव सहसा ययुः ॥ २० ॥ मध्ये चैषां दधिमुखः प्रगृह्य तरसा तरुम् । समभ्यधावद्वेगेन ते च सर्वे प्लवङ्गमाः ॥ २१ ॥ ते शिलाः पादपांश्चापि पर्वतांश्चापि वानराः । गृहीत्वाऽभ्यगमन् क्रुद्धा यत्र ते कपिकुञ्जराः ॥ २२ ॥ ते स्वामिवचनं वीरा हृदयेष्ववसज्य तत् । त्वरया ह्यभ्यधावन्त सालतालशिलायुधाः ॥ २३ ॥ वृक्षस्थांश्च तलस्थांश्च वानरान् बलदर्पितान् । अभ्यक्रामं स्ततो वीराः पालास्तत्र सहस्रशः ॥ २४ ॥

उपनिषदि वायुलोके देवलोकशब्दप्रयोगात् । दर्शिताः दर्शनं कारिताः । दृशेरुपसङ्ख्यानादणिकर्तुः कर्मत्वम् । "ण्यन्तात्कर्तुश्च कर्मणः" इति तस्यैवाभिधेयत्वं च ॥ १६-१८ ॥ गच्छाम इति तैः साहित्येन बहुवचनम् । आत्मनि बहुवचनं वा ॥ १९-२३ ॥

इतरत् ग्राम्यकर्म कुर्वन्ति । केचित् अन्यत्कर्म कृत्वा तद्वदन्ति । केचिदन्यत्कर्म बुद्ध्यन्ति मनसा सङ्कल्पयन्ति ॥ १४॥१५ ॥ प्रकृष्टाः प्रहृता इत्यर्थः । देवमार्गम् अपानं दर्शिताः ॥ १६ ॥ १७ ॥ तान् स्वसम्बन्धिनः पालान् ॥ १८-२६ ॥

ति०—जानुभिः प्रघृष्टाः जानुषु गृहीत्वा आकृष्टाः । देवमार्गं दर्शिताः पादौ गृहीत्वोर्ध्वं प्रक्षिप्ता इत्यर्थः ॥ स०—जानुभिः प्रघृष्टाः पश्चात्ताडितास्सन्तो देवमार्गं सुखतर्म दर्शिताः पश्चाज्जानुसन्ताडने मुखोर्ध्वी भवनेनाकाशावलोकनस्य जायमानत्वादेवमुक्तिः । पायुद्वारं वा । कपीनां हेलनसमये गुदप्रदर्शनस्य भागवतदशमोत्तरार्धे बलरामद्विविदप्रस्तावे अन्यत्रापि बहुशो दृष्टत्वात् ॥ १६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गतायुष इत्यधिक्षेपवचनम् ॥ ३४ ॥ वध्या ह्येत इति । अमर्षप्रभवः अक्षमाजन्यः । रोषस्य तज्जन्यत्वं च यो यस्मै न सहते तस्मै क्रुद्ध्यतीति प्रसिद्धम्

अथ दृष्ट्वा दधिमुखं क्रुद्धं वानरपुङ्गवाः । अभ्यधावन्त वेगेन हनुमत्प्रमुखास्तदा ॥२५॥ तं सवृक्षं महाबाहुमापतन्तं महाबलम् । आर्यकं प्राहरत्तत्र बाहुभ्यां कुपितोऽङ्गदः ॥ २६ ॥ मदान्धश्च न वेदैनमार्यकोऽयं ममेति सः । अथैनं निष्पिपेषाशु वेगवद्वसुधातले ॥ २७ ॥ स भग्नबाहूरुभुजो विह्वलः शोणितोक्षितः । मुमोह सहसा वीरो मुहूर्तं कपिकुञ्जरः ॥ २८ ॥ स समाश्वस्य सहसा संक्रुद्धो राजमातुलः । वानरान् वारयामास दण्डेन मधुमोहितान् ॥ २९ ॥ स कथंचिद्विमुक्तस्तैर्वानरैर्वानरर्षभः । उवाचैकान्तमाश्रित्य भृत्यान् स्वान् समुपागतान् ॥ ३० ॥ एते तिष्ठन्तु गच्छामो भर्ता नो यत्र वानरः । सुग्रीवो विपुलग्रीवः सह रामेण तिष्ठति ॥ ३१ ॥ सर्वं चैवाङ्गदे दोषं श्रावयिष्यामि पार्थिवे । अमर्षी वचनं श्रुत्वा घातयिष्यति वानरान् ॥३२॥ इष्टं मधुवनं ह्येतत् सुग्रीवस्य महात्मनः । पितृपैतामहं दिव्यं देवैरपि दुरासदम् ॥ ३३ ॥ स वानरानिमान् सर्वान् मधुलुब्धान् गतायुषः । घातयिष्यति दण्डेन सुग्रीवः ससुहृज्जनान् ॥ ३४ ॥ वध्या ह्येते दुरात्मानो नृपाज्ञापरिभाविनः । अमर्षप्रभवो रोषः सफलो नो भविष्यति ॥ ३५ ॥ एवमुक्त्वा दधिमुखो वनपालान् महाबलः । जगाम सहसोत्पत्य वनपालैः समन्वितः ॥ ३६ ॥ निमेषान्तरमात्रेण स हि प्राप्तो वनालयः । सहस्रांशुसुतो धीमान् सुग्रीवो यत्र वानरः ॥ ३७ ॥ रामं च लक्ष्मणं चैव दृष्ट्वा सुग्रीवमेव च । समप्रतिष्ठां जगतीमाकाशान्निपपात ह ॥ ३८ ॥

॥ ३५ ॥ ३६ ॥ निमेषान्तरेति । निमेषान्तरमात्रेण निमेषावकाशमात्रेण । वनालयः वानरः ॥ ३७ ॥ रामं चेति । समप्रतिष्ठां समतलाम् । जगतीं

आर्यकः सुग्रीवमातुलत्वात्पूज्यः ॥ २७–३० ॥ भर्ता राजा ॥ ३१–३४ ॥ अमर्षप्रभवः अक्षमाजन्यः ॥ ३५–३७ ॥ समप्रतिष्ठां समास्पदां समतलाम् । जगतीं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भूमिम् ॥३८॥३९॥ अस्मिन्सर्गे चत्वारिंशच्छ्लोकाः ॥४०॥ इति श्रीगोविन्द० श्रीरामायण० शृङ्गार० सुन्दरकाण्डव्याख्याने द्विषष्टितमः सर्गः ॥६२॥

ततः इत्यादि । उद्विग्नहृदयः भीतहृदयः । मातुलस्यापि पादपतनं स्वामित्वानुसारेण ॥ १ ॥ २ ॥ ३ ॥ नैवेति । न निसृष्टपूर्वं यथेच्छभोगाय न

सन्निपत्य महावीर्यः सर्वैस्तैः परिवारितः । हरिर्दधिमुखः पालैः पालानां परमेश्वरः ॥ ३९ ॥ स दीनवदनो भूत्वा कृत्वा शिरसि चाञ्जलिम् । सुग्रीवस्य शुभौ मूर्ध्ना चरणौ प्रत्यपीडयत् ॥ ४० ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

ततो मूर्ध्ना निपतितं वानरं वानरर्षभः । दृष्ट्वैवोद्विग्नहृदयो वाक्यमेतदुवाच ह॥ १॥ उत्तिष्ठोत्तिष्ठ कस्मात् त्वं पादयोः पतितो मम । अभयं ते भवेद्वीर सर्वमेवाभिधीयताम् ॥ २ ॥ [किं सम्भ्रमाद्धितं कृत्स्नं ब्रूहि यद्वक्तुमर्हसि । कच्चिन्मधुवने स्वस्ति श्रोतुमिच्छामि वानर ॥*] स तु विश्वासितस्तेन सुग्रीवेण महात्मना । उत्थाय सुमहाप्राज्ञो वाक्यं दधिमुखोऽब्रवीत् ॥ ३ ॥ नैवर्क्षरजसा राजन्न त्वया नापि वालिना । वनं निसृष्टपूर्वं हि भक्षितं तच्च वानरैः ॥ ४ ॥ एभिः प्रधर्षिताश्चैव वानरा वनरक्षिभिः । मधून्यचिन्तयित्वेमान् भक्षयन्ति पिबन्ति च ॥ ५ ॥ शिष्टमत्रापविध्यन्ति भक्षयन्ति तथाऽपरे । निवार्यमाणास्ते सर्वे भ्रूवौ वै दर्शयन्ति हि ॥ ६ ॥

दत्तपूर्वम् । वानरैः अङ्गदप्रमुखैः । अन्यथा सुग्रीववाक्ये अङ्गदानुवादविरोधात् । भक्षितमिति वनैकदेशमधुपटलविषयम् ॥ ४ ॥ एभिरिति । अचिन्तयित्वा अगणयित्वा । मधूनीति फलानामुपलक्षणम् । भक्षयन्ति पिबन्ति चेत्युक्तेः । यद्वा मधून्येव भक्षयन्ति भक्षवत्कुर्वन्तीत्यर्थः ॥ ५ ॥ शिष्टम्

भुवम् ॥ ३८–४० ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां द्विषष्टितमः सर्गः ॥ ६२ ॥ १–३ ॥ नैवेति । निसृष्टपूर्वं सर्वेषां यथेच्छभोगाय पूर्वं त्यक्तं न भवति ॥ ४ ॥ अचिन्तयित्वा इमानविगणय्य भक्षयन्ति पिबन्ति फलानि भक्षयन्ति मधु पिबन्तीत्यर्थः ॥ ५ ॥ ६ ॥

स०–सम्भ्रमात्किम् किं प्रयोजनम् । यद्वक्तुमर्हसि तद्ब्रूहि । कस्मात्सम्भ्रमः किं सम्भ्रमः तस्मात् । इदं पादयोः पतनम् । यतस्त्वमर्हसि योग्योसि । अर्ह्यत इत्यर्हः स इवाचरतीति व्युत्पत्त्या पूज्योसीत्यर्थ इति वा ॥*

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अवशिष्टं मधुपटलम् । अत्र मधुवने । अपविध्यन्ति ध्वंसयन्ति । भक्षयन्ति मधुपटलमित्यर्थः ॥ ६ ॥ हिशब्दः पादपूरणे । सम्प्रधर्षणचिह्नस्य दृश्य मानत्वाभिप्रायेण प्रसिद्धिपरो वा ॥ ७–१३ ॥ आर्येत्यादि । अङ्गदप्रमुखैरिति अत्र विशिष्यानुवादादधिमुखवाक्ये वानरपुङ्गवैरित्यत्रापि विशेषपरत्वं

इमे हि संरब्धतरास्तथा तैः संप्रधर्षिताः । वारयन्तो वनात्तस्मात् क्रुद्धैर्वानरपुङ्गवैः ॥ ७ ॥ ततस्तैर्बहुभिर्वीरैर्वानरै र्वानरर्षभ । संरक्तनयनैः क्रोधाद्धरयः प्रविचालिताः ॥८॥ पाणिभिर्निहताः केचित् केचिज्जानुभिराहताः । प्रकृष्टाश्च यथाकामं देवमार्गं च दर्शिताः ॥ ९ ॥ एवमेते हताः शूरास्त्वयि तिष्ठति भर्तरि । कृत्स्नं मधुवनं चैव प्रकामं तैः प्रभक्ष्यते ॥ १० ॥ एवं विज्ञाप्यमानं तं सुग्रीवं वानरर्षभम् । अपृच्छत्तं महाप्राज्ञो लक्ष्मणः परवीरहा ॥ ११ ॥ किमयं वानरो राजन् वनपः प्रत्युपस्थितः । कं चार्थमभिनिर्दिश्य दुःखितो वाक्यमब्रवीत् ॥ १२ ॥ एवमुक्तस्तु सुग्रीवो लक्ष्मणेन महात्मना । लक्ष्मणं प्रत्युवाचेदं वाक्यं वाक्यविशारदः ॥ १३ ॥ आर्य लक्ष्मण संप्राह वीरो दधिमुखः कपिः । अङ्गदप्रमुखैर्वीरैर्भक्षितं मधु वानरैः ॥ १४ ॥ विचित्य दक्षिणामाशामागतैर्हरिपुङ्गवैः ॥ १५ ॥ नैषामकृतकृत्यानामीदृशः स्यादुपक्रमः । आगतैश्च प्रमथितं यथा मधुवनं हि तैः ॥ १६ ॥ धर्षितं च वनं कृत्स्न मुपयुक्तं च वानरैः ॥ १७ ॥ वनं यदाभिपन्नास्ते साधितं कर्म वानरैः । दृष्टा देवी न सन्देहो न चान्येन हनूमता । न ह्यन्यः साधने हेतुः कर्मणोऽस्य हनूमतः ॥ १८ ॥ कार्यसिद्धिर्मतिश्चैव तस्मिन् वानरपुङ्गवे । व्यवसायश्च वीर्यं च श्रुतं चापि प्रतिष्ठितम् ॥ १९ ॥

बोध्यम् ॥ १४ ॥ १५ ॥ वनं प्रमथितं भग्नम् । धर्षितम् आक्रान्तम् । मधु च भक्षितम् । यथा येन कारणेन । एषामकृतकृत्यानामीदृश उपक्रमो न स्यादिति मन्य इति योजना ॥ १६ ॥ १७ ॥ कृतकृत्यत्वं विशेषयति—वनमित्यादिना ॥ १८–२३ ॥

इमे मद्भृत्याः ॥ ७–१० ॥ अपृच्छदिति । सहैव वसतो लक्ष्मणस्य " कञ्चार्थमभिनिर्दिश्य दुःखितो वाक्यमब्रवीत् " इति प्रश्नकरणात् दधिमुखेन वनभङ्गादिकं स्वजात्युचितभाषयोक्तमित्यवगन्तव्यम् । उपांशूक्तमिति वा द्रष्टव्यम् ॥ ११–१६ ॥ उपयुक्तं भुक्तम् ॥ १७ ॥ वनमिति । अभिपन्नाः प्राप्ताः ॥ १८–२५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न चेति। वनमिति। मधुवनधर्षणमेव सीतादर्शने लिङ्गमिति भावः। दत्तवरं दिव्यमित्यनेन ऋक्षरजसे ब्रह्मणा दत्तमित्यवगम्यते ॥ २४ ॥ २५ ॥ श्रुत्वेति। द्वितीयसुग्रीवशब्दस्य शोभनग्रीव इत्यवयवार्थो विवक्षितः। क्रियाभेदेनापुनरुक्तिर्वा ॥ २६ ॥ २७ ॥ इच्छामीति । हनुमत्प्रधानान् हनुम

जाम्बवान् यत्र नेता स्यादङ्गदश्च महाबलः। हनूमांश्चाप्यधिष्ठाता न तस्य गतिरन्यथा ॥२०॥ अङ्गदप्रमुखैर्वीरैर्हतं मधुवनं किल। वारयन्तश्च सहितास्तथा जानुभिराहताः ॥ २१ ॥ एतदर्थमयं प्राप्तो वक्तुं मधुरवागिह । नाम्ना दधिमुखो नाम हरिः प्रख्यातविक्रमः ॥ २२ ॥ दृष्टा सीता महाबाहो सौमित्रे पश्य तत्त्वतः। अभिगम्य तथा सर्व पिबन्ति मधु वानराः ॥ २३ ॥ न चाप्यदृष्ट्वा वैदेहीं विश्रुताः पुरुषर्षभ। वनं दत्तवरं दिव्यं धर्षयेयुर्वनौकसः॥२४॥ ततः प्रहृष्टो धर्मात्मा लक्ष्मणः सहराघवः। श्रुत्वा कर्णसुखां वाणीं सुग्रीववदनाच्च्युताम् । प्राहृष्यत भृशं रामो लक्ष्मणश्च महाबलः ॥ २५ ॥ श्रुत्वा दधिमुखस्येदं सुग्रीवस्तु प्रहृष्य च। वनपालं पुनर्वाक्यं सुग्रीवः प्रत्यभाषत ॥२६॥ प्रीतोऽस्मि सोऽहं यद्भुक्तं वनं तैः कृतकर्मभिः। मर्षितं मर्षणीयं च चेष्टितं कृतकर्मणाम् ॥२७॥ इच्छामि शीघ्रं हनुमत्प्रधानान् शाखामृगांस्तान् मृगराजदर्पान्। द्रष्टुं कृतार्थान् सह राघवाभ्यां श्रोतुं च सीताधिगमे प्रयत्नम् ॥ २८ ॥ प्रीतिस्फीताक्षो सम्प्रहृष्टो कुमारौ दृष्ट्वा सिद्धार्थो वानराणां च राजा। अङ्गैः संहृष्टैः कर्मसिद्धिं विदित्वा बाह्वोरासन्नां सोऽतिमात्रं ननन्द ॥२९॥ इत्यार्षे श्रीरामायणे० श्रीमत्सुन्दरकाण्डे त्रिषष्टितमः सर्गः॥६३॥

त्प्रमुखान्। कृतार्थान् कृतकृत्यान्। प्रयत्नं प्रयासम्। तेभ्यः श्रोतुमिच्छामीत्यन्वयः ॥ २८ ॥ अथ प्रत्युपकारार्थं सुग्रीवः स्वोद्योगसाफल्यदर्शनात् भृशं ननन्देत्याह–प्रीतिस्फीताक्षाविति। प्रीत्या सन्तोषेण। संप्रहृष्टौ, रोमस्विति शेषः। हृषितरोमाणावित्यर्थः। "हृषेर्लोमसु" इति विकल्पादिड

श्रुत्वेति अत्र द्वितीयसुग्रीवशब्दः शोभनग्रीवपरः ॥ २६ ॥ २७ ॥ इच्छामीति। सीताधिगमप्रयत्नं सीताधिगमे कृतप्रयत्नं च श्रोतुमिच्छामीति सम्बन्धः ॥ २८ ॥ अथ रामप्रत्युपकारार्थी सुग्रीवः स्वोद्योगसाफल्यदर्शनाद्भृशं ननन्देत्याह–प्रीतीति। प्रीतिस्फीताक्षौ प्रीत्या सन्तोषेण विकसितनेत्रौ। सम्प्रहृष्टौ पुलकितगात्रौ।

स०–स्ववेदनावेदनवागपि रामकार्यसूचकत्वात् मधुरवाक् ॥ २२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भावः । एवम् अङ्गैः संहृष्टैरित्यत्रापि द्रष्टव्यम् । कर्मसिद्धिं बाह्वोरासन्नां हस्तप्राप्ताम्, । विदित्वा निश्चित्येत्यर्थः । जागतं वैश्वदेवीवृत्तम् । "पञ्चाश्वैरिच्छन्ना वैश्वदेवी ममौ यौ " इति लक्षणात् । अस्मिन्सर्गे एकोनत्रिंशच्छ्लोकाः ॥२९॥ इति श्रीगो० श्रीरामा० शृङ्गार० सुन्दरकाण्ड० त्रिषष्टितमः सर्गः ॥६३॥

सुग्रीवेणैवमुक्तस्तु हृष्टो दधिमुखः कपिः । राघवं लक्ष्मणं चैव सुग्रीवं चाभ्यवादयत् ॥ १ ॥ स प्रणम्य च सुग्रीवं राघवौ च महाबलौ । वानरैः सहितैः शूरैर्दिवमेवोत्पपात ह ॥ २ ॥ स यथैवागतः पूर्वं तथैव त्वरितं गतः । निपत्य गगनाद्भूमौ तद्वनं प्रविवेश ह ॥ ३ ॥ स प्रविष्टो मधुवनं ददर्श हरियूथपान् । विमदानुत्थितान् सर्वान् मेहमानान् मधूदकम् ॥ ४ ॥ स तानुपागमद्वीरो बद्ध्वा करपुटाञ्जलिम् । उवाच वचनं श्लक्ष्णमिदं हृष्टवदङ्गदम् ॥ ५ ॥ सौम्य रोषो न कर्तव्यो यदेभिरभिवारितः । अज्ञानाद्रक्षिभिः क्रोधाद्भवन्तः प्रतिषेधिताः ॥ ६ ॥

सुग्रीवेणेत्यादि । सहितैः स्नेहातिरेकेणान्योन्यं युक्तैः । वानरैः सहितैरिति पाठः ॥ १–३ ॥ विमदानित्यत्र हेतुमाह–मेहमानानिति । मेहमानान् मेहयतः, मूत्रयत इत्यर्थः । एतेन मूत्रणान्मधूनि जीर्णानीति गम्यते । अत एव विमदत्वम् । मधूनि च उदकानि च मधूदकमिति द्वन्द्वैकवद्भावः । उदकानि चात्र अनुपानत्वेन पीतानि । तदाह बाहटः–" अनुपानं हिमं वारि यवगोधूमयोर्हितम् । दध्नि मद्ये बिसे क्षौद्रे कोष्णं पिष्टमयेषु च ॥" इति ॥४॥ स तानिति । करपुटाञ्जलिं करतलयोरञ्जलिम्, सम्यक् संयुक्तकरतलाञ्जलिमित्यर्थः ॥ ५ ॥ एभिः वानरैः अभिवारितः अभिवारितोऽसीति यत् अत्रार्थे रोषो न कर्तव्यः । भवन्त इति पूजायां बहुवचनम् । न च हनुमदादिकमादाय बहुवचनम्, उत्तरश्लोकेऽपि युवराजस्त्वमित्युक्तेः । अज्ञानात् क्रोधात्, अज्ञानप्रयुक्तक्रोधादित्यर्थः । अभिवारितमिति पाठे लिङ्गव्यत्यय आर्षः । केचित्तु अज्ञानात् क्रोधाच्च भवन्तः प्रतिषेधिता इत्येतत् परि

संहृष्टैः पुलकितैः अङ्गैरुपलक्षितः । कर्मसिद्धिं कार्यसिद्धिम् । बाह्वोरासन्नां हस्तप्राप्ताम् । विदित्वा निश्चित्य ॥ २९ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां त्रिषष्टितमः सर्गः ॥ ६३ ॥ ॥ १–३ ॥ स प्रविष्ट इति । विमदत्वे हेतुमाह मेहमानान्मधूदकमिति । मेहमानान् मूत्रयतः । एतेन मूत्रणान्मधूनां जीर्णता विज्ञेया, अतो विमदान् । मधूनि च उदकानि च मधूदकमिति द्वन्द्वैकवद्भावः । उदकानि चानुपानत्वेन पीतानीति द्रष्टव्यम् ॥ ४ ॥ ५ ॥ हे सौम्य! एभिरज्ञानात्क्रोधाच्च भवन्तः प्रतिषेधिता इति यत् एतत्परिवारितं परितो वारणं प्रति रोषो न कर्तव्य इति योजना ॥ ६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वारितं परिवारणं प्रति रोषो न कर्तव्य इति योजयन्ति ॥ ६ ॥ क्रोधाद्वारणे कृते कुतो रोषो न कर्तव्यस्स्यादित्याशङ्क्य क्रोधस्याज्ञानकृतत्वादित्याह–युवराज इति । दोषः निवारणरूपापराधः ॥ ७ ॥ आख्यातं हीति । उपयातम् आगमनम् ॥८–११॥ शङ्क इति । अयं वृत्तान्तः अस्मदागमनवृत्तान्तः

युवराजस्त्वमीशश्च वनस्यास्य महाबल । मौर्ख्यात् पूर्वं कृतो दोषस्तं भवान् क्षन्तुमर्हति ॥७॥ आख्यातं हि मया गत्वा पितृव्यस्य तवानघ । इहोपयातं सर्वेषामेतेषां वनचारिणाम् ॥ ८ ॥ स त्वदागमनं श्रुत्वा सहैभिर्हरियूथपैः । प्रहृष्टो न तु रुष्टोऽसौ वनं श्रुत्वा प्रधर्षितम् ॥ ९ ॥ प्रहृष्टो मां पितृव्यस्ते सुग्रीवो वानरेश्वरः । शीघ्रं प्रेषय सर्वा स्तानिति होवाच पार्थिवः ॥ १० ॥ श्रुत्वा दधिमुखस्येदं वचनं श्लक्ष्णमङ्गदः । अब्रवीत्तान् हरिश्रेष्ठो वाक्यं वाक्य विशारदः ॥ ११ ॥ शङ्के श्रुतोऽयं वृत्तान्तो रामेण हरियूथपाः । तत्क्षमं नेह नः स्थातुं कृते कार्ये परन्तपाः ॥१२॥ पीत्वा मधु यथाकामं विश्रान्ता वनचारिणः । किं शेषं गमनं तत्र सुग्रीवो यत्र मे गुरुः ॥ १३ ॥ सर्वे यथा मां वक्ष्यन्ति समेत्य हरियूथपाः । तथाऽस्मि कर्ता कर्तव्ये भवद्भिः परवानहम् ॥ १४ ॥ नाज्ञापयितुमीशोऽहं युव राजोऽस्मि यद्यपि । अयुक्तं कृतकर्माणो यूयं धर्षयितुं मया ॥ १५ ॥

॥१२॥ किं शेषं न किंचिदपि शिष्टमित्यर्थः । किन्तु मे गुरुः सुग्रीवो यत्र वर्तते तत्र गमनमेव शेषमित्यर्थः । किंशेषं गमनं तच्च सुग्रीवो यत्र मे गुरुः इति पाठे–अस्माकं गमनं किंशेषं किंचिच्छेषम् । तच्च गमनशेषं च सुग्रीवो यत्र तत्र गमनामिति संबन्धः ॥१३॥ विनयपूर्वकं सर्वसंमेलनं समर्थयते–सर्व इति । तथास्मि कर्ता आह्वानं करिष्यामीत्यर्थः । कर्तव्ये कार्ये । भवद्भिः अहं परवान्, भवद्भिर्यथा नियुक्तं तथा करिष्यामि । गन्तव्यमित्युक्ते गमिष्यामः स्थातव्यमित्युक्ते स्थास्यामः इत्यर्थः ॥ १४ ॥ युवराजत्वात् भवानेव कर्तव्याकर्तव्यनियन्तेत्यत आह–नाज्ञापयितुमिति । ईशः स्वतन्त्रः । कृतकर्माणः

दोषः कृतः, मदीयैरिति शेषः ॥ ७–११ ॥ शङ्के, दधिमुखस्य परावृत्त्यागमनात् ॥ १२ ॥ किं शेषम् न किमपि शिष्टमित्यर्थः । गमनम्, कर्तव्यमिति शेषः ॥ १३ ॥ १४ ॥ नाज्ञापयितुमिति । अयुक्तमित्येतदव्ययम् । अयुक्ताः अनर्हा इत्यर्थः । धर्षयितुं नियन्तुम् ॥ १५–१७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कृतोपकाराः यूयं मया धर्षयितुम् अनादर्तुम्, परतन्त्रीकर्तुमिति यावत् । अयुक्तम् अयुक्ता इत्यर्थः । आर्षमव्ययमेतत् । शक्यमितिवत्सामान्योपक्रमान्नपुंसकैकत्वनिर्देश इत्यप्याहुः ॥ १५ ॥ १६ ॥ अहमिति मन्यते गर्विष्ठो भवतीति यावत् ॥ १७ ॥ सन्नतिः विनयः ॥ १८ ॥ कृतक्षणाः कृतावसराः, अवसरप्रतीक्षा इति यावत् ॥ १९ ॥ २० ॥ बाढमित्यङ्गीकारे । इतिशब्दः काकाक्षिन्यायेन पूर्वापरयोरन्वेति । एवं तेषां वदतां तेषु वदत्सु अङ्गदः बाढमिति प्रत्यभाषत । गच्छाम इत्युक्त्वापि उत्पपात ॥ २१ ॥ निराकाशं निरवकाशम् ॥ २२ ॥ तेऽम्बरमिति । अत्र जग्मुरित्यध्या

ब्रुवतश्चाङ्गदस्यैवं श्रुत्वा वचनमव्ययम् । प्रहृष्टमनसो वाक्यमिदमूचुर्वनौकसः ॥ १६ ॥ एवं वक्ष्यति को राजन् प्रभुः सन् वानरर्षभ । ऐश्वर्यमदमत्तो हि सर्वोऽहमिति मन्यते ॥ १७ ॥ तव चेदं सुसदृशं वाक्यं नान्यस्य कस्यचित् । सन्नतिर्हि तवाख्याति भविष्यच्छुभयोग्यताम् ॥ १८ ॥ सर्वे वयमपि प्राप्तास्तत्र गन्तुं कृतक्षणाः । स यत्र हरिवीराणां सुग्रीवः पतिरव्ययः ॥ १९ ॥ त्वया ह्यनुक्तैर्हरिभिर्नैव शक्यं पदात्पदम् । क्वचिद्गन्तुं हरिश्रेष्ठ ब्रूमः सत्यमिदं तु ते ॥ २० ॥ एवं तु वदतां तेषामङ्गदः प्रत्यभाषत । बाढं गच्छाम इत्युक्त्वा खमुत्पेतुर्महाबलाः ॥ २१ ॥ उत्पतन्तमनूत्पेतुः सर्वे ते हरियूथपाः । कृत्वाऽऽकाशं निराकाशं यन्त्रोत्क्षिप्ता इवाचलाः ॥२२॥ [अङ्गदं पुरतः कृत्वा हनुमन्तं च वानरम् ।] तेऽम्बरं सहसोत्पत्य वेगवन्तः प्लवङ्गमाः । विनदन्तो महानादं घना वाते रिता यथा ॥ २३ ॥ अङ्गदे समनुप्राप्ते सुग्रीवो वानराधिपः । उवाच शोकोपहतं रामं कमललोचनम् ॥ २४ ॥ समाश्वसिहि भद्र ते दृष्टा देवी न संशयः । नागन्तुमिह शक्यं तैरतीते समये हि नः ॥ २५ ॥

सन्नतिः विनयः नम्रता । भविष्यतीं शुभयोग्यतां भाविनीं भाग्योन्नतिमाख्याति सूचयति ॥ १८-२० ॥ एवं वदतां तेषां पुरतः अङ्गदो बाढमित्यभ्यभाषत । महाबलास्ते गच्छाम इत्युक्त्वा खमुत्पेतुरिति योजना ॥ २१ ॥ उत्पतन्तमङ्गदम् । निराकाशं निरवकाशम् ॥ २२ ॥ अङ्गदमित्यादिसार्धश्लोकमेकं वाक्यम् । ते वानराः अङ्गदं हनुमन्तं च पुरतः कृत्वा अम्बरं सहसोत्पत्य, जग्मुरिति शेषः ॥ २३ ॥ अङ्गदे समनुप्राप्ते सुग्रीवो वानरेश्वरः उवाचेति अङ्गदागमनात्प्रागिति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हार्यम् ॥२३–२५॥ विनिपातिते विघ्निते ॥२६॥ अकृतकृत्यानाम् अकृतकार्याणाम् । ईदृशः मधुवनभङ्गरूपः। उपक्रमः उद्योगः । यदि स्यात्तदाऽङ्गदो दीनवदनत्वादिविशिष्टो भवेत् ॥ २७ ॥ पितृपैतामहमिति । पिता चासौ पितामहश्च । पित्रा ब्रह्मणा ऋक्षरजसे दत्तं पितृपैतामहम् । प्लवगेश्वरः अङ्गदः ॥ २८ ॥ कौसल्येति । हे राम! कौसल्या सुप्रजाः सुप्रजावती । " नित्यमसिच् प्रजामेधयोः " इत्यसिच्प्रत्ययः । एवं देव्यवस्थानज्ञानेन भवतस्सत्ता

न मत्सकाशमागच्छेत् कृत्ये हि विनिपातिते। युवराजो महाबाहुः प्लवतां प्रवरोऽङ्गदः ॥ २६ ॥ यद्यप्यकृत कृत्यानामीदृशः स्यादुपक्रमः । भवेत् स दीनवदनो भ्रान्तविप्लुतमानसः ॥ २७ ॥ पितृपैतामहं चैतत् पूर्वकैरभि रक्षितम् । न मे मधुवनं हन्यादहृष्टः प्लवगेश्वरः ॥ २८ ॥ कौसल्या सुप्रजा राम समाश्वसिहि सुव्रत । दृष्टा देवी न सन्देहो न चान्येन हनूमता ॥ २९ ॥ न ह्यन्यः कर्मणो हेतुः साधनेऽस्य हनूमतः । हनूमति हि सिद्धिश्च मतिश्च मतिसत्तम । व्यवसायश्च वीर्यं च सूय तज इव ध्रुवम् ॥३० ॥ जाम्बवान् यत्र नेता स्यादङ्गदश्च बलेश्वरः । हनुमांश्चाप्यधिष्ठाता न तस्य गतिरन्यथा॥३१॥ मा भूश्चिन्तासमायुक्तः सम्प्रत्यमितविक्रम ॥३२॥ ततः किलकिलाशब्दं शुश्रावासन्नमम्बरे । हनुमत्कर्मदृप्तानां नर्दतां काननौकसाम् । किष्किन्धामुपयातानां सिद्धिं कथयतामिव ॥ ३३ ॥

लाभादिदानीं कौसल्या सुप्रजावती, अभूदिति शेषः ॥ २९ ॥ ३० ॥ यत्र कार्ये । नेता मन्त्री । बलेश्वरः सेनापतिः । अधिष्ठाता संरक्षक इत्यर्थः । तस्य कार्यस्य । गतिः सिद्धिः । अन्यथा विपरीता न भवेत् । संप्रति चिन्तासंयुक्तो मा भूः ॥३१॥३२॥ सिद्धिं कथयतामिव । उत्साहेनेति शेषः ॥३३॥

द्रष्टव्यम् । आगमनस्य वक्ष्यमाणत्वादिति भावः ॥ २४–२६ ॥ ननु मधुवनधर्षणमात्रेण कथं कार्यसिद्धिः ? कापेयादिनापि सम्भवादित्याशङ्क्य, सत्यम् अन्येषां तादृशत्वेपि अङ्गदस्तु नैतादृश इत्याशयेनाह–यद्यपीत्यादिश्लोकद्वयेन । अकृतकृत्यानामन्येषां वानराणाम् । ईदृश उपक्रमः मधुवनभङ्गहर्षव्यापारो यद्यपि स्यात् तथापि तत्र अङ्गदस्तु दीनवदनो भ्रान्तविप्लुतमानसश्च भवेत् । कुतः ? पितृपैतामहं पितृपितामहपरम्परागतं मे मधुवनं जनकात्मजामदृष्ट्वा न हन्यात् ॥ २७ ॥ २८ ॥ हे राम ! कौसल्या सुप्रजाः सीतायाः स्थितिपरिज्ञानेन भवतः सत्तालाभात् इदानीं कौसल्या सुपुत्रवत्यभूदिति भावः ॥ २९ ॥ ३० ॥ अधिष्ठाता

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

आयताश्चितलाङ्गूलः आयतः दीर्घीकृतः आश्चितः माल्यवच्छृङ्गे समारोपितः ॥ ३४ ॥ ३५ ॥ प्रहृष्टाः सञ्जातपुलकाः ॥ ३६ ॥ नियता मिति । अक्षतत्वेप्यनियतत्वे वैयर्थ्यम् नियतत्वेपि क्षतत्वे च तथा । ततः आवश्यकमुभयं संग्रहेण दर्शयति । अस्मिन्सर्गे सार्धैकोनचत्वारिंशत्

ततः श्रुत्वा निनादं तं कपीनां कपिसत्तमः । आयताश्चितलाङ्गूलः सोऽभवद्धृष्टमानसः ॥ ३४ ॥ आजग्मुस्तेऽपि हरयो रामदर्शनकांक्षिणः । अङ्गदं पुरतः कृत्वा हनूमन्तं च वानरम् ॥ ३५ ॥ तेऽङ्गदप्रमुखा वीराः प्रहृष्टाश्च मुदान्विताः । निपेतुर्हरिराजस्य समीपे राघवस्य च ॥ ३६ ॥ हनुमांश्च महाबाहुः प्रणम्य शिरसा ततः । नियतामक्षतां देवीं राघवाय न्यवेदयत् ॥ ३७ ॥ [दृष्टा देवीति हनुमद्वदनादमृतोपमम् । आकर्ण्य वचनं रामो हर्षमाप सलक्ष्मणः ॥] निश्चितार्थस्ततस्तस्मिन् सुग्रीवः पवनात्मजे । लक्ष्मणः प्रीतिमान् प्रीतं बहुमानादवैक्षत ॥ ३८ ॥ प्रीत्या च रममाणोऽथ राघवः परवीरहा । बहुमानेन महता हनुमन्तमवैक्षत ॥ ३९ ॥

इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

ततः प्रस्रवणं शैलं ते गत्वा चित्रकाननम् । प्रणम्य शिरसा रामं लक्ष्मणं च महाबलम् ॥ १ ॥ युवराजं पुरस्कृत्य सुग्रीवमभिवाद्य च । प्रवृत्तिमथ सीतायाः प्रवक्तुमुपचक्रमुः ॥ २ ॥ रावणान्तःपुरे रोधं राक्षसीभिश्च तर्जनम् । रामे समनुरागं च यश्चायं समयः कृतः । एतदाख्यान्ति ते सर्वे हरयो रामसन्निधौ ॥ ३ ॥ वैदेहीमक्षतां श्रुत्वा रामस्तूत्तरमब्रवीत् ॥ ४ ॥

श्लोकाः ॥ ३७–३९ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुष्षष्टितमः सर्गः ॥ ६४ ॥

तत इति ॥ १ ॥ प्रवृत्तिं वार्ताम् ॥ २ ॥ रोधं निरोधम् । यश्चायं समयः कृ ः, मासद्वयादूर्ध्वं हनिष्यामीति यः सङ्केतो रावणेन कृत इत्यर्थः । कार्यकरणोद्योगवान् ॥ ३१–३३ ॥ आयताश्चितलांगूल इति स्वभावोक्त्यलङ्कारः ॥ ३४–३६ ॥ नियतां पातिव्रत्यव्रतसम्पन्नाम् ॥ ३७–३९ ॥ इति श्रीमद्धे श्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां चतुष्षष्टितमः सर्गः ॥ ६४ ॥ १ ॥ २ ॥ रावणान्तःपुर इति । समयः मासद्वयावधि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मासशब्दः पक्षपर इत्युक्तं प्राक् । तमिति शेषः ॥ ३–६ ॥ श्रुत्वा त्वित्यादि । प्रणामश्च सीतायाः स्मरणकृत इति बोध्यम् । सीताया दर्शनं यथेति । येन प्रकारेण सीतादर्शनं जातं तेन प्रकारेणोवाचेत्यन्वयः ॥ ७ ॥ दिदृक्षया न तु श्रोतुमिच्छया मार्गमाण इत्यर्थः ॥ ८ ॥ तत्र लङ्घने कृते सति ॥ ९ ॥

क्व सीता वर्तते देवी कथं च मयि वर्तते । एतन्मे सर्वमाख्यात वैदेहीं प्रति वानराः ॥ ५ ॥ रामस्य गदितं श्रुत्वा हरयो रामसन्निधौ । चोदयन्ति हनूमन्तं सीतावृत्तान्तकोविदम् ॥६॥ श्रुत्वा तु वचनं तेषां हनुमान् मारुतात्मजः । प्रणम्य शिरसा देव्यै सीतायै तां दिशं प्रति । उवाच वाक्यं वाक्यज्ञः सीताया दर्शनं यथा ॥ ७ ॥ समुद्रं लङ्घयित्वाऽहं शतयोजनमायतम् । अगच्छं जानकीं सीतां मार्गमाणो दिदृक्षया ॥ ८ ॥ तत्र लङ्केति नगरी रावणस्य दुरात्मनः । दक्षिणस्य समुद्रस्य तीरे वसति दक्षिणे ॥ ९ ॥ तत्र दृष्टा मया सीता रावणान्तःपुरे सती । संन्यस्य त्वयि जीवन्ती रामा राम मनोरथम् ॥ १० ॥ दृष्टा मे राक्षसीमध्ये तर्ज्यमाना मुहुर्मुहुः । राक्षसीभिर्विरूपाभी रक्षिता प्रमदावने ॥ ११ ॥ दुःखमासाद्यते देवी तथाऽदुःखोचिता सती ॥ १२ ॥ रावणान्तःपुरे रुद्धा राक्षसीभिः सुरक्षिता । एकवेणीधरा दीना त्वयि चिन्तापरायणा ॥ १३ ॥ अधःशय्या विवर्णाङ्गी पद्मिनीव हिमागमे । रावणाद्विनिवृत्तार्था मर्तव्यकृतनिश्चया । देवी कथंचित् काकुत्स्थ त्वन्मना मार्गिता मया ॥ १४ ॥ इक्ष्वाकुवंश विख्यातिं शनैः कीर्तयताऽनघ । सा मया नरशार्दूल विश्वासमुपपादिता ॥ १५ ॥

हे राम! रामा सीता त्वयि मनोरथं स्वाभिलाषम् संन्यस्य जीवन्ती, त्वदभिलाषेण धृतजीवितेत्यर्थः ॥ १० ॥ ११ ॥ दुःखमित्यर्थम् । आसाद्यते आसीदति । आर्षो यत् ॥ १२ ॥ एकवेणीधरा त्रिधाविभागं विना बद्धः केशपाशः एकवेणीत्युच्यते । अधःशय्या स्थण्डिलशायिनी । मर्तव्ये मरणे कृत रूपसमयः । तं चेति शेषः ॥ ३–५ ॥ चोदयन्ति प्रेरयन्ति स्म ॥ ६ ॥ सीतायै प्रणम्य तां दिशं प्रति प्रणम्येत्याकर्षः । उवाचेति । सीताया दर्शनं यथा येन प्रकारेण जातं तत्सर्वं वाक्यमुवाचेत्यर्थः ॥ ७ ॥ देव्या दिदृक्षया तां मार्गमाणोऽगच्छम् ॥ ८ ॥ ९ ॥ हे राम ! त्वयि मनोरथं संन्यस्य सम्यङ्न्यस्य जीवन्ती धृत प्राणा ॥ १०–१३ ॥ अधश्शय्या स्थण्डिलशयना ॥ १४ ॥ १५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

निश्चया ॥ १३–१५ ॥ सर्वमर्थं च दर्शिता सुग्रीवसख्यप्रभृतिसर्वमर्थं च बोधिता ॥ १६ ॥ समुदाचारः परपुरुषाचिन्तकत्वादिः । त्वायि भक्तिश्च, वर्तत इति शेषः । तपसा अनशनेन ॥ १७ ॥ १८ ॥ अभिज्ञानं चिह्नभूतं वाक्यम्, तवान्तिके पूर्वं यथा येन प्रकारेण जातं तथा दत्तमित्यर्थः । तदेव दर्शयति

ततः सम्भाषिता देवी सर्वमर्थं च दर्शिता । रामसुग्रीवसख्यं च श्रुत्वा प्रीतिमुपागता ॥ १६ ॥ नियतः समुदाचारो भक्तिश्चास्यास्तथा त्वयि ॥ १७ ॥ एवं मया महाभागा दृष्टा जनकनन्दिनी । उग्रेण तपसा युक्ता त्वद्भक्त्या पुरुषर्षभ ॥ १८ ॥ अभिज्ञानं च मे दत्तं यथा वृत्तं तवान्तिके । चित्रकूटे महाप्राज्ञ वायसं प्रति राघव ॥ १९ ॥ विज्ञाप्यश्च नरव्याघ्रो रामो वायुसुत त्वया । अखिलेनेह यद् दृष्टमिति मामाह जानकी ॥ २० ॥ अयं चास्मै प्रदातव्यो यत्नात् सुपरिरक्षितः । ब्रुवता वचनान्येवं सुग्रीवस्योपशृण्वतः ॥ २१ ॥ एष चूडामणिः श्रीमान् मया सुपरिरक्षितः । मनःशिलायास्तिलको गण्डपार्श्वे निवेशितः ॥ २२ ॥ त्वया प्रनष्टे तिलके तं किल स्मर्तुमर्हसि । एष निर्यातितः श्रीमान् मया ते वारिसम्भवः ॥ २३ ॥ एतं दृष्ट्वा प्रमोदिष्ये व्यसने त्वामिवानघ । जीवितं धारयिष्यामि मासं दशरथात्मज । ऊर्ध्वं मासान्न जीवेयं रक्षसां वशमागता ॥ २४ ॥ इति मामब्रवीत्सीता कृशाङ्गी धर्मचारिणी । रावणान्तःपुरे रुद्धा मृगीवोत्फुल्ललोचना ॥ २५ ॥ एतदेव मयाऽऽख्यातं सर्वं राघव यद्यथा । सर्वथा सागरजले सन्तारः प्रविधीयताम् ॥ २६ ॥

चित्रकूट इति, सदन्यवक्तव्यत्वात् सूचनोक्तिः ॥ १९ ॥ अखिलेनेति । रावणागमनादिकमित्यर्थः ॥ २० ॥ अयं चास्मा इत्यादि । सुग्रीवस्योपशृण्वतः सुग्रीवे समीपे शृण्वति सति । एवम् एष चूडामणिरित्यारभ्य रक्षसां वशमागतेत्यन्तवक्ष्यमाणप्रकारेण । वचनानि रामं प्रति मयोक्तवचनानि । ब्रुवता त्वया ॥ २१ ॥ अयं मणिरित्यर्थः । प्रदातव्यः ॥ २२–२४ ॥ मृगीवोत्फुल्ललोचना, त्रासातिशयादिति भावः ॥ २५ ॥ सन्तीर्यतेऽनेनेति सन्तारः सेतुः ॥ २६ ॥

सर्वमर्थं च दर्शिता ज्ञापिता ॥ १६–२२ ॥ एष इति । निर्यातितः प्रेषितः । वारिसम्भवो मणिः ॥ २३ ॥ एतम् अङ्गुलीयकम् ॥ २४–२६ ॥

स०–मनःशिलायास्तिलकं तत्स्मरस्वेति चाब्रवीत् इति पाठे–स्मरस्व स्मर । स्व स्वतन्त्रेति रामसम्बोधनं वा ॥ २२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तौ जाताश्वासौ राजपुत्रौ विदित्वा तच्चाभिज्ञानं राघवाय प्रदाय । देव्या चाख्यातं सर्वमेवानुपूर्व्याद्वाचा सम्पूर्णं वायुपुत्रः शशंस ॥ २७ ॥ इत्यार्षे श्रीरामायणे वाल्मी० आदि० श्रीमत्सुन्दरकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥ एवमुक्तो हनुमता रामो दशरथात्मजः । तं मणिं हृदये कृत्वा प्ररुरोद सलक्ष्मणः ॥ १ ॥ तं तु दृष्ट्वा मणिश्रेष्ठं राघवः शोककर्शितः । नेत्राभ्यामश्रुपूर्णाभ्यां सुग्रीवमिदमब्रवीत् ॥ २ ॥ यथैव धेनुः स्रवति स्नेहाद्वत्सस्य वत्सला । तथा ममापि हृदयं मणिरत्नस्य दर्शनात् ॥ ३ ॥ मणिरत्नमिदं दत्तं वैदेह्याः श्वशुरेण मे । वधूकाले यथा बद्धमधिकं मूर्ध्नि शोभते ॥ ४ ॥ अयं हि जलसम्भूतो मणिः सज्जनपूजितः । यज्ञे परमतुष्टेन दत्तः शक्रेण धीमता ॥ ५ ॥

अकथनीयाकथनार्थं चेति ज्ञेयम् । अस्मिन्सर्गे सार्धसप्तविंशतिश्लोकाः ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चषष्टितमः सर्गः ॥ ६५ ॥ एवमित्यादि ॥ १ ॥ २ ॥ यथा वत्सला वत्से स्नेहवती धेनुः । वत्सस्य स्नेहाद्वत्सविषयकस्नेहात् । स्रवत्येव द्रवत्येव । तथा मणिरत्नस्य मणिश्रेष्ठस्य दर्शनान्मम हृदयं द्रवति ॥ ३ ॥ मणेरागतिमाह—मणिरत्नमिति । मे श्वशुरेण जनकेन । वधूकाले वधूप्रतिग्रहकाले, विवाहकाल इत्यर्थः । यथा शोभते तथा बद्धमित्यन्वयः ॥ ४ ॥ जनकेनापि कुतस्तल्लब्धम् ? तत्राह—अयं हीति ॥ ५ ॥

॥ २७ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां पञ्चषष्टितमः सर्गः ॥ ६५ ॥ ॥ १ ॥ तमिति । नेत्राभ्यामश्रुपूर्णाभ्याम् उपलक्षितः ॥ २ ॥ स्रवति द्रवति । वत्सस्येत्यत्रापि दर्शनादिति सम्बध्यते । हृदयमित्यत्रापि स्नेहाद्रवतीति सम्बन्धः ॥ ३ ॥ अथ सीताया मणेरागतिमाह—मणिरत्नमिति । मे श्वशुरेण जनकराजेन । वधूकाले विवाहकाले । वैदेह्या मूर्ध्नि शोभतेति सम्बन्धः ॥ ४ ॥ जनकस्यापि कुत आगतोऽत आह—अयं हीति ॥ ५ ॥

॥१७४॥

ति०—**वधूकाले** वधूत्वसम्पादके काले । सीतामातृहस्ताद्गृहीत्वा दशरथहस्ते दत्तम् । तच्च तस्मिन् काले यथाऽधिकं शोभते तथा मूर्ध्नि बद्धमित्यर्थः । स०—वधूप्रतिग्रहकाले वैदेह्या मूर्ध्नि बद्धं यथा अधिकं अशोभत तथा इदानीमपि शोभते । कालतस्तत्प्रकाशतिरोधानं नास्तीति महत्त्वं रत्नस्य ध्वन्यते ॥ ४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

'मणिं तु दृष्ट्वा रामो वै त्रयाणां संस्मरिष्यति' इति सीतयोक्तप्रकारेण स्मरति—इममिति। इमं दृष्ट्वा तातस्य दशरथस्य। वैदेहस्य जनकस्य। दर्शनमद्यावगतः प्राप्तोस्मि। तदा ताभ्यां तस्या मूर्ध्नि बद्धत्वादिति भावः। इह वैदेहग्रहणं सीताजनन्या अप्युपलक्षणम्। सीतावाक्ये 'वीरो जनन्या

इमं दृष्ट्वा मणिश्रेष्ठं यथा तातस्य दर्शनम्। अद्यास्म्यवगतः सौम्य वैदेहस्य तथा विभोः ॥ ६ ॥ अयं हि शोभते तस्याः प्रियाया मूर्ध्नि मे मणिः। अस्याद्य दर्शनेनाहं प्राप्तां तामिव चिन्तये ॥७॥ किमाह सीता वैदेही ब्रूहि सौम्य पुनः पुनः। पिपासुमिव तोयेन सिञ्चन्ती वाक्यवारिणा॥८॥ इतस्तु किं दुःखतरं यदिमं वारिसम्भवम्। मणिं पश्यामि सौमित्रे वैदेहीमागतं विना ॥ ९ ॥ चिरं जीवति वैदेही यदि मासं धरिष्यति। क्षणं सौम्य न जीवेयं विना तामसितेक्षणाम् ॥ १० ॥ नय मामपि तं देशं यत्र दृष्टा मम प्रिया। न तिष्ठेयं क्षणमपि प्रवृत्तिमुपलभ्य च ॥ ११ ॥ कथं सा मम सुश्रोणी भीरुभीरुः सती सदा। भयावहानां घोराणां मध्ये तिष्ठति रक्षसाम् ॥ १२ ॥ शारदस्तिमिरोन्मुक्तो नूनं चन्द्र इवाम्बुदैः। आवृतं वदनं तस्या न विराजति राक्षसैः ॥ १३ ॥

मम च' इत्युक्तेः। तत्र त्रयाणां संस्मरिष्यतीति त्रयग्रहणं बहुमात्रोपलक्षणम्। इह वैदेहस्यापि स्मरणोक्तेः ॥ ६–८ ॥ इतस्त्विति। आगतं मणिमित्यन्वयः ॥ ९–११ ॥ भीरुभीरुः अत्यन्तभीरुः ॥ १२ ॥ १३ ॥

यथा सीतादर्शनम् अवगतः प्राप्तस्तथा तातस्य दशरथस्य प्राप्तः तद्धस्ते जनकेन दानात्तस्य स्मरणम्, तथा वैदेहस्य राज्ञो जनकस्य सपत्नीकस्य दर्शनं प्राप्त इत्यर्थः ॥ ६–८ ॥ वैदेहीं विना आगतं मणिं पश्यामीति सम्बन्धः। इतः किं दुःखतरम् ॥ ९ ॥ यदि मासं धरिष्यति जीविष्यति तदा चिरं जीवति, जीविष्यतीत्यर्थः। तां विना यथाऽहं न जीवेयं तथा मां विना सापि न जीविष्यतीत्यर्थः ॥ १० ॥ प्रवृत्तिमुपलभ्य क्षणमपि न तिष्ठेयं स्यातुं न शक्यमित्यर्थः ॥ ११ ॥ भीरुभीरुः अत्यन्तं भीरुः ॥ १२ ॥ अम्बुदैरावृतस्तिमिरोन्मुक्तः शारदश्चन्द्र इव तस्या वदनं न राजति ॥ १३ ॥

स०—यदि वैदेही चिरं जीवति तर्हि मासं धरिष्यति। यदि मासं धरिष्यति तर्ह्येव चिरं जीवतीति तज्जीवनं मज्जीवनव्याप्तम्। व्यतिरेकेणाह—क्षणमिति। तामसितेक्षणां विना क्षणमहं न जीवेयं यथा तथा इयं सीतापि मां विना नजीवा न विद्यते जीवो यस्यास्सेति योजना। यद्वा वैदेही यदि मासं धरिष्यति प्राणान् तर्हि चिरं जीवति वार्ताज्ञानानन्तरं मया तु तथा जीवितुमशक्यमित्याह—क्षणमिति ॥ १० ॥ प्रवृत्तिं वार्ताम्, निराहारत्वादिप्रवृत्तिं वा ॥ ११ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तत्त्वतः, सङ्कोचेन न किंचित् गोपनीयामिति भावः ॥ १४ ॥ मधुरा सुन्दरी । मधुरालापा, येन तद्वचनानुवादेपि भवद्वचनं मधुरं भवतीत्यर्थः ॥ १५ ॥
इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षट्षष्टितमः सर्गः ॥ ६६ ॥ एवमित्यादि ॥ १ ॥ २ ॥ पूर्वं

किमाह सीता हनुमंस्तत्त्वतः कथयाद्य मे । एतेन खलु जीविष्ये भेषजेनातुरो यथा ॥ १४ ॥ मधुरा मधुरालापा किमाह मम भामिनी । मद्विहीना वरारोहा हनुमन् कथयस्व मे ॥ [दुःखाद्दुःखतरं प्राप्य कथं जीवति जानकी ।] ॥ १५ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

एवमुक्तस्तु हनुमान् राघवेण महात्मना । सीताया भाषितं सर्वं न्यवेदयत राघवे ॥ १ ॥ इदमुक्तवती देवी जानकी पुरुषर्षभ । पूर्ववृत्तमभिज्ञानं चित्रकूटे यथातथम् ॥ २ ॥ सुखसुप्ता त्वया सार्धं जानकी पूर्वमुत्थिता । वायसः सहसोत्पत्य विरराद स्तनान्तरे ॥ ३ ॥ पर्यायेण च सुप्तस्त्वं देव्यङ्के भरताग्रज । पुनश्च किल पक्षी स देव्या जनयति व्यथाम् ॥ ४ ॥ पुनः पुनरुपागम्य विरराद भृशं किल । ततस्त्वं बोधितस्तस्याः शोणितेन समुक्षितः ॥ ५ ॥ वायसेन च तेनैव सततं बाध्यमानया । बोधितः किल देव्या त्वं सुखसुप्तः परन्तप ॥ ६ ॥ तां तु दृष्ट्वा महाबाहो दारितां च स्तनान्तरे । आशीविष इव क्रुद्धो निःश्वसन्नभ्यभाषथाः ॥ ७ ॥ नखाग्रैः केन ते भीरु दारितं तु स्तनान्तरम् । कः क्रीडति सरोषेण पञ्चवक्त्रेण भोगिना ॥ ८ ॥ निरीक्षमाणः सहसा वायसं समवैक्षथाः । नखैः सरुधिरैस्तीक्ष्णैस्तामेवाभिमुखं स्थितम् ॥ ९ ॥

सङ्कुचितं विस्तृणीते–सुखेत्यादिना । उभावपि पर्यायेण सुप्ताविति त्वया सार्धमित्युक्तम् ॥ ३–६ ॥ तां त्वित्यादि । दारितां विदारिताम् ॥ ७–१९ ॥
एतेन तद्वाक्यश्रवणरूपेण ॥ १४ ॥ मधुरा मधुराकारा ॥ १५ ॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्व० सुन्दरकाण्डव्याख्यायां षट्षष्टितमः सर्गः ॥ ६६ ॥
एवमित्यादि ॥ १ ॥ २ ॥ पूर्वं सङ्कुचितं विस्तृणीते–सुखेत्यादिना । उभावपि पर्यायेण सुप्ताविति त्वया सार्धमित्युक्तम् ॥ ३–६ ॥ दारितां विदारिताम् ॥ ७–१९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रतिसमासितुं प्रतिमुखं स्थातुम् ॥ २०–२५ ॥ त्वच्छोकविमुखः त्वच्छोकेन कार्यान्तरविमुखः ॥ २६–२८ ॥

सुतः किल स शक्रस्य वायसः पततां वरः । धरान्तरचरः शीघ्रं पवनस्य गतौ समः ॥ १० ॥ ततस्तस्मिन् महाबाहो कोपसंवर्तितेक्षणः । वायसे त्वं कथाः क्रूरां मतिं मतिमतां वर ॥ ११ ॥ स दर्भं संस्तराद् गृह्य ब्रह्मास्त्रेण ह्ययोजयः । स दीप्त इव कालाग्निर्जज्वालाभिमुखः खगम् ॥ १२ ॥ क्षिप्तवांस्त्वं प्रदीप्तं हि दर्भं तं वायसं प्रति । ततस्तु वायसं दीप्तः स दर्भोऽनुजगाम ह ॥ १३ ॥ स पित्रा च परित्यक्तः सुरैश्च समहर्षिभिः । त्रीँल्लोकान् संपरिक्रम्य त्रातारं नाधिगच्छति ॥ १४ ॥ पुनरेवागतस्त्रस्तस्त्वत्सकाशमरिन्दम । स तं निपतितं भूमौ शरण्यः शरणागतम् ॥ १५ ॥ वधार्हमपि काकुत्स्थ कृपया पर्यपालयः ॥ १६ ॥ मोघमस्त्रं न शक्यं तु कर्तुमित्येव राघव । भवांस्तस्याक्षि काकस्य हिनास्ति स्म स दक्षिणम् ॥ १७ ॥ राम त्वां स नमस्कृत्य राज्ञे दशरथाय च । विसृष्टस्तु तदा काकः प्रतिपेदे स्वमालयम् ॥ १८ ॥ एवमस्त्रविदां श्रेष्ठः सत्त्ववाञ्छीलवानपि । किमर्थमस्त्रं रक्षस्सु न योजयति राघवः ॥ १९ ॥ न नागा नापि गन्धर्वा नासुरा न मरुद्गणाः । न च सर्वे रणे शक्ता रामं प्रतिसमासितुम् ॥ २० ॥ तस्य वीर्यवतः कश्चिद्यद्यस्ति मयि सम्भ्रमः । क्षिप्रं सुनिशितैर्बाणैर्हन्यतां युधि रावणः ॥ २१ ॥ भ्रातुरादेशमाज्ञाय लक्ष्मणो वा परन्तपः । स किमर्थं नरवरो न मां रक्षति राघवः ॥ २२ ॥ शक्तौ तौ पुरुषव्याघ्रौ वायव्याग्निसमतेजसौ । सुराणामपि दुर्धर्षौ किमर्थं मामुपेक्षतः ॥ २३ ॥ ममैव दुष्कृतं किंचिन्महदस्ति न संशयः । समर्थौ सहितौ यन्मां नावेक्षेते परन्तपौ ॥ २४ ॥ वैदेह्या वचनं श्रुत्वा करुणं साश्रुभाषितम् । पुनरप्यहमार्यां तामिदं वचनमब्रुवम् ॥ २५ ॥ त्वच्छोकविमुखो रामो देवि सत्येन ते शपे । रामे दुःखाभिभूते तु लक्ष्मणः परितप्यते ॥ २६ ॥

न नागा इति । प्रतिसमासितुं प्रतिमुखं स्थातुम् ॥ २०–२५ ॥ त्वच्छोकविमुखः त्वच्छोकेन कार्यान्तरविमुखः ॥ २६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नयते नेष्यते। वर्तमानसामीप्ये वर्तमानवत् प्रयोगः ॥ २९ ॥ ३० ॥ साऽभिवीक्ष्य दिश इति। दिगवलोकनं राक्षस्यो दृष्ट्वा रावणाय वक्ष्यन्तीति भयेन।

कथंचिद्भवती दृष्टा न कालः परिशोचितुम्। इम मुहूर्तं दुःखानामन्तं द्रक्ष्यसि भामिनि ॥ २७ ॥ तावुभौ नर शार्दूलौ राजपुत्रावनिन्दितौ। त्वद्दर्शनकृतोत्साहौ लङ्कां भस्मीकरिष्यतः ॥ २८ ॥ हत्वा च समरे रौद्र रावण सहबान्धवम्। राघवस्त्वां वरारोहे स्वां पुरीं नयते ध्रुवम् ॥ २९ ॥ यत्तु रामो विजानीयादभिज्ञानमनिन्दिते। प्रीतिसञ्जननं तस्य प्रदातुं त्वमिहार्हसि ॥ ३० ॥ साऽभिवीक्ष्य दिशः सर्वा वेण्युद्ग्रथनमुत्तमम्। मुक्त्वा वस्त्रादृदौ मह्य मणिमेतं महाबल ॥ ३१ ॥ प्रतिगृह्य मणिं दिव्यं तव हेतो रघूद्वह। शिरसा तां प्रणम्यार्यामहमागमने त्वरे ॥ ३२ ॥ गमने च कृतोत्साहमवेक्ष्य वरवर्णिनी। विवर्धमानं च हि मामुवाच जनकात्मजा ॥ ३३ ॥ अश्रुपूर्ण मुखी दीना बाष्पसन्दिग्धभाषिणी। ममोत्पतनसम्भ्रान्ता शोकवेगसमाहता ॥ ३४ ॥ हनुमन् सिंहसङ्काशावुभौ तौ रामलक्ष्मणौ। सुग्रीवं च सहामात्य सर्वान् ब्रूया ह्यनामयम् ॥ ३५ ॥ यथा च स महाबाहुर्मां तारयति राघवः। अस्माद्दुःखाम्बुसंरोधात्त्वं समाधातुमर्हसि ॥ ३६ ॥ इमं च तीव्रं मम शोकवेगं रक्षोभिरेभिः परिभर्त्सनं च। ब्रूयास्तु रामस्य गतः समीपं शिवश्च तेऽध्वाऽस्तु हरिप्रवीर ॥ ३७ ॥ एतत्तवार्या नृपराजसिंह सीता वचः प्राह विषादपूर्वम्। एतच्च बुद्ध्वा गदितं मया त्वं श्रद्धत्स्व सीतां कुशलां समग्राम् ॥ ३८ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमत्सुन्दरकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

वेण्यामुद्ग्रथ्यत इति वेण्युद्ग्रथनम्, वेणीधार्यमित्यर्थः। मुक्त्वा वस्त्रादिति। वस्त्राञ्चलेन ग्रथितं मणिं मुक्त्वा ततः ददावित्यर्थः। अस्मिन् भवती मया दृष्टा अतः परं परिशोचितुं न कालः, तव योग्य इति शेषः। चिरं ल[illegible]सितुं न कालो योग्य इति वा। इमं मुहूर्तम् अस्मिन्नेव मुहूर्ते इत्यर्थः॥२७-३०॥ वेण्युद्ग्रथितं शिरसि कतिपयकेशरचितवेण्युद्ग्रथितम्। वस्त्रान्मुक्त्वा वस्त्रान्तर्ग्रथितमुन्मुच्य ददावित्यर्थः ॥ ३१ ॥ त्वरे त्वरावान् जात इत्यर्थः ॥ ३२ ॥ विवर्ध

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सर्गे सार्धसप्तत्रिंशच्छ्लोकाः ॥३१–३८॥ इति श्रीगोविन्द० श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तषष्टितमः सर्गः ॥ ६७ ॥

अथेत्यादि । हे नरव्याघ्र ! तव स्नेहात्, मयीति शेषः । सौहार्दात् सुहृद्भावात्, आप्तत्वादिति यावत् । अनुमान्य सम्मान्य । उत्तरं ततः परम् उत्तरं

अथाहमुत्तरं देव्या पुनरुक्तः ससम्भ्रमः । तव स्नेहान्नरव्याघ्र सौहार्दादनुमान्य वै ॥१॥ एवं बहुविधं वाच्यो रामो दाशरथिस्त्वया । यथा मामाप्नुयाच्छीघ्रं हत्वा रावणमाहवे ॥ २ ॥ यदि वा मन्यसे वीर वसैकाहमरिन्दम । कस्मिंश्चित्संवृते देशे विश्रान्तः श्वो गमिष्यसि ॥ ३ ॥ मम चाप्यल्पभाग्यायाः सान्निध्यात्तव वीर्यवन् । अस्य शोकविपाकस्य मुहूर्तं स्याद्विमोक्षणम् ॥ ४ ॥ गते हि त्वयि विक्रान्ते पुनरागमनाय वै । प्राणानामपि सन्देहो मम स्यान्नात्र संशयः ॥ ५ ॥ तवादर्शनजः शोको भूयो मां परितापयेत् । दुःखाद्दुःखपराभूतां दुर्गतां दुःखभागिनीम् ॥ ६ ॥ अयं च वीर सन्देहस्तिष्ठतीव ममाग्रतः । सुमहांस्त्वत्सहायेषु हर्यृक्षेषु हरीश्वर ॥ ७ ॥ कथं नु खलु दुष्पारं तरिष्यन्ति महोदधिम् । तानि हर्यृक्षसैन्यानि तौ वा नरवरात्मजौ ॥ ८ ॥ त्रयाणामेव भूतानां सागरस्यास्य लङ्घने । शक्तिः स्याद्वैनतेयस्य तव वा मारुतस्य वा ॥ ९ ॥

कार्यं वा । पुनर्देव्याऽहमुक्त इत्यन्वयः । ससम्भ्रमः गमनत्वरान्वित इत्यर्थः ॥ १ ॥ २ ॥ शोकविपाकस्य शोकवृद्धेरित्यर्थः ॥ ३–९ ॥ रामानु०–प्राणानामपि सन्देहो मम स्यान्नात्र संशयः इत्यतः परं तवादर्शनजः शोक इति श्लोकः । अतः परम् अयं च वीर सन्देह इति श्लोकः । केषुचित्कोशेष्वेतच्छ्लोकद्वयं प्रमादात्पतितम् ॥ ९–७ ॥

मानम्, समुद्रतरणायेति शेषः ॥ ३३–३८ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायां सप्तषष्टितमः सर्गः ॥ ६७ ॥

अथेति । हे नरव्याघ्र ! तव स्नेहात, मयीति शेषः । सौहार्दात सुहृद्भावात, आप्तत्वादिति यावत । अनुमान्य सम्मान्य च । उत्तरं ततः परम् उत्तरं कार्यं वा पुनः पुनर्देव्या ससम्भ्रमः गमनत्वरान्वितः अहम् उक्त इत्यन्वयः ॥ १ ॥ किमुक्तम् ? तदाह–एवमित्यादि ॥ २ ॥ यदीत्यादि श्लोकद्वयमेकं वाक्यम् । हे वीर ! यदि वा मन्यसे एकाहं वस । तावता किमायातम् ? अत आह कस्मिंश्चिदिति । अरिन्दम! कस्मिंश्चित्संवृते देशे विश्रान्तः श्वो गमिष्यसि चेत् तव सान्निध्यादल्पभाग्यायाः मम अस्य महतः शोकविपाकस्य शोकरूपस्य पापपरिणामस्य फलस्येत्यर्थः । मुहूर्तं मोक्षणं स्यादिति योजना ॥ ३ ॥ ४ ॥ पुनरागमनाय प्रतीक्षमाणाया मम

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कार्यनिर्योगे कार्यगतौ । दुरतिक्रमे दुर्निवहे ॥ १०--२२ ॥ तदलमिति । मन्युः दैन्यम् । " मन्युर्दैन्ये क्रतौ क्रुधि " इत्यमरः ॥ २३--२८ ॥

तदस्मिन् कार्यनिर्योगे वीरैवं दुरतिक्रमे । किं पश्यसि समाधानं ब्रूहि कार्यविदां वर ॥ १० ॥ काममस्य त्वमेवैकः कार्यस्य परिसाधने । पर्याप्तः परवीरघ्न यशस्यस्ते बलोदयः ॥ ११ ॥ बलैः समग्रैर्यदि मां हत्वा रावणमाहवे । विजयी स्वां पुरीं रामो नयेत्तत् स्याद्यशस्करम् ॥ १२ ॥ यथाऽहं तस्य वीरस्य वनादुपधिना हृता । रक्षसा तद्वधा देव तथा नार्हति राघवः ॥ १३ ॥ बलैस्तु सङ्कुलां कृत्वा लङ्कां परबलार्दनः । मां नयेद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत् ॥ १४ ॥ तद्यथा तस्य विक्रान्तमनुरूपं महात्मनः । भवत्याहवशूरस्य तथा त्वमुपपादय ॥ १५ ॥ तदर्थोपहितं वाक्यं प्रश्रितं हेतुसंहितम् । निशम्याहं ततः शेषं वाक्यमुत्तरमब्रुवम् ॥ १६ ॥ देवि हर्यृक्षसैन्यानामीश्वरः प्लवतां वरः । सुग्रीवः सत्त्वसम्पन्नस्तवार्थे कृतनिश्चयः ॥ १७ ॥ तस्य विक्रमसम्पन्नाः सत्त्ववन्तो महाबलाः । मनस्सङ्कल्पसम्पाता निदेशे हरयः स्थिताः ॥ १८ ॥ येषां नोपरि नाधस्तान्न तिर्यक् सज्जते गतिः । न च कर्मसु सीदन्ति महत्स्वमिततेजसः ॥ १९ ॥ असकृत्तैर्महाभागैर्वानरैर्बलदर्पितैः । प्रदक्षिणीकृता भूमिर्वायुमार्गानुसारिभिः ॥ २० ॥ मद्विशिष्टाश्च तुल्याश्च सन्ति तत्र वनौकसः । मत्तः प्रत्यवरः कश्चित्नास्ति सुग्रीवसन्निधौ ॥ २१ ॥ अहं तावदिह प्राप्तः किं पुनस्ते महाबलाः । न हि प्रकृष्टाः प्रेष्यन्ते प्रेष्यन्ते हीतरे जनाः ॥ २२ ॥ तदलं परितापेन देवि मन्युर्व्यपैतु ते । एकोत्पातेन वै लङ्कामेष्यन्ति हरियूथपाः ॥ २३ ॥ मम पृष्ठगतौ तौ च चन्द्रसूर्याविवोदितौ । त्वत्सकाशं महाभागे नृसिंहावागमिष्यतः ॥ २४ ॥

प्राणानामपि सन्देहः स्यादिति सम्बन्धः ॥ ५--१० ॥ यद्यपि त्वमेव पर्याप्तः, सकलराक्षसवधपूर्वं मन्मोचन इति शेषः । तथापि ईदृशो बलोदयस्तवैव यशस्यः यशो वर्धकः स्यात् ॥ ११ ॥ यदि तु रामो रावणं हत्वा मां नयेत् तदा तन्नयनं तस्य यशस्करं स्यात् ॥ १२--२२ ॥ तदलमिति । मन्युः दैन्यम् ॥ २३--२८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तव शोकेनापि 'नैव दंशान्' इत्यादिमदुक्त्या श्रुतेन । तदा मम पुरस्तादभिपीडिता । अदीनभाषिणा मया । शिवाभिः इष्टाभिः वाग्भिः अभिप्रसादिता

अरिघ्नं सिंहसङ्काशं क्षिप्रं द्रक्ष्यसि राघवम् । लक्ष्मणं च धनुष्पाणिं लङ्काद्वारमुपस्थितम् ॥ २५ ॥ नखदंष्ट्रायुधान् वीरान् सिंहशार्दूलविक्रमान् । वानरान् वारणेन्द्राभान् क्षिप्रं द्रक्ष्यसि सङ्गतान् ॥२६॥ शैलाम्बुदनिकाशानां लङ्का मलयसानुषु । नर्दतां कपिमुख्यानामचिराच्छ्रोष्यसि स्वनम् ॥ २७ ॥ निवृत्तवनवासं च त्वया सार्धमरिन्दमम् । अभिषिक्तमयोध्यायां क्षिप्रं द्रक्ष्यसि राघवम् ॥ २८ ॥ ततो मया वाग्भिरदीनभाषिणा शिवाभिरिष्टाभिरभिप्रसादिता । जगाम शान्तिं मम मैथिलात्मजा तवापि शोकेन तदाऽभिपीडिता ॥ २९ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये चतुर्विंशत्सहस्रिकायां संहितायां श्रीमत्सुन्दरकाण्डे अष्टषष्टितमः सर्गः ॥६८॥ सुन्दरकाण्डः समाप्तः ॥

शान्तिं दुःखनिवृत्तिं जगाम॥२९॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टषष्टितमः सर्गः ॥६८॥


इत्थं कौशिकवंशमौक्तिकमणिर्गोविन्दराजाभिधो वात्स्यश्रीशठकोपदेशिकपदद्वन्द्वैकसेवारतः ।
पूर्वाचार्यकृता विलोक्य विविधा व्याख्या मुहुर्जानकीकान्तस्याप्रतिमाङ्गयैव तिलकं सौन्दर्यकाण्डे व्यधात् ॥ १ ॥

तत इति । तव शोकेनापि 'नैव दंशान्' इत्यादिपूर्वमुक्तया मदुक्त्या श्रुतेन त्वच्छोकेनापि मम पुरस्तदाऽभिपीडिता । अदीनभाषिणा मया शिवाभिरिष्टाभिः वाग्भिरभिप्रसादिता शान्तिं दुःखनिवृत्तिं जगामेति योजना ॥ २९ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीनारायणतीर्थशिष्यश्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां सुन्दरकाण्डव्याख्यायाम् अष्टषष्टितमः सर्गः ॥ ६८ ॥

महेशतीर्थरचिता रामपादसमर्पिता । व्याख्या सुन्दरकाण्डस्य समाप्ता तत्त्वदीपिका ॥
श्रीमत्सुन्दरकाण्डपठनश्रवणयोः फलम् । ब्रह्माण्डपुराणे सप्तचत्वारिंशदुत्तरशततमे अध्याये—
काण्डस्य सुन्दराख्यस्य श्रवणात्पठनादपि । मां प्राप्नुयाज्जगद्धेतुं नात्र सन्देह इष्यते ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

For Private And Personal